सातङ्काः सपदि शशङ्किरे ऽधिलङ्कं
दुःस्वप्नैरपशकुनैश्च दुर्निमित्तैः ।
उत्पातान् मुहुरवलोक्य भीतिमन्तः
सन्तापं मनसि दधुः समस्तदैत्याः ।। २५ ।।

अत्रासौ सह मुनिभिः सहस्रशीर्ष
पुत्रेष्टौ पुरुषमयष्ट यायजूकः ।
इन्धाने दमुनसि कोऽपि तालदघ्न-
स्तेजस्वी पुरुषवरः क्षणादुदस्थात् ।। २६ ।।

मौवर्णीमथ परमान्नपूर्णपात्री-
मादायार्पिपदृषिहस्तयोः प्रसन्नः ।
राज्ञीभ्यो विभज मुने चरुं तिसृभ्य-
स्ताः प्राश्नन्त्विति निगदन् पुरस्तिरोधात् ।। २७ ।।

साश्चर्यं क्षितिपमतेन ताश्च तिस्रः
प्राशुस्तं चरुमृषिणार्पितं चतुर्धा ।
संक्रान्तं हरिमहसा हविर्दधाना
गर्भिण्योऽजनिषत निर्भरालसाङ्ग्यः ।। २८ ।।

इष्टचन्ते मुनिनृपबन्धुतां विसृज्य
स्वीयान्तःपुररमणीविहारलोलः ।
तासामप्यभिलषितान् दिशन् पदार्थात्
राज्ञीनामपि चकमे प्रसूतिकालम् ।। २९ ।।

कौसल्या दितिजरिपु सुषाव पुत्रं
कैकेयी तदनु सुदर्शनं कुमारम् ।
शषांशं समजनयत् तदा सुमित्रा
शङ्खांशं यमलतया च तावभूताम ।। ३० ।।

शय्यानां चतसृषु दिक्षु रत्नदीपान्
कोणेषु ग्रहबलिपुष्पगन्धधूपान् ।
द्वारि द्वार्यपि जलनिम्बपत्रयुक्तान्
रक्षार्थं न्यदधत रत्नपूर्णकुम्भान् ।। ३१ ।।

कौसल्यासुतमकरोत् पिताथ रामं
कैकेय्या भरतमुदैरयत् तनूजम् ।
सौमित्रि समधित लक्ष्मणेति नाम्ना
शत्रुघ्नं तदनु चतुर्थमाजुहाव ।। ३२ ।।

कल्पे यः समभवदब्जपत्र एकः
स्वल्पऽपि स्वपिति वटच्छदे य एकः ।
तल्पेऽसौ सुखमशयिष्ट शेषशायी
रामात्मा रघुकुलरत्नदीप एकः ।। ३३ ।।

क्षुध्यन्तो न रुरुदुराशिता निदद्रु-
र्निद्रायामपि परमात्मयोगयुक्ताः ।
बालास्ते बलिदमनस्य तेजसोंशा-
स्तेजोभिः प्रतिदिनमार्द्धवन्नवीनाः ।। ३४ ।।

उत्तानाः कृतनवगन्धतैलसेकाः
पाकास्ते दशरथपूर्वपुण्यपाकाः ।
धात्रीणां स्तनमधुराद्युतन् स्वभासा
मातॄणां मुखमवलोक्य मन्दहासाः ।। ३५ ।।

धात्रेयीकरमृदुलाङ्गुलीर्दधानाः
सौधाग्रस्फटिकतटेषु चार्यमाणाः ।
स्वं देहं प्रतिफलितं निरीक्षमाणाः
संदेहं दधुरितरेषु बालकेषु ।। ३६ ।।

आ बाल्यादभजत लक्ष्मणोऽपि रामं
शत्रुघ्नो भरतमभक्त रामभक्तम् ।
तद् द्वन्द्वद्वयमभवत् सदैव पित्रो-
रानन्दद्वयमिव नेत्रयोर्द्विरूपम् ।। ३७ ।।

चत्वारो नृपतनयाश्चतुर्दिगन्तं
प्रख्याताः प्रववृधिरे गुरूपनीताः ।
विद्वांसो विविदुरशेषवेदराशी-
नाशीर्भिर्मुनिवरगीर्भिरात्तपोषाः ।। ३८ ।।

अप्रैषुः पितरमतिप्रियानुलापै-
रह्लैषुः स्वगुणनुतौ पुरः सखीनाम् ।
अश्रौषुः प्रियहितभाषितानि पित्रो-
र्व्यस्मार्षन् न गुरुगिरो हितोपदिष्टाः ।। ३९ ।।

कौपीनान्यवसत कज्जलाञ्चिताक्षा
माञ्जिष्ठान्यधिगतमन्त्रशास्त्रसाराः ।
चत्वारश्चलदलदण्डधारिणस्ते
वर्णित्वं विधिवदधुश्च पञ्चचूडाः ।। ४० ।।

अभ्यास्थन् धनुषि चलाचलाशुवेधं
लेखन्या फलकतलेषु चित्रविद्याः ।
साहित्ये मधुरविचित्रविस्तराढ्यं
सङ्गीते चटुलचतुर्विधं च वाद्यम् ।। ४१ ।।

अन्विष्यन् क्वचिदनुरूपराजकन्या-
स्तत्पाणिग्रहणमहोत्सवं विधित्सुः ।
औत्सुक्यं मनसि दधत्पिवन्कुमारा-
नक्षिभ्यामनयदनेहसं जनेशः ।। ४२ ।।

अध्यात्मप्रणिहितमानसो महात्मा
रामोऽयं न परिणयं न राज्यमैषीत् ।
वैराग्यं वयसि नवे च मन्दधानो
वासिष्ठैर्हितवचनैरबोधि सर्वम् ।। ४३ ।।

आस्थानं भजति धरापतौ कदाचित्
प्रत्यूषे भगवति भानुमत्युदीते ।
अभ्यागान्मुनिरथ गाधिराजसूनुः
सभ्यैरभ्यगमदमुं स चाजसूनुः ।। ४४ ।।

अर्घ्याद्यैरवनिपतिः सुखासनः स-
न्नर्चित्वा कुशिकसुतं कुशासनस्थम् ।
रामादीनथ चतुरोऽपि तान् कुमारा-
नस्याङ्घ्रिप्रणमनपावनानकार्षीत् ।। ४५ ।।

अङ्के तं रघुतिलकं समस्तविद्या-
संकेतस्थलमधिरोप्य रोमहर्षी ।
आलिङ्गन्नधित तदङ्गसङ्गसौख्यं
यद् ब्रह्मामृतरसिकाश्च नो लभन्ते ।। ४६ ।।

प्रत्यक्षं परममहः परस्य पुंसः
पश्यन्तो नयनपथामृतं मुनीन्द्राः ।
रामाख्यं हृदि परवस्तु नित्यमस्तु
ध्यातॄणां न इति चकाङ्क्षुरन्वराङ्क्षुः ।। ४७ ।।

बद्धाञ्जल्यथ नृपतिर्मुनिं बभाषे
गाधेयं मयि भगवन् कुरु प्रमादम् ।
धन्योऽस्मि त्वदुपगमावलोकनाभ्यां
किं कार्यं वद करवाणि किङ्करस्ते ।। ४८ ।।

गायत्रीं यदलभथाः पुरा विरिञ्चे-
र्ब्राह्मण्यं यदभजथास्तपोबलेन ।
अस्राक्षीः पुनरपि यज्जगन्महिम्ना
किं वर्ण्यो निरवधिकस्तवानुभावः ।। ४९ ।।

दिव्यास्त्राण्यनघकृशाश्वतोऽध्यगीष्ठा-
स्तेन त्वं दिवि भुवि दिक्षु कीर्तिमाप्नोः ।
निशङ्कं स्थिरमकृथास्त्रिशङ्कुराज्यं
मातङ्का त्वयि कुपिते तदा त्रिलोकी ।। ५० ।।

सामर्थ्यं तव विदितं समस्तलोके
नालोके मदिह तवार्य कार्यलेशम् ।
अप्येवं मनसि ममास्ति कापि काङ्क्षा
नाभाङ्क्षां क्वचिदपि कांचिदर्थियाच्ञाम् ।। ५१ ।।

इत्युक्त्वा विरतवति क्षमाधिनाथे
गाधेयो मुनिरवदद् रघून् प्रशस्य ।
रक्षोभ्यो दशरथ रक्षतान्मखं मे
रामोऽयं रजनिचरान्तकः कुमारः ।। ५२ ।।

मारीचश्चरति वनेषु मानुषादो
वैरी च त्रिदिवसदां सुबाहुयुक्तः ।
तन्माता वनभुवि ताटकाभिधाना
पञ्चत्वं कलयतु पञ्चतालदघ्नी ।। ५३ ।।

रामस्ते शिशुरविता पितेतरेषां
मा भैषीः कथमसुरान् हनिष्यतीति ।
माहात्म्यं तव तनयस्य मादृशानां
वाचानामपि मनसामगोचरः स्यात् ।। ५४ ।।

जानाते तदपि वसिष्ठवामदेवौ
पृच्छेमौ पुरुषवरस्य पूर्ववृत्तम् ।
संमत्या शुचिमनसोः पुरोधसोस्ते
यच्छेमं सवमवितुं सहानुजेन ।। ५५ ।।

तच्छ्रुत्वा क्षणमिव मूर्छितश्चितित्वा
दृष्ट्वा तं कुशिकसुतं कृशाश्वशिष्यम् ।
रामं च प्रियसुतमर्भकं स सम्राट्
व्यम्राक्षीन्मनसि महाभयं प्रविष्टः ।। ५६ ।।

पातुं वा परिभवितुं क्षमो य एक-
स्त्रैलोक्यं मुनितिलकस्त्रिकालदर्शी ।
कुप्येद्वा सकलजगन्ति दग्धुमीष्टे
शप्येद्वा यदि मम कुत्सितं कुलं स्यात् ।। ५७ ।।

बालोऽयं कथमपि मे चिराय जातः
सन्ताने तुरिपयसीव पारिजातः ।
सुत्राम्णे तमिव हरिः प्रदाय चास्मै
दायादं कथमिव धारयामि देहम् ।। ५८ ।।

रक्षोभ्यः शिशुमुपदाय रामचन्द्रं
निद्रायां कथमशनं कथं नु वाद्याम् ।
अद्यासौ सुतवधखिन्नवृद्धशापः
प्रापद्वा सुतविरहो यदाजिहीते ।। ५९ ।।

अन्तर्वानजनि यदैष दारवर्गः
प्रागाख्यत् परिषदि नारदस्तदा मे ।
भेतारो न तव सुता महासुरेभ्यो
भेष्यन्ति स्वयमसुरा भवत्सुतेभ्यः ।। ६० ।।

सिद्धानां गुरुतपसां गिरो न मोघाः
शापानुग्रहपटुरेष कौशिकोऽपि ।
मीमांसे किमनुमिनोमि किं किमूहे-
व्यामोहैरलमृषये दिशामि वत्सम् ।। ६१ ।।

इति मनसि विमृश्य सप्रकाशं
सदसि बभाण वसिष्ठवामदेवौ ।
कथयतमिह किं करोमि कार्ये-
ष्वहितहितेषु युवां हि नः प्रमाणम् ।। ६२ ।।

शिशुरयमरयश्च यातुधानाः
कुशिकसुतो मुनिरेष दुर्विलङ्घः ।
वियति विततभासि रामचन्द्रे
नलिनरुचि नयनानि बिभ्रते नः ।। ६३ ।।

रामलक्ष्मणमहामणिदीपभ्राजितानि भवनान्यखिलानि ।
तद्वियोगविधुराणि समन्ताद् ध्वान्तभाञ्जि न विभान्ति पुरा मे ।। ६४ ।।

तन्निशम्य वचनं जनभर्तुः सन्निधौ मनुजदेवमुनीनाम् ।
ऐकमत्यमधिगम्य रहस्तौ याजकौ जगदतुः कुशहस्तौ ।। ६५ ।।

गच्छतामवितुमध्वरमेतौ यच्छ तात तनयौ मुनये ते ।
किं भयं कुशिकसंभवतेजोवज्रपञ्जरगते त्वदपत्ये ।। ।। ६६ ।।

राम एव तव यज्ञपूरुषः पौरुषेण मुनियज्ञरक्षणम् ।
बाल्य एव विदधातु पालको बालकोऽपि हरते रविस्तमः ।। ६७ ।।

इत्यमोघवचसोः पुरोधसोर्ज्ञानसिन्धुनिरपायरोधसोः ।
वेधसोऽपि सुधियोः सुमेधसोर्वाक्यमादृत वसुन्धराधिपः ।। ६८ ।।

ततः कुमारावपि रामलक्ष्मणौ पितुर्गिरान्तःपुरमभ्यपप्तताम् ।
प्रणम्य मातृरपिनह्य वर्मणी निषङ्गकोदण्डधरौ निरीयतुः ।। ६९ ।।

आगतः पितरमाशु ववन्दे राघवः परिषदाभिननन्दे ।
विस्मयोऽजनि महान् मुनिबृन्दे नागरैर्नरपतिश्च निनिन्दे ।। ७० ।।

राघवो जनयितारमनंसीद् राघवं जनयिता तमशंसीत् ।
तं जनो जनपतिं च जगर्हे कर्मणि प्रयतमानमनर्हे ।। ७१ ।।

करेण धृत्वा कमलायताक्षौ रक्ष्यौ शिशू इत्यवसन्नकण्ठः ।
साश्रुर्मुनीन्द्राय ददौ नरेन्द्रः शुश्रूषणाय श्रुततत्प्रभावः ।। ७२ ।।

अङ्कद्वयं तावधिरोप्य हृष्टो
दृष्ट्वा नृपं गद्गदकण्ठमग्रे ।
प्रियंकरिष्णुः पलितंभविष्णु-
माश्वासयत् पुत्रवियोगदीनम् ।। ७३ ।।

परिदेवनेन नरदेव नेदृशा
हृदयं विदाहय वृथैव मा तमः ।
न तमः कदापि पिदधाति भास्करं
न तिरस्करोत्यरिगणस्तवात्मजौ ।। ७४ ।।

राघवौ मदुपदिष्टमहास्त्रौ
राक्षसाः किमु रणेषु विदध्युः ।
अग्निमुज्ज्वलितमर्कमुदर्कं
किं नु कर्तुमुपयन्त्युपदीपाः ।। ७५ ।।

मा भैषीर्मनसि महीश मा चिचिन्तः
सन्तानस्त्रिभुवनरक्षकस्तवायम् ।
वायव्याद्यखिलमहास्त्रचुञ्चुरस्मै
रामाय स्थित युधि कोऽपि माततायी ।। ७६ ।।

इत्युक्त्वा मुनिरवलम्ब्य कौशिकस्तौ
हस्ताभ्यां सरभसमासनादुदस्थात् ।
आद्वारं नरपतिरन्वितः कुमारा-
वालिङ्ग्य न्यवृतदुदश्रुराप्तवर्गैः ।। ७७ ।।

प्रत्यावृत्तः पार्थिवः प्रार्थितार्थी
कौसल्यायाः प्राप कल्याणसौधम् ।
पर्यङ्कस्थः पर्यदेविष्ट कष्टं
क्व स्थो हा हा राम हा लक्ष्मणेति ।। ७८ ।।

विश्वामित्रं राजपुत्रानुयातं
वीक्ष्यानेके पण्यवीथीषु पौराः ।
गर्हं गर्हं रामचन्द्रावलोका-
दासॅल्लोकाः स्फारचक्षुश्चकोराः ।। ७९ ।।

पुञ्जिताश्च पुरवीथिषु पौरा
रञ्जिताश्च तदुदारगुणौघैः ।
अञ्जनाक्तनयनाञ्चितकर्णं
तं जना ददृशुरञ्जनवर्णम् ।। ८० ।।

राम एष रमणीयगुणाढ्यो
लक्ष्मणाढ्य इह लक्ष्मणनामा ।
ताविमौ नृपतिरेष विमोक्तुं
नार्हतीति जनता विजगर्हे ।। ८१ ।।

कन्दमूलफलमत्ति कथं वा
कन्दरासु कथमम्बु पिबेद्वा ।
स्थण्डिले भुवि शयीत कथं वा
मण्डलेशशिशुरित्यनुशिश्ये ।। ८२ ।।

विग्रहाय विबुधारिभिः समं
निग्रहाय मुनियज्ञघातिनाम् ।
प्रेषितो नृपतिना कथं शिशु-
र्योषितः किमिति न न्यषेधिषुः ।। ८३ ।।

इत्यगादिषुरगाधमहिम्ने
गाधिजाय मुनये शपमानाः ।
रामलक्ष्मणगुणानववर्णन्
नागरा नृपममन्दमनिन्दन् ।। ८४ ।।

पुरजनगिरः श्रावं श्रावं पुराणमुनीश्वरः
क्षितिपतिसुतावादायोभौ शिखण्डकधारिणौ ।
रघुनगरतो निर्गत्यादात् पयस्यथ सारवे
श्रमभयनुदौ विद्ये हृद्ये बलातिबले तयोः ।। ८५ ।।

बलया तयातिबलया कलया
सबलावुभौ किमपि नाश्रमताम् ।
पदचारिणौ च पथि नाक्लमतां
पवनेन किंचिदपि नातमताम् ।। ८६ ।।

नाखिन्दातामेतयोः पादयुग्मे
नाल्गासिष्टामानने काननेऽपि ।
नाबाधेतामध्वनि क्षुत्पिपासे
नालस्यं वा मानसे व्यानशे च ।। ८७ ।।

अथ ताटकया खिलीकृता-
मटवीं प्राप्य च रामलक्ष्मणौ ।
अधिरोप्य च धन्वनी दिशो
वधिराश्चक्रतुरारवैर्ज्ययोः ।। ८८ ।।

ज्यानादमाकर्ण्य नरेन्द्रसून्वो-
रानादयन्ती वनमट्टहासैः ।
आविर्बभूवाध्वनि ताटकाख्या
मारीचमाता दुहिता सुकेतोः ।। ८९ ।।

कङ्कालमैभं दधती करेण
खं कालरात्रिप्रतिमाश्नुवाना ।
तं कालिकेवाभ्यपतत्कुमारं
शङ्काकरी चेतसि तापसानाम् ।। ९० ।।

जहि जहि राम वत्स लघु ताडय ताडय तात ताटकां
रघुनरपालनन्दन कृपालय पालय पालयेह नः ।
इति गुरुमुक्तवन्तमभिवाद्य घृणामपहाय स क्षणाद्
उरसि निखाय बाणमतिगाढमपातयदुग्रराक्षसीम् ।। ९१ ।।

रघुपतिशरघातनिर्घातनिर्घोषनिर्घट्टिता
भयचकितकुरङ्गमारङ्गमातङ्गसंघाकुला ।
पतति दलितवक्षसि क्रूररक्षस्यधिक्षेपण-
ध्वनिजडितदिशानिलिम्पेशकम्पे चकम्पे च भूः ।। ९२ ।।

अनिमिषवृन्दममन्दरवं दिवि दुन्दुभिमुद्धतमध्वनयन्
निरमुचदिन्दुमतीसुतनन्दनमूर्धनि नन्दनपुष्पततीः ।
जय जय राम गुणैरभिराम विरोधिविराम निरामयतां
भज रघुपालक बालक जीव जयेति तमन्वनयन्मुनयः ।। ९३ ।।

ततस्ताटकायामरण्ये हतायां
शरण्यस्य रामस्य सर्वे मुनीन्द्राः ।
कृताशीःसहस्रा उदस्राम्बुपूरै-
र्व्यधुः सर्वलोकैकवीराभिषेकम् ।। ९४ ।।

साकेतवीथिषु शिशुः शिशुरित्युदीर्णः
सौकेतवीमभिनिहत्य स रामभद्रः ।
देवैरपूजि सुमनःप्रकरेण भूमि-
देवैरभाजि भुवनत्रयरक्षितेति ।। ९५ ।।

त्राता य एको जगताममुष्मै
स्नाताय नद्यां मुनिरस्त्रविद्याम् ।
प्रादत्त रामाय सलक्ष्मणाय
प्रत्यक्षमैक्षिष्ट स जृम्भकानि ।। ९६ ।।

सरहस्यजृम्भककलाप-
भरभरितरामलक्ष्मणः ।
कामवनमुपजगाम शनैर्
अपि तत्र रात्रिमृषिरत्यवाहयत् ।। ९७ ।।

सिद्धाश्रमं प्राप्य ततः प्रभाते
सिद्धाः श्रमं तत्यजुरध्वजातम् ।
न कौशिकस्य श्रम ईषदासीत्
कुमारयानात् कृतकार्यसिद्धेः ।। ९८ ।।

संवभ्रिरे यज्ञियसाधनानि
सम्भारजातानि दशायुधानि ।
कृत्वा महर्त्विग्वरणं मुनीन्द्रः
पुण्येऽह्नि यज्ञक्रतवे दिदीक्षे ।। ९९ ।।

रक्षार्थमादिश्य रघुप्रवीरौ
मौनी स मेने मखमप्यविघ्नम् ।
सव्यापसव्यक्रममप्रमत्तौ
तौ भ्रेमतुर्द्वावधियज्ञवाटम् ।। १०० ।।

प्रवृत्ते ततः सप्ततन्तौ समन्ता-
दसृग्वृष्टिमुत्सृष्टवन्तः पलाशाः ।
सुबाहुं पुरस्कृत्य मारीचमुख्याः
क्षुरप्रातिदीप्रा निशि प्रादुरासन् ।। १०१ ।।

वसारुधिरवर्षिभिर्भृशममर्षिभिर्भीषणे-
रधर्षि रजनीचरैर्यजनवाटवर्ती जनः ।
जुहूमुपभृत ध्रुवां स्रुचमपि स्रुवं च त्यजन्
न्यलीयत पलायत त्रुटितवर्गमृत्विग्गणः ।। १०२ ।।

वायव्यास्त्रेण सान्दि रघुपतिरधुनोदम्बुधावम्बुदाभः
प्रोद्यद्बाहुं सुबाहुं सह रजनिचरैरक्षिणोल्लक्ष्मणोऽपि ।
आकाशात् पुष्पवृष्टिं मुमुचुरनिमिषास्तुष्टुवुः कृष्टिवर्गाः
संपूर्णे सप्ततन्तावविहतहविषि प्राप हर्षं महर्षिः ।। १०३ ।।

इति उदारराघवे महाकाव्ये विश्वामित्राश्रमगमनं
नाम द्वितीयः सर्गः ।। २ ।।

तृतीयः सर्गः ।

अथ मैथिलस्य नगरी स गरीया-
नभिगन्तुमैहत समाहितचेताः ।
ऋषिरह्नि पुष्ययुजि शिष्यसमेतः
सवदर्शनाय सह दाशरथिभ्याम् ।। १ ।।

विधृतत्रिदण्डविधिसूत्रशिखण्डै-
र्मुनिमण्डलैश्च सकमण्डलुपीठैः ।
अधिमस्तकं निहितपुस्तकभारै-
र्वटुभिश्च तीव्रपटुभिः परिवव्रे ।। २ ।।

समभाण्डयन्त गृहिणः सकुटुम्बा
वनचारिणोऽपि समचीवरयन्त ।
भसितत्रिपुण्ड्रनिटिला जटिलौघाः
समगंसतोर्ध्वतिलकाश्च तथान्ये ।। ३ ।।

करवीरताम्रमुनिचीरमजिघ्र-
न्नलिहन् करेषु च कुशान् मृगशावाः ।
उपलोचनानि मदवन्त्यपुफुल्ल-
न्नुदपुच्छयन्त गृहजीर्णकुरङ्गाः ।। ४ ।।

निलयान्निरीयुषि मुनौ मुनिबृन्दै-
र्निरगुः प्रसह्य कपिगृह्यकयूथाः ।
क्रतुमन्त्रतन्त्रविनियोगविधिज्ञा
विरहासहाश्च निरहासत कीराः ।। ५ ।।

अभितस्तमेत्य शुभसूचकदक्षाः
प्रददक्षिरे च मृगपक्षिसमूहाः ।
शुभलक्षणान्यपि परीक्ष्य कुमारा-
वभिवीक्ष्य चेतसि जहर्ष महर्षिः ।। ६ ।।

स निशम्य दाशरथिदक्षिणबाह्वोः
स्फुरणं निजाक्षिचलनं च विभाव्य ।
गमनं शुभोत्तरमियाद् रघुनाथो
निमिनाथबान्धवमिहेति ननाथे ।। ७ ।।

परमेऽपि पुंसि न रमेत तथामौ
गुणरत्नधामनि यथा रघुसिंहे ।
मुनयोऽपि वीक्ष्य विनयोत्तरमग्रे
पथि रामचन्द्रमभिराममनन्दन् ।। ८ ।।

अदवीयसीं च पदवीं कियतीं चिद्
व्यतिलङ्घ्य सैकतमृदुस्थलसीमाम् ।
विहरद्विहङ्गमभुजङ्गमसंघा-
मटवीमगाहत स गाधितनूजः ।। ९ ।।

घनगण्डशैलनिभगण्डकयूथां
हरिपुण्डरीकरसचण्डिमघोराम् ।
तरुखण्डहिण्डिततमालतमिस्रां
तटिनीतटोन्नततिरीटसहस्राम् ।। १० ।।

कपिझम्पितक्रमणकम्पितशाखां
चलदच्छभल्लहतपल्लववल्लीम् ।
वटझाटझाटलरटत्पटुझिल्ली-
गणझींकृतारभटिभीषितभिल्लीम् ।। ११ ।।

कलभेभसिंहशरभैणवराह-
ग्रहणाय वागुरिकक्लृप्तकुटीराम् ।
करिपोतदन्तकिरिपोत्रखनित्र-
क्षतवामलूरधुतधूमलधूलिम् ।। १२ ।।

अभितो वनं तदवलोक्य दुरन्तं
पथि मोद्विजिष्ट सकलो द्विजलोकः ।
इति राघवौ धनुषि लाघववन्तौ
समनाहयत् स सुमनां मुनिनाथः ।। १३ ।।

रघुनन्दनौ च गुरुवन्दननम्रौ
गुणिनी विधाय धनुषी धृतवन्तौ ।
अनुवेलमध्वनि गुणध्वनिभिस्तौ
मुनिमण्डलाय च मुदं विदधाते ।। २४ ।।

ग्रहमण्डलेषु शरदीव विवस्वा-
नुडुमण्डलेष्विव कलानिधिरिन्दुः ।
मरुतां गणेष्विव विरिञ्चिरटव्या-
मरुचत्तपोनिधिषु गाधितनूजः ।। १५ ।।

वनराजिभाजि मुनिराजि मुनीना-
मधिकप्रकाशिनि गणः प्रचकाशे ।
महनीयतेजसि मयूखसहस्रै-
रुदिते यथार्यमणि सूर्यमणीनाम् ।। १६ ।।

वनसिन्धुमग्नमदसिन्धुरदान-
द्रवगन्धवन्धुरितमन्थरयानः ।
घनगन्धसारघनसारविलङ्घी
मुनिलोकमुख्यमनिलो निषिषेवे ।। १७ ।।

मकरन्दलुब्धमरविन्दवनानि
व्यतिलङ्घ्य मन्दमलिवृन्दमुपेत्य ।
पथि मञ्जु मञ्जु वनवञ्जुलवीरु-
न्नवमञ्जरीललितपुञ्जमगुञ्जीत् ।। १८ ।।

सशिखण्डकौ विधृतपिप्पलदण्डौ
वरवर्णिनौ कुवलचम्पकवर्णौ ।
दवदर्शिनौ दशरथस्य तनूजौ
मुनिना समंमददृशा ददृशाते ।। १९ ।।

नवमालिकाकुसुमनद्धशिखण्डौ
नवकर्णिकारकृतकर्णवतंसौ ।
पुरतः पुराणपुरुषांशकुमारौ
मधुमाधवाविव शिशू शुशुभाते ।। २० ।।

नवपल्लवाङ्गुलिभिरुल्लसदम्भो-
रुहदृष्टिभिः परिमलोल्लसिताभिः ।
वनदेवतालिभिरुभौ मदभृङ्गी-
विरुतच्छलेन मुहुराजुहुवाते ।। २१ ।।

हरिपुण्डरीककरिगण्डकसंघा-
नचखण्डतामिषुभिरण्डजतुण्डैः ।
परितो वनानि हरितो ध्वनयन्तौ
पुरतो मुनेः स्म चरतो रघुवीरौ ।। २२ ।।

मधुमाधवाविति विचिन्त्य कुमारौ
कलनिःस्वनं चकलिरे कलकण्ठाः ।
गुणशब्दमब्दरव इत्यवयन्तो
नगमण्डलेषु ननृतुः शितिकण्ठाः ।। २३ ।।

मलयानिला दुधुविरे वनवल्ली-
र्वनवल्लयोऽपि चकरुः कुसुमानि ।
कुसुमानि तान्यमदयन्मधुपाली-
र्मधुपालयोऽपि मधुरं पथि रेणुः ।। २४ ।।

रणदस्त्रसंहितशरावपि वीरौ
रतिकेलिलोलहरिणीगणरन्तुः ।
हरिणस्य नूतनकुरङ्गनियन्तुः
पथि तौ दयार्द्रहृदयावदयेताम् ।। २५ ।।

किरिघर्घरध्वनिषु केसरिनादे
करिचीत्कृतेषु खरखड्गविरावे ।
महिषारवे च परुषे पुरुषौ द्वौ
धनुषीश्वरौ मनसि धार्ष्ट्यमधार्ष्टाम् ।। २६ ।।

धनुरारवेण वनराजिमुभन्तौ
न निजघ्नतुः कमपि वन्यमिभं तौ ।
हरिणान् रुरुननवधीनवधिष्टां
शरभीषितांश्च शरभान्निरभैत्ताम् ।। २७ ।।

अथ गौतमायतनमेत्य मुनीन्द्रो
मुनिनामुनार्कसमभाः समभावि ।
भरताग्रजेन चरताग्रजमध्ये
पुपुवे पुरः पदरजोभिरहल्या ।। २८ ।।

उपलायमानमपहाय शरीरं
चपला यथेयमवलाकृतिरग्रे ।
महतां समाजमसमाजररूपा
तरसाभिपत्य शिरसा प्रणनाम ।। २९ ।।

कुत आगतेयमिति विस्मयमाने
कुशिकात्मजे सहमुनौ सकुमारे ।
वृजिनव्यपायविकलङ्कमुखेन्दु-
र्निजगाद साथ निजवृत्तमहल्या ।। ३० ।।

ऋषिवेषदम्भयुजि जम्भविरोधि-
न्यनुरोधिनी यदमुना समगच्छे ।
अधिमत्स मन्तुमसहन्नुपयन्ता
विफलो भवेति मघवानमशाप्सीत् ।। ३१ ।।

उपलात्मिका च चपले वस दुःखं
कलयन्त्यसह्यमिति मह्यमशप्त ।
कृपयाथ रामपदरेणुकणास्त्वां
पुनते पुरेति पुनरप्यवदिष्ट ।। ३२ ।।

मघवन्निमित्तमघवन् मम देहं
मुनिशापदग्धमनिशं भृशदुःखम् ।
कथमप्यवास्थित तदेतदिदानी
रघुनन्दनस्य पदपांसुरपावीत् ।। ३३ ।।

समगंसि यन्मुनिवरेण पुरेव
प्रकृतेन तेन सुकृतेन कुमारः ।
अचिरेण मैथिलसुतां परिणेता
सुचिरं सुखान्यनुभविष्यति रामः ।। ३४ ।।

समरे विजित्य समदानसुरौघा-
नयमर्भकस्तव यदाध्वरमावीत् ।
निमयस्तदैव निरचेषत सीता-
रघुवीरयोः परिणयं मिथिलायाम् ।। ३५ ।।

विदितो विदेहनगरे गुरुबुद्धि-
स्तनयो ममास्ति जनकस्य पुरोधाः ।
स विवाहमस्य घटयिष्यति शीघ्रं
यदयं दधीत धनुरैशमधिज्यम् ।। ३६ ।।

धनुषो धराधरमयस्य गुणः सन्
फणिराज एष विरराज पुराजौ ।
अमुना पुरत्रयमभित्त स धन्वी
हरिणा शरेण हरिणाङ्ककिरीटः ।। ३७ ।।

नय तत्र कौशिक नरेन्द्रकुमारं
सुकुमारमूर्तिमपनीतमदार्तिम् ।
गिरिधन्वधन्वनि वितन्वति बाह्वो-
र्बलमत्र चित्रमिति वक्ष्यति लोकः ।। ३८ ।।

इति वादिनीमृषिकलत्रमहल्या-
मनघेति ते समवदन्त महान्तः ।
स च गौतमो मुनिगिरा गृहिणीं स्वा-
मनुकम्पयानुजगृहे स्वगृहेषु ।। ३९ ।।

पुरभिद्धनुर्महिमनि प्रथमाने
कथमानमेत तदिति व्यथमानम् ।
मुनिमण्डलं समशयिष्ट मुनीन्द्रो
निरचेष्ट रामभुजविक्रमसाक्षी ।। ४० ।।

अथ गाधिराजतनयः सह शिष्यै-
र्जनकाधिराजमखदर्शनकाङ्क्षी ।
चिरविप्रकृष्टगृहिणीस्पृहयित्रा
सह गौतमेन मिथिलाभिमुखोऽभूत् ।। ४१ ।।

नगरोपकण्ठमुपयाति मुनीन्द्रे
समुदस्तदैव समशृण्वत पौराः ।
मणिदण्डकेतुभिरहस्करदीप्तैः
समचस्करत् स नगरीं जनकेन्द्रः ।। ४२ ।।

सहनृत्तगीतबहुवाद्यविशेषैः
सपुरोधसा च सह मन्त्रिगणेन ।
हृदयालुनाभ्यगमि तेन दयालुः
स्पृहयालुना मुनिरनुग्रहयालुः ।। ४३ ।।

स्वपुरोधसा यदुपदिष्टमहल्या-
तनयेन तद्व्यधित सोऽतिथिकृत्यम् ।
पुरमप्यवीविशदृषिं सहशिष्यै-
रितरान् मुनींश्च नितरां बहु मेने ।। ४४ ।।

स मुनिः समं दशरथस्य सुताभ्या-
मभिरामरूपजितकामगुहाभ्याम् ।
प्रविशन् ग्रहप्रतिमशिष्यसमेतो
मिथिलामुपास्कुरुत भास्करतेजाः ।। ४५ ।।

तरसाधिरुह्य पुरगोपुरसौधान्
वरणाट्टहस्तिनखदेवगृहालीः ।
मिथिलाजनोऽपि शिथिलापरकृत्यः
कृतकृत्यभावमनयन्नयनानि ।। ४६ ।।

रघुनन्दनाववलुलोकिषमाणाः
पुरयोषितो विकृतभूषणवेषाः ।
विरराजिरे विपणिषु प्रसरन्त्यो
हसिताः सखीभिरसितायतकेश्यः ।। ४७ ।।

अधिरुह्य सौधशिखराण्यतिदूराद्
वनिता गवाक्षनिहितायतनेत्राः ।
रघुनन्दनं कुशिकनन्दनमूचुः
कुशिकात्मजं दशरथात्मजमूचुः ।। ४८ ।।

पदपद्मयोर्मृगमदं निदधाना
कुचकुम्भयोश्च नवयावकपङ्कम् ।
तिलकं कपोलफलके च दधाना
क्व नु रामभद्र इति काचिदमार्गीत् ।। ४९ ।।

अपहाय रत्नमयमञ्जनपात्रं
करसङ्गतामपि निरस्य शलाकाम् ।
मसृणेन मत्तगजमन्थरयाना
घुसृणेन काचन विलोचनमाञ्जीत् ।। ५० ।।

अविलम्बमम्ब पुनरभ्यनजानी-
त्यभिधाय मातरमपास्य च तैलम् ।
गमनत्वरा गलितकेशकलापा
जघनस्य कापि गरिमाणमगर्हीत् ।। ५१ ।।

जनदृष्टमूरुमनवेक्ष्य नवेक्षा-
कुतुकेन संभ्रमवती सह सख्या ।
गलदम्बरं घननितम्बनिरस्तं
कथमप्यवस्त करिकुम्भकुचान्या ।। ५२ ।।

करयोर्निधाय मणिनूपुरयुग्मं
चरणे च हस्तवलयं कलयन्त्या ।
गलनद्धकाञ्चिलतया कृतयान-
त्वरया कयापि निरयायि निशान्तात् ।। ५३ ।।

शिरसा प्रणम्य कुसुमानि कराभ्यां
विचकार कापि सुकुचा विकचानि ।
स च राजनन्दनमनन्दयदुच्चै-
र्मकरन्दनन्ददलिवृन्दनिनादः ।। ५४ ।।

अवशेन राममवलोकयमाना
विवशा विलोक्य मृगशावकनेत्रा ।
हसितेन मन्दहसितोत्पलनीलं
करसंज्ञयाथ सरसाह्वयदन्या ।। ५५ ।।

इति पौरयौवतविलासविकारा-
नवलोकयन्ननु मुनीन्द्रमयासीत् ।
मनुजेन्द्रसूनुरनुजेन सम तां
धृतबालिमेव मघवा मखवाटम् ।। ५६ ।।

सपदि ध्रुवामुपभृतं च जुहूं च
स्रुचमप्यथ स्रुवमपि व्यपनीय ।
अवलोकितुं रघुवरावभिपेतु-
र्द्विजपुङ्गवा यजनकर्मनियुक्ताः ।। ५७ ।।

कुशविष्टरेषु कुशिकात्मजमुख्या-
नुपवेश्य संसदि यथार्हमथार्हीत् ।
मिथिलेश्वरः पृथुलवक्षसि रामे
सुचिरं व्यधत्त दृशमप्यनिमेषाम् ।। ५८ ।।

कुलमेष कस्य कलयत्यकलङ्कं
सुत एष कस्य वद नाम किमस्य ।
वनवासिभिश्च कथमेष भवद्भिः
समगच्छतेति समपृच्छत राजा ।। ५९ ।।

मनुसन्ततिर्दशरथस्य तनूजो
मम राम एष मखमावदविघ्नम् ।
धनुरैश्वरं च विनमय्य सुतां ते
परिणेष्यतीति स वभाण मुनीन्द्रः ।। ६० ।।

मुनिवाक्यमप्यवितथं कलयन् तं
धृतकाकपक्षमपि राममवेक्ष्य ।
कठिनं धनुः कमठपृष्ठगरिष्ठं
मनसा समीक्ष्य समधिक्षत भूपः ।। ६१ ।।

प्रथमं स विश्वसितनारदवाक्यः
परमं पुमांसमवगम्य च रामम् ।
अनुजन्मना सह कुशध्वजनाम्ना
मुमुदे धृताङ्गपुलको हलकेतुः ।। ६२ ।।

धनुषः प्रसङ्गमनुषङ्गिणमाली-
जनतो निशम्य जनकेन्द्रकुमारी ।
अधिरुह्य सौधमुपरि व्यलुलोकत्
स्ववरं गवाक्षविवराहितनेत्रा ।। ६३ ।।

जलदोदयः किमनुमोदयति त्वा-
मिति जानकी निजसखी समलापीत् ।
तडिदत्र कापि सकला तरलाक्षि
स्फुरतीति सोत्तरमदत्त विदग्धा ।। ६४ ।।

क्व धनुः कठोरमिदमौग्रमुदग्रं
क्व च दोर्युगं रघुशिशोरसमग्रम् ।
अमुना क्रियेत कथमेतदधिज्यं
कुपणोद्यतोऽद्य कृपणोऽजनि तातः ।। ६५ ।।

धनुषोऽधिरोपणपणेन पणेत
क्षितिपो यदीह विघटेत विवाहः ।
अदयं तदस्य हृदयं यदयं मां
रघुवत्सकाय न हि दित्सति तूष्णीम् ।। ६६ ।।

सुरसिद्धकिंपुरुषकिन्नरविद्या-
धरयक्षराक्षसनरेन्द्रकुलेषु ।
तुलितेशचापमपि चापरमस्मा-
न्न वरं वृणीय किमु तात पणेन ।। ६७ ।।

वरणागताय शरणागतरक्षा-
मणये वराय पणबन्धमपास्य ।
यदि मां ददीत मिथिलापतिरस्मै
विधिरानुकूल्यमयते दयते मे ।। ६८ ।।

इति वाचमालिषु मिथोऽनुलपन्ती
रघुराजनन्दनविलोकनलोला ।
स्फुरणाददक्षिणदृशश्चपलायाः
प्रचलाकिनीव हृषितार्जनि सीता ।। ६९ ।।

अथ गाधिसूनुगिरमाद्रियमाणे
मिथिलाजने सदसि विस्मयमाने ।
जनकः स दाशरथिशक्तिपरीक्षी
धनुरानिनाय धरणीशसमाजम् ।। ७० ।।

कमठादुपात्तकठिनाकृति शेषा-
दहितो गृहीतमहितोन्नतिदैर्घ्यम् ।
कुलपर्वताधिकगुरुत्वमहत्त्वं
पृथिवीभृतामिव हसद्भुजसारम् ।। ७१ ।।

उचितं हरस्य रचितं सुरतक्ष्णा
खचितं च लस्तकपदे नवरत्नैः ।
निचितं तडिद्भिरिव तद्धनुरैशं
बहुभिर्बलोद्धतभटैरुपनिन्ये ।। ७२ ।।

पुरभिद्धनुर्धरणभुग्नबलाना-
मथ सिंहानादमकरोन्निकुरुम्बम् ।
बहलोत्सवे हलहलारवकोला-
हलमिश्रितारभटि वीरभटानाम् ।। ७३ ।।

भुजगेन्द्रभूषणभुजप्रणयीदं
गिरिराजदण्डमहिराजदृढज्यम् ।
नलिनाक्ष एष नहुषाजगराभं
नमयेत् कथं न्विति जगाद जनौघः ।। ७४ ।।

अविमुक्तगौरवमनन्तगुणाढ्यं
हरकार्मुकं नमयसीति न युक्तम् ।
यदि शक्तिरस्ति भुजसत्त्वमिह त्वं
प्रथयेति राममवदन्मिथिलेशः ।। ७५ ।।

धनुषः करग्रहणपूर्वकमत्र
क्षितिजाकरग्रहणमाचर वत्स ।
नमयन्निदं शमय संशयमेषां
निरवग्रहो रहसि राममवोचत् ।। ७६ ।।

स तथेति कौशिकनमस्कृतिपूर्व
सहसोत्तरीयपरिवेष्टितमध्यः ।
कवचाभिगुप्तभवचापसमीपं
तडिदन्तिकं जलदपोत इवागात् ।। ७७ ।।

कवचं विकृष्य स विचित्रमथैशं
धनुराननाम रचिताञ्जलि रामः ।
तलघातशब्दितनिकुञ्चितबाहु-
र्निदधे च हस्तमधिलस्तकदेशम् ।। ७८ ।।

धनुरुद्दधार धरणीन्द्रकुमारः
पुलकाञ्चिते नुवति पौरजनौघे ।
कथमत्र शङ्करकराब्जमलासी-
दिति सस्मितं तदचिकीर्षदधिज्यम् ।। ७९ ।।

पृथिवि स्थिरीभव भुजङ्ग वहैनां
तदिदं द्वयं कमठराज दधीथाः ।
दिगिभाश्च धत्त तदपि त्रयमैशं
धनुरादितार्य इति लक्ष्मण ऊचे ।। ८० ।।

अधिजानु धन्व विनिधाय तमज्यं
विदधद् वधूजनदृगुत्पलकीर्णः ।
रघुनन्दनः सपदि नन्दननन्द-
त्सुमनोविसृष्टसुमनोभिरकारि ।। ८१ ।।

जनसंहतौ जय जयेति वदन्त्यां
दिवि साधु साध्विति वदत्सु सुरेषु ।
मनसा समं जनकराजकुमार्या
धनुराचकर्ष रघुराजकुमारः ।। ८२ ।।

दृढवाममुष्टिधृतमस्तकरत्न-
च्छुरिताङ्गुलीयमणिलग्ननखांशुः ।
भुजदण्डमण्डलितधूर्जटिधन्वा
परिवेविषाण इव भानुरभासीत् ।। ८३ ।।

अमुनौपजानुकभुजेन तदैशं
धनुरौपकर्णिकगुणं गुणधाम्ना ।
रभसोच्चलच्चटचटध्वनि बाह्वो-
रतिमात्रकर्षणभरेण वभञ्जे ।। ८४ ।।

भुवमानशे दिवमियाय दिगन्ता-
नललङ्घदब्धिसलिलं विललङ्घे ।
फणिलोकमावृत धुनीरधुनीत
ध्वनिरुद्धतो धनुषि राघवभग्ने ।। ८५ ।।

हठभज्यमानहरकार्मुकनादे
दलयत्यजाण्डकुहरं वहिरन्तः ।
भयकम्पमानफणिराजफणाली-
निलयेन भूमिवलयेन ववल्ले ।। ८६ ।।

चकितस्य संभ्रमगलद्गलरज्जोः
सुरवारणस्य जगले निगडेन ।
अपि तेन दानकुपितेन दिविष्ठाः
करदन्तकोटिभिरमोटिषताट्टाः ।। ८७ ।।

भवधन्वभङ्गरवभङ्गुरचित्ताः
कथमप्यविभ्रत भुवं दिगिभेन्द्राः ।
चकितोत्पतत्तिमितिमिङ्गिलसङ्घैः
कलिलेन सिन्धुसलिलेन वभूवे ।। ८८ ।।

हरिरप्यबुद्ध जलधौ कलधौत-
द्युतिकम्बुराजभरितप्रतिशब्दे ।
मुखरैरहार्यशिखरैरनुसस्रे
गिरिगह्वरैश्च परितः प्रतिनेदे ।। ८९ ।।

प्रसरत्प्रतिध्वनिपतन्मृगयूथं
वलमानशाखिविकचत्प्रचलाकि ।
गिरिजाद्रिगह्वरमुपह्वरयन्ती
भयविह्वला पशुपतिं परिरेभे ।। ९० ।।

इभकुम्भतुल्यकुचकुम्भयुगायाः
परिरम्भमंभ्रमरसेन भवान्याः ।
गिरिशोऽपि चापदलनं वहु मेने
न हि वस्तुहानिमनुशोचति कामी ।। ९१ ।।

धनुषि द्विधा पतति रामविधूते
निनदे च शाम्यति नितान्तकराले ।
भयविस्मयप्रमदविप्रतिसारै-
र्भृशमाकुलोऽजनि विदेहनरेन्द्रः ।। ९२ ।।

विदलय्य धूर्जटिधनुस्त्रपमाणे
मुनिराजकस्तुतिभिरस्मयमाने ।
गुरुवन्दनाय सदसि त्वरमाणे
जनकं च वृद्धमभिवादयमाने ।। ९३ ।।

सुरमुक्तदिव्यकुसुमानि दधाने
जनकात्मजाभिलषितं विदधाने ।
रघुनन्दने विशति तन्मुनिवृन्दं
दिवि दुन्दुभिध्वनिरमन्दमुदैष्ट ।। ९४ ।।

कलमुज्जगे सदसि गायकसंघै-
र्ननृते च नर्तकनटीसमुदायैः ।
उदलासि वैणविकवेणुनिनादै-
रकलन्त वैणिककराहतवीणाः ।। ९५ ।।

अथ मैथिली पुरपुरंध्रिपरीता
जननीजनेन परिधापितवस्त्रा ।
सदसि स्थितं सविजयं स्रजयन्ती
रघुनाथमिष्टमवरिष्ट वरिष्ठम् ।। ९६ ।।

गुणवन्नतं च धनुरैशमभाङ्क्षी-
दयमर्भकस्तदुचितं विविवक्षुः ।
जरठोऽप्यमुष्य जनकः श्वशुरोऽभू-
दुचितं किमित्युपजहास जनौघः ।। ९७ ।।

मुनयोऽपि गाधिसुतगौतममुख्या
जनकादयश्च जगतीपतयस्ते ।
प्रणयादृतं दशरथानयनार्थं
प्रणिधीन् प्रजिध्युरतिशीघ्रमयोध्याम् ।। ८९ ।।

विविधान् विलङ्घ्य विषयान् धृतलेखा
विविशुः पुरं प्रमनसो मनुसृष्टाम् ।
ददृशुश्च तं दशरथं सवसिष्ठं
सचिवैर्वृतं सदसि मैथिलदूताः ।। ९९ ।।

विशिखे धनुर्भजि तदारवभीत्या
चलिते रथे रथिनि तद्ध्वनिहृष्टे ।
गुणसारथी च शरमानविषातां
शयनात्मजाविति ददुः शुभलेखम् ।। १०० ।।

अधिलेखमर्थमवगम्य सुमन्त्रः
प्रहसन्नशंसदधिसंसदुदन्तम् ।
भरताग्रजो भवशरासनकर्षी
निमिकन्यया स्वयमवारि किलेति ।। १०१ ।।

विशिखोऽपि विष्णुरयमेष सुतस्ते
स रथो धरैव स रथी गिरिधन्वा ।
गुणसारथी कलय शेषविरिञ्ची
शयनात्मजाविति जगाद वसिष्ठः ।। १०२ ।।

अजनन्दनोऽपि निजनन्दनवार्ता-
मुपकर्ण्य कर्णहृदयामृतधाराम् ।
विहितोत्सवः पुरि स पौरजनोऽभू-
दमृतोदमग्न इव दारसमेतः ।। १०३ ।।

महता बलेन भरतेन सुमित्रा-
तनयेन बन्धुसहितः सह दारैः ।
निरगान्महेन्द्रविभवो निजपुर्या
निमिबान्धवाय नितरां स्पृहयालुः ।। १०४ ।।

मणिमद्रथाङ्गमधिरुह्य शताङ्गं
स पुरो दधे दशरथेन वसिष्ठः ।
तमरुन्धती च सहचर्यनुभेजे
रघुवंशराजकुलवृद्धचिरण्टी ।। १०५ ।।

कुचकुम्भकान्तिजितकुञ्जरशोभा
मणिशातकुम्भमयपञ्जरगुप्ताः ।
ययुरन्विता वधिरवर्बरकुब्जैः
शिबिकाभिरब्जनयना नृपनार्यः ।। १०६ ।।

मदिरामदेन विवशा नवशाटच-
स्तुरगैरगुर्नगरवारवधूटचः ।
घनसारपूरितहिरण्मयपेटचः
सहसानुवव्रजुरमूरपि चेटचः ।। १०७ ।।

रथिभिर्मतङ्गजतुरङ्गजवाहैः
परितः पदातिकुलसंकुलसैन्यः ।
बलरेणुपङ्किलपयोधिरयासीद्
दशभिर्दिनैर्दशरथो मिथिलां ताम् ।। २०८ ।।

महिषीयुतेन महिषीशतयुक्तः
सपुरोहितेन सपुरोहितवर्गः ।
बलिना बली विभविना विभवाढ्यो
हलकेतुनार्ककुलकेतुरभीये ।। १०९ ।।

द्विरदाचलाग्रविचलद्ध्वजवीची
रमणीधृताभरणरत्नमरीची ।
तुरगग्रहौ तुमुलदुन्दुभिघोषौ
मिथिलान्तिके मिमिलतुर्बलवार्धी ।। ११० ।।

नगरं प्रविश्य विनयेन विनीतं
समपूजयद् दशरथं मिथिलेशः ।
चतुरोऽपि वीक्ष्य चतुरोऽथ कुमारान्
युगपज्जहर्ष युगपत्त्रककेतुः ।। १११ ।।

भयनम्रमौलिभिरुपायनहस्तैः
सदसि स्थितो नृपवरैरुपतस्थे ।
द्युतिमौडवीं भजति राजसमाजे
रुचिमैन्दवीमभजदैन्दुमतेयः ।। ११२ ।।

प्रथमं रघूद्वह उपायत सीता-
मथ माण्डवी शुभरतो भरतोऽपि ।
भरतानुजोऽप्यमिलदूर्मिलयासौ
परिणीतवांस्तदनुजः श्रुतकीर्तिम् ।। ११३ ।।

षष्ठेऽहन्यथ नृपतिर्वसिष्ठवाक्या-
दानिन्ये निजशिविरं निमीन्द्रकन्याः ।
जामातॄनपि दुहितॄः प्रपूज्य राजा
वैदेहो हरणमदादनन्तमर्थम् ।। ११४ ।।

रत्नानि द्विपहयधेन्वजाविचेटी-
रान्दोलीशकटपटीरवस्त्वपेटीः ।
कस्तूरीघनघनसारवस्तुजातं
पुत्रीभ्यः पृथगददात् कुशध्वजोऽपि ।। ११५ ।।

आमन्त्र्य प्रियसखमादरान्निमीन्द्रं
सूर्याभिश्चतसृभिरात्मजैश्चतुर्भिः ।
आरूढो रथमथ कोविदारकेतुं
काकुत्स्थो निजनगरीमभिप्रतस्थे ।। ।। ११६ ।।

पथि पङ्क्तिरथं रुरुत्समानो
भयदैन्यद्रुतसैन्यदत्तमार्गः ।
परशुं परुषं दधद् दृगन्त-
ज्वलदग्निर्जमदग्निसूनुरागात् ।। ११७ ।।

क्व नु मद्गुरुकार्मुकस्य भङ्क्ता
परशुः पास्यति तस्य कण्ठरक्तम् ।
किमु विस्मृत एष रैणुकेयः
क्षितिभृद्वंशदवाग्निरित्यवादीत् ।। ११८ ।।

तत्समागमसमुत्सुकमग्रे
वत्स राम गुणवत्सल मा गाः ।
तत्समीपमिति पुत्रमवादीत्
स त्रसन् दशरथः सकलत्रः ।। ११९ ।।

भृगुनन्दनं मृगयितारमात्मनो
रघुनन्दनः स पुरतः कृताञ्जलिः ।
मुनिमभ्यवादयत सभ्यसंमतो
यदि कार्यमस्ति वदतेति चाब्रवीत् ।। १२० ।।

प्रह्वं पुरः पङ्क्तिरथं निरीक्ष्य
सन्नाहिनो दाशरथींस्तथान्यान् ।
हस्त्यादिसैन्यं च हसन् बभाषे
रामः स रामं विनयाभिरामम् ।। १२१ ।।

अब्राक्षं नृपवृक्षकान् परशुनाधाक्षं प्रतापानलै-
रक्राक्षं भटरक्तपङ्किलमरिक्षेत्रं च शस्त्रीहलैः ।
आवाप्सं धनकीर्तिबीजमभितस्तत्रोत्थितान् वस्तृण-
प्रायानुच्छिनदानि कीर्तिरथ मे गन्ता दिगन्तानपि ।। १२२ ।।

तिष्ठत्यस्मिञ्छत्रुविरामे मयि रामे
रामेत्याख्या मन्तुरयं किं तु तवान्यः ।
कन्याकाङ्क्षी कार्मुकमैशं यदभाङ्क्षी-
स्तौ सोढा हे वैष्णवमाकर्ष धनुर्मे ।। १२३ ।।

श्रुत्वेति सस्मितमसौ च कराद् गृहीत्वा
नारायणीयमवकृष्य च धन्व रामः ।
विप्रं तमप्रतिहतेन शरेण हन्तुं
नैहिष्ट तस्य सुरलोकपथं न्यरौत्सीत् ।। १२४ ।।

तच्चापमाकर्षति ताटकारा-
वाकर्णमाकर्णविशालनेत्रा ।
सासूयमैक्षिष्ट विदेहजासौ
कन्यां किमन्यां परिणेष्यतीति ।। १२५ ।।

शमवति परिरभ्य रामचन्द्रं
गतवति राममुनौ तपोवनाय ।
कथमपि यमवक्त्रनिर्गताः स्मो
वयमिति भूपतिरालिलिङ्ग पुत्रान् ।। १२६ ।।

भृगुपतिभयविह्वलैरनेकैः
पुनरपि जन्मसमागतैरनीकैः ।
क्वचिदहृतनयैर्नृपश्चतुर्भिः
सह तनयैरविशत् पुरीमयोध्याम् ।। १२७ ।।

इति (श्री-कविमल्लाचार्य-शाकल्य-मल्ल-विरचिते)
उदारराघवे मैथिलाश्रमगमनं नाम
तृतीयः सर्गः ।। ३ ।।

चतुर्थः सर्गः ।

ततः कदाचित् तरुणं कुमारं
गुणार्णवं राममवेक्ष्य राजा ।
पौरप्रधानानुमतोऽभिषेक्तु-
मैषीन्मनीषी जगतां हितैषी ।। १ ।।

आनायिता जानपदाः समन्ता-
दाह्वायि राजर्षिगणो नृपेण ।
आनायि हर्षेण महर्षिलोको
रामाभिषेकोत्सवदर्शनाय ।। २ ।।

भूमानमस्याविमृशन्निहैनं
भूमात्र राज्येऽप्यभिषेक्ष्यतीति ।
महर्षयो गाधितनूजमुख्याः
सहर्षयोगा जहसुर्नरेन्द्रम् ।। ३ ।।

राज्ञा नियुक्ता रघुवंशकेतो-
राजहरुरम्भांस्यभिषेकहेतोः ।
नीराकरेभ्यो निखिलापगाभ्यः
सरोवरेभ्यः सकलह्रदेभ्यः ।। ४ ।।

तीर्थाम्बुपूर्णाः कलशीः सरत्नाः
कृतप्रयत्ना विधिवद् विधाय ।
सद्भिर्द्विजैरभ्यममन्त्रदेत्य
गुरुर्वसिष्ठो गृहिणांः वरिष्ठः ।। ५ ।।

काश्मीरगन्धोदकसिक्तवीथी-
मामुक्तमुक्ताफलरङ्गवल्लीम् ।
तत्तत्प्रतोलीमणितोरणाङ्कां
तां कारयामास पुरी नरेन्द्रः ।। ६ ।।

वस्त्राणि चित्राणि वणिग्भिरुच्चै-
र्वंशैरनह्यन्त गृहाङ्गणेषु ।
यच्छाययागाहत नैव किंचि-
न्नीव्राणि तीव्रांशुमयूखजालम् ।। ७ ।।

अध्मासिषुर्वैणविकाश्च वेणून्
खं व्यानशे काहलशङ्खनादः ।
ढक्काहुडुक्कानकदुन्दुभीनां
नादेन मोदेन च पूः पुपूरे ।। ८ ।।

पौरैश्च संचस्करिरे गृहाणि
वाराङ्गनाभिश्च वपुर्बुभूषे ।
अभ्रंकषानारुरुहुश्च सौधान्
सर्वंकषाः सर्जरसादिधूपाः ।। ९ ।।

आबालमानञ्ज लिलेप गन्धै-
र्दधार माल्यानि वभार भूषाः ।
नवानि नानावसनान्यवस्त
निरस्तलोभश्च समस्तलोकः ।। १० ।।

ततो नरेन्द्रप्रहितः सुमन्त्रो
गुणाभिरामं समुपेत्य रामम् ।
अभ्युद्गतस्तेन सुपूजितश्च
प्रमोदवार्तामवदत् सभायाम् ।। ११ ।।

राज्ये तव श्वो भविताभिषेको
रामाद्य रामासहितो रजन्याम् ।
उपोषितोऽभ्यज्य विभूषितः स-
न्नार्यावृतो जागृहि तूर्यनादैः ।। १२ ।।

पुण्याहमावाच्य पुरोहितौघं
दाक्षिण्यमाराधय दक्षिणाभिः ।
करोति तातस्तव सर्वयत्नं
राज्याभिषेके रघुवंशरत्न ।। १३ ।।

कुलक्रमागामि कुमार राज्यं
प्राज्यश्रियः पङ्क्तिरथस्य राज्ञः ।
आसाद्य शासच्चिरमासमुद्रं
भद्रासनस्थो भर भारमुर्व्याः ।। १४ ।।

सत्सन्ततिं वत्स विदेहपुत्र्या-
मुत्पाद्य सत्पात्रसमर्पितार्थः ।
रक्षन्नयोध्यापुरवासिनोऽस्मान्
रक्षांसि हत्वा रघुनाथ जीयाः १५ ।।

श्रुत्वेति रामः श्रवसोरसह्यं
प्रधानवाक्यं प्रहसन् वभाषे ।
प्रमोदवार्तेति वदन्निहार्य
प्रमादवार्तां प्रकटीकरोषि ।। १६ ।।

सुखाय नैतन्मम तात वाक्यं
वैद्यस्य सर्पिर्मधुनोरिवैक्यम् ।
ज्वरातुरस्येव पयो न पथ्यं
वृद्धाः स्खलन्तीति सुमन्त्र तथ्यम् ।। १७ ।।

इक्ष्वाकुभिर्व्यूढमुदूढसत्त्वै-
भारं महान्तं रघवो वहन्ते ।
क्वाहं शिशुः क्वैष भरः कथं वा
गजस्य पल्याणमजस्य योग्यम् ।। १८ ।।

अविर्न मेषोऽनसि वीर्यहेतोः
स्थूणायते धन्व न मीनकेतोः ।
सिंहालयं नान्यमृगोऽधिशेते
रामो रघूणां न धुरं धरेत ।। १९ ।।

दिलीपदत्तां रघुरन्वशात्तां
पितामहोऽजश्च पितामहौजाः ।
ततः क्रमाप्तां तनयैश्च साकं
शाकंभरां शासतु तातपादाः ।। २० ।।

सुमन्त्र कस्यैष कुमन्त्रपाकः
पाके यदस्मिन् मयि दुर्विपाकः ।
राज्यं चिरं शासति राज्ञि चाहं
राजेव खेलन्ननुजैः सुखी स्याम् ।। २१ ।।

पुत्रो हि पूरुर्निजयौवनेन
धन्यो जरां विन्यमिनोद् ययातेः ।
वनेन राज्यं वयसा जरां वा
तातस्य सत्यं विनिमातुमीहे ।। २२ ।।

आयातु मातामहमन्दिरस्थो
भक्तो ममासौ भरतोऽनुजन्मा ।
संमन्त्र्य तेनाहमथो यदुक्तं
तातेन कुर्वीय तथैव युक्तम् ।। २३ ।।

श्रुत्वेति वाक्यान्यभिनन्द्य मन्त्री
संबोध्य रामं सह बन्धुपौरैः ।
कथंचिदोङ्कारयति स्म भेरी-
भाङ्कारमुद्घोष्य महाभिषेके ।। २४ ।।

ततो निजागारगतः सरामो
रामो जजागार कृतोपवासः ।
पुण्याहमावाच्य पुराणविद्भि-
र्द्विजैस्तपोमूर्तिभिरार्त्विजीनैः ।। २५ ।।

आकर्ण्य तूर्यध्वनिमध्ययोध्यं
सौधाधिरूढा सहसाभिपत्य ।
ऊचे वचः किंचिदनर्थसूत्रं
धात्रेयिका केकयराजपुत्रीम् ।। २६ ।।

उत्तिष्ठ कैकेयि किमत्र शेषे
प्राप्तं विशेषेण भयं त्वयाद्य ।
वृथा ह्यसि त्वं सुभगंभविष्णु-
र्भाग्यं च सौभाग्यमितोऽन्यगामि ।। २७ ।।

नाज्ञायि किं संभ्रम एष राज्ञि
रामाभिषेके रघुराजधान्याम् ।
कष्टं सुताः पङ्क्तिरथस्य राज्ये
भ्रष्टा विनष्टा भरतादयोऽन्ये ।। २८ ।।

दुर्धीश्चतुर्धा न विभज्य राज्यं
दत्ते सुतेभ्यो जरठश्चतुर्भ्यः ।
महीं विभक्तां मनुना विभिन्नाः
किं नाधितस्थुर्नवखण्डनाथाः ।। २९ ।।

निशम्य तत् साकुलिता जगाद
रामोऽभिरामो भरतात् प्रियो मे ।
राज्येऽभिषिक्तं रघुवंशनाथं
त्रयः कुमारास्तमुपासितारः ।। ३० ।।

एकाग्रता लक्ष्यगुणोपयोगे
राज्यश्रियो योगिधियश्च सूच्याः ।
अतः करोत्येकमुखं स राज्यं
राज्येऽभिषिच्याग्रभुवं कुमारम् ।। ३१ ।।

अयि प्रियोदन्तमिमं वदन्ती
गृहाण भूषाः सखि मन्थरे मे ।
कुर्वेऽद्य वत्सस्य महाभिषेकं
सर्वे प्रहृष्यन्तु समेत्य पौराः ।। ३२ ।।

तथा वदन्ती तरलायताक्षी-
माक्षिप्य चेटी पुनरप्यवादीत् ।
आः केकयि भ्रान्तिरियं कुतस्ते
रामः क्व राजा भरतः क्व दीनः ।। ३३ ।।

कथं नु वा जीवसि राजपत्नी
सती सपत्नीसुतदत्तपिण्डा ।
रामेऽभिषिक्ते भरते च रिक्ते
क्षमा वृथा मानिनि मा दरिद्रीः ।। ३४ ।।

वरद्वयं प्राग् वसुधेशदत्तं
तवास्ति तस्योपरि तद् वृणीष्व ।
पुर्या विनिर्यातु वनाय राम-
श्चतुर्दशाब्दान् भरतोऽस्तु राजा ।। ३५ ।।

रामे वनं याति सहैव याता
सीता च सौमित्रिरथानुयाता ।
मातामहावासत एत्य मातस्-
त्राता च पृथ्वीं भरतः सुतस्ते ।। ३६ ।।

कौसल्यया केकयि राजमात्रा
दासीकृतां त्वां कथमाश्रयामः ।
कथं नु वा स्थण्डिलसंनिविष्टा
संवाहयेथाश्चरणौ सपत्न्याः ।। ३७ ।।

क्षिप्त्वा श्रियं हस्तगतां पदेन
पोटेव लक्ष्मी सहसे सपत्न्याः ।
असह्यवार्तामधुना वदन्त्यै
यन्मह्यमप्याभरणानि दत्से ।। ३८ ।।

रामश्चिरं राज्यमिदं गृहीत्वा
प्रौढः प्रतिष्ठास्यति रूढमूलः ।
युधाजितः सद्मनि चान्नमश्नन्
क्लिश्नाति बन्धून् कृपणः सुतस्ते ।। ३९ ।।

न बालिशे किंचन वेत्सि कार्यं
निर्धार्यमप्यात्महितं न विन्त्से ।
कमप्युपायं कलयाद्य शीघ्रं
गते कबन्धे नहि सेतुबन्धः ।। ४० ।।

त्वमास्व तूष्णीमहमेव राज्ञि
विज्ञाप्य राज्ञे विदधामि सर्वम् ।
याचामि वाचा मितया वरौ द्वौ
त्यजेति रामं भरतं भजेति ।। ४१ ।।

इद्धाभिशापैरिति विप्रलापै-
रुद्गूढतापैरुपगूढपापैः ।
तस्याः स्वतो निर्मलमप्युदारं
धीरं मनो मन्थरया ममन्थे ।। ४२ ।।

क्रोधेन सौधादवरोप्य राज्ञी
न्युब्जाथ कुब्जा नृपतिं निनाय ।
तामन्तिके गूढविषां निषण्णां
नागीमिवाब्रूत स निश्वसन्तीम् ।। ४३ ।।

खिन्नेव किं नेरयसीह वाक्यं
किं नेक्षसे केकयि मां पुरेव ।
मुक्तादिरत्नाभरणेन किं वा
शृङ्गारयस्यङ्गमनङ्गरागम् ।। ४४ ।।

रामः सुतस्ते भरताग्रजन्मा
रामस्य माता रमणि त्वमेव ।
अस्याभिषेकोत्सवमुत्सुका त्वं
शुभाङ्गि सर्वं शुभयात्मकृत्यम् ।। ४५ ।।

भर्तुर्गुरोरप्यवधार्य वाचं
सारांश्च सा रामगुणान् विचार्य ।
स्वयं न किंचित् त्वपया वदन्ती
मन्दं मुखं प्रैक्षत मन्थरायाः ।। ४६ ।।

दत्तं पुरा पङ्क्तिरथेन तस्यै
वरद्वयं सा जरठा ययाचे ।
एकेन रामस्य वनप्रयाण-
मन्येन वव्रे भरताभिषेकम् ।। ४७ ।।

रामो वनस्थो भरतः पुरःस्थो
रामो जटी स्याद् भरतः किरीटी ।
रामोऽतु चीरी भरतस्तु चेली
चतुर्दशाब्दानिति साभ्यधत्त ।। ४८ ।।

जीनोऽसि दीनो न भवात्मनीने
वरप्रदाने वद सत्यमन्त्ये ।
इक्ष्वाकवो नैव वदन्त्यसत्यं
प्राणेषु नश्यत्स्वपि पार्थिवेन्द्राः ।। ४९ ।।

राजा हरिश्चन्द्र इतीष्टभार्या
व्यक्रेष्ट सत्याय भवत्कुलोत्थः ।
भुवं दिवं कीर्तिभिरश्नुवानो
भेजे दिवाकीर्तिषु वीरबाहुम् ।। ५० ।।

सत्येन कीर्तं जिहते जगत्यां
सत्येन लोकानखिलान् जयन्ति ।
तज्जातु सत्यं न जहीहि राजन्
लज्जावतीयं न हि वेत्ति वक्तुम् ।। ५१ ।।

तदुक्तमेवाकलयैतदुक्तं
वरद्वयं याचति केकयीयम् ।
फलानि मूलानि चरन् वनस्थो
रामोऽस्तु राज्यं भरतः प्रशास्तु ।। ५२ ।।

उक्त्वेति कुब्जा विधुरं व्यरंसी-
च्चेष्टा च राज्ञो भुवि मूर्छितस्य ।
हाहेत्यपप्तन् परितो नरेन्द्रं
सान्द्राश्रुपूराः सहवासिनोऽपि ।। ५३ ।।

वस्त्रान्तवातेन च वीजयन्ती
यमस्य साक्षादिव वैजयन्ती ।
राज्ञः शिरोऽङ्के विनिधाय तस्थौ
कैकेय्यलीकं दधतीव शोकम् ।। ५४ ।।

रक्षोविघाताय रघूद्वहं तं
निर्यापयन्ती पुरदेवतेव ।
आकारवत्यर्चितुमाशु राम-
माकारयन्ती वनदेवतेव (युग्मम्) ।। ५५ ।।

रामस्तदासावधिपुष्पशय्यं
जाग्रन् निजाग्रस्थितमैथिलीकः ।
पुण्यं चरित्रं पुरुषोत्तमस्य
शृण्वन् निशां तामनयन् निशान्ते ।। ५६ ।।

श्रुत्वा निशान्ते जनतोऽन्तरायं
महाभिषेकस्य महीन्द्रसूनोः ।
अन्तः प्रविष्टोऽवसरप्रतीक्षी
निश्चेष्टमैक्षिष्ट नृपं सुमन्त्रः ।। ५७ ।।

मन्त्रौषधीरुद्धमिव श्वसन्तं
नागेन्द्रमालोक्य नरेन्द्रमुर्व्याम् ।
सोऽपासरत् तं च जगाद राज्ञी
राजाज्ञया राममिहानयेति ।। ५८ ।।

तथेति निर्गत्य रथेन गच्छन्
रथ्यासु मिथ्यामुदितः ससूतः ।
पौरं जनं प्रीतिकृतप्रणामं
न किंचिदालोकत नाभ्यधत्त ।। ५९ ।।

दृष्ट्वा रथे साग्रनिविष्टदृष्टिं
सुमन्त्रमाशङ्क्य कमप्यनर्थम् ।
विलक्षयालक्ष्यत पौरवृन्द-
मवृष्टिशुष्कं शरदीव सस्यम् ।। ६० ।।

कृत्वौषसं कर्म कुथोपविष्टं
जायासखं जागरणारुणाक्षम् ।
उपेत्य रामं तमुवाच मन्त्री
दिदृक्षते त्वां भवतः पितेति ।। ६१ ।।

तथेति राजालयमाजगाम
सुमन्त्रसूतेन रथेन रामः ।
आन्दोलिकामप्यधिरुह्य सीता
श्वश्रूजनं वन्दितुमाजगाम ।। ६२ ।।

महाननर्थोऽजनि मन्थराया
वाक्यैरिति व्याहृत पौरलोकः ।
किमेतदित्याकुलतामयासी-
दन्तःपुरं पङ्क्तिरथस्य राज्ञः ।। ६३ ।।

अथो नृपद्वारि रथाधिरूढो
रामेन्दुरप्यैन्दुमतेयसूनुः ।
चक्षुश्चकोरान् मदयन् जनाना-
मन्तर्जगाहे पितरं दिदृक्षुः ।। ६४ ।।

पूर्वागतान् मन्त्रिपुरोहितांश्च
स्त्रीमण्डलं चाश्रुमुखं स पश्यन् ।
अग्रे निषण्णस्य विषण्णमूर्ते-
ररुन्धतीभर्तुरवन्दताङ्घ्री ।। ६५ ।।

हा राम रामेति रुदन्तमुच्चै-
मूर्च्छन्तमुर्व्या च मुहुर्लुठन्तम् ।
अदृष्टपूर्वं पितरं स दृष्ट्वा
मनस्यशङ्किष्ट महन्निजागः ।। ६६ ।।

ततः शिरोऽङ्के पितुरादधानां
तां केकयीं दाशरथिर्ददर्श ।
मूर्च्छाकुलं तं मुहुराह्वयन्ती
मूर्धोपविष्टामिव मृत्युदूतीम् ।। ६७ ।।

आयोध्यकानामनुमोदहत्यै
कालप्रयुक्तामिव कालरात्रिम् ।
भयं प्रदातुं जगतामकाण्डे
भर्गप्रदिष्टामिव भद्रकालीम् ।। ६८ ।।

प्रणम्य तातं च शुचा नितान्तं
किं तात खिन्त्से किमकार्षमागः ।
उक्त्वेति बद्धाञ्जलि मध्यमाम्बां
जातं किमस्येति जगाद रामः ।। ६९ ।।

सा नाविदं किंचन मन्थराया
वाक्यैरयं विह्वलतीत्युवाच ।
ततो वसिष्ठो वदतां वरिष्ठः
स्त्रीसाहसं वीक्ष्य हसन् बभाषे ।। ७० ।।

न केकयीकृत्यमिदं कुमार
तत्प्रेषिता जल्पति मन्थरैव ।
सा वास्त्वियं वास्तु समस्तमस्तं
साम्राज्यमाभ्यां कुलनाशिनीभ्याम् ।। ७१ ।।

पुरा किलायं तव तात तातः
पूतक्रतोः पुण्यजनाभियोक्तुः ।
साहाय्यमिच्छन्ननया सहागाद्
राजाजिराजि रयिणा रथेन ।। ७२ ।।

रथाश्वसंघे रणसीम्नि मग्ने
भुग्ने रथाक्षे भुजमक्षयित्वा ।
जाया पतिं जापयति स्म धीरा
दत्तौ वरौ द्वावमुना किलास्यै ।। ७३ ।।

तावद्य धात्रीतनयामुखेन
धात्रीपतिं याचति केकयी सा ।
चराटवीं राम चतुर्दशाब्दान्
भजत्विदानी भरतोऽभिषेकम् ।। ७४ ।।

जायासखस्त्वं जटिलो वनान्ते
वल्कं वसानो वस लक्ष्मणेन ।
धन्वी निषङ्गी कवची च खड्गी
खड्गेभसिंहादिमृगान् विनेष्यन् ।। ७५ ।।

दिशानसूयो भरतस्य राज्य-
मशान वन्यं फलमूलकन्दम् ।
विशानरण्यान्वयभूररण्यं
दशाननाद्यास्तव राम वध्याः ।। ७६ ।।

श्रुत्वेति रामः श्रुतवानधीती
धीतीर्णसंसारसमुद्रपारः ।
प्रसन्नवक्त्रः पितरौ प्रणम्य
बद्धाञ्जलिर्वाक्यमिदं बभाषे ।। ७७ ।।

महान् प्रसादो मदनुग्रहोऽयं
भारोऽपि नारोपि मयीह पित्रा ।
तथैव कुर्वे मुदिताः स्थ सर्वे
यथाध्यवासादपि मध्यमाम्बा ।। ७८ ।।

दत्त्वा वरावद्य खलु क्लिशित्वा
सत्यान्न हीयस्व महीश किंचित् ।
दयार्द्रया वीक्ष्य दृशा दिशास्मान्
वनाय मा त्वं विषदः प्रमीद ।। ७९ ।।

जीवातुना रामवचोऽमृतेन
मुक्त्वा स मूर्छामुपलभ्य संज्ञाम् ।
आहूय बाहू पुरतः प्रसार्य
पुत्रौ परिष्वज्य चिरं व्यलापीत् ।। ८० ।।

हा राम हा राघव हा कुमार
हा वत्स हा वत्सल मत्समीपम् ।
हित्वा कथं यास्यसि काननान्ते
कथं प्रसूस्ते जरती पुरास्ते ।। ८१ ।।

वृद्धौ च मातापितरौ गृहस्थौ
साध्वी च भार्या शिशुरप्यपत्यम् ।
कृत्वाप्यकार्यं स्वयमप्युपोष्य
पोष्या इति प्राह मनुर्महीयान् ।। ८२ ।।

दृष्ट्वाग्रतो मे परलोकयात्रा-
मरण्ययात्रां कुरु राम पश्चात् ।
चिरस्य जाते त्वयि तात याते
शिरस्यलातं मम को नु दद्यात् ।। ८३ ।।

त्वत्तो निवापं न मृतोऽप्यवापं (नु मृतोऽनकाप्य ?)
प्राप्तोऽस्मि पापं परलोकतापम् ।
प्रत्तं जलं त्वञ्जलमात्मजेन
प्रेतस्य तापप्रशमं करोति ।। ८४ ।।

प्रसीद कैकेयि दुराग्रहासि
रामेण किं ते शिशुनापराद्धम् ।
स्वमातरि त्वय्यपि निर्विशेषे
भक्ते कथं पापमियत् करोषि ।। ८५ ।।

प्रियाः प्रियाभ्यो वितरन्ति लोके
कैकेयि के के न वरान् नरेन्द्राः ।
निष्कासयेत् कोऽहमिव त्वदर्थं
निष्कारणं निष्करुणं कुमारम् ।। ८६ ।।

वशीकृतं वल्लभमर्थयेरन्
वामा हि वामाक्षि वरानभीष्टान् ।
वत्सं त्वदुत्सङ्गसुखोपलाल्यं
वस्तुं वने वल्कलिनं वृणीषे ।। ८७ ।।

चिरादभौक्षं भुवमिष्टभोगा-
नभुक्षि वृद्धो न तपस्तितप्से ।
वत्सः कथं वा युवजानिरेष
वल्कं वसानो वनमभ्युपेयात् ।। ८८ ।।

रामे पुरः प्रोषुषि राज्ययोग्ये
क्षिप्रं मयि प्रेयुषि मन्दभाग्ये ।
लोकाभिशप्ता भवसि त्वमेका
शोकाभितप्ता भुवि राममाता ।। ८९ ।।

इक्ष्वाकुवंशैकगुरो वसिष्ठ
सुमन्त्र धृष्टे शृणु धर्मपाल ।
इमामयोध्यापुरनाशवार्ता
नयन्तु संदेशहराः समन्तात् ।। ९० ।।

उभौ सुतौ मातुलसद्मयाता-
वन्यौ च वन्यावजिनोत्तरीयौ ।
शोकोपरागान्नृपतिः परागा-
दित्यादिशध्वं जनकाय लेखान् ।। ९१ ।।

स ब्रह्म विद्वान् दुहितृः प्रदाय
संबन्धमासज्य कुले रघूणाम् ।
संसारसौख्यं बहु मन्यमानो
जामातृषु प्रेम परं विधत्ते ।। ९२ ।।

जोत्स्नेव सोमं न जहाति रामं
वत्सा च सीता वनमेव याता ।
पुण्यस्य राज्ञो जनकस्य पुत्र्याः
पापोऽहमस्मि श्वशुरो वधूट्याः ।। ९३ ।।

दिवोऽवनेरप्यवनाय जातो
वनाय यातो विधिवैशसेन ।
मूलं फलं वा मुनिभोज्यमद्या-
दद्यापि बालः कथमात्मजो मे ।। ९४ ।।

विनीतमेनं शिशुमग्रतःस्थं
विनापराधं विपिनं व्रजेति ।
ब्रुवे यदि भ्रूणहणं भणेयु-
र्मां कर्मचण्डालमनार्यमार्याः ।। ९५ ।।

जनन्ययोध्ये कुलराजधानि
गते कुमारे मयि सुप्रमारे ।
कः पालयेत् त्वामुपलाल्य कष्टं
नष्टास्यनाथासि कुतः पतिस्ते ।। ९६ ।।

कैकेयि वैधव्यमितः प्रियं चे-
दनर्थमेवं किमिति व्यवासाः ।
भक्ते विषं वा भवनेऽनलं वा
दत्वा पतिघ्नी विधवा न किं स्याः ।। ९७ ।।

इन्दीवरश्यामलमिन्दुवक्त्र-
मिन्दिन्दिरानीलकलापकेशम् ।
इन्द्रारिहन्तारमिमं कुमार-
मीक्षे जटाचीरधरं कथं वा ।। ९८ ।।

वसिष्ठवाक्येन वधूसमेतो
राज्याभिषेकाय रघुप्रवीरम् ।
कृतोपवासं निशि जागरित्वा
वनाय गच्छेति कथं नु वक्ष्ये ।। ९९ ।।

वल्कं गृहाणेति वनं विशेति
जटा वधानेति जपन् वसेति ।
मूलान्यशानेति मुनिर्भवेति
शिशुं ब्रुवाणः शतधा न दीर्ये ।। १०० ।।

धर्मं तथार्थं च परित्यजन्तं
कामं प्रकामं पुरुषार्थयन्तम् ।
लब्ध्वाशयं स्त्रीजितमिन्द्रलोके
रघ्वादयो मां न विलोकितारः ।। १०१ ।।

प्रसादयाम्यञ्जलिनाधुना त्वां
प्रसीद कैकेयि नतोऽस्मि मूर्ध्ना ।
जहीहि वत्सस्य जगद्विरुद्धं
वनप्रयाणाय वरं वराकि ।। १०२ ।।

वत्सप्रवासादितरान् वृणीष्व
वरान् शतं वा वनजाक्षि दद्याम् ।
शिरोऽथवा मे वृणु वामशीले
कम्प्रं त्वया संप्रति संप्रयच्छे ।। १०३ ।।

रामश्च सौमित्रियुतस्तवाहं
प्रेष्या भवामो भरतस्य पोष्याः ।
वत्स्यामि वत्सेन सहाल्पपल्ल्यां
कल्याणि पाल्या तनयेन पृथ्वी ।। १०४ ।।

हताधिकारं क्वचनाधिकारं
वद्ध्वानया मां निगडैर्निबध्य ।
वीरोऽसि मौलैः सह लक्ष्मण त्वं
रामं प्रतिष्ठापय राज्यपीठे ।। १०५ ।।

तवाभिषेकं प्रतिकूलयन्ति
न केऽपि राज्ये मम रामचन्द्र ।
इमां युधाजिद्भुगिनीं विनैकां
किमेतयाध्यास्व बलादयोध्याम् ।। १०६ ।।

स्त्रियाः प्रियार्थं रहसि प्रदाय
न तद् ददानो यदियामसत्यम् ।
राज्यं प्रतिश्रुत्य जगत्समक्षं
ददद् वनं तेन कथं च सत्यः ।। १०७ ।।

सत्सन्ततिं स्वर्गमिहाहुरार्याः
कालेऽनुभाव्यो नरकोऽनृतेन ।
प्रत्यक्षतः स्वर्गसुखं विहाय
परोक्षतः किं नरकाद् बिभीयाम् ।। १०८ ।।

अद्य प्रभृत्यामरणं तवाहं
कैकेयि पापे न मुखं निरीक्षे ।
त्वदानुकूल्य भरतो यदिच्छे-
न्मृतोऽपि नेच्छेयमतो निवापम् ।। १०९ ।।

इत्येकवासा विलुठन् धरण्या-
मुन्मत्तवन्मुक्तविकीर्णकेशः ।
हा वत्स रामेति वदन्ननीचै-
र्मुमूर्छ राजा मुषितो विधात्रा ।। ११० ।।

तमीक्षमाणस्तदवस्थमित्थं
मा तात खिन्था इति रामचन्द्रः ।
उदश्रुरुत्थाप्य नृपं कराभ्यां
मूर्ध्ना नतो मूर्च्छितमालिलिङ्ग ।। १११ ।।

तदङ्गसङ्गेन विहाय मूर्छां
रामेति तातेति न मां त्यजेति ।
हा वत्स मा गा इति हा कुमारे-
त्येतावदेव व्यलपन्नरेन्द्रः ।। ११२ ।।

नष्टोऽस्मि दग्धोऽस्म्यह हा हतोऽस्मि
नष्टा च दृष्टिर्न हि राममीक्षे ।
हा क्वासि वत्सेति विलुठ्य भूमौ
हस्तौ प्रसार्यात्मजमन्वियेष ।। ११३ ।।

तं तादृशं वीक्ष्य ततो दयालु-
म्तातायमस्मीति पदोः पतित्वा ।
निर्गन्तुकामो निजगाद रामो
मातृरुदश्रूश्च शतानि सप्त ।। ११४ ।।

अम्बाः क्षमध्वं मयि किंचिदागः
कुर्वे नमो वो वरवर्णिनीभ्यः ।
स्तनन्धयं मामुपलालयन्त्यो
बहुप्रियैर्बालमवीवृधध्वम् ।। ११५ ।।

न मध्यमाम्बा मम कैकयी यद्
भारं निषेधत्यत उत्तमाम्बा ।
भ्राता प्रियो मे भरतोऽस्तु राजा
राज्यं पिता चाहमदाव तस्मै ।। ११६ ।।

वने समौमित्रिरहं चरेयं
स चासने तिष्ठतु कैकयेयः ।
ददाति तातः सुकरं वनं मे
सुदुष्करे कर्मणि तं नियुङ्क्ते ।। ११७ ।।

आश्वासनीयो जनको ममाम्बाः
सम्बोधनीया जननी च वृद्धा ।
स्पर्धा सपत्नीति न जातु कार्या
ज्येष्ठा ममाम्बेति च माननीया ।। ११८

श्रुत्वा गिरस्ता इति योषितस्ता-
श्चक्रन्दुरुच्चैर्युगपत् समस्ताः ।
तन्मन्दिरं मन्दरमन्थमन्था-
दम्भोधिगम्भीररवं रुराव ।। ११९ ।।

तथा रटन्तीषु नृपाङ्गनासु
नत्वा वसिष्ठं निरहास्त रामः ।
तमन्वगाल्लक्ष्मण एक एव
सरन्तमात्मानमिव स्वभावः ।। १२० ।।

अम्बा क्व सा कुत्र विदेहपुत्री
क्वाम्बा कनीयस्यपि सा सुमित्रा ।
इति ब्रुवन् मातृगृहानुवर्ती
सौमित्रिमालम्ब्य जगाम रामः ।। १२१ ।।

आदेशादवनिपतेर्वनाय गन्तुं
क्रव्यादानधिगहनं वलान्निहन्तुम् ।
वैदेह्या वनगमनं सहानुमन्तुं
कौसल्याभवनमगात् स तां च नन्तुम् ।। १२२ ।।

इति श्रीकविमल्लाचार्य-शाकल्य-मल्ल-प्रणीत
उदारराघवे चतुर्थः सर्गः ।। ४ ।।

पञ्चमः सर्गः ।

तस्मिन्ननेहस्यपि तारतारं
तौर्यत्रिकं तत्र ननाद मन्दम् ।
मन्देतरं दुन्दुभयो निनेदुः
कल्पान्तधाराधरधीरनादाः ।। १ ।।

वीणा विरेणुर्मृदुवेणुनादै-
र्वाराङ्गनामङ्गलगीतमिश्राः ।
कम्बूश्च दध्मुः पटहांश्च जघ्नु-
र्बवन्धुरुच्चैः प्रघणेषु घण्टाः ।। २ ।।

कोणाहतानां जयघण्टिकानां
क्वाणाः समश्राविषत प्रभूताः ।
सर्वत्र चाश्रोषत वेदघोषाः
पुण्याहघोषाश्च पुरोहितानाम् ।। ३ ।।

विचित्रवर्णैर्मणिभित्तिभागैः
कुसुम्भमुख्यैः कुसुमोपहारैः ।
सव्यक्तमुक्तामयरङ्गवल्ली
रराज राज्ञीगृहमण्डलश्रीः ।। ४ ।।

ललाटिकारत्नलसल्ललाटा
लाटाङ्गनाः पाटलगण्डभागाः ।
आरक्तताम्बूलरसारुणास्या
लास्यानि चक्रुर्ललिताङ्गहाराः ।। ५ ।।

अरुन्धतीमुख्यजरच्चिरण्टी-
पूजाविधिव्यग्रपुरन्ध्रिवर्गम् ।
मातुर्गृहं वीक्ष्य मनोहरं त-
दन्तः प्रवेष्टुं तनुजो ललज्जे ।। ६ ।।

पुत्राभिषेकोत्सवपूर्णकामा
क्षौमाभिरामा मणिकाञ्चिदामा ।
वृद्धा समृद्धां श्रियमादधाना
रत्नासनस्था च रराज राज्ञी ।। ७ ।।

धूता सुमित्राकरचामरेण
सीताकरावर्तिततालवृन्ता ।
शुद्धान्तवृत्तान्तमजानती सा
पप्रच्छ विप्रान् समयः कदेति ।। ८ ।।

आगादियत्यन्तर एव रागा-
दागामिदुःखव्यसनानभिज्ञाम् ।
प्रणम्य तां प्रेमभरेण पश्यन्
निःशङ्कमङ्के निषसाद रामः ।। ९ ।।

दरोद्गतश्मश्रु तदीयमम्बा
नीलायितं गण्डतलं निनिमे ।
धम्मिल्लमाल्याग्रमिलन्मिलिन्दे
मूर्धन्युपाघ्रान्मुमुचे च बाष्पम् ।। १० ।।

आकारितस्याप्यभिषेकहेतो-
र्निष्कासितस्यापि च निर्विकारम् ।
प्रसन्नमालोक्य मुखं सुतस्य
किमप्यबुद्ध्वा जननी जगाद ।। ११ ।।

वत्साद्य राज्यं तव भाविशत्रू-
नुत्साद्य रक्ष क्षितिमप्रमत्तः ।
भ्रातॄनपि त्वीस्तव भक्तिभाजो
मातॄरिमा मामिव पश्य सर्वाः ॥ १२ ॥

मान्यानिमान् मानय मन्त्रिणस्ते
बन्धूश्च संभावय बालवृद्धान् ।
पुरोहितान् पूजय पुण्यवाचः
पुषाण भृत्यानपि सत्यसन्धः ॥ १३ ॥

प्रजानुरागेण धनं निनुष्व
धनेन धर्मं परिपालयस्व ।
धर्मेण संपादय राम कीर्तिं
कीर्त्या च लोकानखिलान् पुनीथाः ॥ १४ ॥

विशिष्टि राज्ये निभवं जनानां
निष्पिष्टि पापानि निजैश्चरित्रैः ।
सिंहासनस्थे त्वयि शासतीह
महीतलं शीतलयामि नेत्रे ॥ १५ ॥

श्रुत्वेति रामः प्रहसन् बभाषे
शृण्वत्सु शुद्धान्तजनेषु वृद्धाम् ।
मुग्धे किमप्यम्ब न वेत्सि दग्धे
कुक्षौ क्षुधा कोऽञ्जनमक्षिणि दद्यात् ॥ १६ ॥

वनोपदेशं कुरुते पिता मे
त्वं वक्षि च क्षित्यवनोपदेशम् ।
अहं पितुर्वाक्यमिहाचरेयं
त्वद्वाक्यकारी भरतोऽस्तु राजा ॥ १७ ॥

ममाभिषेकोद्यतमद्य तातं
वरद्वयं याचति मध्यमाम्बा ।
एकेन यास्यामि वनं वरेण
भावी च राजा भरतोऽपरेण ।। १८ ।।

पद्भ्यां चरिष्यामि चतुर्दशाब्दान्
वने जटाचीरधरस्तपस्वी ।
हस्त्यश्वयायी भरतो मनस्वी
दधत् किरीटं धरणी प्रशास्तु ।। १९ ।।

श्रुत्वेत्यकाण्डाशनिपीडितेव
विच्छिन्नकाण्डा कदलीव तन्वी ।
हा वत्स वत्सेति निपत्य भूमौ
मुमूर्छ देवी मुषिता विधात्रा ।। २० ।।

स्वमातृमूर्छाकुलचित्तमग्रे
तं लक्ष्मणो निष्ठुरमाबभाषे ।
किं नाशयस्यार्य वृथैव राज्यं
खिन्ना सतीयं म्रियते तवाम्बा ।। २१ ।।

माता प्रमीताद्य पिता प्रमेता
प्रमेष्यतेऽन्तःपुरमातृवर्गः ।
त्वयि प्रयाते वनमार्य भीता
सीतावला यास्यति कामवस्थाम् ।। २२ ।।

मुधैव किं मुह्यसि मूढबुद्धेः
जाल्मस्य राज्ञो जरतः प्रलापैः ।
स्त्रीविप्रलापैः स च विप्रलब्धो
न राजनीताविह मूलबुद्धिः ।। २३ ।।

नाहं सहे नाथ जगद्विरुद्धं
वृद्धप्रलापेन वनप्रयाणम् ।
स्त्रीबालवृद्धाः खलु पोषणीया
न ग्राह्यवाचो नयमार्गभाजाम् ।। २४ ।।

वृद्धावसंबद्धगिरौ निरुध्य
तौ दम्पती वश्यसमस्तलोकः ।
तवाभिषेकोत्सवमाचरेयं
मौलप्रधानानुमतोऽद्य राम ।। २५ ।।

कश्चिद् यदि स्यादिह नौ विरोधी
बलाभियोधी भरतानुरोधी ।
समूलघातं तमहं निहन्यां
बलाभियातं बहिरीरयामि ।। २६ ।।

वसिष्ठमुख्यान् वशिनो महर्षीन्
वृद्धानमात्यानपि वृष्णिमुख्यान् ।
संमन्त्र्य संभाव्य समस्तमेतत्
समञ्जसं कार्यमिहार्य कुर्याम् ।। २७ ।।

करस्थितं राज्यमिहापहाय
किं गाहितासे गहनं दरिद्रः ।
वस्ता वनान्ते वसिता च वल्कं
कः क्षत्रियः श्रोत्रियतामुपेयात् ।। २८ ।।

राज्येन चिन्वन्ति महान्तमर्थ-
मर्थेन चिन्वन्ति च धर्मकामौ ।
धर्मार्थकामेषु सुसंभृतेषु
मुक्तिः स्वयं सेत्स्यति मुक्तिभाजाम् ।। २९ ।।

तद्राज्यमूलं सकलं विहाय
वृथा दरिद्रास्यसि रामभद्र ।
बाह्वोर्बलेनैव हि बाहुजाना
संजीवनं साधु वदन्ति वृद्धाः ।। ३० ।।

पिनष्मि शत्रून् विशिनष्मि शौर्य
क्षुणद्मि शैलांश्च भिनद्मि वेलाः ।
बध्नामि भाले तव राज्यपट्ट-
मुत्साहमुत्सृज्य न भीलुकः स्याः ।। ३१ ।।

उत्साहहीने धृतिरप्यपैति
धृतौ गतायामुपयाति न श्रीः ।
नाश्रीकमप्याश्रयते जनौघो
जनोज्झितः कस्य कदोपयोग्यः ।। ३२ ।।

न सदिहीनाप्तजनस्य वाक्ये
निशम्य खिन्दीत न जातु धीरः ।
खलेन विन्दीत न कार्याजातं
क्षणेन भिन्दीत स मन्त्रमल्पः ।। ३३ ।।

तदेहि वाभिर्मुनिमन्त्रपूतै-
राज्येऽभिषिच्यस्व भजस्व राज्यम् ।
पित्रैव दत्तं मुनिमन्त्रसाक्ष्या-
दत्रैव भुङ्ग्धि क्षितिमासमुद्रम् ।। ३४ ।।

श्रुत्वेति वाचः श्रुतधर्मतत्त्वः
सत्त्वाधिकस्यावरजस्य रामः ।
विहस्य धृत्वा चिबुकं करेण
सौमित्रिमाभाषत सान्त्वपूर्वम् ।। ३५ ।।

तात त्वमाप्तोऽसि ममासि भक्तः
शक्तो विपर्यासयितुं जगन्ति ।
त्वदग्रजन्मा भरतो भवादृङ्
मद्वाक्यकारी च मदेकजीवः ।। ३६ ।।

तातस्य वृद्धस्य गिरं निरस्य
भ्रातुश्च राज्यं भरतस्य हृत्वा ।
बन्धेन रुन्धीमहि तं यदीह
तत्पुत्रकामेष्टिफलं किमस्य ।। ३७ ।।

चिराय पुत्रानुपलभ्य तेभ्यः
प्रापापदं पङ्क्तिरथो जरायाम् ।
अकीर्तिमेतां कथमुद्वहामो
द्रुह्याम पित्रे कथमर्कवंश्याः ।। ३८ ।।

पितैव दैवं पितरं भजस्व
पित्रैव पोष्यस्व न चेर्ष्य पित्रे ।
पितुर्विभीयाः पितुरेधि भक्तः
पितर्यभीष्टे पितरोऽप्यभीष्टाः ।। ३९ ।।

पितुः स्त्रियो मातर एव सर्वा
द्वैमातुरा भ्रातर एव सर्वे ।
तत्केकयी मे स्वयमेव माता
भ्राता विशिष्टो भरतो युवाभ्याम् ।। ४० ।।

तन्मातरं भ्रातरमाद्रियस्व
राज्ञः स्थिराज्ञस्य विधेहि वाक्यम् ।
चतुर्दशाब्दा इति देवमाने
चतुर्दशाहानि कियाननेहा ।। ४१ ।।

तीर्णप्रतिज्ञे मयि पूर्णकामे
वनान्निवृत्ते वसुधां निधत्तम् ।
तावद् गुणाढ्यो भरतोऽस्तु राजा
त्वं यौवराज्यं भर वीरभोज्यम् ।। ४२ ।।

मदाज्ञया लक्ष्मण कैकयेयं
ज्येष्ठं प्रतिष्ठापय तातराज्ये ।
तातं समाश्वासय वृद्धमार्त-
मम्बां च सम्बोधय भग्नपक्षाम् ।। ४३ ।।

श्वश्रूषु सक्ता श्वशुरस्य भक्ता
शुश्रूषुरास्तामिह मैथिलीयम् ।
बालामनाथां मदपायभीतां
सीतां सुमित्रां च समं मनुष्व ।। ४४ ।।

श्रुत्वेति रोषस्फुरिताधरोष्ठी
भुवस्तलं पादतलेन हत्वा ।
साश्रुः सकम्पा रुदती हसन्ती
सगद्गदं राममुवाच सीता ।। ४५ ।।

मैवं भणी राम गुणी श्रुतस्त्वं
फणीव मा मुञ्च विषं मुखेन ।
मां लक्ष्मणं तिष्ठतमित्यहो ते
वक्तुं न जिह्रेति कथं नु जिह्वा ।। ४६ ।।

तुभ्यं ददन् मां भवचापभङ्क्त्रे
सीतां किमाभाषत सीरकेतुः ।
बालामनाथां च समर्प्य देव्रे
जटी च चीरी च वनं व्रजेति ।। ४७ ।।

रामायणानीह पुरातनानि
पुरातनेभ्यो बहूशः श्रुतानि ।
न क्वापि वैदेहसुतां विहाय
रामो वनं यात इति श्रुतं मे ।। ४८ ।।

रामो विना लक्ष्मणमेक एव
वनं चचारेति वचो विदूरे ।
मामत्र सौमित्रिमुभौ जिहासन्
जिहासमे शून्यमरण्यमेकः ।। ४९ ।।

अहं च सौमित्रिरपि त्वदाप्तौ
सस्नेहबन्धौ जहिवो नहि त्वाम् ।
विद्याविवेकाविव मूर्तिमन्तौ
प्रभाप्रसादाविव पूर्णचन्द्रम् ।। ५० ।

मां नानुजानासि वनाय गन्तुं
त्वां नाथमन्वेष्यति जीव एषः ।
विषेण यद्वानशनेन यद्वा
रज्ज्वाथवा राघव वर्ष्म जह्याम् ।। ५१ ।।

याते त्वयीतः श्वशुरो म्रियेत
श्वश्रूर्मृताद्याहमियं मुमूर्षुः ।
न लक्ष्मणः स्थास्यति चाध्ययोध्यं
क्वचिद् वनं यास्यति कैकयेयः ।। ५२ ।।

इत्थं कुले नश्यति पश्यतस्ते
का प्रीतिरन्तःकरणे भवित्री ।
विच्छिन्नतन्तौ जनने रघूणां
त्वमेव पिण्डोदकनोदकः स्याः ।। ५३ ।।

अहं कलत्रं सुखदुःखमित्रं
संरक्षकश्चापदि लक्ष्मणस्ते ।
आवामुभौ चेदटवीं नयेथाः
समञ्जसं सर्वमिदं भवेन्नः ।। ५४ ।।

उभौ च दिव्यास्त्रधरौ युवानौ
रक्षोहणौ राघव रक्षतं मे ।
मारीचमुख्यानवधिष्टमाजौ
तेभ्योऽपि तीव्राः किमरण्यहिस्राः ।। ५५ ।।

शृङ्गारशय्यापि विना भवन्त-
मङ्गारशय्या मम रामभद्र ।
अङ्गारशय्यापि सह त्वया चेत्
शृङ्गारशय्या कुसुमास्तृता स्यात् ।। ५६ ।।

मूलं फलं वा मम दिग्गमन्नं
भूमिः शिला वा मृदुतूलशय्या ।
वृक्षस्य मूलं मणिसौधशालं
माह्यं तव स्वर्गसुखात् सुखं मे ।। ५७ ।।

तद्राम भद्रासनवाञ्छयालं
निर्याहि यामो निजसद्म तावत् ।
तत्र स्थितं वस्तु धनं समस्तं
पात्रे प्रदाय प्रविशाम दावम् ।। ५८ ।।

बाला न जानाम्युपचारवाचो
यथार्थमेवाभणिषं पुरस्ते ।
यद् रोचते ते कुरु तद् विचार्य
तावत् प्रमं बोधय तावकीनाम् ।। ५९ ।।

श्रुत्वेति मन्दं स विहस्य राम-
स्तथेति सीतागिरमोमकार्षीत् ।
मूर्छागतां साश्रुरवोचदम्बां
सम्बोधयन् गद्गदरुद्धकण्ठः ।। ६० ।।

समाश्वसिह्यम्ब समाश्चतस्रो
दशापि जानीहि न मां तनूजम् ।
कान्तारतः प्राप्य सहानुजेन
कान्तारतोऽहं करवाणि राज्यम् ।। ६१ ।।

तावत् सुमित्रासहिता कथंचित्
तातं समाश्वासय वृद्धमार्तम् ।
मत्तोऽतिभक्तो भरतस्तवासौ
मत्तः श्रिया नावमनिष्यते त्वाम् ।। ६२ ।।

साकर्ण्य कर्णामृतमात्मजस्य
वाक्यं सरोमाञ्चमपास्त मूर्छाम् ।
जगाद तं जागरणारुणाक्ष-
मुन्मीलिताक्षी परिरभ्य पुत्रम् ।। ६३ ।।

हा वत्स मां त्यक्ष्यसि नोचितं मे
हा राम भिन्ते हृदयं विषादः ।
पुत्रास्त्रयः सन्ति पितुस्तवान्ये
वृद्धस्य को वा त्वदृते ममान्यः ।। ६४ ।।

आराध्य वैभाण्डकिमृष्यशृङ्गं
प्रासोषि पुत्रं पुरुषोत्तमं त्वाम् ।
वनं प्रयाते त्वयि वृद्धयोर्नौ
को वा निवापं कुरुते दुरापम् ।। ६५ ।।

हा राम वत्सेति कमाह्वयेय-
मम्बेति चाह्वास्यति कः सुतो माम् ।
निर्याति गेहात् त्वयि तात रामे
निर्यान्ति देहादसवः पुरा मे ।। ६६ ।।

नाजायथाः क्वापि नरेन्द्रगेहे
राजा यथा तर्हि वसेः स्वगेहे ।
न ह्याशु जह्याः पितरौ च वृद्धौ
न केकयी चेन्नरनाथजाया ।। ६७ ।।

मूलं फलं वा तरुजं तवान्धः
पानाय नानागिरिनिर्झराम्भः ।
भूर्वाथ दूर्वाशवलैव शय्या
ममोदरं राम कथं न दग्धम् ।। ६८ ।।

चीनाम्वरं चित्रपटांश्च हित्वा
चीराम्वरं वत्स कथं वसीथाः ।
सुगन्धिना स्वःकुसुमप्रमोदै-
र्मूर्ध्ना कथं मुग्ध जटा दधीथाः ।। ६९ ।।

त्वं तालवृन्तानिलवीजनार्हः
किं तात हिन्तालवनान्तरेषु ।
शिलासु झञ्झानिलवीज्यमानः
शीतासु सीतासहितः शयीथाः ।। ७० ।।

वृद्धाः प्रबुद्धानभिषिच्य राज्ये
यूनः स्वसूनून् वनमाश्रयन्ते ।
जराविहीनो जरतां रघूणां
कथं पथा राघव सञ्चरेथाः ।। ७१ ।।

भवद्वियोगं न सहे कुमार
पुण्यान्यरण्यानि पुनासि यानि ।
तत्रैव मामर्हसि तात नेतुं
त्वत्संनिधौ वत्स ममास्तु वास्तु ।। ७२ ।।

वात्सल्यतो वत्स वदेयमित्थं
राजावरोधस्य न संभवेताम् ।
अन्यत्र यानं तदसंनिधानं
राज्ञि स्थिरासौ यदि वा परासौ ।। ७३ ।।

तद् याहि दावं तरुणी सपत्नी
हृद्या हि राज्ञाप्यविलङ्घिताज्ञा ।
कामातुरे राजनि कार्यहीने
धर्मार्थयोः का गतिरस्ति राम ।। ७४ ।।

अद्रौ वनद्रौ न यथा प्रमाद-
स्तथा युवां तिष्ठतमप्रमत्तौ ।
वनोत्सुका वत्स भवत्समीपं
मोत्सृज्य वात्सीदितरत्र सीता ।। ७५ ।।

सौमित्रिरग्रे सधनुः प्रयातु
मध्ये च वां मैथिलराजपुत्री ।
पृथ्वीतनूजां पुरतो निधाय
धन्वी भवान् रक्षतु पृष्ठतस्तौ ।। ७६ ।।

त्वमेव शय्यासनभोजनाद्यै-
रक्षान्तिके राघव राजपुत्रीम् ।
युवामुभौ रक्षतु लक्ष्मणोऽसा-
वधिज्यधन्वानतिदूरवर्ती ।। ७७ ।।

उत्साम्बु वत्सौ पिबतं न भूयो
न खादतं कन्दफलाद्यपक्वम् ।
गुल्मानि वल्मीकवपाश्च हित्वा
निद्रात भद्रावधि पर्णशय्याम् ।। ७८ ।।

शार्दूलसंघैः शरभैश्च सिंहै-
र्लुलायभल्लूकमुखैर्मृगाद्यैः ।
मारुण्डभेरुण्डखगैश्च भीमाः
सगण्डका दण्डकभूमिभागाः ।। ७९ ।

सरंहसं संहर सिंहसङ्घं
भल्लेषुणा भल्लुकमुल्लुनीहि ।
लुलायवृन्दानि लुनीष्व बाणै-
र्धुनीष्व दूरादपि दुष्टसत्त्वान् ।। ८० ।।

मा संचरोऽभूदपि मास्तु वास-
स्त्वस्नोरहार्यस्तु पुनः स्नुषायाः ।
भूयाः स्थिरायुर्भुवनं प्रशाधि
प्रयाहि वत्सेति तमुत्ससर्ज ।। ८१ ।।

तथोपदिष्टश्च तथा विसृष्टः
सीतासमेतः सह लक्ष्मणेन ।
मनोरथेनेव ततो रथेन
रामः स्वधाम द्रुतमाजगाम ।। ८२ ।।

तत्रापि द्विजसाद् विधाय सकलं राशीकृतं राघवो
रायं जीवधनं च धेन्वनडुहं दासीस्तथाजाविकम् ।
अर्थिभ्यश्च यथेष्टवस्तु वितरन्नस्तोकमस्तूयत
त्यागी विस्मयमानया जनतया सौमित्रिसीतासखः ।। ८३ ।।

आरुन्धतेयं च वसिष्ठसूनुं
सुयज्ञमभ्यर्च्य ददौ स्वभूपाः ।
हेमासनैर्हेममयैश्च मञ्चैः
पात्रैरमत्रैश्च घटैः कटाहैः ।। ८४ ।।

उद्घाट्य स्वयमुपनीय वस्त्रपेटी-
रानीता जनकगृहादनर्घ्यरत्नाः ।
स्वाकल्पानदित सुयज्ञधर्मपत्न्यै
वैदेही प्रमदविकस्वरायताक्षी ।। ८५ ।।

चूडारत्नं शिरसि दधती मैथिली मङ्गलार्थं
सर्वाङ्गीणाभरणवसना वस्त्रयुग्मं गृहीत्वा ।
साक्षाल्लक्ष्मीरिव मधुभिदः सन्निधौ तस्य तिष्ट-
न्त्युत्तिष्ठेति द्रुतमभिदधे वल्लभं वल्गुवाक्या ।। ८६ ।।

निरदिक्षदगाररक्षिणः
कतिचित् कञ्चुकिनः कुलागतान् ।
जरतीर्जननाथनन्दनो
गृहसंस्कारकरीश्च चेटिकाः ।। ८७ ।।

इयदन्तर एव मन्थरां
प्रजिघाय प्रतिघेन केकयी ।
तरुवल्कधरं रघूद्वहं
त्वरितं निर्गमयेति साग्रहा ।। ८८ ।।

केकयीप्रहितचीवराम्बरो
लक्ष्मणं च परिधाप्य वल्कले ।
आयुधान्युपनयेति तं हस-
न्नादिदेश रघुराजनन्दनः ।। ८९ ।।

लक्ष्मणोऽपि लघुसिंहविक्रमः
कोशगुप्तमसियुग्ममानयत् ।
धन्वनी च शरधी च चर्मणी
वर्मणी च भृतरत्नभर्मणी ।। ९० ।।

पद्भ्यां निर्जिगमिषतां पुरस्त्रयाणा-
माभागीरथि रथसारथिर्भवेति ।
आदिष्टो नरपतिना रथाधिरोही
वैदेहीरमणमतत्वरत् सुमन्त्रः ।। ९१ ।।

रामप्रयाणसमये रघुराजधान्यां
प्राणप्रयाणसमयाभिमुखो जनौघः ।
रामेति राजतनयेति रघूद्वहेति
क्रोशन् मुहुर्मुहुरमुह्यदसह्यशोकः ।। ९२ ।।

लक्ष्मीनारायणाभ्यां नम इति शिरसि न्यस्तहस्तारविन्दे
वन्दाराविन्दुमौलेर्दशरथचरणध्यानशुद्धान्तरङ्गे ।
रामे वामेतराङ्घ्रि निदधति पुरतो राजलोकः सशोको
नालोकं जीवलोकोऽप्यलभत मुमुदे केवलं देवलोकः ।। ९३ ।।

बाष्पवर्षमपतन्नरलोके
पुष्पवर्षमगलत् सुरलोके ।
वन्धुभिर्मुखमताड्यत शोके
दुन्दुभिर्मुहुरताड्यत नाके ।। ९४ ।।

पौरो जानपदश्च रामविरही खिन्तां समन्ताज्जनो
रामो रावणदत्तदारविरहः क्रोधेन सङ्गंस्यते ।
क्रुद्धो दाशरथिः सधन्वशरधिर्हन्ता रणे रावणं
तत्काराग्रहमुक्तदारमिलिताः स्यामेत्यहृष्यन् सुराः ।। ९५ ।

प्रागारुह्य रथं सुमन्त्रसचिवो रामं तमारोहय-
द्रामेणापि करावलम्बनकृता सीता च नीतान्तिकम् ।
अग्रे यन्तुरथोपविश्य कुतुकी वल्गाधरो वल्गतः
सौमित्रिस्तुरगान् प्रगृह्य निरगाद् बिभ्रत् प्रतोदं करे ।। ९६ ।।

राघवौ जनतयाथ ववन्दे
राघवेण जनताभिननन्दे ।
जानकी दृशमदाज्जनबृन्दे
केकयी त्रिभुवनेन निनिन्दे ।। ९७ ।।

कनकरथमारूढो बाढप्रमादपरिष्कृतो
नवजलधरश्यामो रामो ननाम पितुर्गृहान् ।
शरदि सवितुर्मध्येबिम्बं चकासतमानम-
न्त्यमत जनता साक्षान्नारायणं रघुनन्दनम् ।। ९८ ।।

श्वश्रूभिरश्रूणि विमुञ्चतीभि-
रश्रूयतारूढरथेति सीता ।
शुश्राव रामं रथिनं च राजा
सुस्राव चास्रं रुरुदुश्च देव्यः ।। ९९ ।।

योषितां रुदितघोष उद्गतो
दिङ्मुखानि मुखरीचकार सः ।
मन्दरेण गिरिणा यथामरै-
र्मथ्यमान इव दुग्धसागरः ।। १०० ।।

हा राम क्व गतोऽसि वत्स कतरत् कान्तारमागाहसे
कान्तारान्तरगाहिनी तव कथं कान्तावला वत्स्यति ।
सौमित्रे शुभगात्र लक्ष्मण महाबाहो विहायोर्मिलां
क्वारण्ये विचरिष्यसीति विलपन् राजा मुहुर्व्यामुहत् ।। १०१ ।।

रमणीजनो झटिति रामजनन्या-
स्त्वपनीय सौधमुपनीय नरेन्द्रम् ।
व्यजनानिलैश्च जलसीकरसेकै-
रुदजीवयत् प्रियशतैरससान्त्वत् ।। १०२ ।।

हा राम राघव रघूद्वह रामभद्र
राजेन्द्रपुत्र रजनीकरसौम्यवक्त्र ।
नार्तौ जहीहि पितरौ नगरीमनाथां
कस्मै ददासि भरतोऽपि न राज्यकामः ।। १०३ ।।

शिशवः कृतजागरोपवासा
निरगुः पारणया विनैव पापे ।
कठिनं हृदयं कथं न दीर्ण
तव कैकेयि कथं नु रुच्यमन्नम् ।। १०४ ।।

वैकल्ये सति हृदये सशोकशल्ये
कौसल्ये जननि कथं जिजीविषा ते ।
द्रष्टासि क्व नु सखि लक्ष्मणं सुमित्रे
भर्त्रा त्वं कथय कदोर्मिले मिलेथाः ।। १०५ ।।

जाल्मौ स्थो जगति वसिष्ठवामदेवौ
मा धर्मं त्यजतमशोकधर्मपालौ ।
मा रामं नय विपिनं सुमन्त्र यन्त-
र्व्यक्रुक्षन्निति विगणौ विलुप्य पौराः ।। १०६ ।।
(कलापकम्)

रामे जगदभिरामे
विमतविरामे विनिर्यति द्विजवर्याः ।
द्रुहिणसदृक्षा गृहिणः
स्वयमपि निरगुः सपुत्रमित्रकलत्राः ।। १०७ ।।

अश्वीयरथ्यागजताविहीना
रथ्या लुठत्पौरकृतार्तनादा ।
अचन्द्रतारेव निशान्धकारे
ममज्ज शोकाम्बुनिधावयोध्या ।। १०८ ।।

वृद्धान् निवर्तध्वमिति प्रणम्य
बद्धाञ्जलिस्तिष्ठत तिष्ठतेति ।
शुद्धान्तरङ्गः प्रवदन् प्रियाणि
रामः सरामो निरगान्नगर्याः ।। १०९ ।।

आध्वमाध्वमटवीषु कदध्वा
तातमातुरमुपाध्वमुपाध्वम् ।
यात मा तमत मा तमतेति
प्राञ्जलिर्मुहुरभाषत बन्धून् ।। ११० ।।

प्रसह्यानुयातो जनौघानशक्तः
सदारो निषेद्धु निपण्णः कुमारः ।
स्वयं चानिषिध्यानुरक्तान् स्वबन्धून्
कथंचिद् रथं चोदयामास सूतः ।। १११ ।।

वृद्धबालवनिताजनान्वित-
श्चिन्तयंश्च पितरौ चिरन्तनौ ।
स्यन्दनेन रघुनन्दनस्ततः
स्यन्दिकामभिजगाम निम्नगाम् ।। ११२ ।।

अत्रान्तरे परिणतो दिवसस्तदानी
पर्यस्तलोहितसमस्तगभस्तिजालः ।
अस्ताद्रिमस्तकमहास्त मयूखमाली
लाक्षरसद्युतिरभूदपरोर्मिमाली ।। ११३ ।।

अजनि जनताचेतोरागः समेत्य दिनात्यये
व्यगलदखिलः संध्यारागो मुहूर्तविसृत्वरः ।
तिमिरपटलं तिर्यक् सान्द्रं तिरोहितदिक्तटं
गगनकुहरे तारराजिर्व्यराजत सर्वतः ।। ११४ ।।

स्यन्दिकापयसि वन्दितसंध्यः
सानुजः सदयितो रघुनाथः ।
अद्भिरेव कृतपारण आसी-
दद्भुतं तदभवद् भुवि भूयः ।। ११५ ।।

नागरा भुवि निपत्य जागरा-
मासुरुद्वलितदुःखसागराः ।
तारकात्ययनिमीलितेक्षणा
निद्रया परिवभूविरेऽखिलाः ।। ११६ ।।

अद्रिजापतिरशेत हिमाद्रौ
श्रीपतिश्च हरिरप्सु निदद्रौ ।
राघवस्त्वचमवस्त विधि को
लङ्घयेदिति जगाद जनौघः ।। ११७ ।।

अश्वपार्श्वशयितस्य मारथे-
रग्रतः समवसत् स लक्ष्मणः ।
तौ च वल्कलकृतावगुण्ठनौ
दम्पती अधिरथं निदद्रतुः ।। ११८ ।।

स्वप्नजः पुरजनस्य समूहे
राघवोऽपि महती धृतिमूहे ।
जाग्रदेव निषसाद सुमन्त्रः
स्वामिनीतिनिहितः स सुमन्त्रः ।। ११९ ।।

सीतया सह गहनं गतवति रघुतिलके
हा हते हतविधिना दशरथजनककुले ।
सारथाविति रुदिते विलपति सकलजने
सा निशा विधुरदशा समजनि मुखरदिशा ।। १२० ।।

इति श्रीकविमल्लाचार्य(-शाकल्य-मल्ल-)विरचिते
उदारराघवे पञ्चमः सर्गः ।। ५ ।।

षष्ठः सर्गः ।

अर्धरात्रसमयेऽथ विनिद्रो
दुर्धरात्र जनतेति स रामः ।
वञ्चिताखिलजनो वनराजी-
राडुढौकिषुरगाढ दुरध्वम् ।। १ ।।

प्रववृते स वनाय रघूद्वहो
निववृते भवनाय महाजनः ।
रथगतो रविवद् रुरुचे रुचा
पुरगतः स्वगृहे जगृहे शुचा ।। २ ।।

आरण्यकानि मृगपक्षिरुतानि शृण्वन्
प्राभातिकेन पवनेन निषेव्यमाणः ।
रामो जगाम जलजानि सरस्सु जिघ्रन्
शीघ्रं महत्तरमरुत्तरमा रथेन ।। ३ ।।

अस्तावलम्बिनि शितत्विषि शीतभानौ
भानूदये भगवतीमुषसं ववन्दे ।
स व्यञ्जलं जलमहर्पतयेऽर्पयित्वा
पश्चादनारतगतिर्गहनं जगाम ।। ४ ।।

अह्नोऽवसानसमये स ददर्श दूरे
जह्नोः सुतां जगदघक्षयहेतुभूताम् ।
तत्तीरसीमनि किरातपतेर्गृहस्य
तुङ्गध्वजं नगरमैक्षत शृङ्गबेरम् ।। ५ ।।

शृङ्गबेरनगराधिनायकः
शृङ्गकाहलनिनादसंभ्रमी ।
राघवौ दशरथात्मजौ तदा
द्रष्टुमागमदभीष्टदर्शनः ।। ६ ।।

दूरतोऽश्वमवरुह्य पदातिः
पञ्चषैः शवरनायकमुख्यैः ।
वस्तु वन्यमुपदाय विनीतो
नामजातिमभिधाय ननाम ।। ७ ।।

स्वीकृत्य गङ्गातटसीम्नि तं गुहं
किरातराजेन पदातिनान्वितः ।
यन्त्रा सुमन्त्रेण विमोच्य वाजिनः
पपौ च रामः प्रियया समं पयः ।। ८ ।।

गाङ्गं दापय सलिलं
गन्धर्वानिति सुमन्त्रमादिश्य ।
तापसतरुमूलभुवं
प्राप स रामः स्वरामया सार्धम् ।। ९ ।।

पल्लवमयासनस्थं
फुल्लमुखं वीक्ष्य पुण्डरीकाक्षम् ।
हल्लोहलमाकलयन्
भिल्लो भल्लीमुपायनीचक्रे ।। १० ।।

तस्मिन्ननेहस्यधिवृक्षसूर्ये
सूर्योढमभ्यर्चयितुं कुमारम् ।
पुरप्रवेशाय रघुप्रवीर-
माह्वद् गुहः प्राञ्जलिरग्रतःस्थः ।। ११ ।।

अभणीदथ तं समन्दहासो
मधुरं मानवसार्वभौमसूनुः ।
न वयं नगरं प्रवेष्टुमर्हा-
श्चतुरोऽब्दान् दश चाटवीमटामः ।। १२ ।।

नास्महे नगरसीम्नि न वस्त्रं
वस्महे विहितभस्मविलेपाः ।
मातिगाम गुह मातरपित्रो-
र्वृद्धयोर्वचनमादरणीयम् ।। १३ ।।

भरताय नीतिनिरताय मे पिता
वितरीतुमैहत धराधिपतित्वम् ।
विपिने चतुर्दश समा जटिलस्त्वं
विहरेति मामनुजयुक्तमदिक्षत् ।। १४ ।।

राजा यदाजाह्नवि सालचिह्नं
सुमन्त्रसूतं रथमादिशन्मे ।
प्रातस्तमेनं प्रहिणोमि साश्वं
बद्ध्वा जटाः श्वो विपिनं विविक्षुः ।। १५ ।।

भृशमक्षुधन् पथि नितान्तमश्रम-
न्नथ वाजिनो रयघनश्रमाम्भसः ।
हरितं तृणं च हरिमन्थकानपि
त्वरितं समानय वयं समागताः ।। १६ ।।

इति रामगिरामनन्तरं
तृणभारांश्चणकानदाद् गुहः ।
रथसारथिरप्यसिष्णपत्
तुरगानुष्णकरावपीडितान् ।। १७ ।।

अथ पश्चिमाद्रिमगमद् रुचां पतिः
परिफुल्लहल्लकदलारुणच्छविः ।
अपरे च मङ्क्षु निमिमङ्क्षरम्बुधौ
वरुणाय शंसितुमुदारराघवम् ।। १८ ।।

पश्चिमवारिराशिपतिते भगवति महसां
भर्तरि हर्तरीति तमसां दशशतकिरणे ।
पक्षिकुले कुलायनिलयानभिपतति शनै-
श्चन्दनशैलमन्दपवनः समगत सरिता ।। १९ ।।

सत्वरमुत्थितो रघुपतिः सममनुजनुषा
जह्नुसुतां धुनीमुपगतो जनकतनुजया ।
अर्घ्यजलं प्रदाय रवये पुनरपि तदगा-
च्छोधितमिङ्गुदीतरुतले किसलयशयनम् ।। २० ।।

कोकव्राते विरहिणि विधुरे
शोकक्लिष्टे विरटति सरिति ।
लोकव्याप्ते तमसि च वहले
नो कस्यापि प्रियमजनि दृशोः ।। २१ ।।

भिल्लं वीक्ष्य प्रियमतनीरस्माकं
याहीदानी गुह नगरीमात्मीयाम् ।
इत्यादिक्षद् रघुपतिरत्यासन्नं
प्रत्यादिक्षत् स च नरपत्यादेशम् ।। २२ ।।

न याम्यहं राघव शृङ्गबेरं
न याथ यूयं पुनरप्ययोध्याम् ।
लोकोत्तरे त्वय्यटवीं प्रविष्टे
लोकाधमो यामि कथं पुरं वा ।। २३ ।।

जरन् पिता ते जगदीश्वरोऽपि
जानाति किं कि जरठो वसिष्ठः ।
अमात्यमौख्यादधिकारिमौग्ध्या-
दाढ्यंभविष्णुस्त्वमरण्यमागाः ।। २४ ।।

निष्कासनस्थस्य निरागसस्ते
निष्कासनं केन भवेन्नगर्याः ।
कामान्धवाक्यैस्त्वमिमां धरित्रीं
करस्थितामुज्झसि कात्र बुद्धिः ।। २५ ।।

एषोऽनुजः शिशुरियं च वधूर्नवोढा
वोढा भुवस्त्वमटवीमटथ त्रयोऽमी ।
वृद्धः पिता यमसमीपगतः समर्थो
भर्ता भुवः क्व भरतः परदेशवर्ती ।। २६ ।।

अतो निवर्तस्व पुनः पुरीं स्वा-
मात्मानमायासयसे किमर्थम् ।
वधूप्रलापेन वृथा निरागाः
सजानिरागाः सह सोदरेण ।। २७ ।।

किरातसैन्यैर्बहुभिर्मदीयै-
र्धाम त्वदीयं रुणधाम राम ।
निष्कारणं त्वत्प्रतिपक्षबुद्धीन्
निष्कासयामो भरतस्य बन्धून् ।। २८ ।।

तव शिरसि जटानां बन्धनं कारयित्रो-
श्चरणनिगडबन्धं कारयिष्यामि पित्रोः ।
प्रविश पुनरयोध्यां पालयानन्ययोध्यां
रणभुवि करणीयाः खण्डशो दण्डसाध्याः ।। २९ ।।

शतानि नावामिह पञ्च सन्ति मे
प्रतिन्वमी पञ्चशतानि नाविकाः ।
धनुर्धराश्च प्रतिनाविकं भटाः
सहस्रसंख्याः समरानिवर्तिनः ।। ३० ।।

कर्बुरदोर्बलचण्डाः
कर्बुरखर्जूरखचितकोण्डडाः ।
अर्बुदमिह सन्ति भटा
न्यर्बुदमपि मे वनाद्रिसंचाराः ।। ३१ ।।

ससारथौ दाशरथौ रथस्थे
सज्जो रथेनैकरथोऽस्मि धन्वी ।
किरातसैन्यं च ममाप्रमेय-
मभिप्रतिष्ठम्व पुनः पुरी स्वाम् ।। ३२ ।।

श्रुत्वेति वाक्यं शवराधिपस्य
हृष्टौ च दृष्ट्वानुजसारथी तौ ।
मन्दं हसन् मन्दरशैलधीरो
रामो वभाषे रघुवंशदीपः ।। ३३ ।।

भक्तोऽसि शक्तोऽसि ममानुरक्तो
दासो निषादाधिप शाधि राज्यम् ।
वनेचराणां वनगोचराणा-
मेकोऽसि राजा गुह नः सहायः ।। ३४ ।।

कुलोचितं वक्षि वलोचितं च
गङ्गाप्रतीर्णो भव कर्णधारः ।
सत्यव्रतानां सततं रघूणां
वालेषु वृद्धेषु च नास्त्यसत्यम् ।। ३५ ।।

व्यतिव्रजेतां यदि पुष्पवन्तौ
खान्निष्पतेयुर्निखिलाश्च ताराः ।
मेरुश्चलेदप्यनलोऽस्तु शीत-
स्तदा न मिथ्या रघवो वदन्ति ।। ३६ ।।

दत्त्वा वरं केकयनन्दनायै
दद्यात् कथं नाद्य पतिः प्रजानाम् ।
वनं व्रजामीति निरेत्य रामः
कथं निवर्तेय जनापहास्यः ।। ३७ ।।

पितरौ हि गुरू ममानुरोध्यौ
तदयोध्याममुचं तदाज्ञयाहम् ।
समचीवरयावहै स्वपूर्या-
मिह तु श्वो भविता जटाभरो नौ ।। ३८ ।।

तद् याहि निद्राहि निजालये श्वः
प्रातर्नदीं तारय नाविकास्मान् ।
रथं पुरं नेष्यति राजसूत-
स्त्वमप्यधिष्ठास्यसि शृङ्गबेरम् ।। ३९ ।।

इति ब्रुवाणं प्रणिपत्य राम-
मुत्थाय धन्वी कवची निषङ्गी ।
सौमित्रिणा सार्धमुवास जाग्रत्
सन्नाहिना वृक्षतले निषण्णः ।। ४० ।।

कथाविशेषान् कथयन् गुहाय
तस्थौ च सौमित्रिरधिज्यधन्वा ।
रथान्तिके पल्लवक्लृप्तशय्य-
श्चिन्ताकुलः सन् न्यषदत् सुमन्त्रः ।। ४१ ।।

प्रवालशय्यामधिशय्य रात्रौ
वल्कावगुण्ठी वनशाखिमूले ।
इष्वासतूणीरकृतोपधानः
सुष्वाप रामासहितः स रामः ।। ४२ ।।

प्रवालशयनं तदा रघुपतेः
फणीन्द्रशयनं बभौ तरुतले ।
तदङ्घ्रिविनिपीडनं विदधती
बभूव जनकात्मजा जलधिजा ।। ४३ ।।

सदारे कुमारे वनद्रौ शयाने
विशद्रौ सुमन्त्रे निषद्रौ रथाग्रे ।
विषण्णे निषण्णे निषादाधिनाथे
व्यतीयाय रात्रिः कथंचित् कराला ।। ४४ ।।

उषसि मरुति मन्दं वाति मन्दारमाला
कलकलयुतकाकव्यूहकोलाहलेन ।
जनकतनुजयासौ जागरामास रामो
मुकुलितकरपद्मो मूर्ध्नि गङ्गां ववन्दे ।। ४५ ।।

उदयशिखरिशृङ्गासङ्गिनि द्वादशात्म-
न्यरुणकिरणजालैः किंचिदभ्युज्जिहाने ।
सुरसरिति स रामः प्रातरस्नात् सरामः
सपदि सहसुमन्त्रो लक्ष्मणश्चोक्तमन्त्रः ।। ४६ ।।

नैयग्रोधं क्षीरमानाय्य गङ्गा-
रोधस्यारात् कर्णधाराधिपेन ।
भृङ्गश्रेणीमेचकानीचकान्तिं
वेणीं कर्तुं केशपाशं ममोच ।। ४७ ।।

सरोजनेत्रस्य पुरोजनेस्ततो
जटाकलापं विरचय्य लक्ष्मणः ।
बबन्ध यत्नेन च तादृशं तदा
पुरःस्थितः शोचति भूतपञ्चके ।। ४८ ।।

त्रस्ता शिरस्ताडयति स्म सीता
लुलोठ भूमौ विलपन् सुमन्त्रः ।
हन्तुं स्वमात्मानमुदायुधः सन्
बलाद् गुहो बन्धुतया न्यषेधि ।। ४९ ।।

तटस्थसिद्धर्षिकुटुम्बिनीना-
मबालवृद्धं रुदतां जनानाम् ।
भिल्लाङ्गनानां बहुबाष्पपूरै-
र्गङ्गाप्रवाहो द्विगुणीबभूव ।। ५० ।।

न साश्रवो रथ्यहया जिहेषिरे
बभाषिरे नौषु मिथो न नाविकाः ।
तटद्रुमस्थाश्च विरेटुरण्डजा
मृगाश्च बाष्पान् मुमुचुः शुचान्विताः ।। ५१ ।।

उपारतायां रुदतां जनानां
भागीरथीरोधसि बाष्पवृष्टौ ।
जटासु बद्धासु नरेन्द्रसून्वोः
पपात खान्नन्दनपुष्पवृष्टिः ।। ५२ ।।

ततः समाहूय हसन् प्रसन्नधीः
सुमन्त्रमार्येति स मन्त्रकोविदः ।
करेण बाष्पं परिमृज्य तन्मुखे
जगाद मन्दं जननाथनन्दनः ।। ५३ ।।

किं रोदिषि प्राकृतवद् भवद्भिया
प्रशास्त्ययोध्यां प्रवयाः पिता मम ।
वन्यां यियास्वोर्वद बुद्धिमावयो-
र्वनाद् यथावां पुनराजिहीर्षहि ।। ५४ ।।

तत् सारथे सज्जय सज्जयावहं
शताङ्गमश्वैः शतयोजनातिगैः ।
अद्यैव साकेतमुपेहि संगवे
तथास्थितं तातमुपेत्य सान्त्वय ।। ५५ ।।

यथा मयि प्रोषुषि पुत्रवत्सलः
पिता न जह्याद् वपुरामदागमम् ।
तथा वसिष्ठो भगवान् पुरोहित-
स्तिरोहितो मा क्षणमप्यवस्थित ।। ५६ ।।

प्राणान् विमुञ्चेद् यदि गाधमू च
क्षणं न पश्येज्जरती मभाम्बा ।
तदाशु गत्वा शुचमुल्लुनीहि
मन्नाम पित्रोः सतनं जपित्रोः ।। ५७ ।।

प्रणिधिभिरानयताविरत
मुकलाभिरतं सकलाभिमतम् ।
झटिति युधाजिदगारगतं
रथवाजिमदेभरतं भरतम् ।। ५८ ।।

स च परमेष्ठिसुतस्य वसिष्ठ-
मुनेरनुतिष्ठतु सुष्ठु गिरम् ।
पितुरधितिष्ठतु राज्यपदं
नयनिष्ठपटिष्ठयविष्ठसखः ।। ५९ ।।

इति रामवचो निशम्य सूतः
कृतसाष्टाङ्गनतिश्चिरं रुदित्वा ।
रथनद्धतुरङ्गमः प्रतस्थे
नगरं गन्तुमनाथवत् सुमन्त्रः ॥ ६० ॥

रथकिङ्किणीघणघणारवमारा-
दनिशम्य तद्रथरजोऽप्यनिशाम्य ।
इतरेतराननविलोकनखिन्ना
स्त्रय एव सिन्धुतटसीमनि तस्थुः ॥ ६१ ॥

रथयानमंजनितबाष्पलोचनौ
विपिनोत्सुकौ तदनु रामलक्ष्मणौ ।
अवलोक्य चीरवसनौ जटाधरौ
स गुहः शुचा सरिति मङ्क्तुमैहत ॥ ६२ ॥

अश्रुदूषितमचिक्षलन्मुखं
जाह्नवीपयसि जानकीपतिः ।
कर्णधारपतिमर्णसस्तटे
दुःखितं सकरुणं स सान्त्वयन् ॥ ६३ ॥

अब्रवीच्च गुह मा वृथा रुद-
श्चारु दर्शयितुमर्हसि प्रियम् ।
नावमानय तरीतुमापगा
नावमानय गिरं कदापि नः ॥ ६४ ॥

आतरं कलय मे निजसख्यं
कातरं भवति किं तव चेतः ।
प्रातरंहय गुहापरतीरं
भ्रातरं भरतवत् कलये त्वाम् ॥ ६५ ॥

इह नन्द सुखी गहनं गुह नः
श्रयणीयमितो नहि मा निवृतः ।
प्रतिवृत्य भजेयमदम्भवता
भवता भरतेन च राज्यपदम् ।। ६६ ।।

परं पारमस्मासु यातेषु नावा
विनावाममूभिश्चमूभिर्निवृत्तः ।
दश त्रीणि चैकं च वर्षाणि ताव-
न्मदीक्षां प्रतीक्षस्व यावन्निवर्ते ।। ६७ ।।

श्रुत्वेति तद्रामवचो बभाण
निषादराजः सविषादबाष्पः ।
चतुर्दशाब्दापगमे न चेत् त्वां
द्रक्ष्यामि वेक्ष्याम्यनलं तदेति ।। ६८ ।।

आनाय्य नावं पटुकर्णधारै-
रारोप्य तास्तारयति स्म गङ्गाम् ।
ततः प्रवेशादपि शृङ्गबेर-
मगाद् गुहो गद्गदरुद्धकण्ठः ।। ६९ ।।

ततो भरद्वाजमुनिं प्रणम्य
तत्प्रार्थितः सानुजनिः सजानिः ।
वन्याशनं प्रत्यवसाय रामो
मुन्याश्रमे तां रजनीं निनाय ।। ७० ।।

प्रातर्मुनीन्द्रं प्रणिपत्य राम-
स्तच्छिष्यमंदर्शितया सरण्या ।
गत्वा व्यतीयाय तृतीययामे
यमस्वसारं यमुनामनौकाम् ।। ७१ ।।

तृण्मयं कीचकदारुनद्धं
संघाटमारोप्य विदेहपुत्रीम् ।
उभावुभाभ्यामुडुपं नुदन्तौ
दोर्भ्यामुभाभ्यामनुतेरतुस्तौ ।। ७२ ।।

उडुपाङ्कगतोडुपाननामौ
ललना सौरभवासितापगापा ।
अभयं कुरु देवि नस्त्रयाणा-
मिति तां सूर्यसुतां सती ववन्दे ।। ७३ ।।

तटं गत्वावाच्यं तपनदुहितुस्ते त्रयः श्यामनाम्नो
वटस्याधः स्थित्वा प्रहरमहरन्तारुणे पश्चिमाब्धौ ।
पतत्युष्णद्योते भगवति कवेरादिकाव्यप्रबन्धुः
प्रदोषे निर्दोषां वसतिमगमन् वामलूरोद्भवस्य ।। ७४ ।।

कृतसत्कृतयः कृतिना व्रतिना
मुनिना कविना धनिना तपसा ।
रजनीमतिवाह्य परोरजसं
निजसंततिमूलमुपस्यनमन् ।। ७५ ।।

वाल्मीकिनाथ प्रहितः प्रभाते
वनानि पश्यन् वनितासमेतः ।
सौमित्रिणाधिज्यशरासनेन
जगाम रामो दिशि दक्षिणस्याम् ।। ७६ ।।

गिरिमथ चित्रकूटमवलोक्य विलोक्य तटं
तटभुवि पुण्डरीकहरिकेसरिसंकुलितम् ।
तमधिरुरुक्षति स्म तरक्षुतरःक्षुभितं
दशरथनन्दनोऽपि मिथिलाधिपनन्दनया ।। ७७ ।।

अग्रे च सौमित्रिरधिज्यधन्वा
ततश्च सीता तरलायताक्षी ।
ततः स रामः स्वयमात्तचाप-
स्त्रयोऽध्यरुक्षन्निति चित्रकूटम् ।। ७८ ।।

मनोरममहीतलं समवलोक्य शृङ्गे गिरे-
र्गरीयसि कनीयसा रचितपर्णशालालयः ।
उवास रघुनन्दनो जनकनन्दनासंयुतः
प्रियंकरणतापसद्विजजनप्रियंभावुकः ।। ७९ ।।

इति श्रीकविमल्लाचार्य(-शाकल्य-मल्ल-)विरचिते
उदारराघवे षष्ठः सर्गः ।। ६ ।।

सप्तमः सर्गः

चित्रकूटमधितिष्ठति रामे
पुत्रशोकविधुरो धरणीशः ।
नन्दनस्य वनवृत्तिमवैतुं
स्यन्दनस्य परिवृत्तिमकाङ्क्षीत् ।। १ ।।

पञ्चमेऽह्नि विनिवृत्य सुमन्त्रः
प्राविशत् पुरमुदश्रुरयोध्याम् ।
रामलक्ष्मणविनिर्गमदूनां
द्यामिव द्युमणिचन्द्रविहीनाम् ।। २ ।।

राजहंसरहितामिव वापी
रत्नदीपरहितामिव शालाम् ।
स्वर्णदीमिव सुरद्विपशून्या
वीतकोकिलशुकामिव वन्याम् ।। ३ ।।

हीनहेषितविषण्णतुरंगा-
मस्तबृंहितसमस्तगजेन्द्राम् ।
आपणेषु परिहीनपदार्थां
मङ्गणेष्वनुषितार्जकसार्थाम् ।। ४ ।।

रङ्गवल्लिरहिताङ्गणरथ्यां
धूलिधूसरवधुमुखचन्द्राम् ।
लुप्तसर्जरसगुग्गुलुधूपां
मन्दिरोज्झितमहामणिदीपाम् ।। ५ ।।

देहलीष्वनिहिताक्षतसूनां
शान्तदेवगृहनर्तनगानाम् ।
वीतवारवनिताकरताल-
त्यक्तनृत्यमदमत्तमयूराम् ।। ६ ।।

तां प्रविश्य शतशो हृतशोभान्
नागरानपि निरीक्ष्य सलज्जः ।
न क्वचिन्निहितवान् निजदृष्टि
राजवर्त्मनि जगाम सुमन्त्रः ।। ७ ।।

त्वं रथेन रघुनाथमनैषीः
सारथे क्व नु विहाय तमागाः ।
इत्युदीरयति पौरसमाजे
नोत्तरं क्वचिददत्त सुमन्त्रः ।। ८ ।।

मन्दिरं नरपतेरुपगम्य
स्यन्दनं तु बहिरेव निधाय ।
मन्दुरापितहयो नरनाथं
तं दुरन्तशुचमीक्षितुमागात् ।। ९ ।।

अन्तरेत्य रुदितं मुदतीना-
माचकर्णदवरोधवधूनाम् ।
मञ्चपार्श्वमुपगम्य विसंज्ञं
तं च पार्थिवमवन्दत सूतः ।। १० ।।

स्तम्भमूलमुपगम्य विषण्णः
स्थण्डिलं निकटमीम्नि निषण्णः ।
राममातरमपृच्छदिदानी
स्वामिनः कथमिवाम्ब दशेति ।। ११ ।।

साधिमञ्चमुपविश्य समीपं
वीजयन्त्यधिपति व्यजनेन ।
मन्दमभ्यधित कोसलपुत्री
मन्त्रिणं रघुपतेर्जनयित्री ।। १२ ।।

निर्गता नगरतोऽहनि यस्मिन्
वत्सका मम वनोत्सुकचित्ताः ।
निर्गतो निशमयन् रथघोषं
द्वारदेशमगमत् त्वरयैषः ।। १३ ।।

स्यन्दनेन रघुनन्दनमग्रे
नीयमानमवयन् भवतैव ।
राम राम रमणीय गुणाब्धे
राघव क्व चलसीति पपात ।। १४ ।।

द्वारसीमनि लुठन्तमिलाया-
मानयन्त महिला मम सौधम् ।
मञ्चकेऽत्र विनिपत्य रुदन्त्यो
मूर्छितं मुहुरमूरससान्त्वन् ।। १५ ।।

तत्प्रभृत्ययमनुन्मिषिताक्षो
नेक्षते किमपि नैव शृणोति ।
रोदिति श्वसिति न स्वपितीष्टे
चेष्टितु न च निरिन्द्रियचेष्टः ।। १६ ।।

क्वासि वत्स रघुनन्दन रामे-
त्येकदा वदति जातविबोधः ।
अन्यदा वदति केकयि किं ते
राघवेण कृतमाग इहेति ।। १७ ।।

तल्पतः पतति लुठ्यति भूमौ
तल्पमेव पुनरप्यधिशेते ।
जल्पतः प्रतिवचो न जनस्य
स्वल्पमप्यभिदधाति विसंज्ञः । १८ ॥

रामनाम यदि कोऽप्यभिधत्ते
कुत्र राम इति मार्गति दिक्षु ।
त्वं च राम इति यद्यवदिष्यः
प्रत्यभोत्स्यत वचोऽप्यभणिष्यत् ॥ १९ ॥

तन्निशम्य वचनं स च तस्या
हृद्गतस्खलितगद्गदकण्ठ्याः ।
तं बुबोधयिषुरम्बु च दृग्भ्या-
मुत्सृजन्निदमुवाच सुमन्त्रः ॥ २० ॥

राम राम रमणीजनकाम
श्यामतामरसकान्त्यभिराम ।
रामणीयकनिधे बहुधामन्
प्रीतिधाम भव राजललाम ॥ २१ ॥

राम राम वदतीति सुमन्त्रे
क्वासि राम वद मामिति राजा ।
उत्थितः शयनमध्यनिषण्णः
सन्नकण्ठमभणद् धृतधैर्यः ॥ २२ ॥

सारथे कथय कुत्र कुमारौ
सा जनी च जनकेन्द्रकुमारी ।
सासवः किमु वसन्ति वनान्ते
शीतवाततपनातपतान्ताः ॥ २३ ॥

अद्य पञ्चममहः सहजाने-
निर्गतस्य नगरान्नहि जाने ।
वृत्तमुत्तमगुणस्य शिशोर्मे
सानुजस्य मुनिवेषधरस्य ।। २४ ।।

ब्रूहि वृत्तमखिलं पृथुकानां
काननानि वद कानि भजन्ते ।
त्वां च मां च न सुमन्त्र कथं वा
केकयी च जनबृन्दमनिन्दीत् ।। २५ ।।

पृच्छतीति पृथिवीभुजि सूतः
पौरजानपदवञ्चनपूर्वम् ।
अर्धरात्रसमये रथयानं
यानमप्यविरतं च शशंस ।। २६ ।।

शृङ्गबेरनगराधिपसङ्गे
तस्य रथ्यहरिमन्थकदानम् ।
पत्तनाय पुनरागमनार्थं
प्रार्थनामकथयच्च गुहस्य ।। २७ ।।

इङ्गुदीतरुतले च रजन्यां
राघवस्य शयनं सह देव्या ।
नातिदूरतरुमूलनिवासं
लक्ष्मणस्य च गुहस्य च चख्यौ ।। २८ ।।

आत्मनोऽपि तृणपल्लवशय्या-
माश्रितस्य रथधुर्यसमीपे ।
अध्ययोध्यमवनीश्वरचिन्ता-
विह्वलस्य निशि जागरमाख्यत् ।। २९ ।।

जाह्नवीपयसि चाह्निककृत्यं
स्नानपूर्वमखिलं कथयित्वा ।
रामलक्ष्मणपरस्परवेणी-
बन्धदारुणकथां च तदाख्यत् ।। ३० ।।

तज्जटानहनजानि जनानां
क्रन्दितानि करुणान्युदभूवन् ।
न श्रुतः किमिह तद्ध्वनिरुच्चै-
र्नागरैरिति रुरोद सुमन्त्रः ।। ३१ ।।

सारथौ रुदति सौधगतानां
योषितां रुदितघोष उदस्थात् ।
वत्स राम जटिलोऽसि वनान्ते
वल्कलीत्यरुददैन्दुमतेयः ।। ३२ ।।

सूत शेषमपि मे सविशेषं
ब्रूह्यतः किमकरोत् स तपस्वी ।
लक्ष्मणः कथमभूत् कथमासी-
न्मैथिलीति नृपतिस्तमपृच्छत् ।। ३३ ।।

सोऽभ्यधात् तरुणतापसवेषौ
वीक्ष्य तौ जनकजा भयभीता ।
ताडयन्त्यथ शिरो यदरोदीत्
तेन भूः स्फुटति शीर्यति च द्यौः ।। ३४ ।।

आननं भुवि निपत्य कराभ्या-
माघ्नती दशरथं जनकं च ।
आह्वयन् मुहुरनाथवदार्ता
राघवेण समबोधि मुहूर्तात् ।। ३५ ।।

प्रेक्ष्य तामहमलोटिषमुर्व्यां
मङ्क्तुमैहत गुहः सुरसिन्धौ ।
वृद्धवद् रघुपतिः स्वयमस्मा-
नेक एव समबोधि यदार्तान् ।। ३६ ।।

मां प्रबोध्य परिरभ्य सुमन्त्र
त्वं प्रयाहि पितुरेव समीपम् ।
जाह्नवीसरितमत्र तरीतुं
नावमानय गुहेत्यशिषन्नौ ।। ३७ ।।

मामवेक्ष्य पितरौ मम वृद्धौ
सान्त्वय प्रणमतो मम वाचा ।
आगताय भरताय च राज्यं
दत्त मन्त्रिण इतीरय सर्वान् ।। ३८ ।।

क्ष्मां प्रशास्तु भरतः पितृदत्तां
शासितुं सकलमर्हति राज्यम् ।
लक्ष्मणावरजनिर्भरतेऽपि
प्रेमभक्तिविनयान् वितनोतु ।। ३९ ।।

केकयीमनममार्यं सुमित्रा-
मप्यनंसिषमवन्दिषि चाम्बाम् ।
तं वसिष्ठमभिवाद्य गरिष्ठं
मन्त्रिणामकृषि चाञ्जलिबन्धम् ।। ४० ।।

याहि सज्जय शताङ्गमयोध्या-
मद्य सायमुपयाहि सुमन्त्र ।
इत्युदीर्य परिरभ्य पुनर्मा
प्राहिणोदहमिहाद्य समागाम् ।। ४१ ।।

मद्रथे चलति जाङ्घिकधुर्ये
कर्णधारपतिरप्यथ नावा ।
तारयेत् त्रिपथगां सरितं तान्
स्वालयांश्च मुनयोऽपि नयेयुः ।। ४२ ।।

दक्षिणां दिशमुपेष्यति रामो
दण्डकावनमभीति करिष्यन् ।
तत्कृते खलु विलप्य नरेन्द्र
स्वास्थ्यमेव भज मात्र चिचिन्तः ।। ४३ ।।

इत्युदीरयति राजविसृष्टे
निर्गते च निलयाय सुमन्त्रे ।
पूर्ववच्छयन एव निपत्य
श्वासमात्रविधृतासुरभूत् सः ।। ४४ ।।

अर्धरात्रसमयेऽथ स राजा
राघवं हृदि विचिन्त्य विचिन्त्य ।
निद्रितासु वनितासु शरीरं
निर्गतासुरधिमञ्चममुञ्चत् ।। ४५ ।।

प्रत्युषस्यतिनिमीलितनेत्रं
वीक्ष्य तं शयननिश्चलगात्रम् ।
योषितो झटिति भूमिमनैषु-
र्हा हता स्म इति चुक्रुशुरुच्चैः ।। ४६ ।।

केकयीवदनसारितहस्ताः
काश्चिदाहतकुचा रुरुदुस्ताः ।
मथ्यमान इव मन्दरघातै-
रध्वनन्निधिरपामिव सौधः ।। ४७ ।।

संभ्रमात् प्रकृतयः क्षितिदेवा
वामदेवसहितश्च वसिष्ठः ।
मन्त्रिणश्च सजयन्तसुमन्त्राः
साश्रवः सममिलन्त सभायाम् ।। ४८ ।।

ते विचार्य निरचेषत राज्ञो
नाग्निसात्कृतिरिहेति कटाहे ।
गन्धतैलपरिरन्धितमङ्गं
व्यक्षिपन्त मणिमन्दिरमध्ये ।। ४९ ।।

आनयेति भरतं त्वरयेति
प्रैषयन् प्रणिधिवर्गममात्याः ।
सोऽपि सर्वसुखधाम युधाजिद्
धाम राजगृहनाम जगाम ।। ५० ।।

तैर्यथाकथनधर्षितधैर्यः
प्रैर्यताकुलमना गमनाय ।
आर्यकेण जननीजनयित्वा
संयुयाव भरतः सयवीयान् ।। ५१ ।।

आनिनाय रथमस्य युधाजिद्
भ्रातरौ तमधिरुह्य निरैताम् ।
तावुभौ विविदतुस्तमुदन्तं
नेतरे विविदुरार्यकमुख्याः ।। ५२ ।।

प्राप्य पञ्चभिरहोभिरयोध्यां
शृण्वता हतमुदं तमुदन्तम् ।
निर्गमं रघुपतेरथ राज्ञः
स्वर्गमं च रुरुदे भरतेन ।। ५३ ।।

क्रोधशोकरुदितानि वसिष्ठ-
स्तस्य साश्रुनयनस्य निरस्य ।
पश्य ते पितरमित्यथ नीत्वा
तादृशं नृपमदर्शयदस्मै ।। ५४ ।।

तं विलोक्य पतितो भुवि मूर्छा-
मार्छदुच्छ्वसितवान् विललाप ।
तात किं वससि तैलकटाहे
हेमपीठमधितिष्ठ सभायाम् ।। ५५ ।।

किं न पश्यसि निमीलितनेत्रो
नोपतिष्ठसि गुरुं च वसिष्ठम् ।
केकयीजठरजातमभाग्यं
किं न मां वदसि वादयसे वा ।। ५६ ।।

तद्विलप्य भरतो विरतोऽसौ
भूपतिं दहनसात्कृतदेहम् ।
न्युप्य सारवजले जलरोध-
स्यौर्ध्वदेहिकममुष्य चकार ।। ५७ ।।

अप्रविश्य नगरं पितृशून्यं
भ्रातृवीक्षणमपेक्ष्य सदैन्यः ।
आत्तमातृगुरुनागरबन्धु-
र्दिव्यसिन्धुमतरद् गुहनावा ।। ५८ ।।

चित्रकूटमुपगम्य सरामं
चीरिणं जटिलमैक्षत रामम् ।
दण्डवत् प्रणिपपात सशोक-
स्तं सविस्मयमलोकत लोकः ।। ५९ ।।

अध्ययोध्यमवनीमव नीत्या
व्याहृतेति भरतः स च रामः ।
मन्मतेन च महीं पितृदत्तां
त्वं भरस्व भरतेति बभाषे ।। ६० ।।

पादुके दिश चतुर्दशवर्षा-
ण्यर्चितुं मम महीमवतं ते ।
इत्युदीर्य भरतः शिरमाधात्
पुष्पवृष्टिरुभयोरपतत् खात् ।। ६१ ।।

स्थाण्डिले जटिनि चीरिणि नन्दि-
ग्रामवासिनि मयीह फलाशे ।
मा कृपां जहिहि यद्यथ नैष्यः
प्रैष्यमध्यनलमित्यनमत् सः ।। ६२ ।।

तं तथेति भरतं च गुहं च
प्राग्विसृज्य गुरुमप्यभिवाद्य ।
ज्ञातिमातृसखिनागरबन्धून्
प्राञ्जलिर्व्यसृजदश्रु च रामः ।। ६३ ।।

इति श्रीकविमल्लाचार्य(-शाकल्य-मल्ल-)विरचिते
उदारराघवे सप्तमः सर्गः ।। ७ ।।

अष्टमः सर्गः ।

प्रस्थितोऽथ नगराय चिराय
प्रार्थितः शुभरतो भरतोऽपि ।
नागरौघपुनरागमशङ्की
राघवोऽपि गिरितो निरितोऽभूत् ।। १ ।।

लक्ष्मणेन सह पक्ष्मलनेत्रा-
मद्रिशृङ्गमवरोप्य च सीताम् ।
दण्डकेषु दनुजान् विजिगीषु-
र्दक्षिणां दिशमगाद् रघुनाथः ।। २ ।।

चण्डकार्मुकधरः करवाली
दण्डकाभिमुखमेत्य स रामः ।
विप्रबृन्दमननन्ददमन्दं
चन्द्रमा इव चकोरकबृन्दम् ।। ३ ।।

चित्रकूटसविधे स विधातुः
पुत्रमत्रिमदिदृक्षत यावत् ।
तावदाश्रममनीनयदेनं
हृष्यता स निजशिष्यगणेन ।। ४ ।।

वेधसः सुतमनेधसमग्निं
प्रज्वलन्तमिव भान्तमिवार्कम् ।
रामया सह निरीक्ष्य स राम-
स्तं सराम इति लक्ष्मणमूचे ।। ५ ।।

नेत्रयोरमृतमादधतं तं
ते त्रयोऽपि रचिताञ्जलि नेमुः ।
सोऽत्रिरप्यवनिपालमभीत्य
श्रोत्रियैः सह यथार्हमथार्हीत् ।। ६ ।।

कन्दमूलफलमिन्दुपितास्मै
दत्तमातृकरदत्तमदत्त ।
आशितंभवमनेन स कृत्वा
सानुजं सदयितो निरवारीत् ।। ७ ।।

जानती जनकजामृषिभार्या
पुत्रिकामिव पुपूजयिषन्ती ।
पूर्वजन्मनि भृगोस्तनयां ता-
मिन्दिराममत मन्दिरमेताम् ।। ८ ।।

अङ्गरागवसनाभरणैस्ता-
मङ्गनां रघुपतेरभिपूज्य ।
दिव्यया पुनरुपास्कृत बाला
मालया सुमनसामनसूया ।। ९ ।।

किं किमेतदिति कौतुकिनी तां
कुङ्कुमेन च समस्कृत सीताम् ।
यत् शची रहसि यच्छति दिव्यं
दिव्यगन्धि दिगधीशवधूभ्यः ।। १० ।।

पारिजातहरिचन्दनजातं
पुष्पजातमभिजातगृहिण्यै ।
आचकर्ष च महर्षिचिरण्टी
सामुना कचभरं समयंसीत् ।। ११ ।।

अर्पणादभिनवाभरणानां
दर्पणाहितमुखा विलसन्ती ।
रूपसंपदनुरूपविलासा
श्रीरिव स्वयमदृश्यत सीता ।। १२ ।।

वल्कले च वसने च वसित्वा
राघवौ जनकजा च नवीने ।
अभ्यवन्दिषत रात्रिमुषित्वा
प्रातरेव गमनाभिमुखास्तम् ।। १३ ।।

खड्गिनं कवचिनं सनिषङ्गं
बिभ्रतं धनुरदभ्रमधिज्यम् ।
जानकीपतिमसावनसूया-
जानिरभ्यधित सभ्यसभाजे ।। १४ ।।

वत्स राम रमणी रमणीयं
त्वामनुव्रजति तामरसाक्षी ।
अध्यरण्यमनया त्वमसूर्य-
पश्यया कथमटिष्यसि भीर्वा ।। १५ ।।

चण्डकेसरिणि दण्डकदावे
गण्डकद्विरदकासरघोरे ।
राक्षसाश्च विचरन्ति समन्ता-
दन्तकातिशयिनो नरजग्धाः ।। १६ ।।

मा चरो वनमदः प्रमदस्त्वं
मध्यमास्तु युवयोस्तनुमध्या ।
सायुधेन भवता भवितव्यं
सानुजेन गिरिसानुचरेण ।। १७ ।।

तन्निशम्य च तपोधनवाक्यं
तत्र घातुकवधं रघुवीरः ।
प्रत्यहं प्रतिदिशं प्रतिदेशं
प्रत्यगं प्रतिवनं प्रतिजज्ञे ।। १८ ।।

निर्गतोऽत्रिभवनादवनार्थं
यज्वनामटिटिषुर्वनवाटीम् ।
उर्वरापतिरुद्रग्रशरासः
सर्वराक्षसवधाय दिदीक्षे ।। १९ ।।

अग्रतो रघुपतिः समचारी-
ज्जानकी समचरिष्ट ततोऽपि ।
पृष्ठतोऽपि दिवमुच्चरमाणो
लक्ष्मणस्य धनुषो ध्वनिरासीत् ।। २० ।।

तद्धनुर्ध्वनिभिरध्वनि भीतैः
कासरद्विरदकेसरियूथैः ।
दुद्रुवे सरवमद्रिनितम्बे
पक्षिभिर्व्यगमि वृक्षकदम्बे ।। २१ ।।

भ्रातराविषुभृतौ कलयन्त्यः
कातराः क्वचिदपासत भिल्ल्यः ।
तावबन्दिषत वृद्धकिराताः
केऽपि केचन फलान्युपनिन्युः ।। २२ ।।

पक्कणेषु मुखरीकृतदिक्कं
बुक्कति श्वनिचये वनचर्यः ।
काविमौ सधनुषाविह केयं
कामिनीति हृदि कौतुकमीयुः ।। २३ ।।

मैथिली पृथुलचारुनितम्बां
निस्तलस्तनयुगां तनुमध्याम् ।
शाकपर्णवसनाः शवरीणा-
मालयो ददृशुराहितगुञ्जाः ।। २४ ।।

कङ्कतं करटिदन्तकरण्डं
शाङ्कवं मृगमदं च सुकेश्यै ।
चामरं च शुचि काचन दत्वा
तामवन्दत पुलिन्दपुरन्ध्री ।। २५ ।।

नीलमेघ इव भाति पुरस्ता-
देष कस्तव घनस्तनि धन्वी ।
पृच्छतीषु शवरीष्विति तन्वी
व्यक्तमुत्तरमदत्त हसन्ती ।। २६ ।।

नारवाणि विटपानि विहङ्गैः
सारवाणि समुदैक्षत सीता ।
भैरवाणि शिखराणि गिरीणा
भीरुरीक्षितुमभीक्ष्णमभैषीत् ।। २७ ।।

लक्ष्मणेन लघुना रघुनाथ-
प्रेरितेन विपिनादुपनीतम् ।
स्वर्णवर्णमदधादधिकर्ण
कर्णिकारकुसुमं करभोरूः ।। २८ ।।

उत्तमं दयितमन्वगमत्तं
मत्तमन्द्रगजमन्थरयाना ।
राघवं सुनयना घनवर्णं
कर्णजाहनयना कमलाक्षी ।। २९ ।।

तं पयोदमभिशङ्क्य सशम्पं
कम्पमानकमनीयकलापाः ।
ताण्डवानि विदधुस्तरुखण्डे
दण्डकावनशिखण्डियुवानः ।। ३० ।।

पुण्डरीकनिवहैर्भुवि भीमै-
रण्डजैश्च दिवि खण्डयमानैः ।
गण्डकैश्च गिरिषु भ्रममाणै-
र्दण्डका ददृशिरे दुरवापाः ।। ३१ ।।

तत्र मर्तुमनिमित्तविरोध-
स्तापसावसथदत्तनिरोधः ।
रामलक्ष्मणबलानवबोधः
प्रादुरास वनसीम्नि विराधः ।। ३२ ।।

उन्नदन्घनवदुन्नतशूल-
प्रोतसिंहशरभेभलुलायः ।
पश्यतोः पथि तयोरविशङ्क-
स्तां जहार तरुणीमथ सीताम् ।। ३३ ।।

बाहुसज्यधनुषौ बलवन्तौ
बालसंहितगुणौ स जिघांसुः ।
तौ च तां च परिगृह्य मदान्धः
स्कन्धदेशमधिरोप्य दुदाव ।। ३४ ।।

राघवौ च भुजयुग्ममसिभ्यां
राक्षसस्य भुजगाभमभाङ्क्ताम् ।
अद्भुतध्वनि पतद् भुवि रक्ष-
स्तद्भयंकरमभूद् भुजहीनम् ।। ३५ ।।

ताडितोऽपि तरुखड्गशिलाभिः
खण्डितोऽपि खरखड्गनिपातैः ।
आरराट मुखराटविलुप्य-
न्नाललाटतटभिन्नकपोलः ।। ३६ ।।

नायुधोपलशताहतमर्मा
मर्मरीषि कथमेषि विनाशम् ।
पृच्छतीति पृथिवीभुजि रामे
स्वच्छचेतसि जगाद विराधः ।। ३७ ।।

सानुजस्त्वमधिमानु सजीवं
राम मां गुणखने निखनेथाः ।
भूनिखातवपुषो मम मर्तुः
पुण्यलोकगतिरस्ति पुरेति ।। ३८ ।।

तं निशम्य च तथेत्यथ नीत्वा
कालसूत्रमिव कन्दरमद्रेः ।
रक्षसो रघुवरावलघिष्ठं
जीवतोऽप्यपघनं न्यखनेताम् ।। ३९ ।।

कालकर्मयुजि कालघनाभे
कालधर्ममुपयाति विराधे ।
अध्यरण्यमृषिलोकशरण्यं
राममानुनुविरे मुनिवर्याः ।। ४० ।।

अर्चितो मुनिभिरर्चयमान-
स्तानमौ विमलमानसवृत्तिः ।
तप्तमिष्टमपि नान्तरितं वः
कच्चिदित्यनुपिपृच्छिषुरासीत् ।। ४१ ।।

आश्रमाननुचरान् स मुनीना-
मालयांश्च परिपालयमानः ।
राक्षसानपि चिरस्य निरस्य (निरस्य निरीति ?)
निर्भयं व्यधित दण्डकदावम् ।। ४२ ।।

ज्यानिनादमुखरीभवदाशा-
मण्डलीलुलितमण्डलुलायः ।
जात्वसौ कमलविष्टरकल्पं
द्रष्टुमैहत मुनि शरभङ्गम् ।। ४३ ।।

मन्त्रवच्छिखिनि जुह्वतमङ्गं
वीक्ष्य विस्मितमनाः शरभङ्गम् ।
राघवोऽथ समवाप सुतीक्ष्णं
तीक्ष्णभानुमिव दीप्तमभीक्ष्णम् ।। ४४ ।।

मान्दकर्णिभयमन्ददिवौकः-
सुन्दरीमृदुमृदङ्गनिनादैः ।
अन्तरानिखनिताम्बुतटाकं
तत्र सोऽद्भुतमवैक्षत रामः ।। ४५ ।।

पूजितश्च स यथाविधि तेन
न्युष्य तां रजनिमृष्यधिवासे ।
प्रातरेव निरगच्छदगस्त्य-
भ्रातुराश्रममवेक्षितुकामः ।। ४६ ।।

आतिथेयमभिवाद्य मुनिं तं
तेन चापि सदकारि स रामः ।
तत्प्रदर्शितपथा निरगच्छद्
द्रष्टुमद्भुतचरित्रमगस्त्यम् ।। ४७ ।।

लक्ष्मणेन नृपलक्षणभाजा
सीतया च सह शीतलवृक्षम् ।
उम्भितं निविविशे सविशेषैः
कुम्भसंभववनं रघुनाथः ।। ४८ ।।

सर्वतः सुरभिचन्दनशीतं
सर्वकालफलितद्रुमजालम् ।
लम्बमानलवलीनिकुरम्बं
निम्बनीपनिचुलैर्निबिरीमम् ।। ४९ ।।

तद् विलोक्य तपसः फलमक्ष्णो-
रद्वितीयमतिशान्तमरण्यम् ।
देवमानवदुरापमुखश्री-
रेवमाह रमणीं रघुवीरः ।। ५० ।।

वश्यवन्यमृगधन्यविहङ्गं
नश्यदार्तिदुरितव्यतिषङ्गम् ।
ऋष्यशृङ्गमिव सङ्गतशान्तं
पश्य जानकि मुनीन्द्रनिशान्तम् ।। ५१ ।।

अत्र मन्दमभिवाति नभस्वा-
नत्र नो वितपते च विवस्वान् ।
अत्र हव्यमनलोऽत्ति हविष्मा-
नत्र खेलति वृषोऽपि वपुष्मान् ।। ५२ ।।

वौषडित्यथ सविस्तरमस्तु-
श्चौषडित्यपि यजेत्यपि नित्यम् ।
येयजामह इति क्रतुमन्त्रान्
गायतीह खलु राजशुकौघः ।। ५३ ।।

धीवरोऽपि मुनिरेष तपस्वी
पीवरोरु विनिमीलितनेत्रः ।
अन्तरायमवधूय समाधे-
रन्तरा किमपि चिन्तयतीव ।। ५४ ।।

इष्टिमध्वरविधानपटीयान्
यष्टुमेष यतते गृहमेधी ।
तूबरं च हविषे षडरत्नि
यूपमभ्युपगमिष्यति मीते ।। ५५ ।।

याज्ञिका दृषदुलूखलशूर्प-
स्फ्याग्निहोत्रहवणीमुसलाद्यैः ।
क्लृप्तन्त्रविधयो विधिपूर्वं
सप्ततन्तुमिह तन्वत एते ।। ५६ ।।

पक्ष्मलाक्षि समवेक्ष्य पुरस्ता-
ल्लक्ष्मणा समुपहूय मखाशान् ।
लक्ष्मणः कुतुकमेत्युपरिष्टा-
ल्लक्ष्मणा हुतवतो मुनिवर्यान् ।। ५७ ।।

शार्करं ककुदवानधिशेते
शाक्वरोऽयमवलोकय मीते ।
फक्कयन्निजभरेण धरित्रीं
धिक्करोति वत दिक्करिणोऽपि ।। ५८ ।।

व्याघ्रयोषिदनुपालयतीयं
शीघ्रमेत्य जलपीत्यवसानम् ।
पल्वलान्तिकजुषां तृषितानां
मिल्वलान्तकवनान्तमृगीणाम् ।। ५९ ।।

सारघं मधु पलाशपुटस्थं
सारगन्धि शिशवोऽनुपनीताः ।
जानकीह जननीजननीतं
जानुनी भुवि निधाय धयन्ति ।। ६० ।।

अस्य देवि महिमा महनीयः
कस्य वाङ्मनसयोर्विषयः स्यात् ।
एष धाम तपसां निधिरेष
छन्दसां निलय एष गुणानाम् ।। ६१ ।।

इति कथयति देव्यै तद्वनं ताटकारौ
मुनिरथ मुनिभिस्तं सादरं सद्म नीत्वा ।
सदकृत सह भुक्त्वा तत्र सीतासमेतो
मुनिकथितकथाभिर्यामिनी तामनैषीत् ।। ६२ ।।

ऋषिरुषसि बभाषे यात गौतम्युपान्तं
वसत च कियतश्चिद् वत्सरान् मत्समीपे ।
इति वदति मुनीन्द्रे सानुजः सद्वितीयः
स रघुपतिरयासीदासितु पञ्चवट्याम् ।। ६३ ।।

इति श्री-कविमल्लाचार्य (-शाकल्य-मल्ल-) प्रणीते
उदारराघवे अष्टमः सर्गः ।। ८ ।।

नवमः सर्गः ।

स ततः स्वकनीयसा विशालां
विपिनान्ते विरचय्य पर्णशालाम् ।
नृपसूनुरुवास नातिदूरे
विहरन्निल्वलहन्तुराश्रमस्य ।। १ ।।

अवलोकयितुं तमभ्यगच्छ-
न्नथ वैखानससिद्धवालखिल्याः ।
स कृताञ्जलिराहृतार्घ्यपाद्यः
मदकार्षीदतिहर्षिणो महर्षीन् ।। २ ।।

मुनयो यदि वा मुमुक्षवो वा
विनयोदग्रममुं यदाभ्यगच्छन् ।
महितैः सहितैः स चात्मविद्या-
मनवद्यामनुभावयांचकार ।। ३ ।।

इतिहासपुराणतर्कतन्त्र-
श्रुतिमन्त्रागमशब्दशास्त्रवेत्ता ।
स तपस्विषु यस्य यत्र गोष्ठी-
प्रियता तत्र तथा तमप्यतार्प्सीत् ।। ४ ।।

दनुजान्तकरं धनुर्दधानं
भसितोद्धूलनभासमानदेहम् ।
जटिलं तमवेक्ष्य जातहर्षा
मुनयोऽमंसत मुग्धचन्द्रचूडम् ।। ५ ।।

चरमे प्रहरे सदा प्रबुद्धः
परमात्मप्रणिधानशुद्धचेताः ।
उटजादुषसि प्रयाय गङ्गा-
मनघोऽस्नादघमर्षणं जपित्वा ।। ६ ।।

अनुजोपनतां त्वचं वसित्वा
विहिताचान्तिरुपास्त पूर्वसंध्याम् ।
अभितर्प्य सुरानृषीन् पितॄन-
प्यथ माध्याह्निकमाचचार रामः ।। ७ ।।

इति नित्यविधित्रिकालकर्मा-
ण्यनुतिष्ठन्नधिगौतमि क्षितीशः ।
अनुजं वनगुप्तये नियुञ्ज-
न्नुटजाभ्यन्तरमध्युवास देव्या ।। ८ ।।

उटजे निवसत्युदारशीले
रणदोःशालिनि राघवे रमण्या ।
धनुषः परुषस्वनैर्दिगन्तान्
ध्वनयन् जातु न लक्ष्मणो निदद्रौ ।। ९ ।।

उटजे वसतोरुदग्रवीर्यः
स यथाकालमकालवन्यवृत्त्योः ।
उभयोश्च तयोर्विहारभाजो-
रुपजह्रे फलमूलकन्दलानि ।। १० ।।

अधिवासितमम्बु पद्मगन्धै-
रुपनिन्ये कलशैरुपान्तनद्याः ।
निनिजे च निजाग्रजानुवर्ती
तरुवल्कं तरुणार्कशोणवर्णम् ।। ११ ।।

कुशपुष्पतिलस्रगक्षताद्यं
समभार्षीदनुजः समस्तमग्रे ।
पितृमेधविधिं सवैश्वदेवं
कुतुपानेहसि कुर्वतोऽग्रजस्य ।। १२ ।।

शशशल्यकुरङ्गकृष्णसारा-
नभिहत्यार्द्रमृगत्वगाहितानि ।
तरसा तरसानि पक्त्रिमाणि
व्यदधात् कीचककृत्रिमे कृशानौ ।। १३ ।।

परिपाकसुगन्धिमातुलिङ्ग-
च्छदचञ्चत्पुटकेषु संभृतानाम् ।
शवरीमतविच्छशामिषाणां
विदधे रन्धनमिन्धनैरनार्द्रैः ।। १४ ।।

पृथुलांसलसत्खनित्रदात्रः
शरधी बिभ्रदद्रभ्रचापनादः ।
विचचार वनं विचक्षणोऽसौ
विचिचीषन् फलपुष्पकन्दमूलम् ।। १५ ।।

वनमिन्धुतरङ्गसङ्गशीता
लसदेलालवलीलवङ्गगन्धाः ।
रतिखिन्नभुजङ्गपीतशेषा-
स्तमसेवन्त वनान्तगन्धवाहाः ।। १६ ।।

सहकारफलानि पुष्पपाली-
विटपालीषु विचित्य वीर्यशाली ।
गिरिशृङ्गतटात्तशृङ्गवेरो
डहुचिञ्चाफलजम्भलान्यलावीत् ।। १७ ।।

स रघोः कुलभूषणं कुमारः
सरघोत्थं मधु संचिचीषमाणः ।
पुटकानि विधाय पर्णपर्णैः
कटकानि व्यचरन्महीधराणाम् ।। १८ ।।

सफलानि फलानि कन्दमूला-
न्यपि संगृह्य विधाय मूर्ध्नि भारम् ।
निचितापघनो निदाघवार्भि-
र्निलयाय न्यवृतन्निरन्तरायः ।। १९ ।।

गहनादुपयान्तमुर्मिलेशं
घनघर्मोदकनिर्यदूर्मिलेशम् ।
अवलोक्य च तं तथा सुदूरा-
दनुजन्मानममुञ्चदश्रु रामः ।। २० ।।

बहिरेव निधाय पादशौचं
शुचिराचम्य शिरोनिरस्तभारः ।
स ननाम सराममेव रामं
सुतरामङ्गनसीम्नि दण्डनामम्।। २१ ।।

प्रणतस्य निषीदतः समीपे
परिधानव्यजनेन देवराम्यम् ।
शतपत्रनिभं श्रमाम्बुसिक्तं
शनकैर्वीजयति स्म रामदेवी ।। २२ ।।

गुरुरेष पितैष पुत्र एष
स्वजनश्चैष सखैष भृत्य एषः ।
इति देवरि लक्ष्मणेऽनुकम्पां
विदधे निश्वसिता विदेहपुत्री ।। २३ ।।

अनुराघवमन्वहं गतासा-
वधिगोदावरि कल्य एव सस्नौ ।
कलशेन च किंचिदार्द्रकेशी
स्वयमर्घोदकमानिनाय देवी ।। २४ ।।

जलसीकरसेकसार्द्रवासाः
कलशीभिस्तुलसीमसिक्त सीता ।
करकङ्कणमुद्रिताश्मसार-
द्युतिधारामिव पुञ्जितामधस्तात् ।। २५ ।।

उटजाङ्गणवर्धितस्य वार्भि-
श्चलपर्णस्य चकार मूलसेकम् ।
उदबिन्दुजुषः कृतावगाहा
विहगास्तत्र विजह्रुरालवाले ।। २६ ।।

सुलभैर्वृतिसल्लकीप्रवालैः
कलभं कंचन पुत्रवत् पुषोष ।
स्वगतैर्गतिमन्दिमानमस्याः
स्वकरेणाहृत चारिमाणमूर्वोः ।। २७ ।।

हरिणीं यवसैरवीवृधत् सा
निजवत्सामिव गौर्नवप्रसूता ।
दुहितुर्जनकस्य दृग्विलासा-
नियमभ्यास्यत शिक्षितेव शिष्या ।। २८ ।।

मृगयां दयिते गते मृगाक्षी
भवनद्वारि वनान्तदत्तदृष्टिः ।
स्तिमिता लिखितेव कीलितेव
स्मरगुप्ता वनदेवतेव तस्थौ ।। २९ ।।

पुनरागतवत्युपेत्य सीता
मुदिताक्षालयदुष्णवारिणाङ्घ्री ।
शयितस्य मृगाजिने कराभ्यां
पदसंवाहनमाचचार भर्तुः ।। ३० ।।

शयनासनभोजनानुलापे-
ष्वविनाभूततदङ्गसङ्गसौख्या ।
रमणी रमणीयताभिरामं
रमणं तं रमयांचकार रामा ।। ३१ ।।

अनुजेन च जायया च नित्यं
क्रियमाणां परिगृह्य तां सपर्याम् ।
रघुवीरमिषेण पञ्चवट्यां
चिरमस्थायि चिरंतनेन पुसा ।। ३२ ।।

अथ मन्मथमित्रमाविरासीद्
वनराशीकृतवल्लरीपरागः ।
मधुपानमदाकुलीकृतानां
मधुरन्ध्रंकरणो मधुव्रतानाम् ।। ३३ ।।

मधुमन्मथयोः प्रियेण सख्या
मलयान्मन्दमवायि मारुतेन ।
मधुराभिरलासि मञ्जरीभि-
र्मकरन्दैरुदपादि माधवीनाम् ।। ३४ ।।

नवमञ्जुलमञ्जरीपरागै-
रुपरागैः पथिकाङ्गनाननेन्दोः ।
अतनीदतनीयसी वितान-
श्रियमन्तर्गहनं वसन्तलक्ष्मीः ।। ३५ ।।

मणिसौधगता यथैव मुक्ता-
फलयुक्ता व्यहरन्त राजकान्ताः ।
वनकुञ्जगतास्तथैव गुञ्जा-
फलपुञ्जाभरणाः पुलिन्दयोषाः ।। ३६ ।।

जघनस्थलनद्धपत्रवल्ली
गिरिमल्लीकुसुमानि कापि भिल्ली ।
अवचित्य गिरौ पुरो निषण्णा
स्वकचानुत्कचयांचकार भर्त्रा ।। ३७ ।।

ववले सुमनःपरागपाली
धवलायां वनसीम्नि गन्धवाहः ।
नुनुदे वनदेवताश्रमाम्भ-
श्चलता येन लतावितानभाजा ।। ३८ ।।

शवरीकवरीप्रसूनगुञ्जद्-
भ्रमरीभिश्चमरीसमाकुलाभिः ।
वनराजिभिरभ्यराजि खेलत्-
करिणीभिर्हरिणीगणैर्वृताभिः ।। ३९ ।।

मणिनुपुरमञ्जुनादकूजत्-
कलहंसक्वणितेषु कौतुकिन्यः ।
चरणैस्तरुणप्रवालताम्रै-
रवलाश्चक्रुरशोकताडनानि ।। ४० ।।

हरिदम्बरकूलमुद्वहन्ती
स्खलयन्ती घनसौरभेण पान्थान् ।
ललनाकुचकुड्मलोपगूढा
ललिता कोरकिणी ललास शाखा ।। ४१ ।।

वकुलावलयो वभुः समन्ता-
न्मधुगण्डूषमवाप्य मानिनीनाम् ।
विदधे हरिदम्बराधिवासं
सहसोत्थाय यदीयसौरभश्रीः ।। ४२ ।।

मदवन्त्यमुहन्मनांसि यूना-
मवलानामवलोकनान्न चित्रम् ।
तिलका यदचेतनाः पुफुल्लुः
पुलकानप्यधुरङ्कुरापदेशात् ।। ४३ ।।

विनिपीय मधूनि मञ्जरीणां
रसवन्तो रसपेशलान् शलाटून् ।
अकलन्त कलं कषायकण्ठाः
कलकण्ठाः सहकारकाननेषु ।। ४४ ।।

मदयन् हृदयं मनस्विनीनां
विधुरं विह्वलयन् वियोगिनीनाम् ।
प्रतिगुल्मलतं प्रतिद्रुमं च
प्रपपञ्चे नवपञ्चमः पिकानाम् ।। ४५ ।।

पथिकान् पथि कान्दिशीकयन्तः
पवनान्दोलितफुल्लपल्लवासु ।
नवकिंशुककुड्मलारुणास्या-
श्चुकुजुश्चूतलतासु राजकीराः ।। ४६ ।।

मुखराः सरसीरभीत्य मन्दं
मुखसंदंशलसन्मृणालखण्डाः ।
वरटाभिरुपेत्य वारिलीलां
मदनोल्लासमधुर्मरालमल्लाः ।। ४७ ।।

कदलीदललीनकोकिलाभिः
कृतकोलाहलकाहलप्रपञ्चः ।
मलयानिलमत्तवारणस्थो
मदनस्तत्र चकार जैत्रयात्राम् ।। ४८ ।।

दिशि दिश्यपदिश्य दीर्घपातं
मरुदान्दोलितमञ्जरीपरागम् ।
सवितारमशेषलोकजैत्रं
ध्वजमुत्तम्भयति स्म चित्तजन्मा ।। ४९ ।।

सुमनःप्रकरैः सुवर्णवर्णै-
र्मधुपव्याजमहेन्द्रनीलसान्द्रैः ।
रतिवल्लभकर्णिकाविलासं
रचयामासुररण्यकर्णिकाराः ।। ५० ।।

मधुरं मधुरं यदा जुगुञ्जु-
र्मधुकुक्षिभरयो मधुव्रतौघाः ।
तदशङ्कि वले कृशोदरीभि-
र्धनुषः स्फूर्जितमूर्जितं स्मरस्य ।। ५१ ।।

कृतमालतमालनक्तमाला-
नलिमालाकलिताननन्यजन्मा ।
निजसैन्यनिवेशनानि मेने
निपतद्भूरिपरागधूसराणि ।। ५२ ।।

मकरन्दसुगन्धयः पृषत्का
मधुरं धन्व मधून्यलीढ मौर्वी ।
महिलारिपवो मनश्च लक्ष्यं
मदनस्याभवदद्भुतास्त्रविद्या ।। ५३ ।।

मधुसख्यमधत्त मन्दवायु-
मधुमन्दानिलसख्यमिन्दुरैषीत् ।
मधुमन्दमरुन्नवेन्दुसख्यान्
मदनो दिग्विजयं चकार धन्वी ।। ५४ ।।

शुशुभे नितरां पलाशवल्ली
शुकतुण्डारुणकुड्मलाभिरामा ।
मदनस्य वनश्रियोपनीता
जयनीराजनदीपमालिकेव ।। ५५ ।।

मधुरस्य रसालमञ्जरीणा
मधुनः स्रोतसि मज्जनं विधाय ।
अजपन्नलयो मनोजमन्त्र
मिथुनानामनपाययोगसिद्धयै ।। ५६ ।।

समजीगण (समजीघट?) दाकलय्य लग्न
लतया रक्तमशोकमुल्लसन्त्या ।
इतरेतरपाणिपल्लवाभ्यां
स पुरोधा इव दक्षिणो नभस्वान् ।। ५७ ।।

कुहलीवहलीभवत्परागां
फणिवल्लीपरिणद्धनालिकेराम् ।
लवलीपरिबद्धगन्धसारां
ललयामास वनश्रिय वसन्तः ।। ५८ ।।

ललदङ्कुरकोरकप्रवाल-
प्रसवालंकृतयो बभुर्वनान्ताः ।
विविधौषधिभिः पचेलिमाभिः
परिणद्धा परिचस्करे वनश्रीः ।। ५९ ।।

अथ काचिदनङ्गराजधानी
वनमुद्गाढममाढ यातुधानी ।
मदिरामदगन्धमुद्वहन्ती
मयमायेव मनांसि मोहयन्ती ।। ६० ।।

जघनेन घनेन मन्दयाना
कुचभारेण च नम्रकम्रगात्री ।
मृदुमध्यमशोभिनिम्ननाभी
मृगनाभीकलनाभिरामगन्धा ।। ६१ ।।

तरलैरमृतं तरङ्गयन्ती
कमनीयप्रसरैः कटाक्षपातैः ।
मुखसौरभलोलुपं द्विरेफं
करलीलाकमलेन तारयन्ती ।। ६२ ।।

हरिचन्दनगन्धबन्धुराङ्गी
हरितः शङ्कुमदेन भावयन्ती ।
मधुपानमिताङ्घ्रिपाततान्ता
मलयश्रीरिव मूर्तिमादधाना ।। ६३ ।।

तपनीयदशान्ततन्तुवीतं
वसनं हल्लकलोहितं वसाना ।
दिवसेशकरापदेशनिर्यत्-
पुलकाङ्कूरयुतेव पूर्वसन्ध्या ।। ६४ ।।

करकङ्कणकिङ्किणीविरावै-
र्मणिमञ्जीरयुगस्य मञ्जुनादैः ।
पुरवैरिहतस्य पुष्पकेतोः
पुनरुज्जीवनमन्त्रमीरयन्ती ।। ६५ ।।

जघनातिगदीर्घनीलवेणी
कचमूलस्थितकेतकीपलाशा ।
सितभूरिफणैककृष्णनागी-
कृतसङ्गेव सुमेरुशृङ्गलक्ष्मीः ।। ६६ ।।

रभसादभिपत्य पर्णशालां
रमणीयां रमणीयरूपवेषा ।
जननाथसुतं जपावसाने
जटिलं जाग्रतमग्रतो ददर्श ।। ६७ ।।

अधरीकृतकामरूपधेयं
त्रिजगन्मङ्गलपुण्यनामधेयम् ।
जनलोचनमूर्तभागधेयं
जनकाधीशसुतामनोविधेयम् ।। ६८ ।।

विततोन्नतभालभासमानं
लसदंसस्थललम्बिकर्णपाशम् ।
उपजानु विलम्बमानबाहुं
पृथुवक्षःस्थलमम्बुजायताक्षम् ।। ६९ ।।

शफरीशतपत्रशङ्खचक्र-
ध्वजवज्राङ्कुशचामरातपत्रैः ।
अरुणाङ्घ्रितलोपशोभमानै-
रधिकं व्यञ्जितसार्वभौमचिह्नम् ।। ७० ।।

सितभासितभावितत्रिपुण्ड्रं
तुलसीमूलमृदा कृतोर्ध्वपुण्ड्रम् ।
अभिदेलिममादिमादिशन्तं
शिवधर्मेण जनाय विष्णुधर्मम् ।। ७१ ।।

परिधाय तरुत्वगन्तरीयं
कृतकृष्णाजिनपट्टिकोत्तरीयम् ।
दधतं मुकुटोचितेन मूर्ध्ना
जनकाज्ञामिव संहृति जटानाम् ।। ७२ ।।

उटजे सह सीतया निषण्णं
तडिता निश्चलयेव नीलमंघम् ।
नररूपमरण्यवासहेतो-
र्धृततारुण्यमिवेश्वरं भवान्या ।। ७३ ।।
(षड्भिः—सप्तभिः ?—कुलकम् ।)

रुचिरज्यदशेषकाननान्ता
व्यलुलोकत् सविशेषकाननान्ताम् ।
वपुरार्द्रकुरङ्गनाभिरामं
दधतीमीशितुरङ्गनाभिरामम् ।। ७४ ।।

तमवेक्ष्य च सा तपस्विवेषं
गुणभूषं रणभीषणं बभाषे ।
मकराङ्कशरातुरा सरागं
मदिरागण्डसुगन्धिना मुखेन ।। ७५ ।।

अयि राजकुमार वार्क्षवल्कं
विवसीथा यदि वा जटा दधीथाः ।
रघुवंशसमुद्भवं भवन्तं
कलये राम इति प्रसिद्धमुर्व्याम् ।। ७६ ।।

अनुजस्तव लक्ष्मणोऽनुगन्ता
महिलेयं तव मैथिलेयपुत्री ।
गुरुवाक्यकरो गुणाधिवासो
वनवासोत्सुकधीरिहाजिहीथाः ।। ७७ ।।

शिशुरेव शिखण्डकं दधानो
न्यवधीरेकशरेण ताटकाख्याम् ।
कुशिकात्मजतः कृशाश्वशिष्या-
दखिलं शस्त्रकलापमध्यगीष्ठाः ।। ७८ ।।

अयि तन्मखमस्त्रविद्ययावीः
कृपया वीक्ष्य वधं मुनेरपावीः ।
नृपसंसदि चापमभ्यभाङ्क्षी-
श्चपलाक्षीमबलामिमां व्यवाक्षीः ।। ७९ ।।

भवतः कुलनामपौरुषज्ञां
मुनियज्ञानवतः प्रसिद्धकीर्तेः ।
गुणरूपविशेषमोहितां मां
मदनादर्हसि रक्षितुं विगर्हाम् ।। ८० ।।

दुहिता महितात्मनो महर्षेः
प्रथिता विश्रवसः पुलस्त्यसूनोः ।
मम शूर्पणखेति नामधेयं
मनसो भीतिकरं मखाशनानाम् ।। ८१ ।।

महितोऽत्र यथा मरीचिवंशः
प्रथितश्चैष तथा पुलस्त्यवंशः ।
कुलरूपगुणेषु तुल्ययोर्ना-
विह दाम्पत्यमुशन्ति योग्यमार्याः ।। ८२ ।।

त्यज वा भज वा विदेहपुत्रीं
भगिनीयं मम यातु तिष्ठताद् वा ।
भवतां वसतामिह त्रयाणां
विदधे राम समस्तसंविधानम् ।। ८३ ।।

यदि दास्यमपि त्वयि व्यधास्यं
परिहास्यत्वमहं न खल्वयास्यम् ।
अनुरूपपतिप्रियंकरिण्यो
न रमण्यो ह्युपहास्यतां व्रजन्ति ।। ८४ ।।

पुरुषोत्तम इत्यनुत्तमं त्वा-
मभिपद्ये शरणं न कञ्चिदन्यम् ।
मदनास्त्वहृता न कापि षण्ढं
पुरुषं ढौकितुमीहते यथेच्छम् ।। ८५ ।।

मम शूर्पणखेति राक्षसाख्या-
मनुशृण्वन्न विभीहि मा हि रूढा ।
न मनुष्यतनु कदापि जह्यां
न हि विभ्रीय कदापि राक्षसीत्वम् ।। ८६ ।।

मलयाचलसीम्नि मन्दराद्रौ
रजताद्रौ यदि वा रघुप्रवीरम् ।
रमयामि भवन्तमंसनीतं
न मया तु स्तुवत (वसत ?) स्तवास्ति चिन्ता ।। ८७ ।।

धनदो दशकण्ठकुम्भकर्णौ
स महाभागवतो विभीषणश्च ।
इति वैश्रवणानवेहि राजन्
मम बन्धून् खरदूषणत्रिमूर्धान् ।। ८८ ।।

मम बन्धुजनेन विश्वजेत्रा
यदि मैत्रीमकरिष्यथास्तथा चेत् ।
भरताग्रज पर्यपालयिष्य-
स्त्वमयोध्यां रघुवंशराजधानीम् ।। ८९ ।।

मघवा यदि वा त्वयीद्धवैरो
यदि वैरोचनिराकरिष्यदागः ।
प्रधने परिभूय मेघानाद-
स्त्वदधीनां च करिष्यति त्रिलोकीम् ॥ ९० ॥

गृहिणीं भज मां गृहाण पाणि
कुरु गान्धर्वविवाहमङ्गलं मे ।
विशिखान् न सहामि शम्बरारे-
रविलम्बेन दिशाङ्गसङ्गसौख्यम् ॥ ९१ ॥

इति शूर्पणखागिरो निशम्य
स्मयमानः स बभाण रामचन्द्रः ।
दशनद्युतिचन्द्रिकाप्रवाहै-
र्विशदैरुज्ज्वलयन् दिशा मुखानि ॥ ९२ ॥

सुभगे शुभगात्रि साधुवाक्या-
न्यभणीरत्र समञ्जसं समस्तम् ।
कृतिनो वशिनो न एकपत्नी-
व्रतिनो विद्धि रघोः कुलं नरेन्द्रान् ॥ ९३ ॥

जनकप्रतिपादिता महीजा
भरतेनेव मही मया न हेया ।
सहधर्मचरीमिमां विहाय
प्रतिपद्येय कदापि न द्वितीयाम् ॥ ९४ ॥

यदि राक्षसि मानुषेऽभिलाषं
कुरुषे लक्ष्मण एष मे कनीयान् ।
भवताद् दयितस्तवानुरूपो
विपिने संनिदधाति नास्य पत्नी ॥ ९५ ॥

मदनूनगुणं मनोभवाभं
वृषभस्कन्धममुं वृणीष्व भद्रे ।
अवधूकतयानुतप्यमानः
सवधूकाय कदापि मा कुपन्मे ।। ९६ ।।

इति वादिनि राज्ञि लक्ष्मणं सा
सरिरंसा रमणं स्वयं वरित्वा ।
रहसीहि सहासमाह्वयत्तं
सहमा मा हसिनीति सिंहसारम् ।। ९७ ।।

स च तामवदत् तथा न युक्तं
रमये त्वां रमणि द्वितीयभार्याम् ।
प्रथमं यदमुत्र चित्तमाधाः
परिहार्यासि ततो यथेयमार्या ।। ९८ ।।

अथवा यदि सर्वथा मनस्ते
विगमे त्वं शरदां चतुर्दशानाम् ।
उपयास्यसि चेत् पुरीमयोध्या-
मनुबोध्य स्वजनं तदा विवक्ष्ये ।। ९९ ।।

अहमस्य सदा करोमि दास्यं
प्रथते दासवधूः स्वयं च दासी ।
त्यज मय्यनुरागमप्यवीरे
कृतधीरेधि भजस्व राघवेन्द्रम् ।। १०० ।।

इति तेन निराकृताथ रामं
भज मामित्यभणत् स तां न्यषेधीत् ।
जनकेन्द्रसुता जहास नीचै-
रसहा शूर्पणखा चुकोप तस्यै ।। १०१ ।।

निजरूपमदर्शयत् करालं
शततालद्वयसी निशाचरी सा ।
वचसामपि सुष्ठु निष्ठुराणां
गदयित्नुः स्तनयित्नुघोरनादा ।। १०२ ।।

करटित्वचमन्तरीययन्ती
तिरयन्ती तिमिरेण काननान्तम् ।
जघनस्थलवेष्टितान्त्रकाञ्ची
मनुजान्त्रावलिमालभारिणी सा।। १०३ ।।

नृकपालगतं वसाविमिश्रं
मुहुरस्त्रं हतदन्तिनो धयन्ती ।
दिवमंसयुगेन घट्टयन्ती
भुवमङ्घ्रिक्रमणेन कम्पयन्ती ।। १०४ ।।

परिवारितगृध्रकाककङ्का
करिकङ्कालकरा करालदंष्ट्रा. ।
रुधिराणि धयानि वस्त्रयाणा-
मिति सीतामधिचिक्षिपेऽक्षपाटी ।। १०५ ।।

तदवेक्ष्य च लक्ष्मणो लघीयान्
जघनान्त्रावलिमङ्घ्रिणा क्रमित्वा ।
असिना निचकर्त कर्णनासा-
रदवासांसि रयेण रात्रिचर्याः ।। १०६ ।।

नवशोणितनासिकंधयी सा
विरटन्ती विपिनानि वेपयन्ती ।
खरदूषणयोः पुरः पतित्वा
निजवृत्तान्तमजिज्ञपन्निशाटी ।। १०७ ।।

श्रुत्वा तत्परिभवमूलमुत्पतिष्णु-
वर्धिष्णुः समिति परानिराकरिष्णुः ।
रक्षोभिः सदसि खरः खरप्रलापः
प्राज्वालीदनल इवाज्यपूरसिक्तः ।। १०८ ।।

इति श्रीमत्सुखस्वप्नाकलितरघुनाथदत्तवरप्रसाद-
सहजसारस्वतश्रीशाकल्यपदाङ्कितमाधवसुधीतनय-
कविमल्लाचार्यविरचिते उदारराघवे
महाकाव्ये नवमः सर्गः ।। ९ ।।

उदारराघवव्याख्या शिशुबोधिनी
महादेवेन कृता

देवं[1] विघ्नपति प्रणम्य वरदं श्रीशारदां सर्वदां
श्रीकाली कुलदेवतां च मतिदान् सर्वान् गुरून् सादरम् ।
कुर्वेऽहं शिशुबोधीनी मितपदव्याख्यां यथामूलत-
स्तूदारादिकराघवस्य [2]जडधिर्विद्वान् महादेवकः ।।

शेमुषीबलवशेन योऽखिलन्यायशास्त्रममलाशयः पुरा ।
व्याकरोद् विबुधराजसंनिधौ [3]गोपिनाथगुरुमानमामि तम् ।।

ग्रन्थादौ प्रत्यूहाभावद्वारकं समाप्तिफलकं सदाचारपरिप्राप्तं महापुरुषस्तुतिरूपं मङ्गलमन्तेवासिशिक्षणाय कविमल्ल-[4]शाकल्यमल्ल. कविरुपनिबध्नाति-**अस्तीत्यादिना।** पुमानस्तीत्यन्वयः । कोऽसौ पुमानित्याकाङ्क्षायामाह--**आद्य** इति । कारणकारणात् पूर्वं इत्यर्थः । ननु कारणकारणपूर्ववर्तित्वेन सर्वकारणप्रकृतिरूपा भवेत्--नेत्याह--**प्रकृतेः परस्तादिति** । प्रकृत्यतिरिक्त इत्यर्थः । ननु तर्हि परमाणुरूपो भवेदित्याशङ्क्याह --(**प्रशस्त इति**) । प्रशस्तः शुद्धः अविकृत इति यावत् । परमाणुस्तु विकारवानिति तद्व्यवच्छेदः । तर्ह्याकाशरूपः स्यादित्याशङ्क्याह--**केवलचित्स्वरूपः** (इति) । केवलं चिदेव स्वरूपं यस्य स. । ज्ञानरूप इत्यर्थः । आकाशस्य शब्दगुणत्वात् ज्ञान-राहित्यम् । तर्हीश्वरः स्यादित्यत आह--**स्वानन्दपूर्णः** (इति) । शोभनः आनन्दः स्वानन्दः=नित्यानन्दः । स पूर्णो यस्मिन्निति सः । आनन्दे शोभनत्वं नित्यत्वमेव । नान्यत् । ईश्वरस्य सुखदुःखरहितत्वादिति भावः । स्वानन्देन पूर्णः स्वानन्दपूर्ण इति केषांचिद्[5] व्याख्यानम् । तच्चिन्त्यम् । अपूर्ण एव द्रव्यान्तरेण पूर्णः क्रियते । न हि पुरुषः पूर्वमपूर्णः पश्चादानन्देन पूर्ण इति । ननु तर्हि योगिरूपो भवेत् सः इत्याशङ्क्याह--**सदसत्प्रपञ्चबाह्यान्तरव्याप्तबहुप्रकारः** (इति) । सदसत्=त्रिगुणात्मकम् अव्यक्तम् । तस्य प्रपञ्चो व्यक्तादिः । तं बाह्यान्तराभ्यां कालपुरुषरूपाभ्यां व्याप्तः प्राप्तः । ततो विशेषणसमासः । तदुक्तं भागवते--यत् तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् इति (३-२६-१०) ।।

अन्तः पुरुषरूपेण कालरूपेण यो बहिः । समन्वेत्येष सत्त्वानां भगवानात्ममायया इति । (३-२६-१८) । अथवा सदसत्प्रपञ्चः=स्थूलसूक्ष्मरूपः । तस्य बाह्यान्तरयोः । बहिरेव बाह्यम् । अन्तरेव आन्तरम् । तत्र व्याप्ताः बहवः प्रकाराः धर्माः यस्य सः । भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वमिति[6] लक्षणात् । अथवा संश्चासावसत्प्रपञ्चश्च । न सन् विद्यमानः प्रपञ्चो यस्मिन्निति । ततो विशेषणसमासः अत्र सांख्यमतेन निरञ्जनो निर्विकारो निर्गुणः पुरुष उक्तः । तथा च भागवते—प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः । अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ।। स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते । अहंधिया विमूढात्मा कर्ताहमिति मन्यते ।। इति । (३-२७-१२२) यद्वा पुरुषपदेन ब्रह्मैवोक्तम् । तच्च तादृशं भवति । सद्रूपमानन्दरूपं चिद्रूपं शुद्धं प्रपञ्चातिरिक्तं सर्वव्यापकं सर्वस्वरूपमिति । आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम् इति च । सर्वं खल्विदं ब्रह्म इत्यादयः श्रुतयः प्रमाणम् । . . . . सजातीयविजातीयतयोक्तज्ञानवानित्यर्थः । शोभनो निरतिशयः आनन्दः । स्वस्वरूपमेव निरुपहितस्वरूपमुक्तम् । अर्थोपहितस्वरूपं निरूपयति—**सदसदिति** । सत् प्रत्यक्षम् । असत् अप्रत्यक्षम् । ते एव प्रपञ्चः । तस्य बाह्ये आन्तरे च स्थिताः बहवः प्रकाराः विवर्तनविशेषाः यस्य स तथोक्तः । बहुभिः प्रकारैरन्तर्बहिश्च कृत्स्नं जगद् व्याप्य स्थित इति भावः । यच्च किंचित् जगत् सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः इति श्रुतेः (T.Ā-; 1-11-5) प्रकृतेरविद्यायाः परस्तात् परतः स्थितः । मायातीत इत्यर्थः । अस्ति सर्वोत्कर्षेण वर्तते इत्यर्थः । संक्षेपव्याख्येयम् । विस्तरस्तु वेदान्तेभ्योऽवगन्तव्यः । अस भुवि इति धातोरस्तीति वर्तमाने लट् ।

वस्तुनिर्देशात्मकं मङ्गलं कृतमिति सूचितम् । तदुक्तम्—आशीर्नमस्क्रिया वस्तुनिर्देशो (वा) मङ्गलमिति । अस्मिन् श्लोके इन्द्रवज्रा वृत्तम् । स्यादिन्द्रवज्रा यदि तौ जगौ गः इति वृत्तरत्नाकरलक्षणात् । ननु इन्द्रवज्रायाम् आदौ तगणः पतति । स शून्यफलः कथमादौ कविना प्रयुक्तः (इति चेत्—न ।) देवता-भद्रादिवाचकत्वेन अदोषात् । तदुक्तं छान्दसैः—"देवतावाचकाः[7] शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्गणतो लिपितोऽपि वा"—इति ।। १-१ ।।

(शिशु-१-२) तमेव पुरुषं विराड्रूपेण स्तौति—**अनन्तशक्तिमिति** । अनन्ता =अनन्तवीर्या शक्तिर्माया यस्य तम् । सा वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं . . . . . । यद्वा अनन्ताः=अनवधयः शक्तयः=सामर्थ्यानि यस्य तम् ।

अचिन्त्यविभुत्वादीश्वरस्येति भावः। यद्वा अनन्ताः शक्तयो (यस्य तम्)। अनन्तरूपोऽनन्तश्रीरिति [9]भारतोक्तेः। अथवा अनन्तः शेषः शक्तिरंशो यस्य तम्। शेषोऽनन्त इत्यमरसिंहोक्तेः। यद्वा अनन्ताः शक्तयो (यस्य तम्)। अनन्तशक्तिर्भगवाननन्तः इति भागवतोक्तेः। **अनन्तकोटिब्रह्माण्डभाण्डावृतरोमरन्ध्रम्।** अनन्ताः बह्व्यः कोटयः उत्कर्षा महदादयो येषाम्। यद्वा कोटयः=अश्रयः। आर्त्युत्कर्षाश्रयः कोट्यः (आर्ति—उत्कर्ष—अश्रि) इत्यमरः। तादृशानि यानि ब्रह्माण्डभाण्डानि तैरावृतानि रोमरन्ध्राणि रोमकूपाः यस्य तम्। क्वाहं तमोमहदहंखचराग्निगोवाभूस्सवेष्टिताण्डघटसप्तवितस्तिकायः। क्वेदृग्विधा विगणिताण्डपराणुचर्या वाताध्वरोमविवरस्य च ते महित्वम्। इति भागवतोक्तत्वात्। एवंविधं नित्यं तं नित्यमुक्ताः भजन्तीत्यन्वयः। तं बुद्धिस्थम्। सर्वनाम्नां बुद्धिस्थवाचकत्वात्। नित्यं सर्वदा मुक्ताः। कदाचिदपि तेषां संसारपाशबन्धो नास्तीत्यर्थः। किंलक्षणास्ते। **समाधियोगैः हृदि अपरोक्षयन्तः।** समाधयो=योगाः। तेषां योगाः=प्रत्यासत्तयः। ताभिः कृत्वा मनसि साक्षात्कुर्वन्तः। अक्षाणामिन्द्रियाणां परं परोक्षम्। अतीन्द्रियमिति यावत्। [8]पारस्करादित्वात् सुट्। न परोक्षम् अपरोक्षम्=प्रत्यक्षम्। अपरोक्षप्रमाव्याप्तं प्रत्यक्षमित्युक्तेः[10]॥ योगिनां हि योगजधर्मप्रत्यासत्त्या सर्वं प्रत्यक्षं भवतीति भावः। खमक्षमिन्द्रियं स्रोतः इति हला(युधः)। इत प्रभृत्यस्मिन् सर्गे उपजातिवृत्तम्। अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजयतयस्ताः इति लक्षणात्। (वृत्तरत्नाकरे)॥ १-२॥

(शिशु-१-३) तमेव पुरुषं सर्वजगत्प्रवर्तकत्वेन स्तौति—**स इति।** स पुमान् महदादिभिः पञ्चविंशतितत्त्वैः प्रारब्धं जनितमण्डं विशेषाख्यं समनुप्रविश्य भवप्रपञ्चं संसारविस्तारं प्रवर्तयामास जनयामासेत्यन्वयः। किंलक्षणैस्तत्त्वैः। (तत्राह—) **दृष्टिमात्रक्षुभितात्मनीनमायागुणोत्थैः।** दृष्टिमात्रेण दर्शनेनैव क्षुभिताः कार्योन्मुखाः ये आत्मनीनमायागुणाः। आत्मने हिता=आत्मनीना। अनुकूलेति यावत्। तादृशी या माया प्रकृतिः। तस्याः गुणाः सत्त्वरजस्तमआख्याः। तेभ्य उत्थैः=उत्थितैरित्यर्थः। प्रवर्तयामासेति वृतेर्ण्यन्ताल्लिट्। आत्मनीनेत्यत्र आत्मन्विश्वजनभोगोत्तरपदात् खः (५-१-९) इति खः। खस्य ईन् (आयनेयीन्—इत्यादिसूत्रेण-७-१-२)। आत्माध्वानौ खे (६-४-१६९) इति (प्रकृतिभावात्) न टिलोपः। अत्रार्थे भागवतम्—सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी। सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते॥ (११-२२-१७)॥ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया। लब्धवीर्याः सृजन्त्यण्डं संहताः प्रकृतेर्बलात्॥ (११-२२-१८)॥ १-३॥

(शिशु-१-४) भवप्रपञ्चं प्रवर्तयामासेत्युक्तम् । तत्प्रकारं नारायणाख्यरूपेण ब्रह्मजननद्वारा आह—**प्रागिति** । स पुमान् आत्मसृष्टेः आत्मा वै पुत्रनामासि इति श्रुतेः ब्रह्मसृष्टेः प्राक्=प्रलये सलिले एकार्णवजले शयानः कृतयोगनिद्रः सन् नारायणाख्यः नारायण इति आख्या यस्य सः । नराणां समूहो नारम् । तत् अयनम् आश्रयो यस्य सः । जगन्निवास इत्यर्थः । यद्वा नाराः=आपः । ताः अयनं स्थानं यस्य स तथोक्तः । जलशायीत्यर्थः । यद्वा नारस्य=नृसमूहस्य अयनं=ज्ञानं यस्मात् स तथा । सर्वेषां ज्ञानद इत्यर्थः । ये गत्यर्थास्ते [11]ज्ञानार्थाः इति (न्यायात्) । यद्वा नारं जन्तुसमूहम् अयते प्राप्नोति (इति नारायणः) सर्वव्यापकत्वादित्यर्थः । ये [12]गत्यर्थास्ते प्राप्त्यर्थाः इति । तादृशः संबभूव जात इत्यर्थः । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः । इति (विष्णुपुराणे १-४-६)—वेत्यपरे । तस्य नारायणस्य नाभौ । हिरण्यगर्भः हिरण्यं गर्भे यस्य सः तादृशः । यद्वा हिरण्यस्य गर्भः ब्रह्माण्डान्तर्भूतत्वात् । हिरण्यगर्भः समवर्तताग्रे इति । अजः=भौतिकदेहरहितत्वात् । अत एव **अरविन्दजन्मा**=अरविन्दात् जन्म यस्य तादृशः । अत एव स्वयंभूः—स्वयं भवतीति स्वयंभूः ब्रह्मेति प्रसिद्धः संबभूव । नारायण एव ब्रह्मरूपेणाविर्बभूव इत्यर्थः । हिरण्यगर्भादिविशेषणत्रय ब्रह्मण एव । हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः इत्यमरोक्तेः । अरविन्दजन्मेत्यत्र अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः—इति वामनः (वामनस्य काव्यालंकारसूत्रे ५-२-१९) । उक्तेऽर्थे भागवतम्—परावरेषां भूतानामात्मा यः पुरुषः परः । स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किंचन ।। तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः । तस्मिन् जज्ञे महाराज स्वयंभूश्चतुराननः ।। (९-१-८-९) इत्यादि ।। १-४ ।।

(शिशु-१-५) ब्रह्माणमेव विशिनष्टि—**चतुर्मुख इति** । चत्वारि मुखानि यस्य सः । **पङ्कजविष्टरः**=पङ्कजं पद्मं विष्टरम् आसनं यस्य सः तादृक् । **जनकोपदेशात्** जनकस्य पितुर्नारायणस्य उपदेशात्—आज्ञातः । जगत् उत्पत्तिस्थितिविनाशवत् सिसृक्षुः स्रष्टुमिच्छुः असौ ब्रह्मा नवाना नवसंख्याकानां प्रजापतीनां प्रथमम् आद्यम् मरीचिं मरीचिनामानं प्रजापतिम् आदौ पूर्वं मनसा ससर्ज उत्पादितवान् । (ससर्जेति) सृज विसर्गे इत्यस्य लिटि । विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम्—इति—तातस्तु जनकः पिता—इति चामरः । नव प्रजापतयस्तु पुराणे (भागवते) उक्ताः । भगवच्छक्तियुक्तस्य लोकसन्तानहेतव—। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।। भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ।। (३-१-२) इति । मनसा ससर्जेत्यत्रापि—मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः इति भागवते ।। १-५ ।।

(शिशु-१-६) मरीचेः को बभूवेत्य(त्र)ाह—**मरीचितः इति** । मरीचितः (इत्यत्र) पञ्चम्यास्तसिल् (५-३-७) । कश्यपनामधेयो महर्षिरासीदिति संबन्धः । विरिञ्चिनप्ता =ब्रह्मपौत्रः । महनीयकीर्तिः सत्कीर्तिः । असावपि—कश्यपोऽपि त्रयोदश तिस्रः दश च दक्षकन्या. दक्षप्रजापतेः पुत्र्यः (ता.) विधिना ब्राह्मविवाहेन उदवाक्षीत् पर्यणैषीत् । उत्पूर्वस्य वह प्रापणे इत्यस्य लुङि परस्मैपदम् । हो ढः (८-३-३१) ढत्वम् । षढोः कः सीति (८-२-४१) कत्वम् । वदव्रजेति (७-२-३) वृद्धिः । त्रयोदशेत्यत्र संख्ययाव्ययासन्नेति (२-२-२५) समासः । कश्यपेन त्रयोदशोढा इत्यत्र पुराणम्—ददौ स दश धर्माय कश्यपाय त्रयोदश—इति (विष्णुपुराणे १-१५-१०४) ॥ १-६ ॥

(शिशु-१-७) कश्यपादितिभ्या को बभूवेत्याह—**तत्रेति** । तत्र तासु त्रयोदशसु मध्ये अदितेः अदितिनाम्न्याः कश्यपतः कश्यपात् पतङ्गः सूर्यः जज्ञे प्रादुर्भूत इत्यर्थः । किंलक्षणः पतङ्गः (तत्राह) विवस्वानिति । विवस्तेजोऽस्यास्तीति तथोक्तः । यद्वा विवस्वान् देव इत्यर्थः । अनेन न पौनरुक्त्यम् । ननु . . . . . इत्याह—जकदेगदीप इति । जगता भुवनानाम् एको मुख्यो दीप प्रकाशक इत्यर्थः । पुनः किंविशिष्टः । त्रिलोकवन्द्यः =त्रयाणा लोकाना वन्द्यो नमस्कार्यः । पुन. किंभूतः । त्रिगुणात्मकः । सत्त्वरजस्तमोरूपगुणात्मक. । तथोक्तम्—त्रिगुणात्मधारिण इति । असौ सूर्यः दिवस्पृथिव्योः द्यावाभूम्योः तिमिरं (तम). विभिन्त्ते विदारयति । विपूर्वस्य भिदिर् विदारणे इत्यस्य—लट्यात्मनेपदे प्रथमपुरुषैकवचनम् । दिवस्पृथिव्योरित्यत्र दिवसश्च पृथिव्याम् (६-३-३०) इति सूत्रेण दिवो दिवसादेशः । द्यौश्च पृथिवी चेति विग्रहः । पतङ्ग पक्षिसूर्ययोरिति—देवसूर्यौ विवस्वन्तौ इति—एके मुख्यान्यकेवला इति चामर. । दाक्षायण्या ततोऽदित्या विवस्वानभवत् सुतः । (९-१-१०) इत्युक्तं भागवते ॥ १-७ ॥

(शिशु-१-८) सूर्य विशिनष्टि—**प्रकाशयन्निति** । एष विवस्वान् सूर्यः आकाशमाकाशयति प्रकाशयति । त्रिभिर्वेदैः ऋगादिभि कृत्वा सचरते गच्छति । किं कुर्वन् स्वधाम्ना निजतेजसा दिशावकाशान् दिगन्तरालभागान् प्रकाशयन् । [13]हलन्ताद् वा—इति दिक्शब्दाद् विभाषा टाप् । किंलक्षण —**लोकेशलक्ष्मीशमहेशमूर्तिः** । ब्रह्मविष्णुशिवात्मकः । लोकेशलक्ष्मीशमहेशमूर्तिभेदैरिति पाठे ब्रह्मादिमूर्तिभेदैः संचरत (इति योजना) । (वेदैरिति पाठे) त्रयीरूप इत्यर्थः । आकाशयतीति (रूपम्)

आङ्पूर्वस्य काशृ दीप्तौ इत्यस्य णिचि लटि । संचरते इति (रूपे) चर गतिभक्षणयोरित्यस्य उदश्चरः सकर्मकात्—समस्तृतीयायुक्तात्—(१-३-५३; १-३-५४) इत्यात्मनेपदम् । लोकेशः स्वयंभूश्चतुराननः इत्यमरः । लोकेशादिमूर्तिरित्यत्र भविष्योत्तरपुराणे (उक्तम्)—उदये ब्रह्मरूपश्च मध्याह्ने तु महेश्वरः । अस्तमाने स्वयं विष्णुस्त्रिमूर्तिस्तु दिवाकरः ।। इति । त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चनारायणशंकरात्मने । इति च ।। १-८ ।।

(शिशु-१-९) सूर्यात् कोऽभूद् इति (अत्र) आह—**वैवस्वत इति ।** ततः= सूर्यात् । पञ्चम्यास्तसिः । वैवस्वतो नाम मनुरभूत् । विवस्वतः अपत्यं वैवस्वतः । तस्यापत्यम् (४-१-९२) इत्यण् । किंभूतः । **धरणीपतीनां धर्मोपदेष्टा ।** धरणीपतीनां भूपतीनां धर्मोपदेष्टा राजधर्मोपदेशक इति भावः । उपदिशतीत्युपदेष्टा । ण्वुल्तृचौ (३-१-१३३) इति तृच् । स मनुः महत्ययोध्यानगरे स्वपुत्रमात्मजम् इक्ष्वाकुमिक्ष्वाकुनामानम् उर्वीपतिं राजानम् अभ्यषिक्त । तस्याभिषेकमकरोदित्यर्थः । अभिपूर्वस्य षिच [14]क्षरणे इत्यस्य लुङि आत्मनेपदम् । झलो [15]झलि (८-२-२६) इति सिचः (सकारस्य) लोपः । वसुधोर्वी वसुन्धरा—इत्यमरः । तदुक्तं भागवते—ततो मनुः श्राद्धदेवः संज्ञायामास भारत । श्रद्धायां जनयामास दश पुत्रान् स आत्मवान् ।। (९-१-११) क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः । तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदण्डकाः ।। (९-६-४) इति ।। १-९ ।।

(शिशु-१-१०) **इक्ष्वाकुवंशेति ।** अथ अनन्तरम् । इक्ष्वाकुवंशप्रभवैः इक्ष्वाकुकुलजातैः विकुक्षिप्रभृतिभिर्नरेन्द्रैः राजभिः अध्यास्यमाना अधिष्ठिता अयोध्या नगरी वृषान्विता वृष्णा इन्द्रेण युक्ता अमरावतीव इन्द्रनगरीव अभात् रराज । नागान्विता शेषाख्यसर्पान्विता भोगवतीव शेषनगरीव च रेजे शुशुभे । अमरावतीत्यत्र मतौ बह्वचोऽनजिरादीनाम् (६-३-११९) इति दीर्घः । अभादिति भा दीप्तावित्यस्य लुङि परस्मैपदम् । अदादित्वात् शपो लुक् । रेजे इति (अत्र) राजृ दीप्तौ इत्यस्य लिटि आत्मनेपदम् । वासवो वृत्रहा वृषा इति, तस्य नगरी त्वमरावती इति, नदीनगर्योर्नागानां भोगवती इति चामरः । उपमेये राजानो बहवः । [16]उपमाने त्विन्द्र एकः । शेषश्चैकः । तथाप्येकेनाधिष्ठिता अमरावती भोगवती च विवक्षिता । यद्वा वृषैः धर्मशीलैः सात्त्विकांशत्वाद् देवैरन्वितामरावतीव । नागान्विता नागैः शेषादिसर्पैरन्विन्ता भोगवतीव इति ।। १-१० ।।

(शिशु-१-११) **हिरण्मयीमिति।** प्रजा. जनाः हिरण्मयी सुवर्णविकारा देवपुरी देवस्य रामाख्यस्य विष्णोः पुरीमयोध्यामध्यास्य तस्यामध्युष्येत्यर्थ. । तामयोध्याम् । पूर्णामृताम्भःपरिखापरीतां =अमृतमिवाम्भः अमृताम्भः । पूर्णममृताम्भो यस्या । सा च परिखा परितः खाता । तया परीतां व्याप्ता ब्रह्मपुरी विदित्वा ज्ञात्वा परम् उत्कट यद् ब्रह्मसुखं =ब्रह्मलोके यत् सुखं तत् सुख भजन्ते प्राप्नुवन्ति । देवाना पूरयोध्या । तस्यां हिरण्मयः कोशः (अस्ति ?) (योवैना ब्रह्मणो वेद) । अमृतेनावृता पुरीम । (तस्मै) ब्रह्म च ब्रह्मा चेति श्रुतेः (तै. आ. १-२६-३) । यद्वा देवपुरी राजनगरीम् । पूर्णामृताम्भःपरिखापरिताम् पूर्ण यदमृताम्भ. मुक्तिजनकजल यस्याः सा पूर्णामृताम्भाः सरयूः सरित् । परिखा परितः खातं दुर्गवेष्टनम् । तेन परीता युक्ताम् । अयोध्यामध्यास्य अधिष्ठाय तां ब्रह्मपुरी विदित्वा परब्रह्मसुखं भजन्ते । अयोध्याया. सप्तपुर्यन्तर्गतत्वेन मोक्षदातृत्व युक्तमित्याशयः । तदुक्तम्——अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका । पुरी द्वारवती चैव सप्त ता मोक्षदायिका -इति ।(?) हिरण्मयीमिति दाण्डिनायनेति (६-४-१७४) इति निपातनात् साधु । अयोध्यामित्यत्र अधिशीङ्स्थासा कर्मेति (१-४-४६) कर्मत्वमाधारे । राजा भट्टारको देव——इति——मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयमामृतम्——इति——खेय तु परिखा इति चामर. । भजन्ते इति भज सेवायामित्यस्माल्लट् ।। १-११ ।।

(शिशु-१-१२) **ये वाजिमेधैरिति।** ये राजान वाजिमेधै. अश्वमेधै. वाजपेयैरपि यागैः ये च राजसूयैः राजकर्तृकैर्यागविशेषैः सुरान् देवान् अयाक्षु यजन्ति स्म ते सर्वेऽपि राजानः तत्र भुवि अयोध्याभूमौ भुक्तभोगाः अनुभूतरत्यादिसुखा सन्त अन्ते मरणकाले शरीरं हित्वा त्यक्त्वा त्रिदिवे रमन्ते क्रीडन्ति । ये अत्र कृताश्वमेधादियागा नृपाः (ते) तस्या स्वर्गतुल्यभोगान् भुक्त्वा अन्ते मृत्वा वैकुण्ठादिस्थानं प्राप्य -रमन्ते इति भावः । [17]राज्ञा सोतव्यो राजसूयः । राजा वा सूयते यत्र स राजसूयः । षुञ् अभिषवे । अस्माद् राजनि तृतीयान्ते उपपदे कर्मणि क्यप् । तस्य गुणाभावो दीर्घत्वं च राजसूयसूर्येत्यनेन (३-१-११४) निपात्यते । अयाक्षुरिति यज देवपूजासंगतिकरणदानेष्वित्यस्य लुङि परस्मैपदे प्रथमपुरुषबहुवचनम् । सिजभ्यस्त विदिभ्यश्चेति (३-४-१०९) [18]झेर्जुसादेश. । स्वरव्यय स्वर्गनाकत्रिदिवत्रिदशालयाः इत्यमरः ।। १-१२ ।।

(शिशु-१-१३) पुनस्तामेव विशिनष्टि——**पालाशेति। पालाशपैतद्रवराज्जुदालबैल्वाः।** पलाशः प्रसिद्धः । पलाशस्यायं पालाश. । [19]पीतद्रुः सरलवृक्षः । तस्यायं पैतद्रवः । रज्जुदालो वृक्षविशेषः । तस्यायं राज्जुदालः । तस्येदम् (४-३-१२०)

इत्यण् । यद्वा पालाशाः पलाशविकाराः । पैतद्रवाः [20]पीतद्रुविकाराः । राज्जुदालाः रज्जुदालविकाराः । अत्र पालशादित्रये पलाशादिभ्यो वा (४-३-१४१) ओरञ् (४-३-१३९) इत्यनेन विकारार्थे अञ् । बैल्वाःबिल्वविकाराः । **तथोदुम्बरखादिराश्च ।** औदुम्बराः उदुम्बरविकाराः । खादिराः खदिरविकाराः । बैल्वशब्दे बिल्वादिभ्योऽण् (४-३-१३६) इति विकारार्थे अण्प्रत्ययः । **सहस्रसंख्याः ।** सहस्रं संख्या येषां ते तथोक्ताः । यूपाः यज्ञस्तम्भाः तस्याः अयोध्यायाः समीपे सरयूतटेषु . . . . . पलाशादियूपकरणे मूलं श्रुतिपुराणानि । . . . . . श्रुतेः । प्राप्ते यूपोच्छ्रये तत्र षड् बैल्वाः खादिरास्तथा । तावन्तो बिल्वसहिताः पर्णिनश्च तथा परे । (वाल्मीकि-रामायणे १-१४-२२) श्लेष्मातकमयो दिष्टो देवदारुमयस्तथा । (वा-रा-१-१४-२३) इति रामायणे । . . . . . पीतद्रुः सरलः पूतिकाष्ठम् इति - पूतिकाष्ठं च सप्त स्युर्देव-दारुणि इति (च) अमरः । अनेन सर्वदा यागकारित्वमुक्तम् ।। १-१३ ।।

(शिशु-१-१४) **साक्षादिति ।** [21]ककुत्स्थनामा नृपः कुलराजधानीम् अयोध्या-मध्यवात्सीत्-उवासेत्यर्थः । उपान्वध्याङ्वसः (१-४-४८) इति कर्मत्वमयोध्यायाः । अधि(पू)र्वस्य वस निवासे इत्यस्य लुङि परस्मैपदे प्रथमपुरूषैकवचनम् । सः स्यार्धधातुके (७-४-४९) इति (धातुसकारस्य) तकारः । वदव्रजेत्यादिना (७-२-३) वृद्धिः । ककुत्स्थनामप्रयोजकं विशे(प)णमाह--'(साक्षादित्यादिना ।) किकृत्वा--साक्षात् प्रत्यक्षस्य ऋभुक्षः--इन्द्रस्य ककुदि स्थितः सन् वृषांसे स्थितः सन् अक्षिगतान् द्वेष्यान् निहत्य घातयित्वा । ननु इन्द्रस्य कथं ककुत्--उक्षाकृतेः (इति) । बलीवर्दमूर्तेः । उक्ष्णः आकृतिरिवाकृतिर्यस्य तस्येत्यर्थः । सप्तम्युपमान-पूर्वपदस्येति बहुव्रीहिः । अत एव इन्द्रवाहः इन्द्रेण वाह्यते इति इन्द्रवाहः । तस्यैव नामान्तरम् । तदुक्तं भागवते--पुरंजयस्तस्य सुत इन्द्रवाह इतीरितः । (९-६-१२) । **ककुदि स्थित इति ।** प्रत्यक्षतुल्ययोरेव साक्षादव्ययमुच्यते इति । द्वेष्ये त्वक्षिगतो वध्यः शीर्षच्छेद्य इमौ समौ इति (अमरः) । आखण्डलः सहस्राक्ष ऋभुक्षा इति प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियामिति चामरः । ककुद-शब्दोऽप्यस्ति । ककुद्वत् ककुदं श्रेष्ठे वृषाङ्गे राजलक्ष्मणि इति विश्वः । उक्षा भद्रो बलीवर्दः इत्यमरः । भवेदक्षिगतो द्वेष्यः इति हलायुध. ।। १-१४ ।।

(शिशु-१-१५) **उदेतीति ।** युवनाश्वसूनुः युवनश्वस्य राज्ञः सूनुः पुत्रः मान्धातृनामा =मान्धाता ता पुरीमयोध्यामध्यवसत् । तस्या वसति चक्रे । उपा-न्वध्याङित्यादिना अधिकरणस्य कर्मसंज्ञा । वस निवासे इत्यस्याधिपूर्वस्य लङि परस्मैपदे प्रथमपुरुषैकवचनम् अध्यवसदिति । किं ततः । सुदानुः दानशीलः । यद्वा

सुष्ठु ददातीति सुदानुः। दाभाभ्यां नुरिति औणादिको नुप्रत्ययः। बहुलवचनादुपपदेऽपि। यद्वा दीयते यत् तत् दानु दानम्। सुष्ठु दानु यस्यासौ सुदानुः। दानुर्दातरि संश्रुतः इति [22]प्रतापः। पुनः किं ततः। तावत् निजक्षेत्रं स्व राज्यम् अनाहताज्ञः अप्रतिहतशासनः सन् शासत्=पालयन्। शास्तीति शासत्। शतृप्रत्ययः। अभ्यस्तत्वान्नुमभावः (नाभ्यस्ताच्छतुः ७-१-७८ इति सूत्रेण)। तावत् कथम्——यावत् सविता सूर्यः उदेति उच्चैः एति उदयाचलं प्राप्नोति अस्तमेति अस्ताचल प्राप्नोति। यद्वा [23]तावत्पर्यन्तं सर्व निजक्षेत्रं यथा भवति तथा शासत्। यावत् तावच्च साकल्ये इत्यमरः। उदेति यावत् सवितास्तमेतीत्य(नेन) चोदयाचलास्ताचलयोरन्तराले इति (कथितं भवति)। तदुक्तं भागवते——

यौवनाश्वोऽथ मान्धाता चक्रवर्त्यवनी प्रभुः।
सप्तद्वीपवतीमेकः शशासाच्युततेजसा॥

यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति।
सर्व तद् यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते॥ इति (९-६-३८, ३७)

॥ १-१५ ॥

(शिशु-१-१६) **महीमिति**। मघवत्समस्तामित्यत्र मघवत्समं ताम् इति पदच्छेदः। मघवत्समः—इन्द्रतुल्यः स राजा सगरः तां समस्तां महीम्- सर्वां भुवम् पुरीमयोध्यां च शशास पालयामास। षष्टि सहस्राणि षष्टिसहस्रसंख्याकान् सुतान् पुत्रान् लेभे च प्राप च। किंभूतः। बाहुजमौलिरत्नम् क्षत्रियमुकुटमणिः। सगरः कस्माज्जात——इत्याशङ्क्याह——बाहुज इति। बाहुनामा **वृकपुत्रः**(?)। तस्मात् जात इत्यर्थः। जायते इति जः। सप्तम्या जनेर्डः (३-२-९७) इति डः। बाहुजः क्षत्रिय इति केनचिद्[24] व्याख्यातम्। तन्न। बाहुजमौलिरत्नमित्यनेनैव पुरुषार्थ (पुरुषसूक्तार्थ?) स्तावकक्षत्रियत्वजातेरुक्तत्वात्। शशासेति शासु अनुशिष्टावित्यस्य लिटि। लेभे इति डु लभष् प्राप्तावित्यस्य लिटि आत्मनेपदम्। षष्टि सहस्राणीति नियतलिङ्गत्वात्। मरुत्वान् मघवेति बाहुजः क्षत्रियो विराडिति चामरः। गरेण सह जातः [25]सगर इति यथार्थनामता। तदुक्तं भागवते——

आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽन्धमा सह।
सह तेनैव संजातः सगराख्यो महायशाः॥ इति॥ (९-८-४)

बाहुज इत्यत्र लिङ्गपुराणम्——

[26]करुकस्य वृकः पुत्रस्तस्माद् बाहुः प्रजज्ञिवान् ।
सगरस्तस्य पुत्रोऽभूद् राजा परमधार्मिकः ।। इति । ।। १-१६ ।।

(शिशु-१-१७) **तस्याश्वमेधे** इति । तस्य सगरस्याश्वमेधे सर्वे तनयाः षष्टिसहस्रमिताः ययुरक्षणाय ययोः अश्वमेधीयाश्वस्य रक्षणं तस्मै दिगन्तान् ययुः प्रतिजग्मुः । स चार्वा वाजी इन्द्रेणामून् कुमारान् सगरपुत्रान् अह्नाय सपदि निह्नोतुम् विप्रलब्धुम् पातालमनीयत नीतः । नयतिर्द्विकर्मकः । दिगन्तानित्यत्र गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ (२-३-१२) इत्यनेन द्वितीया । ययुरश्वोऽश्वमेधीयः इत्यमरः । वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः इति, स्राग्झटित्यञ्जसाह्नाय द्राङ्मङ्क्षु सपदि द्रुते इति चामरः । अश्वहरणे संमतिः—

तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः इति भागवते (९-८-८) ।। १-१७ ।।

(शिशु-१-१८) **अन्वेषमाणाः** इति । तमश्वमन्वेषमाणाः अवलोकयमानाः अनूनसत्त्वाः संपूर्णबलाः करेखनित्रा करे खनित्राणि अवदारणानि येषां ते तथोक्ताः । वीराः शूरास्ते सगरस्य पुत्राः षष्टिसहस्रसंख्याकाः पातालरन्ध्रं पातालबिलम् । पाताललोकमिति यावत् । प्रविविक्षव. प्रवेष्टुमिच्छन्तः सन्तः । पाथःखनिम् = पाथसां जलाना खनिम् आकर समुद्रम् । यद्वा पाथःखनिम् = पृथिवीम् । पाथो जलं खनिरुत्पत्तिस्थानं यस्यास्ताम् । अद्भ्यः पृथिवीति श्रुतेः । पर्यखनन्त = अवदारयन्ति स्म । परिपूर्वस्य खन् अवदारणे इत्यस्य लङि आत्मनेपदम् । करेखनित्रा इत्यत्र सप्तम्युपमानपूर्वपदस्येति समास. । अमूर्धमस्तकात् स्वाङ्गादकामे (६-३-१२) इति सूत्रेण सप्तम्याः अलुक् । खन्यते अनेनेति खनित्रम् । अर्तिलूधूसूखनसहचर इत्रः (३-२-१८४) इति इत्रप्रत्ययः । खनित्रमवदारणमिति त्रिकाण्डी (= अमरः) । प्रविविक्षवः इत्यत्र सनाशंसभिक्ष उः (३-२-१६८) इति सूत्रेण उप्रत्ययः । कबन्धमुदकं पाथ (इति) खनिः स्त्रियामाकर. स्यादिति चामरः । समुद्रखनने भारतम् =

प्रतिगृह्य तु संदशं ततस्ते सगरात्मजाः ।
कुद्दालैर्हिस्रकैश्चैव समुद्रमखनंस्तदा ।। इति ।। १-१८ ।।

(शिशु-१-१९) **आलोक्येति** । कपिलस्य मुनेः पार्श्वे समीपे अश्वमालोक्य हयस्तेनस्तुरगचोरः आस्ते इति ब्रुवाणाः सगरात्मजाः उन्मीलिताक्षेण विकसितनयनेन कर्दमजेन कर्दमनामा कश्चन मुनिस्तस्माज्जातेन कपिलेन रोषात् कोपान्निरीक्ष्यमाणाः सन्तः निर्देहिरे भस्मीचक्रिरे । निस् पूर्वस्य दह भस्मीकरणे इत्यस्य कर्मणि लिटि आत्मनेपदम् । अत एकहल्मध्येऽनादेशादेर्लिटि (६-४-१२०) इत्यभ्यासलोपः

एकारादेशश्च । उन्मीलिताक्षेणेत्यत्र उन्मीलिते अक्षिणी येन तेनेति (विग्रहः) । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (५-४-११३) इति षच् प्रत्ययः । पूर्वं तपः-समाधिना निमीलितनयन इत्युक्तं भवति । कर्दमज इत्यत्र पञ्चम्यामजातौ (३-२-९८) इति डः प्रत्ययः । चोरैकागारिकस्तेनदस्युतस्करमोषकाः इत्यमरः । कार्दमं वीर्यमापन्नं यज्ञे इत्युक्तं भागवते । अत्र केचित्[27] हयः ते नः इति च्छेदं कृत्वा नः अस्माकं हयः ते तव पार्श्वे इति व्याकुर्वते । तदयुक्तम् । मर्मोद्घाटनोपजनकवचनाभावात् । पुराणविरोधाच्च । तद्यथा भागवते--

हयमन्वेषमाणास्ते समन्तान्न्यखनन् महीम् ।
प्रागुदीच्यां दिशि हयं ददृशुः कपिलान्तिके ॥
एष वाजिहरश्चोर आस्ते मीलितलोचनः ।
हन्यतां पाप इत्युक्त्वा सर्वे ते सगरात्मजाः ॥
उदायुधा अभिययुरुन्मिषेण तदा मुनिः ॥
स्वशरीराग्निना तावन्महेन्द्रहृतचेतसः ।
महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् ॥ इति ॥ (९-८-९-१२)

॥ १-१९ ॥

(शिशु-१-२०) **तद्वंशजात इति ।** तद्वंशजातः -सगरकुलोत्पन्नः अंशुमतो राज्ञः पुत्रः[28] भगीरथाख्य भगीरथनामा तपोभिस्तरुणेन्दुमौलि बालचन्द्रचूड शिवम् आराध्य उपास्य अमरैर्दुरापाम् . . . . . गङ्गा प्रपितामहाना पूर्वजाना निवापहेतोस्तर्पणार्थम् उद्धारार्थमिति यावत् । अवाप प्राप । प्रपितामहानामित्यत्र षष्ठीहेतुप्रयोगे (२-३-२६) इति षष्ठी निवापहेतोरिति प्रयोगात् । दुरापामित्यत्र ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् (३-३-१२६) इति खल् । कर्तृकर्मणोः कृति (२-३-६५) इति षष्ठी न, न लोकेति (२-३-६९) निषेधात् । भगीरथगङ्गावतरणे . . . . . .

भगीरथस्तस्य सुतस्तेपे स सुमहत्तपः । इत्यादि
इत्युक्त्वा स नृपो देवं तपसातोषयच्छिवम् । इत्यादि च ।

(भागवते १-१-२, ८) ॥ १-२० ॥

(शिशु-१-२१) **कमण्डलूत्थेति ।** कमलासनस्य ब्रह्मणः कमण्डलूत्था -व्यापारपावनिर्गता विष्णुपदाद् विनिर्गता भर्गजटावतीर्णा --शिवस्य जटायाः अवतीर्णा जह्नुसुता --जह्नुनाम्नो राजर्षेः कन्या . . . . . दुहितृत्वेन प्रतिपादितत्वात् । तदुक्तं हरिवंशे . . . . .

राजर्षिणा ततः पीतां गङ्गां दृष्ट्वा महर्षयः । (इत्यादि)

जाह्नवीति तस्य (जह्नोः) कर्णादुद्भूतत्वात् । भागीरथी भगीरथप्रार्थितत्वात् । एतादृशी सा प्रसिद्धा नदी गङ्गा जगत्त्रयं त्रिभुवनं . . . . पुनीते पवित्रयति । अवतीर्णेत्यत्र रदाभ्याम् (८-२-४२) इति निष्ठातस्य नत्वम् । नदीत्यत्र नदट् पचादिः । ङीप् । अस्त्री कमण्डलुः कुण्डी इति हरः स्मरहरो भर्गः इति चामरः । कमण्डल्वादिभ्यो जानेत्यर्थे--

आदावादिपितामहस्य नियमव्यापारपात्रे जलं
पश्चात् पन्नगशायिनो भगवतः पादोदकं पावनम् ।
भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं
कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ।। इति ।

(सुभाषितसुधानिधावपि २०९ पुटे उद्धृतमिदम्)

जह्नुकर्णोद्भूतत्वे--

. . . . . जाह्नवी जह्नुना पुरा ।
क्रोधात् पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ।। इति । ।। १-२१ ।।

(शिशु-१-२२) **भगीरथे इति ।** भाग्यनिधौ [29]महदैश्वर्याश्रय महीन्द्रे क्षितिपुरन्दरे भगीरथे माहेन्द्रम् =ऐन्द्रम् आसनार्धं सिंहासनार्धम् अध्यूषुषि =अधिष्ठितवति सति =मृते सतीति यावत् । अन्येऽपि अहर्मणेः सूर्यस्य अन्वयभूमिपालाः वंशभूपाः खट्वाङ्गादयः तामयोध्यामध्यूषुः अधिवसन्ति स्मेत्यर्थः । आसनार्धमित्यत्र समांशविवक्षया अर्धशब्दस्य न पूर्वभावः । अध्यूषुषि इत्यत्र लिडादेशः क्वसुः । वचिस्वपीति (६-१-१५) संप्रसारणम् । वसोः संप्रसारणम् (६-४-१३१) इति वसोरपि संप्रसारणम् । अयोध्यामित्यत्र उपान्वध्याङिति (१-४-४८) आधारस्य कर्मत्वम् । कर्मत्वाद्द्वितीया । अध्यूषुरित्यत्र वस निवासे इत्यस्याधिपूर्वस्य लिटि परस्मैपदम् ।। १-२२ ।।

(शिशु-१-२३) **तत इति ।** ततः अनन्तरं दिगन्ताधिपतिः नानादेशाधिपतिर्दिलीपः शतं शतसंख्याकान् अश्वमेधान् क्रतून् आहरत् चकार । आङ्पूर्वस्य हृञ् हरणे इत्यस्य लङि परस्मैपदम् । वंशकरं कुलवर्धनं रघुं रघुनामानं सुतं पुत्रं च सुदक्षिणायां पत्न्यां लेभे प्राप । वंशकरम् इत्यत्र कृञो हेतुताच्छील्यानुलोम्येषु (३-२-२०) इति टः प्रत्ययः ।। १-२३ ।।

(शिशु-१-२४) **सौदक्षिणेय इति ।** इन्द्रयोधी इन्द्रेण युध्यते इति । नन्दिग्रहीत्यादिना (३-१-१३४) णिनिः । सौदक्षिणेयः सुदक्षिणायाः अपत्यम् । स्त्रीभ्यो ढक् (४-१-१२०) इति ढक् । आयनेत्यादिना (७-१-२) ईयः । तद्धितेष्वचामादेः (७-२-११७) इति वृद्धिः । रघुः पित्रा दिलीपेन शताश्वमेधेषु कृतेषु सत्सु महता बाह्वोर्बलेन भुजशक्त्याच पूतक्रतायीतनयं शचीपुत्रं जयन्तम् आह्वास्त स्पर्धया आकारितवान् । स्पर्धायामाङः (१-३-३१) इति आत्मनेपदम् । ह्वेञ् स्पर्धायां शब्दे च इत्येतस्य लुङि रूपम् । आदेच (उपदेशे) अशिति (६-१-४९) इति आत्त्वम् । पूतक्रतोः स्त्री पूतक्रतायी । पूतक्रतोरै च (४-१-३६) इति ऐकारः ङीप् च । यद्वा वृषाकपायीतनयमिति पाठे पार्वतीनन्दन सेनान्यमपि आह्वास्तेत्यर्थः । वृषाकपायी श्रीगौर्योरित्यमरः । पूतक्रतायीमभ्येत्य सत्रपः किं न गोत्रभित् इति च . . . . प्रयोगः ।। १-२४ ।।

(शिशु-१-२५) **रघुर्दिलीपे इति ।** रघुवंशदीपे रघुकुलप्रकाशके । पचाद्यच् । दिलीपे यज्ञफलानुभूत्यै स्वर्गसुखानुभवाय दिव स्वर्गं याते प्राप्ते सति अमुद्रैरसंख्यैः अपरिच्छिन्नैरिति यावत् । पृतनासमुद्रैः सेनासमुद्रैः चतु समुद्रीपरिखा पृथ्वी जिगाय अजयत् । जयतेः सन्लिटोर्जेः (७-३-५७) इति लिटि कुत्वम् । चत्वारः समुद्राः समाहृता इति चतुःसमुद्री । संख्यापूर्वो द्विगुः (२-१-५२) इति द्विगुसंज्ञा । तद्धितार्थेत्यादिना समासः (२-१-५१) । अकारान्तोत्तरपदो द्विगुः स्त्रियां[30] भाष्यते (वार्त्तिक-२-४-३०-४) इति स्त्रीत्वम् । द्विगुरेकवचनम् इत्येकवचनम् । द्विगोः (४-१-२१) इति ङीप् । **चतुःसमुद्री** परिखा यस्यास्ताम् । सेना च पृतना चमूरित्यमरः । यद्वा पृतनासमुद्रैः समुद्रात्मकगणनाभिः पृतनाभिरित्यर्थः । समुद्रगणना खर्वलक्षात्मिका । ततुक्त रामायणे ?——शत [31]खर्वसहस्राणा समुद्रमभिधीयते इति ।। १-२५ ।।

(शिशु-१-२६) **रघोरिति ।** रघोरजः पुत्रो जातः । किंविशिष्टः । कुञ्जरघोरजन्यः कुञ्जरस्येव घोरं जन्यं युद्धं यस्य सः । पुनः किंविशिष्टः । पुरुहूततेजाः इन्द्रतुल्यप्रतापः । अथ अनन्तरं सः अजः स्वयंवरे इन्द्रप्रभा चन्द्रतुल्यकान्तिम् इन्दुमतीं व्यवोढ विवाहितवान् । विवाहप्रत्यूहभूतान् सर्वनृपान् व्यजेष्ट जितवान् । व्यवोढेति विपूर्वस्य वहतेर्लुङि रूपम् । झरो झरीति । (८-४-६५) मिचो लुक् । हो ढः (८-२-३१) इति ढत्वम् । झषस्तथोर्धोऽधः (८-२-४०) इति धत्वम् । ष्टुना ष्टुः (८-४-४१) इति टुत्वम् । ढोढे लोपः (८-३-१३) इति ढकारलोपः । सहिवहोरो-

दवर्णस्य (६-३-११२) इति ओकारादेशः । व्यजेष्टेति विपूर्वस्य जयतेर्लुङि रूपम् । विपराभ्या जेः (१-३-१९) इति तङ । सिजादेशः । युद्धमायोधनं जन्यमित्यमरः ।। १-२६ ।।

(शिशु-१-२७) **अजीजनदिति ।** अजोऽपि राजा इन्दुमत्यां शस्यं प्रशस्तं दशस्यन्दनं दशरथम् अजीजनद् उत्पादितवान् । स्वयं च स्वर्गतां स्वर्ग प्राप्तां तामन्वगमत् । अनुजगाम । किंभूतः पुत्रप्रधानाहितराज्यभारः । पुत्रश्च प्रधानाश्च । तेष्वाहितः क्षिप्तः राज्यभारो येन सः । अजीजनदित्यत्र जनी प्रादुर्भावे इत्यस्य णिचि लुङि रूपम् । णिश्रिद्रुस्रुभ्यः कर्तरि चङ (३-१-४८) इति सूत्रेण णिचश्चङादेशः । चङि (६-१-११) इति द्विर्वचनम् । सन्वल्लघुनि चङपरेऽनग्लोपे (७-४-९३) इति सन्वत्कार्यम् । सन्यतः (७-४-७९) इतीत्वम् । दीर्घो लघोः (७-४-९४) इति दीर्घः । शस्यमित्यत्र शंसिदुहिगुहिभ्यो वा इति वार्त्तिकेन क्यप् । अनिदितामिति (६-४-२४) इत्यनुस्वारलोपः । अन्वगमदिति गम्लृ गतावित्यस्य लुङि रूपम् ।। १-२७ ।।

(शिशु-१-२८) **पितर्यजे इति ।** पितरि अजे मातरि इन्दुमत्यां च अजातहार्दः अनुत्पन्नस्नेहः अत एव शिशुर्बाल एव राजा प्रधानबुद्ध्या परिवर्तमानः सन् शनैर्यौवन वयः तरुणं वयः अभ्यपादि प्राप । अभिपूर्वस्य पद गतावित्यस्य लुङि चिण् ते पदः (३-१-६०) इति चिण् । चिणो लुक् (६-४-१०४) इति तशब्दलोपः । अजातहार्द (इत्यत्र हार्दशब्दे हृदयस्येदमित्यर्थे तस्येदम् (५-३-१२०) इत्यण् । तस्मिन् परे हृदयस्य हृल्लेखयदण्लासेषु (६-३-५०) इति सूत्रेण हृदयस्य हृदादेशः ।) यौवनमित्यत्र हायनान्तयुवादिभ्योऽण् (५-१-१३०) इत्यनेनाण् । प्रेमा ना प्रियता हार्द प्रेम स्नेहः इत्यमरः । तारुण्यं यौवनं समे इति च ।। १-२८ ।।

(शिशु-१-२९) **युवा दिगन्तेष्विति ।** युवा तरुणः स दशरथः दिगन्तेषु कीर्ति **स्तम्भान्** जयस्तम्भान् निखाय रोपयित्वा मन्त्रिवरैः सुमन्त्रमुख्यैः प्रधानैः नानानिवृद्भ्यः नानादेशेभ्यः आनायिताः नरनाथकन्याः राजकन्याः उदूहे परिणीतवान् । किंभूतः । जम्भारिनिभप्रभावः । जम्भारिरिन्द्रः । तेन तुल्यः प्रतापो यस्य स तथा । उदूहे इति उत्पूर्वस्य वहतेर्लिटि आत्मनेपदम् । जम्भारातिः शचीपतिः, स प्रतापः प्रभावश्च, नीवृज्जनपदो देशः इति चामरः । नियतं वर्तन्ते जनाः अस्मिन्निति नीवृत् । राष्ट्रापरपर्यायः । नहिवृतीति (६-३-११६) [32]वैकल्पिकं दीर्घत्वम् ।। १-२९ ।।

(शिशु-१-३०) **खेलन्निति ।** समं ताभिरिति च्छेदः । असौ रन्ता रमयतीति (अर्थे) तृच् । रघुप्रवीरः रघुश्रेष्ठः दशरथः ताभिः राजकन्याभिः समं सह समन्तात् सर्वतः निरन्तरम् अनवरतम् निष्कुटदीर्घिकासु गृहारामवापीषु खेलन् क्रीडन् सन ताः राजकन्याः रम्येषु हर्म्येषु राजगृहेषु चिरं बहुकालं रमयाचकार संतोषयामास । समन्ततस्तु परितः सर्वतः, गृहारामस्तु निष्कुटः, वापी तु दीर्घिका इति चामरः । दीर्घैव दीर्घिका । संज्ञायां कन् (संज्ञायां च ५-३-९७ इति सूत्रेण) ।। १-३० ।।

(शिशु-१-३१) **ययाविति ।** स दशरथः यौवनं तारुण्यं सार्थयितु सार्थकं कर्तु रन्तुं क्रीडितुं वनं वृक्षबहुलं स्थानम् । वन्यते सेव्यते इति वनम् । उपवनं च करणेन निर्वृत्तः कृत्रिमो वृक्षसमूहः । वनस्य समीपम् उपवनम् । ययौ जगाम । वामासु प्रतीपदर्शिनीषु सक्तः सन्नखेलत् । क इव । वनसीम्नि लोलः सतृष्णः कुरङ्गीषु हरिणीषु सक्तः आसक्तः कृष्णसारः मृगविशेषः स इव । बहुषु स्थानेषु बह्वीनामुपभोगे हेतुगर्भ विशेषणम् । कुमारः कुत्सितः सर्वातिशयितत्वात् मारो मदनो येन हेतुना सः । तस्मिन्ननुरागोद्रेकात् । यद्वा कुत्सितः धिक्कृतः सौन्दर्यातिशयेन मारो येन स तथोक्तः । यद्वा शत्रुजनितभयं विहाय कथमनवरतमेव खेलनमिति चेत् तत्राह कुमार इति । कुत्सितान् निन्दास्पदान् शत्रून् मारयतीति तथोक्तः । कुत्सिताः म्रियन्तेऽनेन हेतुभूतेनेति वा । प्रतीपदर्शिनी वामाः, लोलश्चलसतृष्णयोः, हरिणा अमी अजिनयोनयः कृष्णसारेत्यादि चामर. ।। १-३१ ।।

(शिशु-१-३२) **कौसल्ययेति ।** स दशरथः कलापकेश्या मयूरबर्हतुल्यकेशपाशया भूषणयुक्तकेशया वा कौसल्यया कोसलदेशराजापत्येन । वृद्धेत्कोसलेति (४-१-१७१) सूत्रेण ष्यङ् । यङञ्चाप् (४-१-७४) । अरस्त अक्रीडत् । केकयराजपुत्र्या कैकेय्या सह केलिं क्रीडां व्यधत्त चकार । सुमित्रया सह सर्वसुखानि भेजे सिषेवे । स्ववशासु स्वस्मिन्ननुरक्तासु तासु कौसल्यादिषु मध्ये रेजे शुशुभे । कासु क इव । स्ववशासु स्वकरिणीषु मध्ये करीव । (वद्रव्रजेत्यत्र) परस्मैपदेष्वित्यनुवर्तते । अत एव (अरस्तेत्यत्र) हलन्तलक्षणा वृद्धिर्न भवति । व्यधादित्यत्र विपूर्वस्य डु धाञ् इत्यस्य लुङि रूपम् । गातिस्थेति (२-४-७७) सिचो लुक् । कलापो भषणे बर्हे तूणीरे संहतावपि, करिणी धेनुका वशा इति चामरः ।। १-३२ ।।

(शिशु-१-३३) **ता एवेति ।** तस्य दशरथस्य तरुणीशतानां मध्ये तिस्र एव ताः कौसल्यादयः प्रियाः वल्लभाः महिष्यः कृताभिषेका बभुः शुशुभिरे । स दशरथः ताः कौसल्यादीः शरीरभाजः शरीरधारिणीः शक्तीः प्रभावोत्साहमन्त्रजाः तिस्रः शक्तीरिव

अभक्त सेवयामास। ताभिस्तिसृभिः सेव्यमानः स ताः कौसल्यादीः सिद्धीरिव. . . . . अबुद्ध ज्ञातवान्। बभूरिति भा दीप्तावित्यस्य लिटि। अभक्तेति भज सेवायामित्यस्य लुङि आत्मनेपदम्। झलो झलीति सिचो लुक्। चोः कुः इति कुत्वम्। अबुद्धेति बुध अवगमने इत्यस्य लुङि। झलो झलीति सिचो लुक्। झषस्तथोर्धोऽधः इति धत्वम्। लिङ्सिचावात्मनेपदेष्विति किद्वद्भावाद् गुणाभावः। दयितं वल्लभं प्रियम्, कृताभिषेका महिषी, शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः इति च त्रिकाण्डी (अमरः) ॥ १-३३ ॥

(शिशु-१-३४) **ताभिरिति।** ताभिः कौसल्यादिभिः समं सह. . . कृतानुकम्पैः कृतकृपैः भूनिलिम्पैः भुवो निलिम्पाः देवाः विप्रा इति यावत्। तैः सह सुरौघान् देवसमूहान् तर्पयितुः प्रीणयितुः संतानचिन्ताविधुरस्य संततिविचाररहितस्य संततिचिन्तया दुःखितस्य वा राज्ञो दशरथस्य नव सहस्राणि समाः संवत्सराः व्यतीयुः अतिचक्रमुः। निलिम्पैरित्यत्र लिप उपदेहे इत्यस्य शप्रत्यये परे रूपम्। अनुपसर्गाल्लिम्प—(३-१-१३८) इति सूत्रेण उपसर्गरहितस्यैव लिम्पतेः शप्रत्ययविधानात् सोपसर्गस्य शप्रत्ययाभावात् नुम् न स्यादिति प्राप्तेऽभिधीयते। नौ लिम्पेर्वाच्य इति वार्त्तिकेन शप्रत्ययविधानात् नुम्भावात्। अतः सर्वं साधु। कृपा दयानुकम्पा स्यादिति, संवत्सरो वत्सरोऽब्दः इति च त्रिकाण्डी ॥ १-३४ ॥

(शिशु-१-३५) **तत इति।** ततोऽनन्तरम्। स दशरथः कदाचित् कस्मिंश्चिद्दिवसे तमसातटेषु मुहुर्वारं वारं मृगयाविनोदी मृगयया विनोदयतीति विहरतीति णिनिः। तादृशः सन् व्यचारीत् हिण्डते स्म। कीदृशः तुरङ्गसादी तुरङ्गे सीदत्यवश्यमिति। अश्वारूढ इत्यर्थः। पुनः कीदृशः। चतुरङ्गयुक्तः सेनाङ्गचतुष्टययुक्तः। पुनः कीदृशः। कुरङ्गसारङ्गविहङ्गघाती मृगमतङ्गजपक्षिघातकः। हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् इत्यमरः। चतुरङ्गा हि सा। पदातीनां समूहः पादातम्। सारङ्गः कुञ्जरो ज्ञेय इत्यभिधानात्। ननु राज्ञां वनगजः अवध्यः इति चेत् तर्हि एव व्याख्येयम्। कुरङ्गेषु सारङ्गाः शबलाः। शबलमृगाः इति यावत्। सारङ्गशबले त्रिष्वित्यमरः। यद्वा सारङ्गाः मृगपक्षिविशेषाः। सारङ्गः पक्षिभेदे स्यान् मृगभेदे चेति प्रतापमार्तण्डः ॥ १-३५ ॥

(शिशु-१-३६) **वनेचरैरिति।** धन्वी धनुर्धरो दशरथः। वनेचरैः। वने चरन्तीति वनेचराः। चरेष्टः इति टप्रत्ययः। तत्पुरुषे कृति बहुलम् (६-३-१४) इत्यलुक्। वागुरा मृगबन्धनी रज्जुः तया जीवन्तीति वागुरिकाः। वेतनादिभ्यो जीवति (४-४-१२) इति ठक्। तया चरन्तीति वा अर्थे चरति (४-४-८) इति

ठक् । कर्णावतंसीकृतकिंकिरातैः कर्णावतंसीकृतानि किंकिरातानि कर्णिकारपुष्पाणि कुरण्टकपुष्पाणि वा यैस्तैः किरातैः भिल्लैः विशेषेण शोधितं गाढं दृढं दावं वनम् अगाढ विवेश । गाढं विशोधितं वनमिति वा । अथ अनन्तरम् अश्ववाराः अश्वान् वारयन्तीति । अश्वारूढाः कर्मण्यण् इत्यण् । न नृपमन्वीयुः अनुजग्मुः । अगाढेति गाहू विलोडने इत्यस्य लुङि रूपम् । झलो झलीति सिचो लोपः । हो ढ इति ढत्वम् । झषस्तथोर्धोऽध इति धत्वम् । ष्टुत्व च । ढो ढे लोप इति ढकारलोपः । वागुरा मृगबन्धनी, द्वौ वागुरिकजालिको इति चामरः । कर्णिकारः कचुर्दारः कोकः कनकपुष्पकः, किंकिरातः पीतभद्रो मृदुपर्णः कुरण्टकः ।।, किंकिटः किंकिरातश्च पीतकः इति च प्रतापमार्तण्डः । गाढबाढदृढानि चेत्यमरः । दवो वनगतो वह्निर्दावस्तु वनमुच्यते इति कात्यः । वने च वनवह्नौ च दवो दाव इहेष्यते इति शाश्वतश्च ।। १-३६ ।।

(शिशु-१-३७) **बंहीयसेति ।** बहीयसा अत्यर्थबहुलेन वारणबृंहितेन करिगर्जितेन पटीयसा अतिमार्थेन घोटकहेषितेन तुरङ्गहेषारवेण तथा भयानकैः भयंकरैः सैनिकसिंहनादैः । सेनाया चरन्तीति सैनिकास्तेषां सिंहनादैः क्ष्वेडाभिः क्रीडाध्वनिभिः कृत्वा मुहूर्तं वनान्ता वनमध्यप्रदेशाः मुखराः सशब्दाः आसन् बभूवुरित्यर्थः । बंहीयसेत्यत्र द्विवचनविभज्योपपदे (५-३-५७) इति ईयसुन् । प्रियस्थिरेतिसूत्रेण बंह्यादेशः । ननु बृंहितहेषितशब्दाभ्यामेव कर्यश्वयोः प्रतीतेः वारणघोटकपदे व्यर्थे । बृंहितं करिगर्जितमिति अश्वानां हेषा ह्रेषा च नि स्वनः इत्युक्तत्वात् । उच्यते । विशिष्टवाचकानां पदानां पृथग्विशेषणसमवधाने विशेष्यमात्रपरता इति न्यायात् बृंहितहेषितयोर्विशेष्यमात्रपरत्वम । कीचकैर्मारुतपूर्णरन्ध्रैः (रघु-२-१२) इति यथा । अन्यच्च [33]करिकलभशब्दे करिशब्दः तादृप्यस्य वाचको यथा । तदिदमुक्तं प्रयुक्तेषु नाप्रयुक्तेषु । न हि भवति यथा श्रवणकुण्डलमिति तथा नितम्बकाञ्चीति यथा करिकलभ इति तथा उष्ट्रकलभ इति च (वामनस्य काव्यालंकारसूत्रे २-२, १७, १८, १९,) । यद्वा वारयतीति वारणम् । ततो विशेषणसमासः । घोटयते परिवर्तयते जनानिति घाटकम् । ततो विशेषणसमास । यद्वा सैनिकसिंहनादैरित्यत्र सैनिकाः सिंहा इवेत्युपमितसमासः । तेषां नादाः शब्दाः । तैरित्यर्थः । मुहूर्तमित्यत्र कालाध्वनोरत्यन्तसंयोगे (२-३-५) इति द्वितीया । मुखराः इत्यत्र खमुखकुञ्जेभ्यो रः (ऊषसुषीत्यादिसूत्रस्थेन (५-२-१०७-वार्त्तिकेन) इति रः प्रत्ययः । घोटके वीतितुरगेत्यादिः, भयंकरं प्रतिभयं घोरं भीरु भयानकम्, सेनायां समवेता ये

सैन्यास्ते सैनिकाश्च ते, क्ष्वेडा तु सिंहनादः स्यात्, ते तु मुहूर्तो द्वादशास्त्रियाम् इति चामरः ।। १-३७ ।।

(शिशु-१-३८) **शल्यानिति ।** पङ्क्तिरथो दशरथः शरैर्बाणैः शल्यान् श्वाविदः विलुम्पन् छिन्दन् शरभान् गवयान् अष्टापदमृगविशेषान् वा तृम्पन् हिंसन् शार्दूलसंघांश्च व्याघ्रसमूहांश्च विनिघ्नन् विशेषेण हिंसन् सिंहाश्च भिन्दन् विदारयन् हरिणांश्च विध्यन् ताडयन् सन् मध्येवनं वनस्य मध्ये चचार । पारे मध्ये षष्ठ्या वा (२-१-१८) इति समासः । पङ्क्तिरथ इत्यत्र पङ्क्तिशब्दः पङ्क्तिविंशती-यादिसूत्रेण (५-१-५९) निष्पन्नः । पङ्क्तिश्छन्दोऽपि दशमम् इत्यमरः । लुपच्छेदने, तृप हिंसायाम्, हन हिंसागत्योः, भिदिर् विदारणे, व्यध ताडने । शत्रन्तानामेतेषां विलुम्पन्नित्यादीनि रूपाणि । विनिघ्नन् इत्यत्र हो हन्तेः (७-३-५४) इति कवर्गादेशः । श्वावित्तु शल्यः, गन्धर्वः शरभो रामः सृमरो गवयः शशः, शार्दूलद्वीपिनौ व्याघ्रे इति च त्रिकाण्डी । शरभः शलभे चाष्टपदे प्रोक्तो मृगान्तकः इति विश्वः । शरैरिति करणे तृतीयायाः सर्वत्र संबन्धः ।। १-३८ ।।

(शिशु-१-३९) **वसन्तेति ।** वसन्तेन विभ्राजितुं शीलमस्येति ताच्छील्ये णिनिः । स चासौ वनान्तश्चेति समासः तदनु तं भजतीति—भाक् । तस्मिन् वसन्तविभ्राजिवनान्तभाजि । विराजि सम्राजि दशरथे इति यावत् । पार्पद्धिविहा-रशीले—मृगयारसिके सति भ्रमराः लतासु वल्लीसु मञ्जु मञ्जुलं यथा स्यात् तथा जुगुञ्जुः गुञ्जारावं चक्रुरित्यन्वयः । कलकण्ठसंघाः कोकिलसमूहाः कलं मधुरं चुकूजुः अव्यक्तमूचुरित्यर्थः । जुगुञ्जुरिति गुजि अव्यक्ते शब्दे इत्यस्य लिटि । चुकूजुरित कूज अव्यक्ते शब्दे इत्यस्य पूर्ववत् । कलकण्ठः कोकिलः पिकः प्रोक्तः इति हलायुधः । संघसार्थौ तु जन्तुभिरित्यमरः । वसन्तविभ्राजिवनान्तभाजीत्यादिना एतदुक्तं भवति—कुसुमपल्लवदर्शनीयं वनमिति कुसुमप्रियः षट्पद इति पल्लवप्रियः कोकिल इति क्रमोक्तिः । तथैव रघुवंशेऽपि—कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम् । इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम् । इति (९-२९) ।। १-३९ ।।

(शिशु-१-४०) **शनैरलुण्ठन्निति ।** कलकण्ठडिम्भाः कोकिलार्भकाः शनैः चूतलताशलाटून् आमशाखाफलानि चञ्चूपुटैः अलुण्ठन् प्रतिजघ्नुरिति संबन्धः । पोतः पाकोऽर्भको डिम्भः, आम्रश्चूतो रसालोऽसौ, समे शाखालते, आमे फले शलाटुः स्यात् इति चामरः । लुठि आलस्ये प्रतिघाते च इत्यस्यालुण्ठन्निति रूपम् लङि ।

ततस्तदनन्तर तत् पूर्वोक्तमालोक्य दृष्ट्वा पान्थो जनो बिभाय भयं प्राप । जि भी भये इत्यस्य लिटि रूपम् । कीदृक् । पञ्चमनादशङ्की । पञ्चमनामा स्वरः पञ्चमनादः । तं शङ्कते इति । निषादर्षभगान्धारषड्जमध्यमधैवता । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिता स्वरा. ।। इत्यमर । यदाहुः—षड्जं[34] मयूरा ब्रुवते गावस्त्वृषभभाषिणः । अजाविक तु गान्धारं क्रौञ्च क्वणति मध्यमम् ।। पुष्पसाधारणे काले पिकः कूजति पञ्चमम् । धैवतं हेषते वाजी निषादं ब्रुवते गजाः ।। इति । एषु मध्ये पञ्चमो विरहिणामतिदु सह इति भावः ।। १-४० ।।

(शिशु-१-४१) **मातङ्गदानायेति ।** मातङ्गदानाय गजमदजलाय गतः मदालिः मदप्रिय. अलि भ्रमर । शाकपार्थिवादित्वात् समास । तत्कर्णतालव्यजनावधूतः तेन गजेन कर्णाविव तालव्यजने तालवृन्ते ताभ्यामवधूत निराकृतः । गुणाश्रये सौरभ्यादिगुणाधारे श्रीमति शोभावति हंससेव्ये पद्मवने कमलवने पश्चात्तपन् पश्चात्तापयुक्तः सन् रुराव शब्द चक्रे । अथ च कश्चित् लोके यथा चाण्डालदानाय गतः स तेन निराकृत सन् गुणाश्रये पावित्र्यादिगुणयुक्ते श्रीमति सपत्तिदातरि हंससेव्ये परमहंससेव्ये परमहंसाश्रिते पद्मवने कमलयक्तवने भागीरथ्यादिजले पश्चात्तापयुक्तः सन् रोदिति तद्वदिति ध्वनि । गजेऽपि नागमातङ्गौ, षट्पदभ्रमरालय , व्यजन तालवृन्तकम्, जीवन भुवन वनम् इति चामर । रुरावेति रु शब्दे इत्यस्य लिटि ।। १-४१ ।।

(शिशु-१-४२) **वल्लीमतल्लीष्विति ।** वल्लीमतल्लीषु प्रशस्तासु वल्लीषु पदं दधाना स्थापयन्ती वल्ल्यन्तरे अन्यस्या वल्लयाम् स्थितमिति शेष । वल्लभ प्रियम् आह्वयन्ती आकारयन्ती । चञ्चद्विपञ्चीकलनादभङ्गी । चञ्चन्ती (वदन्ती) वाद्यमाना चासौ विपञ्ची च । तस्या. कलनाद अव्यक्तमधुरः शब्द । तस्य भङ्गीव भङ्गी यस्या. सा । विपञ्ची वीणा । एवंविधा भृङ्गी भ्रमरी गीतादिरूपम् अङ्गीकुरुते स्म अङ्गीचाकार । लुप्तोपमा, इवादिद्योतकाभावात् । वल्लीमतल्लीष्वित्यत्र प्रशमावचनैश्चेति समासः । रूढा मतल्लिकादय. प्रशमावाचिनो गृह्यन्ते । यथा गोप्रकाण्डम् गोमतल्लिका । मतल्लिका मर्चिका प्रकाण्डमुद्घतल्लजौ । प्रशस्तवाचकान्यमूनि इति, ध्वनौ तु मधुरास्फुटे कल इति, वीणा तु वल्लकी विपञ्ची इति चामर । गीतं वाद्य तथा नृत्य त्रय संगीतमुच्यते (संगीतरत्नाकरे १-२१) ।। १-४२ ।।

(शिशु-१-४३) **अरूढपङ्केति ।** भृङ्गी भ्रमरी मरसि निनदेन शब्देन जगज्जिगीषुप्रसवेषुचापटङ्कारशङ्का व्यतानीदिति संबन्ध । जगज्जिगीषुः विश्वं

जेतुमिच्छुः । स चासौ प्रसवेषुः । मदनः । तस्य चापो धनुः तस्य टङ्कारो ज्यारवः । तस्य शङ्का व्यतानीत् विस्तारयामास । जगज्जयाय संनद्धस्य मदनस्य गुणध्वनिरसौ नान्यः इति विरहिणः शशङ्किरे इति भावः । किं शंकायाः आस्पदमिति चेत्—— इदम्——जगज्जैत्रस्य कामस्य चित्रं चाप लता मृदुः । मौर्वी पुष्पलिहामालिः पुष्पाणि च शरोत्कराः ।। इति । किंविशिष्टा भृङ्गी । आरूढपङ्केरुहनालदोलालोलायमाना । आरूढा चासौ पङ्केरुहनालदोला। । पङ्केरुहं कमलम् । तस्य नालम् । तदेव दोला (प्रेङ्खेलिका) । प्रेङ्खादिका [35]भाषया हिन्दोलिका । तस्यां लोलायमाना चपलायमाना । पङ्केरुहेत्यत्र हलदन्तात् सप्तम्याः संज्ञायाम् (६-३-९) इत्यलुक् । पुष्पं प्रसवमिति हलायुधः । कुसुमेषुरनन्यजः, पङ्केरुहं तामरसम्, दोला प्रेङ्खादिका स्त्रियाम् इति चामरः ।। १-८३ ।।

(शिशु-१-८८) **न तद् वनम् इति ।** तद् वनं न भवति अस्तीति वा । तत् किम् । यत्र वने माधवी वासन्ती लता न नास्तीत्यर्थः । सा लता न यत्र माधवीलतायां मञ्जुमञ्जरी न । सुन्दरवल्लरी न । सा मञ्जरी न यत्र मञ्जर्या सौरभं न । तच्च सौरभं न यत्र सौरभे षट्पदाः भ्रमराः न सन्ति । अयमाशयः——यत्र माधवी लता नास्ति तद् वनमेव नास्ति । सर्वाणि वनानि वासन्तीलतासहितानीत्यर्थः ।। १-८८ ।।

(उदारराघवव्याख्यायाः शिशुबोधिन्याः एकैव मातृका पुण्यपत्तनाल्लब्धा । तत्रापि इयानेव व्याख्याभागः उपलभ्यते । मातृकान्तरं भागान्तरं च एतद्व्याख्यासंबन्धि अद्य यावत् क्वापि नोपलभ्यते ।——सपादक.) ।

इति शम ।

NOTES TO ŚIŚUBODHINĪ

[1] Before the first verse of the Commentary i.e. *devam vighnapatim pranamya* etc. there is a sentence of customary salutation as *Śrīdakṣināmūrtaye namaḥ*, which was probably given by the scribe.

[2] MS.4—seems to read: *udārādikarāghavasyājaḍadhīḥ* etc. where the vertical line in Nāgarī script indicating the *long ākāra* as "—*svājaḍadhīḥ*" (not as "*sya jaḍadhīḥ*")—is very clear. But I think that this must be a mistake of the scribe. The ninth syllable of the *Sārdūlavikrīḍita* (of this verse) the third of the *jagaṇa*- —should be a short one, and cannot be a long one. The following expression may be either *patudhīḥ* or *jaḍadhīḥ*. If it be *jaḍadhīḥ*, though it appears to be inconsistent with *vidvān* found immediately in the same verse, it may be explained as an expression by which he was probably known or intended by the author to indicate his humility, and that the expression *vidvān* may be not in the sense of "*the learned*", but in the sense of one who knows his limitations. Or it may be *patudhīḥ* which fits well, if it can be supported by the reading of some other MS. of the Commentary (if available).

[3] The shortening of the long "ī" in Gopinātha (instead of Gopīnatha) may be similar to the one in the expressions : Kālidāsa and Revatiputra, and this is allowed according to the rule *Ṅvāpoḥ saṃjñāccchandasor bahulam* (6.3.63)

[4] MS. 4 reads Śākalla, instead of Śākalya of others. This Commentator refers to the author of the *Udārarāghava* with the adjective Kavimalla, and he is also referred to as Bhaṭṭa Malla by Bhaṭṭoji in his *Śabdakaustubha* on 3.1.29 (page 363; CSS. 1929) Mallinātha refers to him also as Bhaṭṭa Malla on *Raghuvaṃśa* 8.68. *Pradyotanī* refers to him as Mallibhaṭṭa.

[5] This seems to be a reference to the *Pradyotanī*, which notes this interpretation too. Mahādeva may be later than Cauṇḍipaṇḍita.

[6] The *Nyāyakośa* notes this with a reference to the *Nyāyasiddhāntamañjarī* (1.5).

[7] Mallinātha gives this answer and the verse in his Commentary on the *Kirātārjunīya* at the beginning; the verse is attributed to Bhāmaha by some.

[8] This is a reference to the *Viṣṇusahasranāmam*, which has thus: *anantarupo'nantaśrīr jitamanyur bhayāpahaḥ* (verse 100). This *stotra* occurs in the *Bhīṣma-Yudhiṣṭhira-saṃvāda* in the *Anuśāsana-parvan* of the *Mahābhārata*.

[9] This is a reference to the rule: *Pāraskaraprabhṛtīni* ca (6.1.157) of Pāṇini. But, in the list of words the usage of which is explained by this rule,

the word *parokṣa* is not noted by any well-known grammarian, such as the *Kāśikākāra*, the Commentators on the *Kāśikā* or Bhaṭṭoji etc. Under the rule: *Parokṣe liṭ* (3.2.115) there is a good discussion about the word *parokṣa* in the *Mahābhāṣya* and the *Pradīpa* of Kaiyaṭa, whom Bhaṭṭoji and others too follow. According to them, the part *paraḥ* of *paroksa* is explained as a *nipāta* by the use of this very rule (3.2.115). It is not clear what was the source for this author to bring in *Pāraskara*-rule and the *suṭ*.

[10] This seems to be a reference to the *Tārkika-rakṣā*. The full *Kārikā* is as follows:

aparoksapramāvyāptaṃ pratyaksaṃ dvividham ca tat
savikalpakam ity ekam aparam nirvikalpakam. (vv. 10-11).

[11] Under the rule: *Saṅghodghau* (3.3.86) Bhaṭṭoji says: *Gatyarthānām buddhyarthatvāt*. The *Padamañjarī* and the *Nyāsa* explain similarly. The *Bālamanoramā* notes: *Sarve gatyarthā jñāñārthā iti nyāyāt*.

[12] Under the rule: *Labher gatyarthāt* etc. of the *Kāvyālamkārasūtra* of Vāmana (5.2.8) in the Commentary the *Kāmadhenu* Tippa Bhūpāla says thus: *vivaksāvaśāt labhir ayam kadācit prādhānyena gatim āha; kadācit tu prāptim ity arthaḥ*.

[13] See Note 15 to *Pradyotanī*.

[14] MS. 5 reads *secane*. The reading in the *Dhātupātha* is *ksarane*.

[15] MS. 5 reads *Jharo jhari*. It is obviously a mistake of the scribe.

[16] The *Pradyotanī* notes the plurality of the *upamāna* here. The author of the *Śiśubodhinī* probably had seen the *Pradyotanī* from which he is giving perhaps a different interpretation by mentioning *upamāne tv indra ekaḥ*.

[17] Bhaṭṭoji in his SK says thus (under 3.1.114) :
Rājñā sotavyaḥ abhiṣavadvārā nispādayitavyaḥ. yadvā latātmakaḥ somo rājā. sa sūyate kanḍyate atra ity adhikaraṇe kyap. nipātanād dīrghaḥ.

[18] MS seems to read *ksādeśaḥ*. Probably it shoud be *jher jus ādeśaḥ*.

[19] MS. 5 reads *pūtadruḥ* instead of *pītadruh* of Bombay edn.

[20] Here too MS. 5 alone reads *pūtadru* and *pautadrava*, instead of *pītadru* and *paitadrava* of Bombay edn.

[21] MS. 5 reads *Kākutstha*. The basic text, the *Pradyotanī* and others read in the context as *kakutstha*, which is correct.

[22] Pratāpa seems to be Pratāpamārtāṇḍa, a lexicographer, who is also quoted in the *Pradyotanī*. One lexicographer Pratāpa also quoted by the Mallinātha, the Commentator on the *Amarakośa*, is quoted several times. See for instance page 285, Vol,I. *Amarakośa* AL, Series. Perhaps the author meant in all these references is identical.

[23] This seems to indicate that this author is following the interpretation given in the *Pradyotanī*.

[24] This seems to be a reference to the *Pradyotanī*. See Note 21 to the *Pradyotanī*, and the related portion.

[25] See V. S. Apte under Sagara.

[26] The *Bhāgavata* has this:
Bharukas tatsutas tasmād vṛkas tasyāpi bāhukah (9.8.2). There is a Footnote reading as Karuka instead of Bharuka.

[27] This is not a reference to the *Pradyotanī*. This shows that the author had access to some other commentary, besides the *Pradyotanī*.

[28] See Note 22 to the *Pradyotanī*.

[29] The reading is very clear. We may take it as *Mahatām arsvarvam. tadāśraye*.

[30] Bhaṭṭoji gives the *Vārttika* as *Akarāntottarapado dvigoh strīvām istah*. Mahādeva, the author, was perhaps not aware of the *Siddhāntakaumudī* of Bhaṭṭoji as it was probably not yet popular by his time as it was subsequently. This is only a guess.

[31] See the *Vaijayantī* on *kharva* and *samudra*, and also M. Monier Williams on these entries.

[32] The Amara in all editions has only *nīvṛt* (with long *ī*). The word with long "*ī*" is unsuitable here as it will offend against the metre. The commentator justifies the form with short "*i*" by noting it as *vaikalpika* (optional). Bhaṭṭoji also notes the rule as a case of *Vyavasthitavibhāsā*. *Pradyotanī* has a different explanation here.

[33] See Vāmana's *Kāvyālamkārasūtravṛtti* 2.2. 17,18 and 19.

[34] See also Mallinātha on the *Raghuvamśa* 1.39, and the South Indian Commentaries on the Amara, *Nāṭyavarga* verse 1 (Adyar Library Publication)

[35] This is probably *Mahārāstrabhāsā Marāthī*. If it is so then it would indicate that the author Mahādeva was probably from the *Mahārāstra* area.

उदारराघवव्याख्या प्रद्योतनी मायिसूनुचौण्डि-पण्डितेन कृता

[1]वागीश्वरीं भजे वाचां विभूत्यै विश्वतोमुखीम् ।
वाचो वाल्मीकिमुख्यानां प्रवृत्ता यत्कृपालवात् ।। १ ।।

तमालश्यामलं रामं राजीवदललोचनम् ।
नमामि नयनानन्दं (लोकक्षेमविधायिनम्) ।। २ ।।

शाकल्यमल्लिभट्टेन कृतस्य ([2]वरशालिना) ।
उदारराघवाख्यस्य काव्यस्य महतोऽधुना ।। ३ ।।

गाधिगोत्रसमुत्पन्नमायिसूरितनूभुवा ।
लिख्यते बालबोधाय व्याख्या चौण्डिविपश्चिता ।। ४ ।।

[3]पूर्वमध्याप्यभावेन वर्णितं मल्लिधीमतः ।
काव्यं य(ा[4]) द्योत(ये)द् यस्माट्टीका प्रद्योतनी ह्यसौ ।। ५ ।।

यथामूलं यथापेक्षं यथान्वयमहास्फुटम् ।
मया विरच्यते व्याख्या हृद्येयं विदुषा सदा ।। ६ ।।

एषा व्याख्या च सुधियः प्राप्य साध्वी रसोज्ज्वला ।
भूयाद् दुग्धोदधि यद्वत् क्षारं क्षीरायते जलम् ।। ७ ।।

असाधुतां साधुतां च न [5]जानानो यदालिखम् ।
आलोच्य सन्तो युष्माभिस्तत् साधूक्रियतांतराम् ।। ८ ।।

(प्रद्यो-१-१) अथाखिलकलुषापहरमुदारराघवं नाम महाकाव्यं चिकीर्षुस्तदादौ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति न्यायादनपायं वस्तु निर्दिशति **[6]अस्तीति** । प्रशस्तः = सजातीयविजातीयगतभेदशून्यः । केवलम् = एकम्, चित् = ज्ञानमेव, स्वरूपम् = आत्मा यस्य स तथोक्तः; ज्ञानघन इत्यर्थः । (स्वानन्दः =) शोभनो निरतिशयानन्दः; यद्वा स्वं स्वरूपमेव आनन्दः । तेन पूर्णः । एतेन निरुपाधिकस्वरूपमुक्तम् । अर्थोपहितं स्वरूपं निरूपयति सदसदिति । सत् = प्रत्यक्षम् । असत् = अप्रत्यक्षम् । ते एव प्रपञ्चः । तस्य बाह्ये अन्तरे च व्याप्ताः = व्याप्य स्थिताः ।

एतेन निरुपहितस्वरूपमुक्तम् । बहव. प्रकारा विवर्तनविशेषा यस्य स तथोक्तः । बहुभिः प्रकारैरन्तर्बहिश्च कृत्स्नं जगद् व्याप्य स्थित इत्यर्थ. । यच्च किंचिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत् सर्वं व्याप्य नारायण. स्थितः[7] ।। इति श्रुतेः । प्रकृतेः = अविद्याया. परस्तात् = परत स्थितः । मायातीत इत्यार्थः । आद्यम् = मूलकारणम् । पुमान् = पुरुषः । अस्ति = सर्वोत्कर्षेण वर्तते इत्यर्थः । अस्तेर्लट् । इन्द्रवज्रा वृत्तम् । स्यादिन्द्रवज्रा यदि तौ जगौ गः इति (वृत्तरत्नाकरे) ।। १-१ ।।

(प्रद्यो-१-२) आद्य. पुमानस्तीत्युक्तम् । किं तेनास्माकमित्यत आह--**अनन्तशक्तिमिति ।** प्रशस्तः = प्रसिद्धः ।अनन्ता = अपरिच्छिन्ना शक्तिः = माया यस्य तं तथोक्तम् । अनन्ताः कोटयः कोटिसंख्याः येषां तै. ब्रह्माण्डैरेव भाण्डैरावृतानि रोमरन्ध्राणि यस्य त तथोक्तम् । तथा च **भागवते**--तथाह तमोमहदहंखचराग्निवार्भूस्संवेष्टिताण्डघटसप्तवितस्तिकाय. । स्वेदृग्विधा विगणिताण्डपराणुचर्या वाताध्वरोमविवरस्य च(ते)महित्वम् ।। अर्थहेतुत्वान्नि[8]यमस्थैर्योगिभिरप्यस्यत्वेन निर्दिष्ट इति भावः । उपजातिवृत्तम् । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इति (वृत्तरत्नाकरे) ।। १-२ ।।

(प्रद्यो-१-३) वर्ण्यमान (महापुरुष) चरितोपयोगितया तद्रूपं वक्तुं तावत् भगवतः सांख्यमतानुसारेण स्रष्टृत्वमाह--**(स दृष्टिमात्रेति ।)** स. ईश्वर । दृष्टिमात्रेण = ईक्षणमात्रेण क्षुभिता कार्योन्मुखी आत्मनीना आत्मने हिता आत्माधीना स्वानुकूलेति यावत् । आत्मन्विश्वजनेति (५-१-९) खप्रत्यय. । सा च माया = प्रकृतिः । तस्याः गुणेभ्यः सत्त्वरजस्तमोभ्यः उत्था = उत्पत्तिर्येषां तै. । यद्वा (उत्थैः = उत्थितैः =) उत्पन्नैर्महदादितत्त्वैः प्रारब्धम् = उत्पादितम् [9]अण्डम् = ब्रह्माण्डं समनुप्रविश्य अधिष्ठाय भवप्रपञ्चं = संसारविस्तारं प्रवर्तयामास = जनयामास । वृतेर्ण्यन्ताल्लिट् ।। १-३ ।।

(प्रद्यो-१-४) प्रवर्तयामासेत्युक्तम् । तत्प्रकारमाह--**प्रागिति ।** आत्मनः सृष्टेः प्राक् पूर्वं सलिले शयानः अत एव नारायण इति आख्या यस्य स. नारायणाख्यः । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ।। इति विष्णुपुराणात् (१-४-६) । हिरण्यगर्भः = ज्ञानप्रकाशः स ईश्वरः अजस्य = जन्मशून्यस्य स्वस्य नाभौ अरविन्दात् जन्म यस्य स तथोक्तः सन् । [10]अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः इति वामनः (वामनस्य काव्यालंकारसूत्रे--(५-२-१९) । स्वयंभूरिति नाम्ना संबभूव आविर्बभूव ।। १-४ ।।

(प्रद्यो-१-५) स्वयंभुव इत्याह—**चतुर्मुखः इति ।** पङ्कजं विष्टरम्—आसनं यस्य स तथोक्तश्चतुर्मुखो ब्रह्मा जनकोपदेशात् जगत् = विश्वं स्रष्टुम् इच्छुः = सिसृक्षुः । सनाशंसभिक्ष उः (३-२-१६८) इत्युप्रत्ययः । आवौ सृष्ट्यादौ नवानां [11]भृग्वादीनां ब्रह्मणां मध्ये प्रथमं पूर्वं मनसा मरीचिं ससर्ज—उत्पादयामास । उपेन्द्रवज्रा वृत्तम् । उपेन्द्रवज्रा जतजास्ततो गौ इति (वृत्तरत्नाकरे) ।। १-५ ।।

(प्रद्यो-१-६) **मरीचित इति ।** मरीचितः मरीचिब्रह्मणः । महनीया कीर्तिर्यशो यस्य स तथोक्तः । कश्यप इति नामधेयं यस्य स कश्यमनामधेयः । भागरूपनामभ्यो धेय इति (वार्त्तिकेन—पादार्घाभ्यां च—५-४-२५—इति सूत्रस्थेन) धेयप्रत्ययः । महांश्चासो ऋषिश्चेति महर्षिः । कृत्यस्य स्वसृज्यलोकस्य (महतः) [12]यशसा (महनीयकीर्तिः) आसीदभवत् । अस्तेर्लङ् । विरिञ्चेर्ब्रह्मणो नप्ता पौत्रः । [13]नप्ता पौत्रः सुतात्मजः इत्यमरः । असौ कश्यपः दक्षप्रजापतेः कन्याः अदित्याद्याः त्रयोदश यास्ताः विधिना उक्तप्रकारेण उदवाक्षीत् । उत्पूर्वाद् वहतेर्लुङः सिच् । अस्तिसिचोऽपृक्ते (७-३-९६) इति ईडागमः । हो ढः (८-२-३१) इति (ढत्वम्) । षढोः कःसीति (८-२-१) कत्वम् । वदव्रजेत्यादिना (७-२-३) वृद्धिः । इण्कोः (८-३-५७) इति षत्वम् ।। १-६ ।।

(प्रद्यो-१-७) कश्यपसन्ततिमाह—**तत्रेति ।** तत्र तासां मध्ये कश्यपतः कश्यपात् । पञ्चम्यास्तसिल् (५-३-७) । अदितेः = अदित्यामित्यर्थः । संबन्धमात्रे षष्ठी । (जगदेकदीपः =) जगतः एकदीपः एकप्रकाशकः । (त्रिलोकवन्द्यः =) त्रिलोकैर्वन्द्यो नमस्कार्यो यस्त्रिगुणात्मकः = सत्त्वरजस्तमोगुणात्मकः । विवस्वन्नामकः पतङ्गः सूर्यः । पतङ्गः पक्षिसूर्ययोरित्यमरः । जज्ञे जातः । जनेः कर्तरि लिट् । असौ विवस्वान् । दिवस्पृथिव्योः द्यावापृथिव्योः । तिमिरम् अन्धकारम् । विभिन्त्ते नाशयति । भिदेर्लट् । [14]उपजातिवृत्तम् ।। १-७ ।।

(प्रद्यो-१-८) **प्रकाशयन्निति ।** एष विवस्वान् । दिश एव दिशाः । आपं चैव[15] हलन्तानां यथा वाचा निशा दिशा—इति वचनादाबन्तत्वम् । तासामवकाशान् अन्तरालान् । प्रकाशयन् [16]स्वधाम्ना = निजतेजसा आकाशमाकाशयति । काशृ दीप्तावित्यस्माण्ण्यन्ताल्लट् । **लोकेशलक्ष्मीशमहेशमूर्तिः** = ब्रह्मविष्णुमहेश्वरात्मकः । लोकेशः पद्मभूर्ब्रह्मा इति [17]प्रतापमार्ताण्डः । त्रिभिः (त्रि)विधैः संचरते—प्रवर्तते । संपूर्वात् चरतेः समस्तृतीयायुक्तात् (१-३-५४) इत्यात्मनेपदम् । [18]उपजातिवृत्तम् ।। १-८ ।।

(प्रद्यो-१-९) **वैवस्वत इति।** धरणीपतीनां राज्ञां धर्मस्योपदेष्टा उपदेशकः विवस्वतः सूर्यस्यापत्यं पुमान् वैवस्वतो नाम वैवस्वत इति प्रसिद्धः मनुः ततस्तस्माद-भूज्जात इत्यर्थः। भवतेर्लुङ्। स वैवस्वतो महत्ययोध्यानगरे इक्ष्वाकुनामकं पुत्रम् उर्व्याः वसुन्धरायाः पतिमध्यक्षम् अभ्यषिक्त। षिच क्षरणे इत्येतस्मात् कर्तरि लुङ् ॥ १-९ ॥

(प्रद्यो-१-१०) **इक्ष्वाकुवंशेति।** अथ अनन्तरम् अयोध्या नाम पुरी प्रधान-नगरी। **(इक्ष्वाकुवंशप्रभवैः)** इक्ष्वाकोर्वंश एव प्रभवः कारणं येषां तैर्नरेन्द्रैरध्यास्य-माना अधिष्ठीयमाना। वृषभिर्वासवैरन्विता युक्ता। वासवो वृत्रहा वृषा इत्यमरः। अमराः देवाः सन्त्यस्यामिति अमरावती इन्द्रपुरी--(सा)--इव। मतौ बहवचोऽन-जिरादीनाम् (६-३-११९) इति दीर्घः। अभात् अशोभत। भातेर्लङ्। नागान्विता सर्पान्विता भोगवतीव नागपुरीव। नदीनगर्योर्नागाना भोगवती--इत्यमरः। रेजे शुशुभे। राजतेः कर्तरि लिट् ॥ १-१० ॥

(प्रद्यो-१-११) **हिरण्मयीमिति।** प्रजायन्ते इति प्रजाः। उपसर्गे च सञ्ज्ञायाम् (३-२-९९) इति डप्रत्ययः। हिरण्यस्य विकारो हिरण्मयी। ताम्। अमृतमिवाम्भः। पूर्णममृताम्भः यासु ताः पूर्णामृताम्भसः। ताश्च ताः परिखाश्च तथोक्ताः। परिखा दुर्गवेष्टनखातम्। खेयं तु परिखा इत्यमरः। अन्येष्वपि दृश्यते (३-२-१०१) इति डप्रत्ययः। ताभिः परीताम् आवृताम्। दीव्यन्ते इति देवाः इक्ष्वाकवः। तेषा पुरी। तामयोध्यामध्यास्य अधिष्ठाय। अधिशीङस्थामा कर्मेति (१-४-४६) कर्मत्वम्। ब्रह्मपुरी विदित्वा मत्वा। पर निरतिशयं ब्रह्मसुख ब्रह्मानन्दं भजन्ते प्राप्नुवन्ति लभन्ते ॥ १-११ ॥

(प्रद्यो-१-१२) **ये इति।** ये राजानो वाजपेयैः क्रतुविशेषैः ये वाजिमेधैरश्व-मेधैरपि राजसूयैश्च सुरानिन्द्रादीन् अयाक्षुः पूजयामासुः। यजतेर्लुङ्। **(भुक्तभोगाः)** भुक्ता अनुभूताः--भोज्यन्ते इति भोगाः पदार्थाः यैस्ते भुक्तभोगाः। अन्ते अवसाने शरीरं तत्र--भुवि हित्वा त्रिदिवे स्वर्गे रमन्ते ॥ १-१२ ॥

(प्रद्यो-१-१३) **पालाशेति।** पलाशस्य विकाराः पालाशाः। [19]पीतद्रवो --वृक्षविशेषाः। तद्विकाराः [19]पैतद्रवाः। रज्जुदाराः[20] श्लेष्मातकाः। तद्विकारा राज्जुदालाः[20]। बिल्वविकारा बैल्वाः। तेषां द्वन्द्वः। तथा उदुम्बरस्य विकाराः औदुम्बराः। खदिरस्य विकाराः खादिराः। तयोर्द्वन्द्वः। तथोक्ताः सहस्रसंख्याः

अपरिमिताः यूपाः तस्या अयोध्यायाः समीपे सरयूतटेषु विलसन्ति शोभन्ते । लष कान्तावित्यस्माल्लट् ।। १-१३ ।।

(प्रद्यो-१-१४) **साक्षादिति ।** नृपो राजा साक्षात् प्रत्यक्षम् उक्ष्णः वृषभस्य आकृतिरिवाकृतिर्यस्य स इन्द्रवाहस्तस्य ऋभुक्षः इन्द्रस्य, ककुदि स्थितः सन् ककुत्स्थ इति नाम यस्य सः ककुत्स्थनामा सन् । धीयन्ते अस्यामिति धानी । अधिकरणे ल्युट् । टिड्ढाणञ् (४-१-१५) इत्यादिना ङीप् । राज्ञां धानी राजधानी नगरी । प्रधाननगरी राज्ञो राजधानीति कथ्यते इति शब्दार्णवः । कुलस्य राजधानी (कुलराजधानी) । तामयोध्यामध्यवात्सीत् । तस्यामध्यवसदित्यर्थः । उपान्वध्याङिति (१-४-४८) कर्मत्वम् । अधिपूर्वाद् वसतेर्लुङ् ।। १-१४ ।।

(प्रद्यो-१-१५) **उदेतीति ।** मुदानुर्दानशीलः । युवनाश्वनाम्नो राज्ञस्तनयः मान्धातृनामा राजा । सविता यावत्—यावत्पर्यन्तम् । यावत् तावच्च साकल्ये इत्यमरः । उदेति उदयते । यावत् अस्तम् अस्ताचलम् एति याति तावत्पर्यन्तं निजक्षेत्रं स्वराज्यम् अनाहताज्ञः अप्रतिहताज्ञः सन् शासत् (पालयन्) । नाभ्यस्ताच्छतुरिति (७-१-७८) नुमभावः । स तां पुरीमध्वसत् अध्यवात्सीत् । उपान्वध्याङ्वसः (१-४-४८) इति कर्मत्वम् । . . . . अध्वसदित्यत्र अधिपूर्वाद् वसतेर्लङ् ।। १-१५ ।।

(प्रद्यो-१-१६) **महीमिति ।** मघवत्समः शक्रतुल्यः सगरो नाम राजा समस्ताम् अखिलां महीं तां पुरीमयोध्यां शशास पालयामास । तुल्यतयेति भावः । बाहुजः क्षात्रसंभव [21]इत्यर्थः । बाहुजः क्षत्रियो विराडित्यमरः । बाहुजमौलिरत्नं राजशिरोमणिः सगरः षष्टिं सहस्राणि सुतान् षष्टिगुणितसहस्रसंख्याकान् सुतान लेभे लब्धवान् ।। १-१६ ।।

(प्रद्यो-१-१७) **तस्येति ।** तस्य सगरस्य अश्वमेधे सर्वे तनयाः ययुरश्वमेधीयोऽश्वस्तस्य रक्षणाय । ययुरश्वोऽश्वमेधीय इत्यमरः । दिगन्तान् दिशामन्तान् ययुः जग्मुः । अमूनेतान् कुमारान् सगरस्य पुत्रान् निह्नोतुम अपह्नोतुम् इन्द्रेण देवेन्द्रेण अर्वा वाजी—वाजिवाहार्वगन्धर्वेत्यादिरमरः—अह्नाय सपदि पातालम् अनीयत नीतः । स्राङ्रमक्षु सपदि द्रुते इति विश्वः । अनीयतेत्यत्र नयतेर्द्विकर्मकात् प्रधाने कर्मणि लङ् ।। १-१७ ।।

(प्रद्यो-१-१८) **अन्वेषमाणा इति ।** अनूनसत्त्वाः महाबलाः वीराः पराक्रमशालिनः ते सगरपुत्राः तमश्वमन्वेषमाणा अन्विष्यन्तः । एषृ गतावित्यस्माद्धातोर्लटः

शानजादेशः । पातालरन्ध्रं पातालबिलं प्रविविक्षवः प्रवेष्टुमिच्छवः । करेखनित्राः करे खनित्रमवदारणं येषां ते करेखनित्राः । खनित्रमवदारणमित्यमरः । पाथसां खनिमाकरम् । कबन्धमुदकं पाथः इत्यमरः । पर्यखनन्त परितः खातवन्तः । खनतेर्लङ् ॥ १-१८ ॥

(प्रद्यो-१-१९) **आलोक्येति ।** कपिलस्य ऋषेः पार्श्वे अश्वमालोक्य हयस्तेनः अश्वचोरः आस्ते इति ब्रुवाणाः वदन्तः रोषात् क्रोधात् उन्मीलिताक्षेण विवृतनयनेन । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (५-४-११३) इति षच् । कर्दमजेन कर्दमप्रजापतिपुत्रेण कपिलर्षिणा अवलोक्यमानाः निर्देहिरे (निश्शेषेण) दग्धाः । निस्पूर्वाद् दहतेः कर्मणि लिट् । इन्द्रवज्रा वृत्तम् ॥ १-१९ ॥

(प्रद्यो-१-२०) **तद्वंशजात इति ।** तस्य सगरस्य वंशः इत्थम्——सगरस्य सूनुरसमञ्जसः तस्याशुमान् तस्य [22]दिलीपस्तस्यात्मजो भगीरथ. एवं वंशः । तस्मिन् जातो भगीरथ इति आख्या यस्य स तथोक्तः । तपोभिः समाधिभिस्तरुणेन्दुमौलि सदाशिवमाराध्य प्रपितामहानां सगरपुत्राणा निवापः पितृदानमेव हेतुः कारणं यस्य तस्य निवापहेतोः——तदर्थमित्यर्थः । षष्ठी हेतुप्रयोगे (२-३-२६) इति षष्ठी । पितृदानं निवापः स्यादित्यमरः । देवैर्देवेन्द्रादिभिर्दुरापां तां गङ्गामवाप प्राप ॥ १-२० ॥

(प्रद्यो-१-२१) **कमण्डलूत्थेति ।** कमलासनस्य ब्रह्मणः कमण्डलूत्था करकोत्पन्ना सती । कमण्डलुः स्यात्करक इति विश्वः । विष्णोः पदात पादाद् विनिःसृता विनिर्गता सती भर्गजटावतीर्णा शिवजटाभ्योऽवतीर्णा सती । शिवः स्मरहरो भर्ग इत्यमरः । भागीरथी जह्नोः राजर्षेः सुता भूत्वा जगतां त्रयं पुनीते पावयति । पूञो लट् ॥ १-२१ ॥

(प्रद्यो-१-२२) **भगीरथ इति ।** भाग्यनिधौ सौभाग्यालये भगीरथे महीन्द्रे भूपतौ महेन्द्रस्येदं माहेन्द्रमासनार्धमध्यूषुषि अधिष्ठितवति——स्वर्गं गते सतीत्यर्थः—— अधिपूर्वाद् वसेर्लिटः क्वसुः । वसोः संप्रसारणम् । अन्येऽपि च अहमंणेः सूर्यस्यान्वये जाताः भूमिपालाः तामयोध्यामध्यूषुः । तस्यां तस्थुरित्यर्थः । अधिपूर्वाद्वसतेर्लिट् । शासिवसिघसीनां च (८-३-६०) इति षत्वम् । अपान्वध्याङ्वसः (१-४-४८) इति कर्मत्वम् ॥ १-२२ ॥

(प्रद्यो-१-२३) **तत इति ।** ततस्तदनन्तरं दिगन्ताधिपतिः सकलभूमण्डलेश्वरः इत्यर्थः । दिलीपः शतं शतसंख्याकान् अश्वमेधान् क्रतून् आहरत् अकरोत् । हरतेर्लङ् ।

सुरभेः प्रसादात् सुदक्षिणायां वंशकरं वंशवर्धकं रघुं रघुनामानं सुतं लेभे प्राप ॥ १-२३ ॥

(प्रद्यो-१-२४) **सौदक्षिणेय** इति । इन्द्रेण योद्धुं शीलमस्येति इन्द्रयोधी । सुप्यजातौ णिनिस्ताच्छील्ये (३-२-७८) इति णिनिः । सुदक्षिणायाः अपत्यं पुमान् सौदक्षिणेयः । स्त्रीभ्यो ढक् (४-१-१२०) । रघुः पित्रा दिलीपेन शताश्वमेधेषु कृतेषु सत्सु बाह्वोर्भुजयोर्महता महत्तरेण बलेन सत्त्वेन पूतक्रतायीतनयं शचीसुतम् । पूतक्रतोरै च (४-१-३६) इति ङीप् ऐकारश्चान्तादेशः । जयन्तम् आह्वास्त आकारयामास । आहूतवानित्यर्थः । आङ्पूर्वाद् ह्वयतेर्लुङ् । स्पर्धायामाङः (१-३-३१) इत्यात्मनेपदम् । स्वपितरि इन्द्रतुल्ये स्वयं जयन्ततुल्योऽभूदित्यर्थः ॥ १-२४ ॥

(प्रद्यो-१-२५) **रघुरिति** । रघुवंशदीपे रघुशवंप्रकाशके दिलीपे यज्ञफलानुभूत्यै यागफलभोगाय दिवं स्वर्गं याते गते सति रघुरमुद्रैरनर्गलैः पृतनासमुद्रैः (सेनासमुद्रैः) । चतुःसमुद्रीपरिखाम् । चतुर्णां समुद्राणां समाहारश्चतुःसमुद्री । तद्धितार्थेत्यादिना समाहारसमासः (२-१-५१) । सैव परिखा दुर्गवेष्टनखातं यस्याः सा । तथोक्ताम् । खेय तु परिखाधार इत्यमरः । अन्येष्वपि दृश्यते (३-२-१०१) इति डप्रत्ययः । पृथ्वी भूमिं जिगाय जितवान् ॥ १-२५ ॥

(प्रद्यो-१-२६) **रघोरिति** । पुरुहूतस्य इन्द्रस्य तेज इव तेजो यस्य स तथोक्तः । सप्तम्युपमानपूर्वपदस्येति बहुव्रीहिरुत्तरपदलोपश्च । कुञ्जरैर्गजैः साधनैर्घोरं जन्यं युद्धं यस्य स तथोक्तः । (यद्वा) कुञ्जरेण परिपन्थिना घोरं जन्यं युद्धं यस्य स तथोक्तः । युद्धमायोधनं जन्यमित्यमरः । तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान् कुमारः इति कालिदासेनाप्युक्तम् (रघुवंशे ५-५०) । रघोः सकाशादजो नाम पुत्रो जातः । अथ अनन्तरम् स्वयंवरे इन्दोः प्रभेव प्रभा क्रान्तिः यस्याः सा तामिन्दुमती विदर्भराजतनयां व्यवोढ (परिणीतवान्) । वहतेर्विपूर्वात् कर्तरि लुङ् । स्वरितेत्त्वादात्मनेपदम् । सर्वनृपान् व्यजेष्ट अजैषीत् । विपूर्वाज्जयतेर्लङ् । विपराभ्यां जेः (१-३-१९) इत्यात्मनेपदम् ॥ १-२६ ॥

(प्रद्यो-१-२७) **अजीजनदिति** । राजा अजोऽपि इन्दुमत्यां शस्यं प्रणस्यम् दशस्यन्दनं दशरथं नाम पुत्रमजीजनत् अजनयत् । जनेः कर्तरि णिचि लुङ् । पुत्रे प्रधानेष्वमात्येषु चाहितो न्यस्तो राज्यभारो येन स तथोक्तः स्वयं स्वर्गतां स्वर्गं गतां-मृतामित्यर्थः—तामिन्दुमतीमन्वगमत् ममारेत्यर्थः । गमेर्लुङ् । इन्द्रवज्रा वृत्तम् ॥ १-२७ ॥

(प्रद्यो-१-२८) **पितर्यजे इति ।** पितर्यजे मातरि इन्दुमत्यां च अजातहार्दः अनुत्पन्नस्नेहः सः दशरथः शिशुरेव राजा भूत्वा प्रधानबुद्धया मन्त्रिधिया शनैः मन्दमभिवर्धमानो विवर्धमानो यौवनं तारुण्यं वयः अभ्यपादि प्राप्तवान् । पद्यतेः कर्तरि लुङ । चिण् ते पदः (३-१-६०) ॥ १-२८ ॥

(प्रद्यो-१-२९) **युवा दिगन्तेष्विति ।** जम्भारेरिन्द्रस्य समो जम्भारिनिभः । नित्यसमास (त्वादस्वपदवि) ग्रहः । स प्रभावो यस्य स तथोक्तः । युवा तरुणो दशरथः दिगन्तेषु कीर्तिस्तम्भान् निखाय समारोप्य मन्त्रिवरैः सचिवश्रेष्ठैः नानानिवृद्धयो नानादेशेभ्यः । नितरां वृत्तिरत्र जनानामिति निवृत् । बहुवीहिः । नात्र नहिवृतीत्यादिनोक्तः (६-३-११६) दीर्घः । निशब्दस्य क्रियायोगाभावेन उपसर्गत्वा[23]भावात् । (अथवा दीर्घस्य विकल्पः) यदमरसिंहव्याख्यातृभिः . . . . . अन्येषामपि दृश्यते (६-३-१३७) इति दीर्घोऽभ्यधायि . . . . . तद् (न साधु) । . . . . . निवृज्जननिवृद्धेदे . . . . . इति प्रतापमार्ताण्डः । आनायिताः आनयनं कारिताः । नरनाथकन्याः उदूहे उदवहत् । उत्पूर्वाद् वहतेः कर्तरि लिट् ॥ १-२९ ॥

(प्रद्यो-१-३०) **खेलन्निति ।** रन्ता रमणशीलो रघुप्रवीरो योऽसौ दशरथः निष्कुटदीर्घिकासु । गृहारामास्तु निष्कुटाः इत्यमरः । वापी तु दीर्घिका इति च । समन्तात् सर्वतस्ताभिः समं राजकन्याभिः सह खेलन् क्रीडन् रम्येषु मनोज्ञेषु हर्म्येषु चिरं बहुकालं निरन्तरमनवरतं ताः रमयाञ्चकार रमयामास । ण्यन्ताल्लिट् ॥ १-३० ॥

(प्रद्यो-१-३१) समन्तादित्युक्तम् । तत्राह **ययाविति ।** स कुमारः यौवनं सार्थयितुं सफलीकर्तुं रन्तुम् क्रीडितुम् वनमुपवनमारामं च ययौ जगाम । कुरङ्गीषु हरिणीषु सक्तः कृष्णसार इव वामासु वनितासु—प्रतीपदर्शिनीषु लोलोऽनुरक्तः वनसीम्नि वनभुवि अखेलत् अक्रीडत् । खेलतेर्लङ । यतः कारणात् कौ पृथिव्यां मारो मदनः । गोत्रा कुः पृथिवी इति मदनो मन्मथो मारः इति त्रामरः ॥ १-३१ ॥

(प्रद्यो-१-३२) **कौसल्ययेति ।** स्ववशासु अधीनासु तासु कौसल्यादिषु करीव रेजे रराज । कथम् । कलापकेश्या कलाप इव बर्हा इव केशा यस्याः सा तथोक्ता । तया । कलापो भूषणे बर्हे इत्यमरः । कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या । वृद्धेत्कोसलेति सूत्रेण ञ्यङ । (४-१-१७१) यङश्चाप् (४-१-७४) । तया अरंस्त रमते स्म । रमतेर्लुङ । केकयस्य राज्ञः पुत्री कैकेयी । तया सह केलिं क्रीडां व्यधात् ।

अतनोत् । विपूर्वाद् दधातेर्लुङ् । सुमित्रया प्रेयस्या सह सर्वसुखानि भेजे—सिषेवे ।। १-३२ ।।

(प्रद्यो-१-३३) **ता एवेति ।** तरुणीशतानां युवतीशतानाम् । तरुणी युवती समेत्यमरः । मध्ये एतास्तिस्रो महिष्यः कृताभिषेकाः । कृताभिषेका महिषीत्यमरः । प्रियाः प्रेयस्यो बभुः भान्ति स्म । सेव्यमानः आभिरेवेति भावः । स दशरथः शरीरभाजः मूर्तिमतीः शक्तीरिव प्रभुमन्त्रोत्साहशक्तीरिव अभक्त असेवत । भजतेर्लुङ् । शरीरभाजो बुद्धीरिव अबुद्ध बुद्धवान् । बुध ज्ञान इत्यस्माल्लुङ् । इन्द्रवज्रा वृत्तम् ।। १-३३ ।।

(प्रद्यो-१-३४) **ताभिरिति ।** ताभिर्महिषीभिः समम् । कृता अनुकम्पा यैस्तथोक्तैः भूनिलिम्पैः भूदेवैः । विप्रैरिति यावत् । नौ लिम्पेर्वाच्य इति (३-१-१३८ सूत्राधस्थवार्तिकात्) निपूर्वात् लिम्पतेः शप्रत्ययः । सुरौघान् तर्पयितुः संतानचिन्तया विधुरस्य विक्लवस्य राज्ञो दशरथस्य नवसंख्याकानि सहस्राणि समाः संवत्सरसहस्राणि । हायनोऽस्त्री शरत् समाः इत्यमरः । व्यतीयुः गताः । इणो लिट् ।। १-३४ ।।

(प्रद्यो-१-३५) **तत इति ।** ततोऽनन्तरं तुरङ्गे अश्वे सीदतीति तुरङ्गसादी अश्वारूढ इत्यर्थः । कदाचित् मृगयाविनोदी मृगयया विनोदितुं शीलमस्येति तथोक्तः । आखेटो मृगया स्त्रियामित्यमरः । चतुरङ्गयुक्तः हस्त्यादिचतुरङ्गयुक्तः । हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् इत्यमरः । कुरङ्गसारङ्गविहङ्गघाती—कुरङ्गा हरिणाः सारङ्गाश्चातकाः विहङ्गाः पक्षिविशेषाः । मृगे कुरङ्गेत्यादिरमरः । चातके हरिणे पुंसि सारङ्गः शबले त्रिषु इति चामरः । एतान् हन्तुं शीलमस्येति तथोक्तः । सुप्यजाताविति (३-२-४८) णिनिः । तमसायास्तटेषु रोधस्सु मुहुर्व्यचारीत् । विपूर्वाच्चरतेर्लुङ् । उपेन्द्रवज्रा वृत्तम् ।। १-३५ ।।

(प्रद्यो-१-३६) **वनेचरैरिति ।** कर्णेष्ववतंसीकृतानि किंकिरातानि कर्णिकारकुसुमानि यैस्तथोक्तैः । कर्णिकारः [24]कच्छदारु कोकः कनकपुष्पकः । वीरपुष्पः किंकिरातो वीरभद्रोऽमृतद्रुमः इत्यादिः . . . . . । वागुरा मृगबन्धनी रज्जुः । वागुरा मृगबन्धनीत्यमरः । तया चरन्तीति वागुरिकाः—जालिकाः । चरति (४-४-८) इति ठक् प्रत्ययः । द्वौ वागुरिकजालिकावित्यमरः । मृगयुर्लुब्धको व्याधो बुधैर्वागुरिकः स्मृतः इति हलायुधः । वनेचरैः किरातैः शबरैः विशोधितं मृष्टं दावं वनम् । दवदावौ वनारण्यवह्नी इत्यमरः । धन्वी धनुष्मान्[25] । व्रीह्यादित्वात् इनि.

(५-२-११६)। गाढं बाढमगाढ प्राविशत्। गाहू विलोडने इत्यस्माल्लुङ। अश्वान् वारयन्तीत्यश्ववाराः। कर्मण्यण्। तं दशरथम् अन्वीयुः अन्वगच्छन्। इणो लिट् ॥ १-३६ ॥

(प्रद्यो-१-३७) **बंहीयसेति।** इदं बहुलम् इदं बहुलमनयोरतिशयेन इति बंहीयः। तथोक्तेन। बहुलतरेणेत्यर्थः। द्विवचनेत्यादिना (५-३-५७) ईयसुन्। प्रियस्थिरेत्यादिना (६-४-१५७) बहुलशब्दस्य बंह्यादेशः। वारणानां बृंहितं गर्जितम। बृंहितं करिगर्जितमित्यमरः। पटीयसा पटुतरेण। पूर्ववदीयसुन्। घोटकानां तुरङ्गाणां ह्रेषितं निस्वनः। अश्वानां हेषा ह्रेषा च निस्वनः इत्यमरः। तेन भयानकैः भीमैः। घोर भीमं भयानकम् इत्यमरः। सेनायां समवेताः सैनिकाः। सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते इत्यमरः। सेनाया वा (४-४-५५) इति पक्षे [26]ठक्। तेषां सिंहनादैश्च मुहूर्तं वनान्ताः वनभुवः मुखरा ध्वनिमन्तः आसन् अभूवन्। अस्तेर्लङ ॥ १-३७ ॥

(प्रद्यो-१-३८) **शल्यानिति।** पङ्क्तिरथो दशरथः। पङ्क्तिविंशतीत्यादिना (५-१-५९) दशशब्दार्थे निपात। शरैर्बाणैः शल्यान् श्वाविदः। श्वावित्तु शल्य इत्यमरः। विलुम्पन् हिंसन्। शरभान् अष्टापदमृगविशेषान्। शरभश्शलभे चाष्टापदे प्रोक्तो मृगान्तरे इति विश्वः। तृम्पन् हिंसन्। शार्दूलसघान् व्याघ्रगणान्। शार्दूलद्वीपिनौ व्याघ्रे इत्यमरः। विनिघ्नन् प्रहरन्। सिंहान् छिन्दन् विदारयन्। हरिणान् विध्यन् प्रहरन्। मध्येवनं वनस्य मध्ये। पारे मध्ये षष्ठ्या वा (२-१-१८) इत्यव्ययीभावः। चचार। इन्द्रवज्रा वृत्तम् ॥ १-३८ ॥

(प्रद्यो-१-३९) **वसन्तविभ्राजीति।** विराजि राजनि। बाहुजः क्षत्रियो विराडित्यमरः। पापानाम् ऋद्धिः समृद्धिः यस्या सा तथोक्ता। तस्यां विहारः क्रीडा। तत्र शीलं स्वभावो यस्य तस्मिन् तथोक्ते। वनान्तं भजतीति तस्मिन् वनान्तभाजि। वसन्तविभ्राजि वसन्तवद् विभ्राजते इति तस्मिन् तथोक्ते सति भ्रमराः लतासु मञ्जु मनोज्ञम्। मनोज्ञं मञ्जु मञ्जुलमित्यमरः। जुगुञ्जुः रुरुवुः। कलकण्ठाः कोकिलाः। कलकण्ठः परभृते कोकिलश्च वनप्रियः इति प्रतापमार्तण्डः। तेषां संघाः कलमव्यक्तं चुकूजुः कूजन्ति स्म। कूज अव्यक्ते शब्दे इत्यस्माल्लिट्। उपेन्द्रवज्रा वृत्तम् ॥ १-३९ ॥

(प्रद्यो-१-४०) **शनैरिति।** कलकण्ठडिम्भाः कोकिलार्भकाः। पोतः पाकोऽर्भको डिम्भ इत्यमरः। चञ्चूपुटैः त्रोटीपुटकैः। चञ्चुस्त्रोटिरुभे स्त्रियौ इत्यमरः।

चूतलतासु शलाटून् अपक्वफलानि । आमे फले शलाटुः स्यादित्यमरः । शनैर्मन्द-मलुण्ठन् अभक्षयन् । लुठि स्तेये इत्यस्माल्लङ । ततस्तदालोक्य पान्थो विरहिजनः—(चूतशलाटुभक्षणवशात् कोकिलानां पञ्चमनादः अचिराद् भवेदिति स्वभावात्) पञ्चमनादशङ्की पञ्चमः तन्त्रीकण्ठोत्थितः स्वरविशेषः तस्य नादं शङ्कितुं शील-मस्यास्तीति पञ्चमनादशङ्की । सुप्यजाताविति णिनिः । नादाश्च—निषादर्षभगान्धा-रषड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः—इत्यमरः । पञ्चमस्य कोकिलसंबन्धमाह[27]—पुष्पसाधारणे काले पिकः कूजति पञ्चमम्—इति । भूयः अत्यर्थं बिभाय भयमाप । भी भये इत्यस्मात् लिट् ।। १-४० ।।

(प्रद्यो-१-४१) **मातङ्गदानायेति ।** अत्र भ्रमरचेष्टां वर्णयति । मदालिः मदोपलक्षितोऽलिः मधुपः । पक्षान्तरे मदनोपलक्षितः आलिः विशदाशयो जनः । तथाच—अलिः सुरामधुलिहोरालिस्तु विशदाशये इति विश्वः । मातङ्गदानाय—मातङ्गो गजः स्वस्य दानाय मदोदकाय मदोदकं पातुम् । क्रियार्थोपपदस्येति चतुर्थी । गजेऽपि नागमातङ्गावित्यमरः । (पक्षान्तरे) मातङ्गश्चण्डालः । तत्सकाशाद् दानाय दानं ग्रहीतुम् । दानं मदगजे त्यागे इति विश्वः । चण्डालप्लवमातङ्गेत्यादिरमरः । दानं ग्रहीतुं गतः प्राप्तः । तत्कर्णाविव तालव्यजनानि तैरवधूतस्तिरस्कृतः । पक्षान्तरे तालस्ताडनं तेनावधूतः । गुणाश्रये सौगन्ध्यादिगुणाकरे । पक्षान्तरे । गुणा भव्यता-(दयः) तेषामाश्रये । श्रीमति शोभावति । पक्षान्तरे श्रीमति संपद्वति । शोभा-संपत्तिपद्मासु लक्ष्मीः श्रीरपि कथ्यते इति [28]शाश्वतः । हंसा राजहंसास्तैः सेव्यः । पक्षान्तरे तु हंसा निर्लोभनृपतयः । तैरुपयोग्ये । निर्लोभनृपतौ हंस (इति विश्वः ।) पद्मवने कमलवने । पक्षान्तरे पद्माख्ये निधिसंघे । पद्मः स्यात्पन्नगे व्यूहे निधौ संख्यान्तरेऽम्बुजे इति विश्वः । पश्चात्तपन् । पश्चात्तापं प्राप्नुवन् रुराव चुकूज । रु शब्दे इत्यस्माल्लिट् । लोकेऽपि कश्चिद् विवेकी केनचिन्मदेन मत्तः सन् चण्डालाद्दा-नप्रतिग्रहाय प्राप्तस्तेन प्रतिषिद्धः सन् औदार्यादिगुणाकरे महाराजास्थाने वाग्विजृम्भणं करोतीति ध्वनिः[29] ।। १-४१ ।।

(प्रद्यो-१-४२) **वल्लीति ।** भृङ्गी भृङ्गाङ्गना । प्रशस्ता वल्लयः वल्लीम-तल्ल्यः । श्रेष्ठमल्लिकालता इति यावत् । प्रशंसावचनैश्च (२-१-६६) इति समासः । तासु पदं दधाना निक्षिप्तवती । अन्या वल्ली वल्ल्यन्तरम् । तत्र स्थितं वल्लभं रमणम् । यद्वा प्रशस्तमल्लिकाकुसुमानि मल्लीमतल्ल्यः । तासु मल्लीमतल्लीकुसुमेष्वित्यर्थः । द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियामित्यमरः । मल्लीशब्दस्य हरीतक्यादिवत्

स्त्रीलिङ्गनिर्देशः । वल्लीपुष्पस्यान्तरे विशेषवल्ल्यन्तरे । वल्ली स्यादजमोदायां पुष्पभेदे च वीरुधि इति विश्वः । अवकाशे बहिर्योगे विशेषेऽवसरेऽन्तरम् इति हलायुधः । आह्वयन्ती आकारयन्ती । चञ्चद्विपञ्चीकलनादभङ्गी——कलः अव्यक्तश्चासौ नादश्च । विपञ्च्याः वल्लक्या कलनादस्य भङ्गी । चञ्चन्ती मनोज्ञा विपञ्चीकलनादभङ्गी यस्याः सा तथोक्ता सती संगीतं गानम् अङ्गीकुरुते स्म अङ्गीचकार । लट् स्मे (३-२-११८) इति स्मोत्तरे भूतार्थे लट् ।। १-४२ ।।

(प्रद्यो-१-४३) **आरूढेति** । भृङ्गी भृङ्गाङ्गना पङ्केरुहं कमलम् । तत्पुरुषे कृति बहुलमित्यलुक् समासः । नालो दण्डः । नालो नालमित्यमरः । स एव दोला प्रेङ्खा । दोला प्रेङ्खादिका स्त्रियामित्यमरः । आरूढा चासौ पङ्केरुहनालदोला च । तस्यां दोलायमाना चलन्ती सती । निनदेन झङ्कारेण जगद् विश्व जेतुमिच्छुः । मनाणंसेत्युप्रत्ययः । कुसुमान्येवेषवो बाणा यस्य सः प्रसवेषुः । तस्य चापस्य टङ्कारशङ्का शिञ्जनीध्वनिम् । स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने इत्यमरः । टङ्कारः शिञ्जनीध्वनौ इति विश्वः । सरसि कमलाकरे व्यतानीद् अकार्षीत् । विपूर्वात्तनोतेर्लुङ् ।। १-४३ ।।

(प्रद्यो-१-४४) **न तद् वनमिति** । यत्र वने माधवीलता नास्ति वासन्ती लता नास्ति तद् वनं न (भवति) । वासन्ती माधवी लतेत्यमरः । यत्र यस्यां माधवीलतायां मञ्जुमञ्जरी मनोज्ञस्तवको न सा लता न (भवति) । यत्र मञ्जर्यां सौरभं सौगन्ध्यं न सा च मञ्जरी न भवति । यत्र सौरभे षट्पदाः भ्रमराः न सन्ति तच्च सौरभं न (भवति) । (यद्यपि एतत्पद्यनिबन्धना अत्र दोषशङ्का भवति——) [30]असांप्रदायिकवंशस्थत्वात् । सर्गमध्येऽपि[31] तल्लेखनस्यायुक्तत्वात् । सर्गे चात्र इन्द्रवज्रा——(उपेन्द्रवज्रा)——उपजातय इति त्रीण्येव वृत्तानीति । तथापि (निरङ्कुशाः कवय इति स्वातन्त्र्यदर्शनात्) बहुषु (मातृका——) पुस्तकेषु (अत्रेदं पद्यं दृश्यते) विलिखितमिति (अस्माभिरपि) व्याख्यातमित्यदोषः ।। १-४४ ।।

(प्रद्यो-१-४५) **वनेष्विति** । वनेषु वसन्तवल्ल्यः माधवीलताः अराजन्त अशोभन्त । राजतेर्लङ् । वसन्तवल्लीषु मधुव्रतालयः——मधु मकरन्दं व्रतयन्तीति मधुव्रताः । तेषामालयः पङ्क्तयः (अराजन्त) । मधुव्रतालीषु मनोज्ञनादाः मनोहरस्वराः (अराजन्त) । मनोज्ञनादेषु यूना मनांसि । अराजन्तेति प्रतिवाक्यं क्रियावृत्तिः । उपेन्द्रवज्रा वृत्तम् ।। १-४५ ।।

(प्रद्यो-१-४६) **ततो वनान्ते इति।** वनान्ते वनमध्ये वसन्ते वसन्तर्तौ गलिते सति ततः समनन्तरं महान् अधिकः ऊष्मा उष्णो यस्मिन् तस्मिन् महोष्मणि। ग्रीष्मोष्मबाष्पा ऊष्माणः इति यादवः। ग्रीष्मर्तौ अभितः सर्वतः प्रवृत्ते सति। अपीच्यः सुन्दरः। अपीच्यः सुन्दरः प्रोक्त इति (हेमः)। राजापि मृगयैव पिशाची तया गाढं बाढं गृहीतः गहने वने चचार बभ्राम। मृगयायाः कष्टतमत्वसूचनार्थं पिशाचित्वेन रूपणम्। अत एवोक्तं मनुना––मृगयाऽक्षो दिवास्वप्नः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥ इति (मनुस्मृतिः ७-४७)। पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्। एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे॥ इति च। लोकेऽपि सुन्दरं पुरुषं ..... (दोषाः) .... (चारय)न्तीति भावः॥ १-४६॥

(प्रद्यो-१-४७) अत्यन्तमृगयासक्तिमाह––**नाहारमिति।** स दशरथः आहारं न ऐहिष्ट नैच्छत्। ईह चेष्टायामित्यस्माल्लुङ्। निद्रां स्वपनं न प्राप। स्त्रीषु न अराङ्क्षीत् नानुरक्तोऽभूत्। रञ्ज रागे इत्यस्माल्लुङ्। अस्तिसिचोऽपृक्ते (७-३-९६) इतीडागमः। वदव्रजेत्यदिना (७-२-३) वृद्धिः। जकारस्य चोः कुरिति कुत्वम्। इण्कोरिति षत्वम्। अनुस्वारपरसवर्णौ च। गृहान्। गृहाः पुसि च भूम्न्येव इत्यमरः। न अकाङ्क्षीत् न अचकमत। काङ्क्षि काङ्क्षायामित्यस्माल्लुङ्। स राज्यभोगानपहाय। राज्ञः कर्म राज्यम्। भुज्यन्ते इति भोगाः विषयास्तानपहाय विसृज्य। पापानाम् ऋद्धिः समृद्धिः यस्याः सा तामेव पापर्द्धिमेव मृगयामेव सर्वं सौख्यम् अमत अमन्यत। मनोतेर्लुङ्। तनादिभ्यस्तथासोः (२-४७९) इति सिचो लुक्। अनुदात्तोपदेशेति (६-४-३७) अनुनासिकलोपे ह्रस्वादङ्गात् (८-२-२७) इति सिचो लोपे च रूपमिदम्। इन्द्रवज्रा वृत्तम्॥ १-४८॥

(प्रद्यो-१-४८) **ग्रीष्मे** इति। राजनि नृपे वनं गाहमाने सति भीत्या भयेन मृगेषु हरिणादिषु निगूहमानेषु निलीयमानेषु मत्सु। ऊदुपधाया गोहः (६-४-८१) इति ऊकारः। शृङ्खला निगलाः एषां सन्तीति शृङ्खलिनः। विमुक्ताः विसृष्टाः। मृगदर्शनार्थमिति भावः। कौलेयकाः सारमेयाः। कौलेयकः सारमेय इत्यमरः। कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु (४-२-९६) इति ढकञ्प्रत्ययः कुलशब्दात्। वराहान् रुन्धन्तीति वराहरुधः। वराहः सूकरो घृष्टिरित्यमरः। कोलाहलं कलकलम्। कोलाहलः कलकलः इत्यमरः। विनेनुश्चक्रुः॥ १-४८॥

(प्रद्यो-१-४९) **स्फिचमिति।** एको वराहः द्रुममूले स्फिचं कटिप्रोथं निधाय। स्त्रियां स्फिचौ कटिप्रोथावित्यमरः। अनेकानपि शुनः शुनकान्। शुनको भषकः श्वा

स्यादित्यमरः। विदार्य विदलय्य विद्राव्य पलाय्य। पर्यस्तमुस्तासुरभिप्रदेशं पर्यस्ताभिः मुस्ताभिः सुरभिप्रदेशो यस्य तथोक्तं वेशन्तजलं पल्वलजलं विवेश प्राप। वेशन्तः पल्वलं चाल्पसरः इत्यमरः ॥ १-४९ ॥

(प्रद्यो-१-५०) **विभिद्येति।** ऋश्याः मृगविशेषाः पृदाकून् अभिद्विषाणाः अभिद्वेषं कुर्वाणाः सन्तः। क्रुधद्रुहेत्यादिना (१-४-३७) चतुर्थ्यां प्राप्तायां [32]तदपवादत्वेन कर्मणि द्वितीया। द्विषः स्वरितेत्त्वात् शानजादेशः। नाकून् अभितः परितः। अभितः परित इत्यादिना द्वितीया। वामलूरश्च नाकुश्चेत्यमरः। निकर्षन्ति घर्षयन्ति विषाणानि येषां ते तथोक्ताः। पृदाकून् सर्पान्। सर्पः पृदाकुरित्यमरः। विभिद्य विदार्य निशि रात्रौ तटाकानां पद्माकराणां वेशन्तानां च तलेषु प्रदेशेषु। पद्माकरस्तटाकोऽस्त्री इत्यमरः। आविल कलुषमम्भः अभीषुः ऐच्छन्। इषु इच्छायामित्यस्माल्लिट् ॥ १-५० ॥

(प्रद्यो-१-५१) **स्वच्छाययेति।** तृषा पिपासया आर्तः। महती विषाणे यस्य सः महाविषाणो महिषः लुलायः। लुलायो महिष इत्यमरः। मार्तण्डस्य सूर्यस्य गाढास्तीव्राः उष्णकराः उष्णकिरणास्तान्। तीव्रैकान्तनितान्तानि गाढबाढदृढानि चेत्यमरः। असोढा असहमानः। तृजन्तत्वात् न लोकेति (२-३-६९) षष्ठीनिषेधः। मण्डलितं मण्डलीकृतम्। मण्डलशब्दात् तत्करोतीति ण्यन्तात् कर्मणि निष्ठा। शरीरं सङ्कोचयन् अत्यन्तमल्पीकुर्वन् स्वच्छाययां स्वशरीरच्छाययां गोप्तुं रक्षितुम् इयेष इच्छति स्म। इच्छतेर्लिट् ॥ १-५१ ॥

(प्रद्यो-१-५२) **तुच्छद्रुमेति।** कदुष्णे मन्दोष्णे वायौ। कोष्णं कवोष्णं मन्दोष्णं कदुष्णमित्यमरः। कोः कत्तत्पुरुषेऽचीति (६-३-१०१) कदादेशः। वाति सति। उष्णं न सहन्ते इत्युष्णालवः। शीतोष्णतृप्तेभ्यस्तन्न सहते इति वार्त्तिकेन आलुः प्रत्ययः। तृष्णया पिपासया आतुराः आर्ताः अत एव तृष्णा तुरङ्गो येषां ते तृष्णातुरङ्गाः तृष्णया तुरङ्गेणेवाकृष्यमाणा इत्यर्थः। कृष्णमृगाः कृष्णसाराः। तुच्छद्रुमच्छायतलेषु—तुच्छा द्रुमच्छाया तुच्छद्रुमच्छायम्। तच्च तत् तलं च। तेषु तुच्छद्रुमच्छायतलेषु स्वल्पतरुच्छायायामित्यर्थः। तुच्छद्रुमच्छायेत्यत्र विभाषासेनासुराच्छायेति (२-४-२५) इति नपुंसकत्वम्। निषण्णा उपविष्टाः हरिणीः एणीः नुदन्तः प्रेरयन्तः विचेरुः ॥ १-५२ ॥

(प्रद्यो-१-५३) **भल्लूक इति।** एको भल्लूकः ऋक्षः। बहुधा बहुभिः प्रकारैः। संख्याया विधार्थे (५-३-४२) इति धाप्रत्ययः। जिहिक्के ववाशे। हिक्क

अव्यक्ते शब्दे इत्यस्माल्लिट् । एनं भल्लूकं रुन्धद्भिः वारयद्भिः शुनकैः बुबुक्के । बुक्क [33]श्वशब्दे इत्यस्मात् भावे लिट् । वने शुनां शुनकानां कोलाहलेन दीर्णा विदीर्णा दिशो यस्मिंस्तस्मिन् विदीर्णदिक्के सति फणिभिः सर्पैः वल्मीके वल्मीकरन्ध्रे श्वभ्रे लीनैः पफक्के । रन्ध्रं श्वभ्रमित्यमरः । फक्क नीचैर्गतौ इत्यस्माद् भावे लिट् ।। १-५३ ।।

(प्रद्यो-१-५४) **सूर्ये** इति । सूर्ये ललाटं तपन्तीति ललाटंतपाः । असूर्यललाटयोर्दृशितपोः (३-२-३६) इति खश् । अरुर्द्विषदिति (६-३-६७) मुम् । ईदृग्विधा भासो यस्य तस्मिन् सति । मध्याह्ने इत्यर्थः । सूर्यं न पश्यन्तीति असूर्यपश्याः तैः । पूर्वोक्तसूत्रेण खश् । मुम् च । सार्वधातुकत्वात् पाघ्राध्मा—इत्यादिना (७-३-७८) दृशेः पश्यादेशः । अद्रिगुहासु विलीनैः घूकैः दिवाभीतैः घूको घर्घारवः कौशी दिवाभीतश्च कथ्यते इति प्रतापमार्ताण्डः । अभायि भीतम् । भावे लुङ् । तत्र वने रघूत्तमोऽमीषां घूत्कृतानि तत्कृतानारवान् अशृणोत् । शृणोतेर्लङ् । घूत्कारभावादिति भावः ।। १-५४ ।।

(प्रद्यो-१-५५) **व्यादायेति ।** मृगवधोपजीवी व्याधः वनवृक्षमूले वक्त्रं व्यादाय विवृतं कृत्वा व्यालवत् सर्पवदायतं दीर्घम् (व्यालायितमिति पाठे व्यालवद् संचरन्तम्) वालधिम् लाङ्गूलम् । पुच्छोऽस्त्री लूमलाङ्गूले वालहस्तश्च वालधिः इत्यमरः । उद्धनानं कम्पयमानं व्याघ्रं लतान्तस्थित एव—कुञ्जस्थ एवेत्यर्थः । प्रविव्याध जघान । नृपो राजा च जहर्ष तुतोष । इन्द्रवज्रा वृत्तम् ।। १-५५ ।।

(प्रद्यो-१-५६) **विषाणिनेति ।** संज्ञाविदा रघूद्वहेन दशरथेन कश्चिद् वननीलरोहित् अरण्यमृगविशेषः विषाणिना लुलायेन । विषाणी तुरगद्वेषी इति प्रतापमार्ताण्डः । गृह्यकरोहिषेण गृहासक्तमृगविशेषेण करणेन । गृहसक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाच्च ते इत्यमरः । निगृह्य अवरुध्य । संज्ञुः संहतजानुकः । संज्ञुः संहतजानुक इत्यमरः । प्रसंभ्यां जानुनोर्ज्ञुः (५-४-१२९) इति ज्ञुरादेशः । भ्रमित्वा परिवृत्य भुवि दत्तजानुः सन् अघानि निहतः । [34]हन्तेः कर्मणि लुङ् ।। १-५६ ।।

(प्रद्यो-१-५७) **सिंह इति ।** करालदंष्ट्रो भयंकरदंष्ट्रः सिंहः गिरेर्गह्वरस्य गुहायाः पार्श्वे स्थिते नृपाश्वे दशरथतुरगे निहितोग्रदृष्टिः । रंहसा वेगेन सह वर्तते इति सरंहः तस्याश्वस्य कण्ठे गले अपतत् । पत गतावित्यस्माल्लङ् । राजा खड्गेन तं सिंहं खण्डयति स्म । लट् स्मे इति भूतार्थे लट् । इन्द्रवज्रा वृत्तम् ।। १-५७ ।।

(प्रद्यो-१-५८) **छेकैरिति।** नृपः छेकैर्गृहासक्तमृगैः कुरङ्गादिभिः वनमृगान् निहत्य घातयित्वा गृह्यखगैः गृहासक्तखगैः। खगे विहंगविहगेत्यादिरमरः। पदास्वैरिबाह्यापक्ष्येषु चेति (३-१-११९) इति क्यप्। वन्यखगान् निपात्य पातयित्वा प्राणिषु सत्त्वेषु परस्परमन्योन्यं जातिवैरं जातितो मृगत्वपक्षित्वतः वैरं विरोध पश्यन् श्येनं धरतीति श्येनधरः। शशादन. पत्री श्येन इत्यमरः। चचार ॥ १-५८ ॥

(प्रद्यो-१-५९) **स एकदेति।** स पङ्क्तिरथः दशरथः एकदा कदाचिद् अपराह्णे दिनापरभागे पतङ्गे सूर्ये। पतङ्गः पक्षिसूर्ययोरित्यमरः। अम्बरतः विलम्बमाने स्रंसमाने सति रुरुं मृगविशेषम्। कृष्णसाररुरुन्यङ्कु—इत्यादिरमर.। निहन्तु हयेनाश्वेन रुरुधे रुद्धवान्। सोऽपि रुरुरपि अध्यरण्यम् अरण्ये। विभक्त्यर्थे अव्ययीभावः। अद्रवत् अधावत्। द्रु गतावित्यस्माल्लङ्। उपेन्द्रवज्रा वृत्तम् ॥ १-५९ ॥

(प्रद्यो-१-६०) **उन्मार्गेति।** स दशरथः उन्मार्गवर्तिनि—उन्मार्गेण वर्तितु शीलमस्येति। तस्मिन् उन्मार्गवर्तिनि ऋष्ये मृगविशेषे। गोकर्णपृषतैणर्ष्यरोहिताश्चमरो मृगाः इत्यमरः। दृङ्मार्गं दृष्टिपथं शीघ्रमतियाति सति अतिक्रामति सति क्वचिदपि कुत्रापि अदृश्ये अप्रत्यक्षे सति तरस्विना वेगवता। तरस्वी त्वरितो वेगी इत्यमरः। तुरङ्गमेण तरङ्गैर्लोलं तरलां तमसा तमसानदीमगात् अयासीत् ॥ १-६० ॥

(प्रद्यो-१-६१) **लोकान्तरमिति।** लोहितधाम्नि सूर्ये इत्यर्थः। अन्यो लोको लोकान्तरं याति गते सति सहसा शीघ्र सान्ध्ये सन्ध्यासंबन्धिनि रागे शोणितवर्णे च प्रयाते अपगते सति कुलादिबन्धोः इक्ष्वाकुमूलबन्धोः—सूर्यस्येत्यर्थ.—पयः प्रदानाय अर्घ्यप्रक्षेपाय सिन्धोः नद्याः—सिन्धु र्ना सरिति स्त्रियामित्यमर —तटम्—प्रतीरं च तटं त्रिष्वित्यमरः—सिन्धुजं सैन्धवम् अश्वमित्यर्थः। हयसैन्धवसप्तयः इत्यमरः। आनिनाय प्रापयामास। नीवह्योरिति[35] वचना (त् नयतेरपि द्विकर्मकत्वम्) ॥ १-६१ ॥

(प्रद्यो-१-६२) **तत्रेति।** तत्र नदीतटे एनमश्वम्। अवरुह्य अवतीर्य अर्थात् तुरङ्गमादिति गम्यते। न तु एनमित्यनेन अवरुह्येति पदम् अन्वेतुमर्हम्। तस्मादेन तुरङ्गं [36]पाययामासेत्यन्वयो वक्तव्य। अथ पल्याणं पल्ययनम्। पल्ययनं पल्याण चाथ वाजिनामिति प्रतापमार्तण्डः। अपसार्य अपनीय। उर्वीलुठितोत्थितम् उर्व्यां लुठितः उपावृत्तः स चासौ उत्थितश्च तं वाजिनम् तुरङ्गम् वाजिनस्तु महीपृष्ठे परावृत्ते. पुनः पुनः लुठितं स्यादुपावृत्तं वयमेतत् त्रिषु स्मृतम् ॥ इति प्रतापमार्तण्डः। फेनेन रक्तेन सह वर्तते इति सफेनरक्तम्। तदाननं यस्य तथोक्तं तं तुरङ्गं पयो जलं पाययामास। पिबतेर्ण्यन्ताल्लिट् ॥ १-६२ ॥

(प्रद्यो-१-६३) अथ उदकपानानन्तरम् अग्रे पुरतः राजसिंहे राजा सिंह इव राजसिंहस्तस्मिन् । उपमितं व्याघ्रादिभिरिति समासः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः इत्यमरः । गुणं रज्जुं गृह्णातीति तस्मिन् गुणग्राहिणि सति । गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु इति (वैजयन्ती) । राजश्रेष्ठत्वाद् गुणग्राहिणीति च । अर्वा वाजी । वाजिवाहार्वेत्यादिरमरः । दूर्वाकबलान् दूर्वाघासान् जघास भक्षयामास । घस्लृ अदने इत्यस्माल्लिट् । मन्दं शनैर्जिहानो गच्छन् । ओ हाङ गतावित्यस्मात् लटः शानजादेशः । भृञामित् (७-४-७६) इति अभ्यासस्य इकारः । मरुत् वायुः अस्य अश्वस्य अदभ्रं बहुलं बहु इत्यमरः । वनभ्रमेण वनसंचारेण यः स्वेदो घर्मजलं तम् आचचाम जहार । चमु अदने इत्यस्माल्लिट् ।। १-६३ ।।

(प्रद्यो-१-६४) **पिप्रायेति ।** तोयेन जलेन पितृप्रसूम्—पितृणा प्रसूः ताम् । (अत्र प्रकरणे) सायं सन्ध्याम् । सन्ध्या पितृप्रसूः इत्यमरः । श्रुतिप्रसू गायत्रीम् । . . . . तां पिप्राय प्रीणाति स्म । प्रीञ् प्रीणने इत्यस्माल्लिट् । श्रुतीनां प्रसूम् वेदमातरमित्यर्थः । त्रिपदाम्—त्रीणि पदानि पादाः यस्याः सा त्रिपदा । ताम् गायत्रीमित्यर्थः । जपित्वा । तमिस्रजाले—तमिस्राणां जालं समूहः यस्मिन् तस्मिन् तमसोपकूले रोधसि तमालमूले वृक्षविशेषमूले । कालस्कन्धस्तमालः स्यादित्यमरः । तुरगं बबन्ध । तमिस्रजाले तमसोपकूले तमालमूले इति बहूनामप्यधिकरणत्वमविरुद्धम्—ग्रामे [37]गृहे पीठे स्थित्वा भुङ्क्ते इतिवत् ।। १-६४ ।।

(प्रद्यो-१-६५) **गुल्मे इति ।** निशीथे निशायाम् गुल्मे कुञ्जे । अप्रकाण्डे स्तम्बगुल्मावित्यमरः । प्रवालैः शयनं कृत्वा तृणैर्वल्मीकरन्ध्राणि वल्मीकमुखानि पिधाय आच्छाद्य आततज्यम् आरोपितगुणं धनुरग्रे पुरतो निधाय जाग्रदेव जागरूकः सन्नेव । नाभ्यस्ताच्छतुरिति नुमभावः । न्यषदत् । षद्लृ विशरणगत्यवसादनेष्विति धातोः लृङ ।। १-६५ ।।

(प्रद्यो-१-६६) . . . . **तत इति ।** ततश्शयनानन्तरं कश्चित् तरुणो युवा तपस्वी । अस्मायामेधास्रजो विनिः (५-२-१२१) इति विनिः । जरतोः वृद्धयोः । वृद्धो जीर्णो जरन्नपीत्यमरः । पिपास्वोः पातुमिच्छ्वोः पित्रोः मातापित्रोः । मातापितरौ पितरावित्यमरः । पिता मात्रा (१-२-७०) इत्येकशेषः । उदन्यां पिपासाम् । अशनायोदन्याधनाया बुभुक्षापिपासागर्धेषु (७-४-३४) इति (क्यजन्तो निपातितः) । विनेतुं कामो यस्य सः विनेतुकामः । कलशं गृहीत्वा । रात्रेरर्धम् अर्धरात्रः । तस्मिन् निशीथे । रात्राह्नाहाः पुंसि (२-४-२९) इति पुंलिङ्गता । ता तमसाम् अगाढ ।

गाहू विलोडने इत्यस्माल्लुङ । ऊदित्वेन इटो विकल्पाद् इडभावपक्षे ढत्वे ष्टुत्वे च झलो झलि इति सलोपे ढो ढे लोप इति ढलोपे च कृते रूपमिदम् ।। १-६६ ।।

(प्रद्यो-१-६७) **अम्भोभिरिति** । अथ अनन्तरम् । कुम्भिनीशः क्षमापतिः । कुम्भिनी क्षमा इति अमरः । स दशरथः । शब्दवेधी—शब्दानुसारेण विध्यतीति शब्दवेधी—निर्मानुषे निर्जने नीवृति[38] देशे । नीवृज्जनपदे देशे इत्यमरः । अस्मिन् तपस्विनि मुनौ कुम्भम् अम्भोभिरुम्भति पूरयति सति । कुम्भिनो गजस्य । विषाणी द्विरदः कुम्भी इति प्रतापमार्ताण्डः । ध्वनि बृहितम् अमत अमस्त । मनु अवबोधने इत्यस्मात् लुङ । तनादिभ्यस्तथासोरिति विकल्पेन सिचो लुक् । अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः । तत्र देशे मर्माणि विध्यतीति मर्मावित् । न हि वृनीति दीर्घः । तम—बाणं ममोच । इन्द्रवज्रा वृत्तम ।। १-६७ ।।

(प्रद्यो-१-६८) **हा तात तातेति** । हठादकस्मात हा तात हा जनकेति । हा विषादशुगार्तिषु इति तातस्तु जनकः पिता इति चामरः । अमन्दम् उच्चैः आक्रन्दम् आक्रोशमाकर्ण्य विदीर्णचेताः विदीर्ण भिन्नं चेत यस्य स मक्तचापः त्यक्तधनुः ब्रह्म-हत्यां ब्राह्मणवधम् अभिशङ्कमानः उत्प्रेक्षमाणः मनसि अमीमासत जिज्ञासां चकार । मान पूजायाम् इत्यस्मात् मान् बधेत्यादिना (३-१-६) शन् प्रत्ययः अभ्यासदीर्घश्च । मानेर्जिज्ञासायाम् इति वार्त्तिकेन जिज्ञासार्थत्वम् (विचारार्थत्वम्) । सन्नन्तात् कर्तरि लङ ।। १-६८ ।।

(प्रद्यो-१-६९) विचारमेवाह—**हा कष्टमिति** । तृषा पिपासया आर्तम् अम्भः आदित्सुम् आदातुमिच्छुम् । सनाशसेत्युप्रत्ययः । कृत कुम्भस्य पूरः येन सः तथोक्तम् अमुम् तपस्विनम् अव्यात्सम् अविध्यम् । व्यध ताडने इत्यस्माल्लुङ । मम शब्दपाती शब्दानुसारेण पततीति शब्दपाती शरो बाण कचन किजातीयं वा पुरुषम् अवधीत् अहन् । हन्तेर्लुङ । लुङि च (२-४-४३) इति वधादेशः । शापेन तापेन च हा हतोऽस्मि । हा इत्यार्तौ ।। १-६९ ।।

(प्रद्यो-१-७०) **अम्बेति तातेति** । हे अम्ब हे तात हे मातः हे जनकेति विलालपीति पुनः पुनर्विलपति । विपूर्वाल्लपतेर्यङ्लुक् । कोकिलस्येव मञ्जुर्मनोज्ञो नादो यस्य सः एष को वा भवेदिति । मम बाणविद्धः मरिष्यन् । तृटः सद् वेति शतृप्रत्ययः । एष बालो मुहुर्बहुशः मुमूर्षुः शङ्कितमरणः पित्रोः स्मरति । मातापितरौ स्मरतीत्यर्थः । अधीगर्थदयेशां कर्मणि (२-३-५२) इति विशेषाविवक्षायां षष्ठी । स्म आध्याने इत्यस्माल्लट् ।। १-७० ।।

(प्रद्यो-१-७१) **जीवन्निति ।** विद्धो हतः स तपस्वी यावत् यावता जीवं जीवितं न जहाति न त्यजति । ओ हाक् त्यागे इत्यस्माल्लट् । क्रुद्धः सन् यावत् मह्यं न शपेत न शप्यात् । श्लाघह्नुङस्थाशपां ज्ञीप्स्यमानः (१-४-३४) इति सूत्रेण संप्रदानसंज्ञा । शप उपालम्भे इत्यस्माद् भौवादिकात् लिङ् । तावत् ततः पूर्वमेव एनं तपस्विनं गतः प्राप्तः तस्य पदोश्चरणयोः । पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः । पादः पद् इति पदादेशः । पतित्वा प्रणम्य कथंचित् कथमपि प्रसादयिष्यामि प्रसन्नं करिष्यामि । षद्लृ विशरणगत्यवसादनेषु इति धातोः लृट् (ण्यन्तात्) ।। १-७१ ।।

(प्रद्यो-१-७२) **केनापीति ।** द्रोढा । द्रोग्धा इति पाठान्तरम् । वा द्रुहमुहेत्यादि सूत्रेण (८-२-३३) विकल्पेन ढत्वम् । गोढा संवरिता । गुहू संवरणे इति धातुः । उभयत्रापि तृच् । अहं केनापि केनचिदपि पुरुषेण अदृष्टम् अज्ञातं कष्टं दुःखम् अस्य वधं कस्मैचिदपि (न वच्मि कथयामि ।) वचेर्लट् । तथापि पञ्चभूती—पञ्चानां भूतानां समाहारः । द्विगोरिति ङीप् । मां ब्रह्महणं । ब्रह्महनं विक्रोष्यति उद्घोषयिष्यति । हन्तेरत्पूर्वस्येति[39] णत्वम् । क्रुश आह्वाने इत्यस्माल्लृट् । देवाश्च मां ब्रह्महणं ब्रूयुः । भणेयुरिति भणतेर्लिङ् । तं भूतान्यभ्यक्रोशन् ब्रह्महन् इति [40]श्रुतेः ।। १-७२ ।।

(प्रद्यो-१-७३) **यद्येष इति ।** यद्येष जीविष्यति (तर्हि) दास्याचरणेन—दासस्य कर्म दास्यम् । तस्याचरणेन नम्रो राज्यं ददामि । ददातेर्लट् । म्रियेत चेत् मरणं प्राप्नुयाच्चेत् (तर्हि) । मृङ प्राणत्यागे इत्यस्माल्लिङ् । शरीरं शरीराभिमानं हित्वा स्वायुधेन कृत्तं छिन्नं शीर्षं शिरो येन स तथोक्तः तम् अनुम्रियेय अनुमरिष्यामि । स्वायुधकृत्तशीर्षं इति निर्वेदातिशयद्योतनार्थम् । उपसर्गवशात् सकर्मकत्वम् ।। १-७३ ।।

(प्रद्यो-१-७४) **विचारयन्निति ।** असमीक्ष्यकारी अविमृश्यकारी मनस्वी अभीतचित्तः इति पूर्वोक्तप्रकारेण विचारयन् निशीथकाले अर्धरात्रे कराले भयंकरे तमिस्रजाले तिमिरसमूहे तं तपस्विनमन्वेष्टुमनाः । तुम् काममनसोरपि इति तुमुनो मकारलोपः । तमसां नदी पद्भ्यां पदाभ्यामेव अयासीत् । यातेर्लुङ ।। १-७४ ।।

(प्रद्यो-१-७५) **दृष्ट्वेति ।** इष्वा पत्रिणा (बाणेन) । पत्री रांप इषुर्द्वयोः इत्यमरः । प्रोतं ग्रथितम् । घट एत्राधारो यस्य तद् घटाधारम् । जटाः अस्य सन्तीति जटालम् । प्राणिस्थादिति लच् (५-२-९६) । जटालं च तत् शीर्षं च—जटालशीर्षम् । घटाधारं जटाशीर्षं यस्य तं तथोक्तम् । रटन्तं विलपन्तम् । उर्व्यां लुठन्तम् परिवर्तमानम । तपस्विनं दृष्ट्वा कम्प्रो वेपमानः । नमिकम्पीत्यादिना (३-२-१६७) रप्रत्ययः ।

कथितमात्मवृत्तं येन स तथोक्तः। शनैरभिसंप्रोह्य अपृच्छत् पृष्टवान्। पृच्छतेर्लङ्। इन्द्रवज्रा वृत्तम् ॥ १-७५ ॥

(प्रद्यो-१-७६) प्रश्नमेवाह—**कस्त्वमिति**। हे तपस्विन् कलशाम्बुनो घटोदकस्य नेता त्वं कः। ते तव माता पिता वा सहजः सोदरो वा सखा वा बन्धुः कोऽस्ति। तम् इह अत्र आह्वयेयम्। ह्वयतेर्लिङ्। स्पर्धायामाङः (१-३-३१) इति (स्पर्धायामेव विहितम्) आत्मनेपदम्। तदभावाद् इह परस्मैपदम्। त्वाम् अमीभिर्मात्रादिभिः कथमपि कथंचित् जीवयेयम् जीवयिष्यामि। जीव प्राणधारणे इत्यस्मात् लिङ्। इन्द्रवज्रा वृत्तम् ॥ १-७६ ॥

(प्रद्यो-१-७७) [41]**पापर्द्धीति**। मृगया आखेटः। पापर्द्धिनाम्नी—पापानाम् ऋद्धिः समृद्धिः यस्याः सा। पापर्द्धिरिति नाम यस्याः सा पापर्द्धिनाम्नी इति सत्यम् यथार्थम्। अन उपधालोपिनोऽन्यतरस्याम् (४-१-२८) इति ङीप्। यद् यस्मात् कारणात् जालमस्य असमीक्ष्यकारिणः मे मम यत् पातकं पापम् आगतं प्राप्तम् लोकविगर्हितेन लोकनिन्दितेन अनेन अस्मद्दुष्कर्मणा कथं नु कथं वा। एनसो भावः एनस्त्वम्। तत् न भवतीति अनेनस्त्वम्। इयां प्राप्नुयाम् अहम् इति। इणो लिङ्॥ १-७७ ॥

(प्रद्यो-१-७८) **रघोरिति**। रघोः कुले पङ्क्तिरथ इति आख्या नाम यस्य स पङ्क्तिरथाख्यः एकः कश्चन मुनिं तपस्विनं जघानेति अवधीदिति मे अपकीर्तिरपयशो जीवलोके मनुष्यलोके चिराय बहुकालम्। विभक्तिप्रतिरूपकाव्ययम्। वर्त्स्यति वर्तिष्यते। वृतेर्लृट्। अहहेति खेदे। अहहेत्यद्भुते खेदे इत्यमरः। पापिनः पापात्मनः श्रीः संपत् कथं नु वा कथं वेत्यर्थः। वर्त्स्यति वर्तिष्यते। वृतेर्लृट्। वृद्भ्यः स्यसनोः (१-३-९२) इत्यभयत्रापि परस्मैपदम्। इन्द्रवज्रा वृत्तम् ॥ १-७८ ॥

(प्रद्यो-१-७९) **विप्रोऽसीति**। विप्रोऽसि किम् ब्राह्मणः किम्। किमिति प्रश्ने। इह अस्मिन् विषये क्षिप्रं शीघ्रमभिधेहि ब्रूहि। अभिपूर्वाद्दधातेर्लोट्। तव प्राणमोक्षः मरणं मास्तु न भवतु। एतत् पापम् अज्ञानतः अकामतः अकार्षम्। करोतेर्लुङ्। मे मम किं करोषि। अपराधिनं प्रति किं चिकीर्षसीत्यर्थः। तव किं करोमि। अभिलषितमित्यर्थः ॥ १-७९ ॥

(प्रद्यो-१-८०) तपस्वी राजानं प्रत्याह—**सोऽब्रूतेति**। स तपस्वी इति एवम् अब्रूत अवोचत्। ब्रूतेर्लङ्। किमिति। ब्राह्मणात् जातिः जन्म यस्य स तथोक्तः। जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः इति विश्वः। नास्मि न भवामि। मां

वैश्यतपस्विसूनुं जानीहि। (तथा च) रामायणे—ब्रह्महत्याकृतं पापं हृदयादपनीयताम्। न द्विजातिरहं राजन् मा भूत्ते मनसो व्यथा ।। शूद्रायामस्मि वैश्येन जातो नरवराधिप ।। इति (रामायणे अयोध्या—६३-४९-५०)। जानीहीति जानातेर्लोट्। मम पितरौ मातापितरौ अन्धौ नेत्रविकलौ—अनाथौ गत्यन्तरशून्यौ तरुलम्बितायां वृक्षलम्बमानायां स्कन्धाटिकायां स्तः विद्येते। स्कन्धाटिका नाम क्षीरादिवहनसाधनभूतः कोटिद्वयावलम्बितस्कन्धोपवाह्यो यष्टिविशेषः—वीवधिकेत्युच्यते। तस्यां स्तः इत्यर्थः ।। १-८० ।।

(प्रद्यो-१-८१) **वृद्धाविति**। वीवधिकारूढौ। विवधो वीवधो भारः इति हलायुधः। उभौ वृद्धौ वत काशी वाराणसीं तीर्थविशेषं नयन् प्रापयन् इह देशं कर्मवशाद् दैववशाद् आगां प्राप्नुवम्। मयि परासौ—परागताः असवः यस्य सः। तस्मिन्। पञ्चत्वं गत इत्यर्थः। परासुप्राप्तपञ्चत्वेत्यादिरमरः। काननान्ते वनमध्ये पिपासू पा—तुमिच्छू पितरौ असून् प्राणान् कथं वा पुरा धत्तः धरिष्यतः इत्यर्थः। यावत् पुरानिपातयोर्लट् (३-३-४) इति पुराशब्दयोगे भविष्यदर्थे लट् ।। १-८१ ।।

(प्रद्यो-१-८२) **तावेकत इति**। एकत इति [42]सार्वविभक्तिकस्तसिः। तौ पितरौ स्तः तिष्ठतः। अहम् एकतः अन्यत्र हतः। एके मुख्यान्यकेवलाः इत्यमरः। विधिर्दैवं बलीयान् बलवत्तरः। द्विवचनविभज्येत्यादिना (५-३-५७) बलवच्छब्दाद् ईयसुनि विन्मतोर्लुक् (५-३-६५) इति मतुपो लुक्। त्वं किं विदधासि किं करोषि। जात्यन्धयोः जातिर्जननं तयैवान्धयोः दृष्टिविहीनयोः अन्तिकं समीपं मदीयं कायं देहम्—कायो देहः क्लीबपुंसोरित्यमरः—कलशेन घटेन तोयं जलं च आशु शीघ्रं नेयं प्रापणीयम् ।। १-८२ ।।

(प्रद्यो-१-८३) **यावत्तृषार्ताविति**। हे पार्थिव तृषार्तौ तृषा पिपासया आर्तौ बाधितौ तौ पितरौ यावन्न मरिष्यतः न प्राणान् त्यजतः—मृङ् प्राणत्यागे इत्यस्मात् लृट्—तावता कालेन पयः जलं पाययेथाः पायय। पिबतेर्ण्यन्तात् लिङ्। न पादमीत्यादिना। (१-३-८९) परस्मैपदप्रतिषेधात् कर्त्रभिप्राये आत्मनेपदम्। जरतोर्वृद्धयोः। वृद्धो जीनो जीर्णो जरन्नपीत्यमरः। जीर्यतेरतृन् (३-२-१०४) इति अतृन् प्रत्ययः। जलं नेतुमिच्छुः निनीषुः सन् (अहं) हतः प्रहतः। तथाहि नलिनासनाज्ञा नलिनासनस्य ब्रह्मणः आज्ञा शासनं न लङ्घनीया नातिक्रमणीया ।। १-८३ ।।

(प्रद्यो-१-८४) **मदेकपुत्राविति**। हे नृपाल नृपते कृपालयः करुणानिधिस्त्वम्। मदेकपुत्रौ अहमेव एकः पुत्रः ययोस्तौ। मदेकमित्रौ—अहमेकः सुहृद् ययोस्तौ। तथा

मदेकयष्टी मन्मात्रावलम्बिनौ। कि च मदेकदृष्टी——तयोश्चक्षुरप्यहमेवेत्यर्थः। तथा मदेकलोकौ——मां विना अयमपि लोकः परलोक एवेति भावः। मदुपात्तशोकौ——मया निमित्तेन उपात्तशोकौ मद्वशात् प्राप्तदुःखौ तौ पितरौ अनाथाविति भाव.। पालय पाहि। पालयतेर्लोट्॥ उपेन्द्रवज्रा वृत्तम्॥ १-८४॥

(प्रद्यो-१-८५) **न ब्रह्महेति**। हे नरनाथ दिष्ट्या ब्रह्महा नाभूः। तव स एव लाभ इति। तस्मात् त्वं मा भैषीः। हे धात्रीश धरणीश धात्रा ब्रह्मणा मम ललाटे लिखितं तदेतत् को वा मार्ष्टु परिमार्ष्टुम् ईष्टे शक्नोति। ईश ऐश्वर्ये इत्यस्माल्लट्॥ १-८५॥

(प्रद्यो-१-८६) **तद्याहीति**। तद् तस्मात् कारणात् याहि गच्छ। ताभ्यां पितृभ्यां सहैव मच्छरीरम् इह नद्यां तमसायाम् अनलमात् विधाय कृत्वा नः त्रयाणां कृतं बन्धुकृत्यं पुत्रकृत्यं येन स तथोक्तः सन् त्वं क्वचित् क्वचिदपि कुत्रापि अप्रमत्तः प्रमादरहितः सन्——प्रमादोऽनवधानतेत्यमरः——राज्यं कुरुष्व॥ १-८६॥

(प्रद्यो-१-८७) **इतीति**। इति पूर्वोक्तप्रकारेण ब्रुवन् वेदनया दुःखेन अभिभूतः तिरस्कृतः सन् अन्तःकरणे भूतेशं गिरिशम्——भूतेश. खण्डपरशुर्गिरीशो गिरिशो मृडः इत्यमरः——निधाय साश्रुनेत्रे साश्रुणी सबाष्पे नेत्रे यस्य तस्मिन् नरेश्वरे पश्यति सति . . . . नमः शिवायेति . . . . जपन् ममार॥ १-८७॥

(प्रद्यो-१-८८) **मृतमिति**। (मातृकायाम् अत्यन्तमस्फुटोऽयं भागः) देशाधिपः मुनेः पुत्रम् अंसे स्कन्धे गृहीत्वा निधाय घटेन नद्याः . . . . . इदं नादेयं तोयं जलम् आदाय तदादिष्टतम्प्रदेशं भयेन व्याकुलः सन् शनैर्मन्दं प्राप। आप्नोतेर्लिट्॥ १-८८॥

(प्रद्यो-१-८९) **पादध्वनिमिति**। (इहाप्यस्फुटो भागः) . . . . . (सहजानिः) . जम्बूलतालम्बितवीवधस्थः——जम्बूलताया। लम्बमाने वीवधे निष्टतीति तथोक्तः। वीवधो विवध इति हलायुधः। अन्धः नेत्रविकलः वृद्धस्तस्य राज्ञः पादध्वनि निशम्य श्रुत्वा आत्मजं पुत्रं मत्वा गद्गदमन्नकण्ठः—— . . . हीनः कण्ठस्वरो यस्य स तथोक्तः राजानं दशरथम् ऊचे उवाच। ब्रुवो लिट्॥ १-८९॥

(प्रद्यो-१-९०) तदुक्तमाह——**किमिति**। कि तात कि पुत्र। कि प्रश्ने वितर्के च। संतापेन विशुष्कौ विशेषेण शुष्कौ कण्ठौ ययोस्तौ। त्वदागमाय उत्कण्ठमानौ उत्सुकमानसौ त्वम् एकः जीवः आत्मा ययोस्तौ तथोक्तौ आवाम् अधिदावम्——

विभक्त्यर्थेऽव्ययीभावः—वने च वनवह्नौ च दवो दाव इवेष्यते इति शाश्वतः। विहाय त्यक्त्वा यातोऽसि गतोऽसि। चिराय नागाः नागतोऽसि। इणो गा लुङि इति गादेशः ॥ १-९० ॥

(प्रद्यो-१-९१) **तमालेति**। इह वने तमालवत् तापिञ्छवत् नीलानि श्यामानि। कालस्कन्धस्तमालः स्यात्तापिञ्छोऽपीत्यमरः। तमांसि तिमिराणि जात्यन्धयोः जन्मनैवान्धयोरपि नौ आवयोश्चित्तं मनः भीषयन्ते उद्वेजयन्ति। जि भी भये इत्यस्माद् हेतुमण्णिच्। लट्। भीस्म्योर्हेतुभये (१-३-६८) इत्यात्मनेपदम्। भियो हेतुभये षुक् (७-३-४०) इति षुक्। झिल्ल्यः पक्षिविशेषाः। भृङ्गारी झीरुका चीरी झिल्लिका च समा इमाः इत्यमरः। सृगाल्यः वञ्चकाः। सृगालवञ्चकक्रोष्टु (फेरुफेरवजम्बुकाः) इत्यमरः। जातेरस्त्रीविषयादयोपधाद् (४-१-६३) इति ङीष्। घोरैर्भयंकरैर्विरावैः ध्वनिभिः करणैः धैर्यं धाष्ट्र्यं विगाल्य भ्रंशयित्वा भाययन्ति त्रासयन्ति। जि भी भये इत्यस्माल्लट्। पूर्ववत् णिचि वृद्धावायादेशे शेषात् कर्तरि परस्मैपदम् (१-३-७८) इति परस्मैपदम्। अत्र भीस्म्योर्हेतुभये इत्यात्मनेपदं न भवति। करणादत्र भयं न हेतुसंज्ञकात् प्रयोजकादिति ॥ १-९१ ॥

(प्रद्यो-१-९२) **व्याघ्राश्चेति**। अरण्ये व्याघ्राश्च सिंहाश्च वसन्ति तिष्ठन्ति। स्रवन्तीषु निम्नगासु। स्रवन्ती निम्नगापगा इत्यमरः। निशि रात्रौ भूताश्च देवयोनयः। भूतोऽमी देवयोनयः इत्यमरः। चरन्ति विचरन्ति। हे पुत्र त्वं बाल एकः हिंस्राश्च बहवः। नमिकम्पीत्यादिना रप्रत्ययः। पुण्यैः भाग्यैः। अस्माकमिति शेषः। पुनः भूयः समागतोऽसि आगतोऽसि ॥ १-९२ ॥

(प्रद्यो-१-९३) **आनीतमिति**। अम्भो जलम् आनीतम् आहृतं यदि। कीदृशं तत्। कुम्भपूर्णम्—कुम्भेन कलशेन पूर्णम् इहारण्ये तृषा पिपासया आर्तौ तूर्णं शीघ्रं पाययस्व। पिबतेर्ण्यन्तात् लोट्। हे तात अनुकम्प्य आप्रातराशः आङ् ईषदर्थे। प्रातः प्रातःकाले एव आशः अशनं यस्य स तथोक्तः अत एव क्षुधितोऽसि बुभुक्षितोऽसि। आ प्रातराशक्षुधित इत्येकपदपक्षे—प्रातराशं प्रातर्भोजनमारभ्य क्षुधितः आप्रातराशक्षुधितः। भक्तोऽसि भक्तिमान् अत एव अनुरक्तः स्निग्धोऽसि स्थिरायुः चिरायुः भव। इन्द्रवज्रा वृत्तम् ॥ १-९३ ॥

(प्रद्यो-१-९४) **इति ब्रुवतीति**। सकम्पे सवेपे। सकम्पेत्यत्र तेन सहेति तुल्ययोगे (२-२-२८) इति बहुव्रीहिः। सकम्पे मुनौ इति एवं ब्रुवति सति जातानुकम्पः उत्पन्नदयः नृपतिर्दशरथः जगाद। किमिति। अहं ते न सुतः—पुत्रो न। किं

तु मां सुतस्य हिंसितारं हन्तारम् (जानीहि)। तृजकाभ्यां कर्तरि चेति तृचा षष्ठी-समासनिषेधात् अत्र तृना सामासः। न लोकाव्ययनिष्ठाखलर्थतृनाम् (२-३-६९) इत्यत्र सानुबन्धस्य तृनो ग्रहणेन क्वचित् तृन्योगेऽपि षष्ठीप्रयोगस्याङ्गीकृतत्वात्। तथा(च)न्यासकारैरुक्तम्—अथ [43]किमर्थं तृचः सानुबन्धकस्योच्चारणम्। तृनो निवृत्त्यर्थम् (इति चेद्) नैतदस्ति। तद्योगे न लोकाव्ययेत्यादिना षष्ठीप्रतिषेधात्। एवं तर्हि एतद् ज्ञापयति तद्योगे (तृन्योगे—अपि) क्वचित् (षष्ठी) भवतीति। तेन [44]भीष्मः कुरूणां भयशोकहर्ता इत्यादि सिद्धं भवति। अजात्मजं दशरथं (मां) राजानं जानीहि अवगच्छ। (जानातेः) लोट्॥ १-९४॥

(प्रद्यो-१-९५) **अस्मिन्निदाघे इति।** अस्मिन् निदाघे ग्रीष्मे मृगयायाम् आखेटे अनुरक्तः आसक्तः मृगान् वेद्धुमिच्छुः विवित्सुः। विध्यतेः सन्नन्ताद् उप्रत्ययः। सरिति तमसानद्याम् अवात्सम् अतिष्ठम्। वस निवासे इत्यस्मात् लुङ्। अमोघः अवन्ध्यः बाणो यस्य स अमोघबाणः अहम् अम्भो जलम् उम्भन्तं पूरयन्तं तव सूनुं वनकुम्भिबुद्ध्या वनगजधिया अव्यात्सम् अविध्यम्। व्यध ताडने इत्यस्मात् लुङ्॥ १-९५॥

(प्रद्यो-१-९६) **सुत इति।** अयं ते तव पुत्रः परासुः मृतः पुरतः अग्रतः आस्ते तिष्ठति। पातुमिच्छुः पिपासुः। सह द्वितीयया पत्न्या सह वर्तते इति सद्वितीयः। पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी इत्यमरः। अम्भः जलं पिब। ननु पुत्रे मृते कथं पिबामीत्यत्राह—वां युवयोः अहं सुतः। युवां भवन्तौ मे पितरौ मातापितरौ। स च पुत्रः दिवं स्वर्गं यायात्। यातेर्लिङ्। युवयोः भवतोः भवत्संबन्धिनी इयं भूः। न ममेति भावः। उपेन्द्रवज्रा वृत्तम्॥ १-९६॥

(प्रद्यो-१-९७) **विषीदतं मेति।** मा विषीदतं मा शोचतम्। अस्य शिशोः विधिः दैवम् ईदृक् ईदृशः। विधिर्विधाने दैवेऽपीत्यमरः। मापराधे मयि प्रसीदतम् प्रसन्नौ भवतम्। उभयत्र सीदतेर्लोट्। अयोध्यायाम् अध्ययोध्यम्। विभक्त्यर्थेऽव्ययीभावः। सिंहासनं नृपासनम्। राजतं त्वासनं राज्ञां भद्रासनमिति स्मृतम्। सिंहासनं नरेन्द्राणां तदेव स्वर्णनिर्मितम्॥ इति प्रतापमार्तण्डः। अध्यूह्य अधिष्ठाय। वगतेर्ल्यपि संप्रसारणम्। भुवं भुङ्क्तं पालयतम्। शुचि शोके। मन्युशोकौ तु शुक् स्त्रियामित्यमरः। मा माङ्क्तम् मा स्म मज्जतम्। टु मस्जो शद्धावित्यस्मात् लङ्। झलो झलीति सिचो लोपे अनुस्वारे परसवर्णे च कृते रूपम्। हन्तेति खेदे॥ १-९७॥

(प्रद्यो-१-९८) **श्रुत्वेति** । सदारः सकलत्रः स वृद्धः निर्घातनिभम् निर्घातेन अशनिना सदृशं निर्घातनिभम । नित्यसमासत्वादस्वपदः । इति एवं तद्वचः श्रुत्वा पर्यस्तदेहः पतितः विलापं परिदेवनं विदधत् कुर्वन् विक्रुश्य आक्रुश्य शापं दातुमिच्छुः दित्सुः भूपं निजगाद उवाच । इन्द्रवज्रा वृत्तम् ।। १-९८ ।।

(प्रद्यो-१-९९) **न त्वामिति** । हे राजन् अर्कवंश्यं सूर्यवंशप्रभवम् तत्रापि ऐक्ष्वाकम् इक्ष्वाकुगोत्रापत्यं पुमान् ऐक्ष्वाकस्तम्——(दाण्डिनायनेतिसूत्रे ६-४-१७९) निपातनात् साधुः । आयोध्यकम् अयोध्यापतिम् त्वां भस्म भवेति न शपे न शपामि । शप आक्रोशे इत्यस्मात् लट् । त्वामित्यत्र ज्ञीप्स्यमानत्वाभावात् श्लाघह्नुङ् इत्यादिना (१-४-३४) न संप्रदानत्वम् । रघुवंशस्य तन्तुम् आलम्बनं निहन्तु नेहे नेच्छामि । ईह चेष्टायाम् इत्यस्मात् लट् । सुतघातमन्तुम् सुतस्य घातो हननं स एव मन्तुः अपराधः तम् । आगोऽपराधो मन्तुरित्यमरः । अनुमन्तुम् अङ्गीकर्तुं न सहे न मृष्ये । इन्द्रवज्रा वृत्तम् ।। १-९९ ।।

(प्रद्यो-१-१००) **जहीहीति** । अहं यथा अहमिव जरठो वृद्धः उदश्रुः निर्यद्बाष्पः हा पुत्र पुत्रेति एवं——हा इति विषादे——रुदन् मञ्चस्थितः खट्वास्थित एव देहं जहीहि । ओ हाक् त्यागे इत्यस्मात् लोट् । शोकसिन्धौ दुःखाब्धौ मज्जध्वमि मज्जनं प्राप्स्यसि । टु मस्जो शुद्धावित्यस्मात् लृट् । मस्जिनशोर्झलि (७-१-६०) इति नुम् । तदा मरणसमये कोऽपि कश्चन पुत्रो न संनिदध्यात् । समीपे न तिष्ठेत् । दधातेर्लिङ् ।। १-१०० ।।

(प्रद्यो-१-१०१) **पुत्रे इति** । पुण्यनिधौ भाग्यनिधौ अमुष्मिन् पुत्रे मृते मरणं गते सति कथं नु आवां राज्यं कुर्वीवहि । करोतेर्लिङ् । तर्हि किं कुर्वे——तत्राह——त्वम् अनेनसा न विद्यते एनः पापं यस्य तेन अनेनसा निष्पापेन पुत्रेण साकम् सह । साकं सत्रा समं सहेत्यमरः । आवां नौ वह्नौ अग्नौ अह्नाय सपदि । अह्नाय सपदि द्रुते इत्यमरः । हविषी आहुती विदध्याः । विपूर्वाद्दधातेर्लिङ् ।। १-१०१ ।।

(प्रद्यो-१-१०२) **भस्मत्वमिति** । एतादृशि पुत्रे भस्मत्वं याति गतवति सति न विद्यते पुत्रो ययोस्तौ अपुत्रौ । तयोः नौ आवयोः पुत्रत्वं भजस्व प्राप्नुहि । तथा स्मृतिः——पुत्राभावे स्त्रियः कुर्युः स्वभर्तृणाममन्त्रकम् । तदभावे च नृपतिः कारयेत द्विजन्मना । सजातीयैः सतीः . . . . सकलाः क्रियाः ।। सर्वेषामपि वर्णानां बान्धवो नृपतिः । इति । हे राजन् मम पुण्यलोकप्राप्तये पिण्डोदकानि तिलोदकपिण्डादीनि न मा निवाप्सीः न मा दद्याः । किं तु दद्यादेव इति भावः ।। १-१०२ ।।

(प्रद्यो-१-१०३) **अन्धेनेति** । राजा दशरथः अन्धेन नेत्रविकलेन तथोक्तः सन् चित्यै चितायै काष्ठानि दारूणि स्कन्धेनावचित्य चिति कृत्वा तयोः पुत्रमनले अध्यनलम्। विभक्त्यर्थेऽव्ययीभावः । न्यधत्त निक्षिप्तवान् । निपूर्वाद्दधातेर्लङ् । तावन्धवृद्धौ तत्रैव चित्यां पेततुः । पततेर्लिट् ।। १-१०३ ।।

(प्रद्यो-१-१०४) **त्रिष्विति** । त्रिषु जननीजनकपुत्रेषु अग्निना दग्धापघनेषु दग्धाङ्गेषु । अङ्गं प्रतीकोऽवयवोऽपघनः इत्यमरः । अपघनोऽङ्गम् (३-३-८१) इति निपातितः । दिव्यं विमानमारुह्य दिवं स्वर्गं गतेषु सत्सु स दशरथः——पुत्राः अस्य सन्तीति पुत्रवान् । तस्य भावः पुत्रवत्त्वम् । तेन पुत्रवत्त्वेन मुहुर्ननन्द । नन्दतेर्लिट् । पुत्रविषयेण शोकेन मृतिं न निनिन्द न जगर्ह । निदि कुत्सायाम् इत्यस्माल्लिट् । . . . . . उपजातयः ।। १-१०४ ।।

(प्रद्यो-१-१०५) **हत्वेति** । स दशरथः इत्थमनेन प्रकारेण निजचरितं विनिन्दन् प्रगे प्रातः काले सेनाभिः चमूभिः मिलित्वा संगत्य । पुत्रोऽस्यास्तीति पुत्री । तस्य भावः पुत्रित्वं पुरा भवति भविष्यति । यावत्पुरानिपातयोर्लट् (३-३-४) इति पुराशब्दस्य योगे भविष्यदर्थे लट् । सप्रमोदः सहर्षः सुकेतुमालम् शोभनाः केतुमालाः ध्वजपङ्क्तयो यत्र तत् तथोक्तं साकेतम् अयोध्याम्——साकेतं स्यादयोध्यायां कोसलानन्दिनीति च—— इति यादवः । अगादयासीत् । इणो गा लुङि (२-४-४५) । [15]प्रहर्षिणी वृत्तम् ।। १-१०५ ।।

श्रीमन्मायिमहासुधीतनुभुव[46] श्रीचौण्डिसूरेः कृता-
वज्ञानां हृदयान्धकारदलनात् प्रद्योतनीनामनि ।
भूमौ [47]भाःस्वदुदारराघवमहाकाव्यस्य नित्योल्लसद्-
व्याख्याने विदुषां मनोहरतमः [48](सर्गोऽयमादिर्गतः) ।।

[49]इति उदारराघवे महाकाव्ये प्रथमस्य सर्गस्य समाप्ता
इयं प्रद्योतनी टीका।

NOTES TO PRADYOTANĪ—Canto I

[1] Before the first verse *Vāgīśvarīm* etc. of the Commentary, there is a sentence of customary salutation as *śrīhayagrīvāya namaḥ*, which was probably given by the scribe, who might have been a devotee of Hayagrīva, an incarnation of Viṣṇu.

[2] MS. 2 reads four syllables in the second foot as: *canaśālya*, with a gap following. Perhaps the scribe could not make out the reading clearly. It might be *varaśālinā*, as is mentioned in the colophon about the author as: *sukhasvapnākalitaraghunāthadattavaraprasāda*--etc. This is only my guess.

[3] MS. 2 seems to read: *pūrvam ādyākhyabhāvena vāntiam*, which does not make out any clear sense. What is given in the text is only my guess. It would mean that the author Cauṇḍipaṇḍita first (i.e. previously) taught the *Udārarāghava* to his students, and subsequently at the request of his students and others perhaps he composed the Commentary.

[4] Expressions or syllables or letters shown within brackets are surmised by the editor (me).

[5] MS. 2 looks like: *na jānānām samālikham*. It may be what is given in the text.

[6] MS. 2 reads: *vastunirdeśah astīti*. Because of the expression *cikīrsuh* some suitable form like *vastu nirdiśatī* or *vastunirdeśaṃ karoti* is necessary.

[7] See the *Nārāyanopanisat* (*Taittirīvāranyaka*) 10. 11. 5.

[8] MS. 2 reads: *niyamasthābhir upāsyatvena* etc.

[9] MS. 2 reads: *atha* instead of *anḍam*.

[10] MS. 2 reads: *udajyo*, which is obviously a mistake of the scribe.

[11] *Manusmṛti* has the following:

aham prajāḥ sisṛksus tu tapas taptvā suduścaram,
patīn prajānām asṛjam maharsīn ādito daśa (I. 34)
marīcim atrvaṅgirasau pulastyaṃ pulahaṃ kratum,
pracetasaṃ vasiṣṭhaṃ ca bhṛguṃ nāradam eva ca. (I· 35)

[12] MS. 2 reads: *daśasā*. *Yaśasā* is only my guess.

[13] Amarakośa has the reading in the feminine gender as: *naptrī pautrī sutātmajā*. Perhaps the Commentator found the masculine reading.

[14] MS. 2 has a wrong reading.

[15] See the S. K. (*Siddhāntakaumudī*) at the end of the *Avyayaprakarana*.

[16] Like MS. 1, MS. 2 also reads: *svatejasā*.

[17] I have no access to any information about *Pratāpamārtāṇḍa*.

[18] MS. 2 has a wrong reading.

[19] MS. 2 reads *pūtudravo* etc. and *pautudravāḥ*.

[20] MS. 2 reads—*dāra* for—*dāla* of others.

[21] This seems to be in the mind of the author of the *Śiśubodhinī*. See Note 23 to the *Śiśubodhinī*.

[22] See the *Bhāgavata* 9. 9. 1 and 2. Some other sources in Sanskrit leave out Dilīpa and mention Bhagīratha as the son of Aṃśumān. This is how the *Śiśubodhinī* also notes. See Note 28 to the *Śiśubodhinī*. For further information, see the *Purāṇic Encyclopaedia* by Vettam Maṇi, Reprinted in 1979 by Motilal Banarsidass, DELHI.

[23] See Note 32 to the *Śiśubodhinī*. Bhaṭṭoji notes *vyavasthitavibhāṣā* in the rule: *nahivṛti*—etc. (5. 3. 116) and states: *gatikārakayor eva dīrghaḥ*. Cauṇḍi-sūri is trying to justify the use of *nivṛt* in a similar manner. Bhaṭṭamalla, our author, himself uses also *nīvṛt* (with long "*ī*") in I. 67. See Note 38.

[24] The *Śiśubodhinī* quotes from *Pratāpamārtāṇḍa* here, and it has a different reading. I have no means of verifying the sources.

[25] See Vāmana's K. A. S. V.—V. 2. 57 (*Dhanvīti vrīhyādipāṭhāt*) and the commentary the *Kāmadhenu* thereon.

[26] Though the optionality is noted in the *Kāśikā*, the order of the expressions as *pakṣe ṭhak*, as found in the *Pradyotanī*, is also found in the *Siddhāntakaumudī* too. It is not clear whether Cauṇḍi-paṇḍita is using the expression from the SK.

[27] See Note 34 to the *Śiśubodhinī*.

[8] MS. 2 seems to read Viśvaḥ. Perhaps mistake of the scribe, due to some confusion.

[29] It is an intelligent interpretation.

[30] The portion in the MS. is defective here. It is not clear what is meant by the expression: *asāmpradāyika* (of *asāmpradāyikavaṃśasthatvāt*). Kṣemendra in his *Suvṛttatilaka* has this:

> *asamastapadaiḥ pādasandhivicchedasundaram,*
> *sarvapādair visargāntair vaṃśastham yāty anarghatām.* (II. 17)

Non-conformity with the requirement noted as *sarvapādair visargāntaiḥ*, i.e. all *pādas* (of the verse) should have words ending in *visarga* (and it contributes to the great value of the *Vaṃśastha* metre)—this non-conformity is perhaps intended by the reference as *asāmpradāyika* (unconventional). The *sampradāya* was a general one, and verses of contrary type are not uncommon, as noted by Ksemendra himself.

[31] This probably has a reference to Daṇḍin's line: *sarvatra bhinnavṛttāntam* (*Kāvyādarśa;* I. 19), because a different metre is permitted by convention generally only at the end of a Canto, and not in the middle.

[32] Perhaps the author has in mind the *nyāya*: *upapadavibhatkeḥ kārakavibhaktir balīyasī*. But, Bhaṭṭoji in his *Śabdakaustubha* (under I. 4. 37) has this:

yo'smān dveṣṭi and *auṣadhaṃ dveṣṭīti*. This probably indicates that either Cauṇḍi-sūri was earlier than Bhaṭṭoji, or was unaware of the comments found in the *Śabdakaustubha* regarding the correctness of the *dvitīyā-vibhakti*, without having recourse to the *apavādatva*, too. Also see Note 26.

[33] Bhaṭṭoji (and others too) mentions it as *bukka bhaṣaṇe*, and *bhaṣaṇaṃ śvaravaḥ*. Cauṇḍi-sūri's noting as *śva-śabda* may be his own choosing to make the meaning without subsequent comments/ Or it may be that he was earlier than Bhaṭṭoji. But, we have no positive evidence to prove the chronology. However, Bhaṭṭamalla (or Śākalyamalla, the author of the *Udārarāghava*. notes in his *Ākhyātacandrikā* as *bukkatīti śunāṃ dhvanau*.

[34] The MS. 2 here reads as: *anteh ka*—and then has some blank space. This shows that the scribe of this MS. copied the Commentary from some other MS. and that the writing being illegible, he simply left the blank space. It is possible that even that manuscript might have been a copy of some other MS.

[35] The scribe is not able to make out while copying the portion here. He leaves out a blank space after *vacanā* . . . . From the context it is clear that the reference is to the following:

> *nīvahyor harateś cāpi, gatyarthānāṃ tathaiva ca,*
> *dvikarmakeṣu grahaṇaṃ kartavyam iti niścayaḥ.*
> (*Mahābhāṣya* on I. 4. 51)

[36] See the portion on "Some New Usages" in the Introduction.

[37] It is a very nice and correct interpretation. It shows that Cauṇḍi-sūri is a careful and a dependable commentator.

[38] See Note 23.

[39] Bhaṭṭoji splits the rule (*yogavibhāga*) into two as: *Hanteḥ* and *Atpūrvasya*. He treats the second as a *Niyama* (Restrictive) rule. According to Bhaṭṭoji, in the expressions: *vṛtrahaṇam* and *brahmahaṇam* the cerebral "*ṇa*" is by the rule *Ekājuttarapade naḥ* (8. 4. 12). See SK under the rule: *Sau ca* (6. 4. 13). Cauṇḍi-sūri was perhaps earlier than Bhaṭṭoji, and so he did not know the interpretation noted by Bhaṭṭoji.

[40] *śruti* not traced.

[41] In the Bombay edn. *pāparddhi* etc. appears as the second half According to Cauṇḍi-sūri this is first half.

[42] See "*Itarābhyo'pi dṛśyante*" (5. 3. 14) and the Commentaries thereon.

[43] See the *Nyāsa* on 2.2.16.

[44] See pp. 20-21 of the *Sāhityakaṇṭakoddhāra* (my edn., Delhi-1980; by Motilal Banarsidass), and the notes theron. Cauṇḍi-sūri is not mentioning Bhaṭṭojis reference to, and comments on, the usage: *tribhuvanavidhātuh*. See the SK under "*Tṛjakābhyāṃ kartari*" (2. 2. 15). Cauṇḍi was perhaps earlier than, or was not aware of Bhaṭṭoji's works.

[45] *Mnau jrau gas tridaśayatiḥ praharṣiṇīyam* is the definition.

[16] MSS read *tanubhavaḥ*. MS. 2 has many gaps here.

[17] MS. 2 is defective here. It seems to read:—*bhūmau ṭīkās sadudāra*— etc.

[48] MS. 2 gives this verse like an unmetrical line and closes it as "*manohari atamaḥ prathamaḥ sargaḥ*". Mysore Ms. is illegibile here.

[49] This line is supplied by the editor. In the Mysore MS. at the end the following experessions of the scribe are found: . . . *śrī nṛsiṃhārpanam astu. śrrāmāya namo namaḥ.*

उदारराघवे महाकाव्ये द्वितीयसर्गस्य व्याख्या प्रद्योतनी

(प्रद्यो-२-१) **पृथ्वीश** इति । मुनिसुतघातखिन्नचेताः——मुनिसुतस्य [1]वैश्यतपस्विसूनोः घातेन हननेन खिन्नं दुःखितं चेतो मनो यस्य स तथोक्तः । पृथ्वीशो भूपतिः दशरथस्तामयोध्यां पुरमधिगम्य शुद्धान्ते अन्तः पुरे——भूभुजामन्तःपुरम् . . . . . शुद्धान्तश्चावरोधश्चेत्यमरः——सन्तानं सन्तर्ति चिराय बहुकालं समभिलषन् आकांक्षन् अत एव चिन्तावान् अत एव जीर्णदेहः सन् कमपि——भूयांसमिति यावत्——कालं निनाय गमयामास । नयतेर्लिट् ।। २-१ ।।

(प्रद्यो-२-२) **कालज्ञ इति ।** कमलभवस्य ब्रह्मणः आत्मजः पुत्रः——अनेन प्रकृतकार्यनिर्वाहकत्वं सूच्यते——अत एव कालं जानातीति कालज्ञः समयविदित्यर्थः । [2]वसिष्ठः——कदाचित् जातु ध्यात्वा विचिन्त्य अन्तः अन्तःकरणे विदितो विबोधितो विनिश्चयो निर्णयो येन स तथोक्त. अमुष्य अस्य दशरथस्य चित्ते रुजाम् उपतापम्——स्त्री रुग् रुजा चोपतापेत्यादिरमरः——छिन्दन् खिदानम् [3]क्लिश्नन्तम्——उभयत्र लटः शानच् । इन्दुमत्यास्तनयं दशरथम् रहसि एकान्ते अवोचत् अभाणीत् । वच परिभाषणे इत्यस्माल्लङ् ।। २-२ ।।

(प्रद्यो-२-३) **मा [4]खिन्था इति ।** हे महीश भूपते दशरथ मनसि मा खिन्थाः मा शुचः । खिद दैन्ये इत्यस्माल्लङ् । मा स्म सन्धेक् सन्देहं मा कुरु । न माङ्योगे (६-४-७४) इत्यडभावः । हे अनघ पापरहित त्वया अश्वमेधे मतिः सन्धेया । तदवसितौ तस्य अश्वमेधस्य समाप्तौ पुत्रनिमित्तां पुत्रीयाम् इष्टि पुत्रकामेष्टिं वितानय कारय । तनोतेर्ण्यन्तात लोट् । विभाण्डकस्य तनयम् ऋष्यशृङ्गं यष्टारं——याजितारमित्यर्थः——कुरु ।। २-३ ।।

(प्रद्यो-२-४) स तु कुत्रास्ते इत्यत्राह——**चम्पायामिति ।** चम्पायां चम्पानामपुर्याम् अधिपतिरध्यक्षः अङ्गदेशे अङ्गदेशस्य ईश्वरः——स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च (२-३-२९) इत्यनेन उभयत्र विकल्पेन सप्तमी——[5]रोमपादो रोमपादो नाम राजा देशस्य अवग्रहमनावृष्टिमवलोक्य——न विद्यते इतरैः संगः संसक्तिर्यस्य स तथोक्तः——पूर्वमिति शेषः । तथा च श्रीरामायणे——ऋष्यशृङ्गो वनचरस्तपस्वाध्या-

र्यानिरतः। अनभिज्ञश्च नारीणां विषयाणां सुखस्य च ।। (बालकाण्डे-१०-२) न तेन जन्मप्रभृति दृष्टपूर्व तपस्विना। स्त्री वा पुमान् वा यच्चान्यद् इति। (तत्रैव-१०-९) अत एव मुनीन्द्रमित्यनेन सामर्थ्य द्योतयति। कान्ताराद् वनात्—कान्तारमुपसर्गादौ वने दुर्गमवर्त्मनि विश्वः। कान्ताभिर्ललनाभिः स्वपुरं चम्पानगरम् अनीनयत् प्रापयत्। तथा च श्रीरामायणे—स श्रुत्वा वचनं तासां सर्वासा हृदयंगमम्। गमनाय मति चक्रे ताश्च निन्युस्तदा स्त्रियः (तत्रैव-१०-२८) ।। २-४ ।।

(प्रद्यो-२-५) तस्य सामर्थ्यमेवाह—**तं देशमिति**। विभाण्डकस्य सूनौ ऋश्यशृङ्गे तं देशमङ्गदेशं विशति प्रविशति सति बलमथनस्य बलस्य मथनस्तस्य शचीपतेः—बलारातिः शचीपतिरित्यमरः—संदेशं सदधानः सम्यग् विभ्रत्—शानजन्तः—पर्जन्यः मेघः अम्बरस्थो गगनस्थः प्रकटं स्फुटमगर्जद् गर्जितवान्। गर्ज शब्दे इत्यस्माल्लङ्। पौरबृन्दं नागरिकौघो [6]वर्ष्टारं वर्षुकम्—ण्वुल् तृचाविति तृच्। मेघम् अभिननन्द [7]तुष्टाव ।। २-५ ।।

(प्रद्यो-२-६) **धाराले** इति। धाराले धारासंपन्ने घनौघे मेघसमूहे दिशि दिशि—नित्यवीप्सयोः (८-१-४) इति वीप्सायां द्विर्भावः वर्षुके वर्षणशीले सति—लषपतेत्यादिना (३-२-१५४) उकञ्। वसुन्धरायाम् उर्व्याम् वार्योघाः वारीणाम् उदकानाम् ओघाः प्रवाहाः [8]प्रववृतिरे प्रवृत्ताः। विदूनचित्तं विशेषेण दूनं दुःखित चेतो यस्य तं तथोक्तं विरहिजनं [9]धुन्वानं कम्पयत् ऐन्द्रं धन्व इन्द्रधनुः प्रतीच्या पश्चिमायाम्—प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः इत्यमर.—दिशि आकाशे ददृशे दृष्टम्। दृशेः कर्मणि लिट् ।। २-६ ।।

(प्रद्यो-२-७) कुतस्त्यमस्य सामर्थ्यम्। तत्राह—**सुत्रामेति**। सुत्रामा वज्री—सुत्रामा गोत्रभिद् वज्री इत्यमरः—अस्य ऋश्यशृङ्गस्य वर्षणत्वं वर्षुकत्वं वरम् अदित दत्तवान्। ददातेर्लुङ्। मुनिः अतो हेतोः अत्राङ्गे अङ्गदेशे सुवृष्टिं सपूर्णवर्षणम् असृजत् सृष्टवान्। सृजतेर्लङ्। अथानन्तरम् तत्तुष्टः तया सुवृष्ट्या प्रहृष्टः नृपतिः रोमपादः शान्तेत्याख्या नाम यस्यास्ताम् आत्मनः कन्यां पुत्री निजतनया शमनिधये शान्त्यालयाय मुनीश्वराय अदात् दत्तवान्। ददातेर्लुङ् ।। २-७ ।।

(प्रद्यो-२-८) **शान्तेति**। हे दशरथ अमाविय शान्ता नमा कुमारी तावकी। तवेयम्। युष्मदस्मदोरित्यादिना (४-३-१) अणि तवकममकावेकवचने (४-३-३) इति तवकादेशः। टिड्ढेत्यादिना (४-१-१५) ङीप्। गृहागताय गृहं प्राप्ताय—प्रार्थयमानायेति भावः। प्रियं मनोऽनुकूलम्। तत् करोतीति तस्मै। क्षेमप्रियमद्रेत्यादिना

(३-२-४४) खच् । अरुर्द्विषदित्यादिना मुम् । अङ्गेष्वधिपतये अङ्गानामधिपतये इत्यर्थः । स्वामीश्वरेत्यादिना विकल्पात् सप्तमी । श्रीदाम्ने लक्ष्मीनिवासाय रोमपाद इति नाम यस्य तस्मै नरपतये लक्ष्मीमिव प्रियतनयां शान्तां प्रायच्छः अदाः । अपत्यत्वेनेति शेषः । तथाच उत्तररामचरिते—कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् । अपत्यकृतिकां राज्ञे रोमपादाय यां ददौ ।। (१-४) इति ।। २-८ ।।

(प्रद्यो-२-९) **जामातेति ।** विभाण्डकस्य आत्मजः सूनुः ऋश्यशृङ्गः ते तव जामाता दुहितुः पतिः भवति । जामाता दुहितुः पतिरित्यमरः । स च रोमपादपुर्या चम्पायां निवसति तिष्ठति । इह प्रदेशे आहूतः आकारितः—क्रतुविधिविद्भिः क्रतूनां विधिविधानम्—तं विदन्तीति क्रतुविधिविदस्तैः क्रतुविद्भिः—अत एव ऋत्विक्—कर्म अनुष्ठातुं शीलं येषा तैः आर्त्विजीनैः ऋत्विजमर्हन्तीति आर्त्विजीनास्तैः—यज्ञर्त्विग्भ्यां घखञौ (५-१-७१) इति खञ् । यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् इति वार्त्तिकात् (आर्त्विजीनैः इत्यस्य) ऋत्विक्कर्मार्हैरित्यर्थः । तैः सह ऋत्विजा कर्म आर्त्विज्यं करोतु आचरतु । करोतेः लोट् ।। २-९ ।।

(प्रद्यो-२-१०) **सन्तान इति ।** तव दशरथस्य भवतः सन्तानः प्रजोत्पत्तिः कदा भविता कदा संपत्स्यते—भवतेर्लुट्—इति नः अस्माकम्—अस्मदो द्वयोश्चेति (१-२-५९) एकस्मिन्नपि बहुवचनम्—चित्ते मनसि चिरं बहुकालं नितान्तं नैरन्तर्येण चिन्ता विचारः अनुवर्तते । अद्य निद्रान् स्वपन्—निपूर्वाद् द्रातेः शतृप्रत्ययः—तव भवनाङ्गणे गृहाङ्गणे अग्रे [10]चतुर्विषाणं चतुश्शृङ्गं मातङ्गं गजम्—गजेऽपि नागमातङ्गावित्यमरः—अद्राक्षम् अपश्यम् । [11]स्वप्नमद्राक्षमित्यर्थः । दृशेर्लङ् ।। २-१० ।।

(प्रद्यो-२-११) **चत्वार इति ।** कदाचित् सरसिजसंभवः कमलसंभवः—ब्रह्मेत्यर्थः—तव सकलवसुन्धराया सर्वोर्व्याः धुरीणाः धुरन्धराः—वसुधोर्वी वसुन्धरेत्यमरः—सत्त्वाढ्याः चत्वारस्तनयाः पुत्राः यावद् भवन्ति भविष्यन्ति—यावत्पुरानिपातयोर्लट् इति—यावच्छब्दयोगे भविष्यदर्थे लट्—इति एवं त्रिदिवमदां दिवौकसां देवानां महासभायां महासमाजे व्याचष्ट[12] व्याख्यातवान् । चक्षिङः व्यक्तायां वाचि इत्यस्माल्लङ् ।। २-११ ।।

(प्रद्यो-२-१२) **तच्छीघ्रमिति ।** तत् तस्मात कारणात् शीघ्रम् एनमिमं ऋश्यशृङ्गं समुपनय प्रापय । स च मुनिः पुत्रीयां पुत्रस्य निमित्तम्—पुत्राच्छ च (५-१-४०) इति छप्रत्ययः—इष्टिम् आतनोतु करोतु । शान्तायाः कान्तं पतिम् ऋश्यशृङ्गम् आह्वातुम् आकारयितुम् सुमन्त्र एव व्रजतु गच्छतु । नः अस्माकम्—अस्मदो द्वयोश्च

(१-२-५९) इति द्वयोर्बहुवचनम्—अनयोः शान्ताऋश्यशृङ्गयोः अवेक्षणं दर्शनं प्रियम् इष्टम् ॥ २-१२ ॥

(प्रद्यो-२-१३) **तच्छ्रुत्वेति** । तदा तस्मिन् काले गुरुवचनं वसिष्ठवाक्यं श्रुत्वा सुमन्त्रं प्राहैषीत् प्रेषितवान्—प्रपूर्वात् हि गतावित्यस्माल्लुङ्—(सः) सुमन्त्रः पवनरंहसा वायुवेगवता रथेन उचितस्य युक्तस्य वचसः प्रसंगेन प्रस्तावेन हृष्टम अतिशान्तम् अतिशयेन शान्तम् शान्तायाः पति भर्तारम् ऋश्यशृङ्गम आनैषीत् आनीतवान् नयतेर्लुङ ॥ २-१३ ॥

(प्रद्यो-२-१४) **काकुत्स्थ इति** । सैन्ययुक्तः सेनासहितः ककुत्स्थस्य गोत्रापत्यं पुमान् काकुत्स्थः स दशरथः तम् ऋश्यशृङ्गमभिगम्य प्रत्युद्गम्य जामातुः दुहितुः पत्युः प्रियमिष्टं वस्तुजातं पदार्थसमूहम् उपदाय उपायनं कृत्वा हे भगवन् षड्गुणैश्वर्यसंपन्न इह अस्यां पुत्राणां प्रतिभुवि लग्नके पुत्रकामनेष्टौ आर्त्विज्यं ऋत्विजां कर्म कुरु इति वव्रे वृतवान् । वृञ् वरणे इत्यस्माल्लिट् ॥ २-१४ ॥

(प्रद्यो-२-१५) **अध्वर्युरिति** । मखे अधिमखम् । विभक्त्यर्थेऽव्ययीभावः । नरपतिना नृपेण वसिष्ठः अध्वर्युर्वृतोऽभूत् । भगवान् स वामदेवः ब्रह्मा वृतोऽभूत् । असौ ऋश्यशृङ्गः होता वृत आसीत् । भृगुरुद्गाता वृतोऽभवत् । तथा उदगामीत् उद्गानमकरोत् । गै शब्दे इत्यस्माल्लुङ ॥ २-१५ ॥

(प्रद्यो-२-१६) **प्रागिति** । नृपतिर्दशरथः प्राक् अश्वमेधयागात् पूर्वम् साग्रहण्या[13] सांग्रहण्याख्यया इष्ट्या अयष्ट इष्टवान् । यजतेर्लुङ । ततः चित्रायां चित्रानक्षत्रे अश्वमेधं मखमुपचक्रमे उपक्रान्तवान् । चित्रा[14] नक्षत्रं भवतीति श्रुतेः । पुत्रकामेष्टिरेवालम् । किमन्तरा अश्वमेधेनेति चेत् तत्राह—अश्वमेधयाजी—इति । अश्वमेधयागकारी सर्वेषा भूतानां—सर्वभूतानित्यर्थे कर्तृकर्मणोः कृतीति कर्मणि षष्ठी—अभिभविता तिरस्कर्ता इति निशम्य ज्ञात्वा—तस्मादश्वमेधयाजी सर्वाणि भूतान्यभिभवतीति श्रुतेः—स दशरथः यष्टुम् ऐषीत् ऐच्छत् । इषु इच्छायामित्यस्माल्लुङ ॥ २-१६ ॥

(प्रद्यो-२-१७) **ऐक्ष्वाक इति** । इक्ष्वाकोर्गोत्रापत्यं पुमान् ऐक्ष्वाकः । दाण्डिनायनेत्यादिना निपातनात् साधुः । क्षितिपतिर्दशरथः अश्वमेधनाम्ना अश्वमेधाख्येन यज्ञेन त्रिदिवसदः—भूलोकापेक्षया तृतीया द्यौः त्रिदिवम् । दीव्यन्त्यत्रेति घञर्थे कविधानात् (वार्त्तिकेन) दिव इति रूपम् । यद्वा त्रयाणां ब्रह्मादीनां द्यौः त्रिदिवः स्वर्गः । तत्र सीदन्ति तिष्ठन्तीति त्रिदिवसदः देवाः । तान् विधिमनतिक्रम्य यथाविधि इष्टवा संपूज्य सन्ततीष्ट्या पुत्रकामेष्ट्या पुत्रीयं पुत्रनिमित्तं पुरुषम—पुत्राच्छः—

श्रीपतिम् अयष्ट इष्टवान् । यजतेर्लुङ् । विभाण्डकस्य सूनुः ऋष्यशृङ्गः यत्र इष्ट्याम् अग्निं व्यतत व्यतानीत् । तनोतेर्लुङ् ॥ २-१७ ॥

(प्रद्यो-२-१८) **एतस्मिन्निति** । एतस्मिन्नवसरे एव पौलस्त्येन रावणेन प्रतिहतं विहतं चेतो येषां ते तथोक्ताः अत एव विहस्ताः व्याकुलाः—विहस्तव्याकुलौ समौ इत्यमरः—दीनाः निस्तेजस्काः—आ समन्तात् कम्पः आकम्पः । तेन सह वर्तन्ते इति साकम्पाः । सातङ्का इति वा । वासवः इन्द्रः आद्यः आदिर्येषां ते वासवाद्याः निलिम्पा देवाः—नौ लिम्पेर्वक्तव्यमिति शप्रत्ययः—दुग्धाब्धौ क्षीरसागरे स्थितम् अनुकम्पिनम् अनुकम्पते ताच्छील्येनेत्यनुकम्पी तम् हरिम्—हरिरिति दुष्टनिग्रहद्योतनार्थम्—प्रणम्य नत्वा शरणं रक्षितारम्—शरणं गृहरक्षित्रोरित्यमरः—अगुः ययुः । इणो लुङ् । इणो गा लुङीति गादेशः ॥ २-१८ ॥

(प्रद्यो-२-१९) अनुकम्पित्वमेवाह—**दृष्ट्वेति** । अब्जं नाभौ यस्य सः अब्जनाभः हरिः—अनेनास्य जगत्स्रष्टृत्वं प्रतीयते—अच् समासान्तः—सकरुणया सकृपया दृशा दृष्ट्या तान् इन्द्रादीन् दृष्ट्वा अवलोक्य दन्तानाम् आल्योर्दन्तपङ्क्त्योः द्युतीनां कान्तीनां ततिभिः समूहैः दिशामन्तराणि अवकाशान् दिगन्तराणि—अन्तरमवकाशेत्यादिरमरः—विसृमरा विसृत्वरा चारुः रम्या चन्द्रिका ज्योत्स्ना येषा तानि व्यातन्वन् विस्तारयन् अब्दस्तनितगभीरया—अब्दस्तनितं मेघगर्जितम्—तद्वद् गम्भीरया वाचा बभाषे उवाच । भाष व्यक्तायां वाचीत्यस्माल्लिट् ॥ २-१९ ॥

(प्रद्यो-२-२०) **वत्सा इति** । हे वत्साः पुत्राः किं बिभिथ । मा भैष्टेत्यर्थः । जि भी भये इत्यस्माल्लट् । भियोऽन्यतरस्याम् (६-४-११५) इति वा इत्वम् । रणभुवि युद्धभूमौ दुरात्मनां दुष्टान्तःकरणानाम् अरीणाम् शत्रूणाम् उत्खातम् उन्मूलनम्—नाशनमिति यावत्—अहं राघवो रामभद्रो भूत्वा करिष्ये करिष्यामि । करोतेर्लृट् । कथं राघवो भवतीत्यत्राह—त्रिजगदिति । त्रयाणा जगतामुपप्लवाः पीडाः तेषामुपशान्त्यै शमनाय एकधा त्रेधा च चतुःसंख्यया—विधार्थेधा—दशरथसूनुः उत्पत्स्ये जनिष्ये—चतुःप्रकारेण दशरथसूनुः सन्नित्यर्थः—उत्पूर्वात् पद गतावित्यस्मात् लृट् ॥ २-२० ॥

(प्रद्यो-२-२१) तदागमनहेतुप्रकारमेवाह—**त्रस्यन्त इति** । दशवदनात् रावणात् त्रस्यन्त बिभ्यतः । त्रस्यतेर्लटः शतृप्रत्ययः । इह अस्मिन् स्थले आगताः स्थ आयाताः भवत—अस्तेर्लट् । निजनिजधाम्नि स्वस्वगेहे—धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः इति विश्वः—निर्भयाः भयशून्याः सन्तः स्थातारः स्थिरतरा—धैर्यवन्त इत्यर्थः

——स्त भवत——तिष्ठतेत्यर्थः——स्वैः स्वकीयैरंशैस्तेजोविशेषैः बलेन शौर्येण आढ्याः अधिकाः वलीमुखाः शाखामृगाः भवत——शाखामृगवलीमुखेत्यादिरमरः——भवत । भवतेर्लोट् । समेताः मिलिताः समित्सु आजिषु——समित्याजिसमिदित्यादिरमरः——मे साहाय्यं भजत प्राप्नुत । भजतेः लोट् ।। २-२१ ।।

(प्रद्यो-२-२२) वयं स्वस्वरूपेण (किं) सहाया भविष्यामः (अथवा) किं वलीमुखरूपेण——तत्राह——**लङ्काया** इति । कीशौघैर्वानरसंघैः——मर्कटो वानरः कीश इत्यमरः——लङ्काया रावणपुर्याः दहनम् अशेषदैत्यनाशश्च पुरा——भवति भविष्यति——पुराशब्दयोगे भविष्यदर्थे लट् । नन्दिशापो नन्दीश्वरस्य शापः । श्रीरामायणे उत्तरकाण्डे——कोऽयं शंकर इत्युक्त्वा शैलमूलमुपागतः । सोऽपश्यन् नन्दिनं तत्र देवस्यादूरतः स्थितम् । दीप्तं शूलमवष्टभ्य द्वितीयमिव शंकरम् । (७-१६-१२/१३) तं दृष्ट्वा वानरमुखमवज्ञाय स राक्षसः । प्रहासं मुमुचे तत्र सतोय इव तोयदः ।। (७-१६-१४) इत्यादि । तर्हि वयमेव शाखामृगा भविष्यामः । त्वमेव तद्रूपेण रावणं जहि——इत्यत्राह **तदिति** । सकुम्भकर्णं कुम्भकर्णसहितं दशवदनं दशाननं नाम रक्षो राक्षसं मानुषादृते मनुष्यं विना——अन्यारादित्यादिना पञ्चमी——हन्तुं नाशयितुम् अन्यः न प्रभवति न समर्थो भवति । भवतेर्लट् ।। २-२२ ।।

(प्रद्यो-२-२३) **युष्मास्विति** । युष्मासु भवत्सु प्लवगभटेषु——प्लवं कम्पितक्रमणं यथा भवति तथा गच्छन्तीति प्लवगाः कपयः । अत एव भटास्ते योधाः । तेषु सत्सु——कपिप्लवंगप्लवगेत्यादिः, भटा योधाश्च योद्धार इति चामरः । मयि अधृष्यं दुर्धर्षं मनोः कुले प्रसूतेः मानुष्यं मनुष्यत्वं भजति सति अरिषु शत्रुषु विध्वस्तेषु नष्टेषु सत्सु त्रयो लोकास्त्रैलोक्यम्——चतुर्वर्णादित्वात् स्वर्थे ष्यञ्——विभूतिभिः ऐश्वर्यैः विलोक्यं दर्शनीयं सत्——रमणीयमिति यावत्——सर्वं सुखं सर्वभोगानित्यर्थः——अनुबोभवीतु अत्यर्थमनुभवतु ।। २-२३ ।।

(प्रद्यो-२-२४) **इत्युक्त्वेति** । इति एवमुक्त्वा हरौ[15] विष्णौ——विष्णौ सिंहे सुवर्णेच मणौ भेके हरिं विदुरिति [16]शाश्वतः——झटिति शीघ्रम् अब्धौ क्षीरोदधौ तिरोहिते अन्तर्हिते सति देवाः वनभुवि वानरा मर्कटा बभूवुः । ननु तेषां वानरत्वं कियदवधिकम् तत्राह——धाता अब्जयोनिः——लङ्केशप्रमुखेत्यादि——लङ्केशः रावणः प्रमुखो येषां ते तथोक्ताः——पलं मांसमश्नन्तीति पलाशनाः । लङ्केशप्रमुखाश्च ते पलाशनाश्च । तेषां प्रणाशे प्रकर्षेण नाशविषये——संकेतः यूयं वानरा भवत अहं राघवो भवामीत्येवंरूपः । तदवधिः——तच्छब्देन रावणादय उक्ताः । तेषां नाश एव अवधिः

इति एवम् उवाच उक्तवान् । वच परिभाषणे इत्यस्माल्लिट् । यावत्सकलदैत्यसहितरावणनाशो भवति तावत्पर्यन्तं तेषां (देवानां) वनचरत्वमिति भावः ।। १-२४ ।।

(प्रद्यो-२-२५) **सातङ्का** इति । समस्तदैत्याः सकलदितिसुताः लङ्कायाम् अधिलङ्कम्—विभक्त्यर्थेऽव्ययीभावः—दुःस्वप्नैः पुरुषं कृष्णदन्तं च पश्यतीत्येवमादिकैः अपशकुनैः शाकुनिकपक्षिणामप्रदक्षिणप्रचारैर्दुर्निमित्तैर्वामाक्षिस्पन्दनादिभिश्च आतङ्केन भयेन सहिताः सातङ्काः—आतङ्को भयमाशङ्का इति हलायुधः—शङ्किरे शङ्कितवन्तः । शङ्कतेः कर्तरि लिट् । मुहुः बहुशः उत्पातान् भूकम्पोत्पातादीन् अवलोक्य सपदि भीतिमन्तो भयवन्तः मनसि दुःखं दधुः धृतवन्तः ।। २-२५ ।।

(प्रद्यो-२-२६) **अत्रासाविति** । अत्र अस्मिन्नवसरे यायजूकः इज्याशीलः—इज्याशीलो यायजूक इत्यमरः—असौ दशरथः मुनिभिः सह पुत्रेष्टौ पुत्रकामेष्ट्यां सहस्रशीर्षं सहस्रम् अपरिमितानि शीर्षाणि शिरांसि यस्य तं तथोक्तं पुरुषं श्रीपतिं हरिम् अयष्ट पूजितवान्—यजतेर्लुङ्—यायजूक इत्यत्र यजजपदशां यङः (३-२-१६६) इत्यनेन यजेर्यङन्तादूकप्रत्ययः—दमुनसि अनले इन्धाने प्रज्वलिते सति—सप्तार्चिर्दमुनाः शुक्र इत्यादिरमरः—कोऽपि कश्चन तालदघ्नः—तालस्तृणराजाह्वयः—तृणराजाह्वयस्ताल इत्यमरः—तालः प्रमाणमस्येति तालदघ्नः—प्रमाणे द्वयसच् दघ्नच् इत्यादिना (५-२-३७) दघ्नच् प्रत्ययः—तेजस्वी तेजोविशिष्टः—अस्मायामेधास्रजो विनिः (५-२-१२१) इत्यनेन विनिप्रत्ययः—पुरुषवरः पुरुषोत्तमः क्षणात् तस्मिन्नेव काले उदस्थात् उत्थितवान् । तिष्ठतेर्लुङ् । उदोऽनूर्ध्वकर्मणि (१-३-२४) इत्यनेन अनूर्ध्वकर्मणि आत्मनेपदविधानात् ऊर्ध्वकर्मणि परस्मैपदम् ।। २-२६ ।।

(प्रद्यो-२-२७) **सौवर्णीमिति** । अथ उत्थानानन्तरम् प्रसन्नः पुरुषः सौवर्णीं सुवर्णमयीम्—मयट् च (४-३-८२) इति चशब्दादण् । टिड्ढेति ङीप् । परमान्नेन पायसेन पूरिताम्—परमान्नं तु पायसम् इत्यमरः—विषु पात्री पुटी वाटी इत्यमरः—तामादाय गृहीत्वा ऋषेः ऋश्यशृङ्गस्य हस्तयोः आर्पिपत् अर्पयति स्म । (ऋधातोः-ण्यन्तस्य) अर्पयतेर्लुङ् । हे मुने तिसृभ्यो राज्ञीभ्यः राजपत्नीभ्यः चरुं विभज विभागतः प्रक्षिप । ताश्च पत्न्यः प्राशनन्तु भक्षयन्तु इति इत्थं निगदन् वदन् पुरः अग्रतः तिरोऽधात अन्तर्हितवान् । दधातेर्लुङ् ।। २-२७ ।।

(प्रद्यो-२-२८) [17]**साश्चर्यमिति** । ऋषिणा ऋश्यशृङ्गेन चतुर्धा विभज्य अर्पितं दत्तमित्यर्थः । स च विभागः श्रीरामायणे—कौसल्यायै नरपतिः पायसार्धं ददौ तदा ।। अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः । कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ।।

प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् । अनुचिन्त्य सुमित्रायै पुनरेव महामतिः ।। इति । (इह तु चतुर्धेति कविना कथितम्) (वा-रा-१-१६-२७/२८) अर्पितं तं चरुं तिस्रस्ता राज्ञ्यः क्षितिपतिमतेन दशरथानुज्ञया साश्चर्यं आश्चर्येण सहितं यथा तथा प्राशुः प्राशितवत्यः । अश्नातेर्लिट् । (अत्र च) मान्या कौसल्या । प्रिया कैकेयीति मत्वा दशरथश्च तयोः समविभागेन मुनिना उभे मानयित्वा ताभ्यां (दत्ताभ्यां स्वार्ध-भागाभ्यां) सुमित्रां मानयामासेत्यर्थः—क्षितिपतिमतेनेत्येतद्वचनसामर्थ्याल्लभ्यते । (चतुर्धा अर्पितमित्युक्तेरप्ययमेवाभिप्राय इति भाति । अयं च चतुर्धा विभागो यद्यपि न रामायणसंमतः । तथापि पुराणान्तरसंमतिर्द्रष्टव्या ।) तथा च [18]नारसिंहपुराणे—ते पिण्डप्राशने काले सुमित्रायै महीपतेः । पिण्डाभ्यामल्पमल्पं तु स्वभगिन्यै प्रयच्छतः ।। इति । हरिमहसा विष्णुतेजसा संक्रान्तं हविः चरुम् दधानाः दधत्यः (ता राज्ञ्यः) निर्भरालसाङ्ग्यः—निर्भराणि अत्यन्तम् अलसानि अङ्गानि गात्राणि यासां तास्तथोक्ताः गर्भिण्यः गर्भवत्यः अजनिषत प्रादुरभवन् । जनी प्रादुर्भावे इत्यस्मालङ् ।। २-२८ ।।

(प्रद्यो-२-२९) **इष्ट्यन्ते** इति । इष्ट्यन्ते यागावसाने मुनयो वसिष्ठाद्याः नृपाः सिन्धुसौवीरसौराष्ट्रिथाद्याः बन्धुता बन्धुसमूहाः काशीपतिप्रभृतयः—तान् विसृज्य स्वीयाः स्वकीयाः ताश्च ताः अन्तःपुररमण्यश्च तासां विहारे क्रीडायां लोलुपो लालसः—लोलुपो लोलुभो लोलो लम्पटो लालसोऽपि च—इति प्रातापमार्तण्डः । एतासामन्तःपुरनारीणामपि राज्ञीनामपि कौसल्यादीनाम् अभिलषितान् इष्टान् पदार्थान् वस्तूनि दिशन् ददत् तासां राज्ञीनां प्रसूतिकालं चकमे काङ्क्षितवान् ।। २-२९ ।।

(प्रद्यो-२-३०) **कौसल्येति** । कोसलस्यापत्यं स्त्री कौसल्या—वृद्धेत्कोसलेति (४-१-१७१) ञ्यङ्प्रत्ययान्तः । दितेर्जाताः दितिजाः तेषां रिपुं विष्णुं पुत्रं सुषाव । सुषुवे इत्यर्थः । षु [19]प्रसवैश्वर्ययोरित्यस्माद् भौवादिकात् लिट् । तदनु पश्चात् कैकेयी—केकयस्यापत्यं स्त्री—केकयेत्यादिना (७-३-२) इयादेशः—सुदर्शनं सुदर्शनांशं कुमारं सुषाव सुषुवे । तथा सुमित्रा शेषांशं पुत्रं शङ्खांशं पुत्रं च समजनयत् जनयामास । जनयतेर्लङ् । तौ कुमारौ यमलतया सकृत्प्रसवतया अभूताम् आस्ताम् भवतेर्लुङ् ।। २-३० ।।

(प्रद्यो-२-३१) **शय्यानामिति** । रक्षार्थम् । शिशूनामिति शेषः । शय्यानां मञ्चानाम्—शयनं मञ्चपर्यङ्केत्यमरः । चतसृषु दिक्षु प्राच्यादिषु रत्नदीपान्—रत्नान्येव दीपाः । तान्—कोणेष् आग्नेयादिष् ग्रहाः नन्दनाप्रभृतयः—तेषा बल्यर्थं

पूजार्थं पुष्पाणि गन्धधूपाश्च तान्—तथोक्तं [20]वैद्यशास्त्रे—प्रथमे दिवसे मासे वा नन्दना नाम मातलिः (गृह्णाति बालम् । तया गृहीत—पूर्वं ज्वर(:) स्यात् गात्रशोभेति . . . गृह्णाति । बलि तस्याः प्रवक्ष्यामि येन मुञ्चति मातलिः ।। नद्युभयमृत्तिकां गृहीत्वा पुत्तलिकां कारयेत् । शुक्लान्योदनगन्धानुलेपनपुष्पाणि पञ्च पञ्च दीपस्वस्तिकाः पूर्वाह्णे त्रिदिनं बलिं दद्यात् ।। राजसर्षपान् शिरसि विनिर्माल्य मार्जाररोमभागुकेशनिम्बपत्रघृतगव्यकैर्बलिं धूपयेत् । चतुर्थे दिने शान्त्युदकेन स्नापयेत् । ब्राह्मणं भिक्षुकं वा क्षीरेण भोजयेत् । बालः स्वस्थो भवति । इं ह्रीं वट् स्वाहेति मन्त्रेण द्वारि द्वार्यपि—नित्यवीप्सयोरिति द्विर्भावः—एकं पदं द्वारि द्वार्यपि जलेन निम्बपत्रेण पिचुमन्दपत्रेण च युक्तान् रत्नैर्मुक्ताफलादिभिर्युक्तान् पूर्णकुम्भान्—मुक्ताफलं हीरकं च वैदूर्यं पद्मरागकम् । पुष्यरागं च गोमेधं नीलं गारुत्मतं तथा ।। प्रवालमुक्तान्येतानि महारत्नानि वै नव ।। इति । यद्वा सुवर्णं रजतं मक्ता राजावर्तं प्रवालकम् । पञ्चरत्नं समाख्यातं सर्वकर्मसु शोभनम् ।। इति—पूर्णकुम्भान् जलपूर्ण-कलशान् न्यदधतेति प्रतिवाक्यं संबध्यते—निक्षिप्तवन्तः—दधातेर्लङ् ।। २-३१ ।।

(प्रद्यो-२-३२) **कौसल्येति ।** अथ सूतकानन्तरं पिता दशरथः कौसल्यासुतं नाम्ना राममकरोत् । कैकेय्यास्तनूजं नाम्ना भरतमुदैरयत् अवोचत् । उत्पूर्वात् ईर गतावित्यस्मात् (णिजन्तात्) लङ् । सुमित्राया अपत्यं पुमान् सौमित्रिः—बाह्वा-दित्वात् (४-१-९६) इण् । तं लक्ष्मणेति नाम्ना—लक्ष्मण इत्येवम्—लक्ष्मणेति प्राति-पदिकनिर्देशः—समधित समयोजयत् । दधातेर्लुङ् । तदनु पश्चात् चतुर्थं पुत्रं नाम्ना शत्रुघ्नम् आजुहाव आह्वयत् । आङ्पूर्वात् ह्वयतेर्लिट् ।। २-३२ ।।

(प्रद्यो-२-३३) **कल्पे य इति ।** यः कल्पे प्रलये—संवर्तः प्रलयः कल्प इत्यमरः—अब्जपत्रे कमलदले एकः सन् समभवत्—भवतेर्लङ्—स्वल्पेऽपि वटच्छदे न्यग्रोधपर्णे एकः सन् स्वपिति शेते—ञि प्वप् शये इत्यस्माल्लट्—रुदादिभ्यः सार्वधातुके (७-२-७६) इति इट्—असौ एकः शेषशायी विष्णुः—तथा च विष्णुपुराणे—नाग-पर्यङ्कशयने शेतेऽसौ परमेश्वरः (विष्णु-पु-१-२-६४) इति । रामात्मा रामरूपी रघुकुलरत्नदीपः—रत्नमेव दीपः रघुकुलस्य रघुवंशस्य रत्नदीपः रघुकुलरत्नदीपः—अनेन समासेन निरन्तरनिरपेक्षकप्रकाशकत्वं द्योत्यते—तल्पे शयने सुखं यथा भवति तथा अशयिष्ट शयितवान् । शेतेर्लुङ् ।। २-३३ ।।

(प्रद्यो-२-३४) **क्षुध्यन्त इति ।** बलेर्दमनस्य विष्णोः तेजसोंशाः अंशभूतास्ते बालाः क्षध्यन्तः क्षुधिता अपि न रुरुदुः न रुदितवन्तः । आशिताः आशितवन्तः ।

अश्नातेः सकर्मकत्वेऽपि आशितः[21] कर्ता (६-१-२०७) इति कर्तरि निपातितः। आशिताः=पीतस्तना इति यावत्। निदद्रुः सुषुपुः। द्रा कुत्सायां गतावित्यस्माल्लिट्। निद्रायामपि परमात्मनो ब्रह्मणो योगेनैक्येन युक्ताः दिने दिने प्रतिदिनम् तेजोभिः नवीनाः नूतनाः सन्तः—नवीनो नूतनो नव इत्यमरः—आर्ध्नुवन् ऐधन्त—ऋधु वृद्धावित्यस्मात लङ्। २-३४॥

(प्रद्यो-२-३५) **उत्ताना इति।** दशरथस्य पूर्वजन्मसु यत् पुण्यं तस्य पाकाः—फलभूता इत्यर्थः—पाका अर्भकाः पोतः पाकोऽर्भको डिम्भ इत्यमरः—कृतः नवेन गन्धतैलेन श्रीखण्डतैलेन सेकः सेचनं येषां ते तथोक्ताः—तथा च द्रव्यनिश्चये–(रक्त) चन्दनसंभूतं तैलं रक्तप्रसादनम्। स्निग्धवर्णकरं शीतं दौर्गन्ध्यविषनाशनम्[22]॥ इति। उत्तानाः उत्तानशायिनः धात्रीणाम् उपमातॄणाम्—धात्री स्यादुपमातापीत्यमरः—स्तनं कुचम् अधुः पपुः—धेट् पाने इत्यस्मात् लुङ्। मातॄणाम् (उपमातॄणां च) मुखमवलोक्य मन्दहासाः ईषद्धसिताननाः सन्तः स्वभासा निजतेजसा आद्युतन आद्योतयन्। द्युत दीप्तावित्यस्मात् लुङ्। द्युद्भ्यो लुङीति (१-३-८१) परस्मैपदम्। पुषादिद्युतादीति (३-१-५५) च्लेरङ्॥ २-३५॥

(प्रद्यो-२-३६) **धात्रेयीति।** धात्रीणामपत्यानि स्त्रियो धात्रेय्यः—स्त्रीभ्यो ढक्। टिड्ढेत्यादिना ङीप्—तासां कराणां मृदुलाङ्गुल्यः—ताः धात्रेयीकरमृदुलाङ्गुलीः कोमलकरशाखा इत्यर्थः—अङ्गुल्यः करशाखाः स्युरित्यमरः—ताः दधानाः दधतः सौधानां राजसदनानाम्—सौधोऽस्त्री राजसदनमित्यमरः—अग्रेषु उपरिभागेषु स्फटिकतटाः स्फटिकमयतटाः—तेषु चार्यमाणाः पादचारं कार्यमाणाः सन्तः तेषु प्रतिफलितं प्रतिबिम्बितं स्वदेहं स्वकीयदेहं निरीक्षमाणाः पश्यन्तः इतरेष्वन्येषु बालकेषु सन्देहं संशयं दधुः—दधातेर्लिट्—स्फटिकतलेषु स्वप्रतिबिम्बानि दृष्ट्वा अन्ये बालाश्चरन्तीति निश्चितवन्त इति भावः॥ २-३६॥

(प्रद्यो-२-३७) **आबाल्यादिति।** आबाल्यात् बाल्यात् प्रभृति लक्ष्मणः रामम् अभजत असेवत। भजतेर्लङ्। शत्रुघ्नः रामभक्तं भरतम् अभक्त। भजतेर्लुङ्। पित्रोः मातापित्रोः—पिता मात्रा इत्येकशेषः—नेत्रयोः नयनयोः सदैव सततमेव तेषां रामादीनां द्वन्द्वयोः द्वयम् द्विरूपम्—द्वे रूपे यस्य तद् द्विरूपम्—आनन्दस्य द्वयमिव अभवत् भवतेर्लङ्॥ २-३७॥

(प्रद्यो-२-३८) **चत्वार इति।** चत्वारो नृपतनयाः राजकुमाराः रामादयः गुरूपनीताः वसिष्ठेन उपनीताः ब्रह्मचारित्वं प्रापिताः चतुर्षु दिगन्तेषु प्रख्याताः प्रथिताः

प्रववृधिरे वृद्धिमन्तः (आसन्) । आशीर्भिराशीर्वादरूपाभिः मुनिवरगीर्भिः—मुनिषु वराः श्रेष्ठास्तेषां गीर्भिः वाग्भिः आप्तः प्राप्तः पोषः पुष्टिः येषां ते तथोक्ताः विद्वांसः विदितसकलशास्त्रार्थाः अशेषवेदराशीन् विविदुः अभ्यासक्लेशं विनैव ज्ञातवन्त इत्यर्थः । विद ज्ञाने इत्यस्माल्लिट् ।। २-३८ ।।

(प्रद्यो-२-३९) **अप्रैषुरिति ।** अतिप्रियानुलापैः अतिमधुरवचोभिः पितरम् अप्रैषुः अप्रीणयन् । सखीनां वयस्यानां पुरः अग्रतः स्वगुणनुतौ निजगुणस्तुतौ क्रियमाणायाम्—स्तवः स्तोत्रं स्तुतिर्नतिरित्यमरः—अह्रैषुः जिह्रियुः । ह्री लज्जायाम् इत्यस्माल्लुङ् । किमुत इतरेषां महतां समक्षे इति भावः । पित्रोः मातापित्रोः प्रियाणि मनोऽनुकूलानि हितानि भाविश्रेयस्कराणि भाषितानि वचनानि अश्रौषुः अशृण्वन् । शृणोतेर्लङ् । हिते हितविषये उपदिष्टाः उक्ताः गुरुगिरः वसिष्ठवाचः न व्यस्मार्षन् न व्यस्मरन् ।। २-३९ ।।

(प्रद्यो-२-४०) **कौपीनानीति ।** चत्वारस्ते रामादयः कज्जलाञ्चिताक्षाः—कज्जलेन अञ्जनेन अञ्चिते व्यापिते अक्षिणी येषां ते तथोक्ताः (—अञ्चितपदे गत्यर्थे अञ्चुधातोर्ण्यन्तात् क्तः—)यद्यपि मधुमांसाञ्जनोच्छिष्टशुक्तप्राणिहिंसनम् (वर्जयेत् इति) उपनीतत्रैवर्णिकानाम् अञ्जनधारणं च निषिद्धम् । तथापि वृद्धसमाचारादित्यनुसन्धेयम् । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (५-४-११३) इति षच् प्रत्ययः समासान्तः । कौपीनानि गुह्यचीराणि—कौपीनं स्यादकार्ये च गुह्यचीरप्रदेशयोरिति विश्वः—अवसन् आच्छादयन् । वस आच्छादने इत्यस्मात् लङ् । अधिगतो ज्ञातो मन्त्रशास्त्राणां सारो यैस्ते तथोक्ताः । माञ्जिष्ठानि मञ्जिष्ठारागेन रक्तानि वासांसि—तथा च आपस्तम्बः माञ्जिष्ठं महाराजस्य । हारिद्रं वैश्यस्य इति—न्यवसत—पञ्च चूडाः पञ्च शिखा येषां ते तथोक्ताः । शिखा चूडेत्यमरः । चलदलदण्डान् बोधिद्रुमदण्डान्—अश्वत्थदण्डानित्यर्थः—बोधिद्रुमश्चलदलः इत्यमरः—तान् धरन्तीति—धारिणः । विधिवत् शास्त्रमनतिक्रम्य वर्णित्वं ब्रह्मचारित्वम् । वर्णाद् ब्रह्मचारिणि (५-२-१३४) इति इनिप्रत्ययः । अधुः धृतवन्तः दधातेर्लुङ् ।। २-४० ।।

(प्रद्यो-२-४१) **अभ्यास्थन्निति ।** धनुषि विषये चलाचलाशुवेधम्—चलाः . . . अचलाः स्थाण्वादयः तेषामाशुवेधं शीघ्रवेधनम् अभ्यास्थन् अभ्यसितवन्त इत्यर्थः । असु क्षेपणे इत्यस्मात् लुङ् । पुषादित्वादङ् । अस्तेस्थुक् (७-४-१७) इति थुक् । आडजादीनाम् इति आडागमः । फलकतलेषु फलकेषु लेखिन्या तूलिकादिना चित्रविद्याः आलेख्यविद्याः साहित्ये कथाविषये मधुरं च विचित्रं च मनोहरं च विस्तरः युक्तिचातुर्य

विस्तरः स च—मधुरविचित्रविस्तराः तैराढ्यम्—आढ्यशब्देन . . . संगीते भरतविद्याविषये चटुलं मनोहरं चतुर्विधं च वाद्यम्—चातुर्विध्यं नाम ततानद्धसुषिरघनरूपम्—ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यं तालादिकं घनम् इत्यमरः—अभ्यास्थन्निति प्रतिवाक्यं संबन्धः ।। २-४१ ।।

(प्रद्यो-२-४२) **अन्विष्यन्निति ।** जनेशो नरपतिः क्वचिद् य कुत्रापि अनुरूपाः कुलसौन्दर्यादिभिः सरूपाः राजकन्याः अन्विष्यन् मृगयमाणः तेषां रामादीनां पाणिग्रहणं विवाहस्तमेव महोत्सवं विधित्सुः विधातुमिच्छुः मनसि औत्सुक्यम् उत्कण्ठाम् दधत् दधानः कुमारान् अक्षिभ्यां पिबन् अतितृष्णया पश्यन्नित्यर्थः अनेहसं कालम्—कालो दिष्टोऽप्यनेहापीत्यमरः—अनयत् नीतवान् । नयतेर्लङ् ।। २-४२ ।।

(प्रद्यो-२-४३) **अध्यात्मेति ।** अयं रामः । आत्मनीत्यध्यात्मम् । विभक्त्यर्थेऽव्ययीभावः । अनश्च (५-४-१०८) इति टच् समासान्तः । अध्यात्मं प्रणिहितं मानसं मनो यस्य स तथोक्तः—स्वान्तं हृन्मानसं मनः इत्यमरः—अत एव महात्मा महाबुद्धिमान्—आत्मा देहे धृतौ बुद्धौ स्वभावे परमात्मनि इति [23]वैजयन्ती । अत एव परिणयं विवाहम् राज्यं च न ऐक्षीत् न ऐच्छत् । इच्छतेर्लुङ् । यतः अध्यात्मनिष्ठः अतो नवे वयसि बाल्ये वैराग्यं विरक्तत्वम् अनुसंदधानः वसिष्ठैः वसिष्ठसंबन्धिभिः हितवचनैः हितवाक्यैः सर्वं सदसत्प्रपञ्चादिकम् अबोधि ज्ञातवान् । बुध्यतेर्लुङ् ।। दीपजनेत्यादिना कर्तरि चिण् प्रत्ययः ।। २-४३ ।।

(प्रद्यो-२-४४) **आस्थानमिति ।** कदाचित् प्रत्यूषे अहर्मुखे—प्रत्यूषोऽहर्मुखं कल्यमित्यमरः—भगवति ऐश्वर्यसंपन्ने भानुमति भास्करे उदिते उदयति सति धरापतौ धरित्रीपतौ आस्थाने सभायाम्—सभासमितिसंसदः आस्थानी क्लीबमास्थानम् इत्यमरः—वसति सति गाधिराजसूनुः विश्वामित्रः अभ्यागात् आगतवान् । अथ आगमनानन्तरम् राजसूनुर्दशरथश्च अमुं विश्वामित्रं सभ्यैः सभार्हैः सह अभ्यगमत् प्रत्युद्गतवान् । गमेर्लुङ् ।। २-४४ ।।

(प्रद्यो-२-४५) **अर्घ्याद्यैरिति ।** सुखासनः सुखकरासनः स चावनिपतिः भूपतिः कुशा एवासनम्—तस्मिन् तिष्ठतीति—तं कुशासनस्थम् कुशिकसुतम् विश्वामित्रम्—अर्घ्याद्यैः—अर्घाय पूजायै योग्यं जलम् अर्घ्यम् तद् आद्यं येषां तैः अर्घ्याद्यैः—पादार्घाभ्यामिति यत्—आदिशब्देन पाद्यादिकम्—तैरर्चित्वा अर्चयित्वा—अर्चतेः भौवादिकात् क्त्वाप्रत्ययः—अथ अर्चनानन्तरम् चतुरः चतुःसंख्याकान तान् रामादीन् कुमारान्

अस्य विश्वामित्रस्य अङ्घ्र्योः चरणयोः प्रणमनेन नमस्कारेण पावनान् शुद्धान् अकार्षीत् ॥ २-४५ ॥

(प्रद्यो-२-४६) **अङ्के तमिति ।** विश्वामित्रः समस्तविद्यानां सकलवेदशास्त्रादीनां सङ्केतस्थलं सङ्केतस्थानं रघुतिलकम् ललामभूतम्—तिलकं चित्रके प्राहुः ललामे तिलकालक इति विश्वः—अङ्के उत्सङ्गे—उत्सङ्गचिह्नयोरङ्क इत्यमरः—तम् अधिरोप्य आलिङ्गन् आश्लिष्यन् रोमहर्षी रोमाञ्चवान् तस्य रामस्य अङ्गसङ्गेन सौख्यम् अधित अधत्त । दधातेर्लुङ् । यत् सौख्यं ब्रह्मामृतरसिकाः ब्रह्मामृतरसज्ञाः योगिनश्च योगिनोऽपि नो लभन्ते न प्राप्नुवन्ति । तदङ्गसौख्यमेवालभतेति भावः ॥ २-४६ ॥

(प्रद्यो-२-४७) **प्रत्यक्षमिति ।** मुनीन्द्राः मुनिश्रेष्ठाः नयनपथामृतं परस्य उत्कृष्टस्य पुंसः श्रीमहाविष्णोः परमं महः उत्कृष्टं तेजः प्रत्यक्षम् अपरोक्षं पश्यन्तः ध्यातॄणां चिन्तकानां नः अस्माकम् हृदि मनसि—स्वान्तं हृन्मानसं मन इत्यमरः—रामाख्यं परवस्तु परं ब्रह्म नित्यं सदा अस्तु इति चकाङ्क्षुः कांक्षितवन्तः । तव अन्वराङ्क्षुः (अनु+अराङ्क्षुः) तव अनुरक्ता इत्यर्थः । रञ्ज रागे इत्यस्मात् लुङ् । च्लेः सिच् । झेर्जुस् । वृद्धिः कुत्वषत्वे च ॥ २-४७ ॥

(प्रद्यो-२-४८) **बद्धाञ्जलीति ।** अथ अनन्तरं नृपतिर्दशरथः गाधेयं गाधिसुतम् —इतश्चानिञः (४-१-१२२) इति ढक्—मुनिं विश्वामित्रं बद्धाञ्जलि कृताञ्जलि यथा भवति तथा बभाषे उवाच । किमिति—हे भगवन् सर्वज्ञ मयि प्रसादमनुग्रहं कुरु । तव उपगमनम् आगमनम् अवलोकनं च ताभ्यां धन्यः कृतार्थोऽस्मि । ते तव दासोऽहं किंकरः । किं कार्यं प्रयोजनं करवाणि । वद ॥ २-४८ ॥

(प्रद्यो-२-४९) **गायत्रीमिति ।** चतुर्भिः श्लोकैर्मुनिं स्तौति—यद् यस्मात् पुरा पूर्वं [23a]विरिञ्चेः ब्रह्मणः सकाशाद् गायत्रीम् अलभथाः लब्धवानसि । लभेर्लङ् । यद् यस्मात् कारणात् ब्राह्मण्यं ब्राह्मणत्वम् अभजथाः । तथाच श्रीरामायणे—ततः सुरगणाः सर्वे पितामहपुरोगमाः । विश्वामित्रं महात्मानं वाक्यं मधुरमब्रुवन् ॥ (१-६५-१८) ॥ ब्रह्मर्षे स्वागतं तेऽस्तु तपसा स्म सुतोषिताः । ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ॥ . . . १९) इति ॥ यद् यस्मात् महिम्ना तपोमहिम्ना पुनर्भूयः जगदपि अस्राक्षीः असृजः । सृजेर्लुङ् । सृजिदृशोर्झल्यमकिति (६-१-५८) इति अमागमे वदव्रजेत्यादिना वृद्धिः । अत्रापि श्रीरामायणम्—ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः । सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनः ॥ (१-६०-२०) ॥ . . . . ततः परमसंभ्रान्ताः सर्षिसंघाः सुरासुराः । विश्वामित्रं महात्मानभ ऊचुः सानुनयं वचः ॥ . . .

(१-६०-२३) ।। इत्यादि । तस्मात् निरवधिकः अवधिरहितः तव अनुभावः सामर्थ्यम् किं वर्ण्यः कथं वर्णयितुं शक्यः । न शक्य इत्यर्थः ।। २-४९ ।।

(प्रद्यो-२-५०) **दिव्यास्त्राणीति** । हे अनघ दोषरहित कुशाश्वतः——कुशाश्वात् ——पञ्चम्यास्तसिल्——दिव्यास्त्रीणि अध्यगीष्ठाः अधीतवानसि । अत्र श्रीरामायणम् ——सर्वास्त्राणि कुशाश्वस्य पुत्राः परमधार्मिकाः । कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति ।। (१-२१-१३) ।। तेन कर्मणा त्वं दिवि स्वर्गे भुवि भूमौ दिक्षु प्राच्यादिषु कीर्तिं ख्यातिम् आप्नोः प्राप्तोऽसि । . . . . त्रिशङ्कोः वसिष्ठशापेन चण्डालतां प्राप्तस्य ऐक्ष्वाकस्य राज्यं स्वर्गारोहणम् (निश्शङ्कं स्थिरमकृथाः) । अत्र रामायणम्—— अवाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसंनिभः । (१-६०-३१) । अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमम् । कृतार्थं कीर्तिमन्तं च स्वर्गलोकगतं यथा ।। (१-६०-३२) ।। इति । निश्शङ्कं निर्गता शङ्का यथा भवति तथा स्थिरं दृढम् अकृथाः । त्वयि कुपिते सति तदा तस्मिन् काले त्रयाणां लोकानां समाहारस्त्रिलोकी——तद्धितार्थेत्यादिना समाहारे संख्यापूर्वो द्विगुरिति द्विगुसंज्ञकः । द्विगोरिति ङीप्——सातङ्का सभया—— आतङ्को भयमशङ्केति हलायुधः——अभूदिति शेषः ।। २-५० ।।

(प्रद्यो-२-५१) **सामर्थ्यमिति** । हे आर्य विश्वामित्र तव सामर्थ्य प्रभावः समस्त-लोके सकलभुवने विदितं ज्ञातमभूत् । ते मत् मत्तः इह अस्मिन् लोके कार्यलेशं प्रयोज-नलवमपि न आलोके न पश्यामि । लोकृ दर्शने इत्यस्मात् लट् । एवमपि तव मनसि काङ्क्षा वाञ्छा अस्ति आस्ते——प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते——(श्लोकवार्त्तिके-संबन्धाक्षेपपरिहारे-५५) इति न्यायात् । क्वचिदपि कदाचिदपि कांचित् कामपि अर्थिनां याचकानाम् प्रार्थनां मा भाङ्क्षम्——न भज्यासम्——भञ्जो आमर्दने इत्यस्मात् माङि लुङ् इति आशिषि लुङ्——तस्माद् यथेच्छं याचस्वेति भावः ।। २-५१ ।।

(प्रद्यो-२-५२) **इत्युक्त्वेति** । क्षमाधिनाथे कुम्भिनीशे——गौरिला कुम्भिनी क्षमेत्यमरः——इति एवम् उक्त्वा विरतवति तूष्णीं स्थितवति सति गाधेयो गाधिसूनुः—— इतश्चानिञ (४-१-१२२) इति ढक् । रघून् रघोर्गोत्रापत्यानि पुंसः प्रशस्य संस्तुत्य अवदत् उवाच । वदतेर्लङ् । किमिति——रजनिचराणां राक्षसानाम् अन्तको मृत्युः कुमारोऽयं रामः रक्षोभ्यः मे मम मखं क्रतुम्——सप्ततन्तुर्मखः क्रतुरित्यमरः——रक्षतात् । रक्षतेर्लोट् । तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् इति तातङादेशः ।। २-५२ ।।

(प्रद्यो-२-५३) **मारीच इति** । मानुषानत्तीति मानुषादः । भूलोकापेक्षया तृतीया द्यौः त्रिदिवः स्वर्गः——दीव्यन्त्यत्रेति [21]घञर्थे कविधानात् दिव इति रूपम् । तत्र

सीदन्तीति त्रिदिवसदः। तेषां तथोक्तानां देवानां वैरी शत्रुः सुबाहुयुक्तो मारीचो नाम राक्षसः वनेषु चरति वर्तते। पञ्च तालाः तृणराजाह्वयाः प्रमाणमस्याः इति पञ्च-तालदघ्नी—प्रमाणे द्वयसजित्यादिना (५-२-३७) दघ्नच् प्रत्ययः। टिड्ढेत्यादिना (४-१-१५) ङीप्—ताटकाभिधाना—ताटकेत्यभिधानं यस्याः सा तथोक्ता तन्माता मारीचजननी वनभुवि वनदेशे पञ्चत्वं कालधर्मम्—स्यात् पञ्चता कालधर्म इत्यमरः—कलयतु प्राप्नोतु। स्त्रीत्वेऽप्याततायित्वाद् वध्येयमिति भावः ॥ २-५३ ॥

(प्रद्यो-२-५४) **रामस्ते इति।** तव शिशुः इतरेषां त्वद्व्यतिरिक्तानाम् अविता रक्षिता—ण्वुल्तृचाविति तृच्—अत एव पिता पोषकः। तत्र स्मृतिः—जनकश्चो-पनेता च यस्तु विद्या प्रयच्छति। अन्नदाता भयत्राता पञ्चैते [25]पितरः स्मृताः ॥ इति। असून् प्राणान् रान्ति नाशयन्तीति असुराः। न विद्यन्ते सुरा देवाः येषां ते इति वा। तान् तथोक्तान् कथं हनिष्यतीति एवं मा भैषीः (न बिभीहि)—ञि भी भये इत्यस्मात् माङि लुङ इति लुङ (सर्वलकारापवादः)। कुतोऽस्य सामर्थ्यमित्यत्राह—तवास्य सुतस्य माहात्म्यं सामर्थ्यम्—अहमिव दृश्यन्ते इति मादृशाः—त्यदादिषु दृशोऽनालोचने—कञ् च (३-२-६०) इति कञ्—वाचानाम् वचसाम्—यथा वाचा निशा दिशा इति पाठात् टाबन्तः—मनसाम् अन्तःकरणानामपि अगोचरः अविषयः स्यात्। अस्तेर्लिङ। गोचरशब्दस्य नियतलिङ्गत्वात् पुंलिङ्गता ॥ २-५४ ॥

(प्रद्यो-२-५५) **जानाते इति।** वसिष्ठवामदेवावपि तत्सामर्थ्यं जानाते जानीतः। जानातेर्लट्। द्विवचनम्। पुरुषवरस्य श्रीविष्णोः पूर्ववृत्तं पुरातनवृत्तान्तम् इमौ वसिष्ठवामदेवौ पृच्छ—पृच्छतेर्दुहादित्वाद् द्विकर्मत्वम्—ते तव शुचिमनसोः शुद्धान्तः-करणयोः पुरोधसोः पुरोहितयोः—पुरोधास्तु पुरोहित इत्यमरः—तयोः संमत्या अनुमत्या अनुजेन कनीयसा लक्ष्मणेन सह इमं रामम् सवम् अध्वरम्—यज्ञः सवोऽध्वरो याग इत्यमरः—अवितुं पातुं यच्छ देहि। दाण् दाने इत्यस्मात् लोट्। पाघ्रेत्यादिना (७-३-७८) यच्छादेशः ॥ २-५५ ॥

(प्रद्यो-२-५६) **तच्छ्रुत्वेति।** सम्राट् मण्डलेश्वरः—येनेष्टं राजसूयेन मण्डल-स्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञः स सम्राट् इत्यमरः—स दशरथः तद् विश्वा-मित्रस्य वाक्यं श्रुत्वा निशम्य क्षणम् ईषत्कालं मूर्छित इव मोहं प्राप्त इव स्थितः स्वस्थः सन् चितित्वा ज्ञात्वा कृशाश्वस्य शिष्यं कुशिकसुतं विश्वामित्रम् दृष्ट्वा अर्भकम्—डिम्भम्—पोतः पाकोऽर्भको डिम्भ इत्यमरः—प्रियम् अत्यन्तप्रियं सुतं रामं दृष्ट्वा महाभयं प्रविष्टः भयं गतः व्यम्राक्षीत् व्यमृशत्। विचारितवानित्यर्थः। मृश आमर्शने इत्यस्मात् लुङ ॥ २-५६ ॥

(प्रद्यो-२-५७) विचारमेवाह—**पातुमिति**। त्रयः कालाः त्रिकालाः भूतभविष्यद्वर्तमानाः। तान् द्रष्टुं शीलमस्यास्तीति त्रिकालदर्शी। ननु संख्यापूर्वो द्विगुरिति द्विगुसंज्ञाविधानात् द्विगुरेकवचनम् इत्येकवचनम् इत्येकवचनत्वे स नपुंसकम् इति नपुंसकत्वे प्राप्ते तदपवादत्वेन अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्ट इति स्त्रीलिङ्गत्वात् द्विगोरिति ङीप् कस्मान्न भवति (इति चेत्) नैष दोषः। द्विगुरेकवचनम् इत्येकवद्भावस्य द्विगुसंज्ञापूर्वकत्वात् संज्ञापूर्वको विधिरनित्य इति एकवद्भावस्य अनित्यत्वात् स्त्रीलिङ्गत्वाभावात् ङीपोऽप्यभावः[26]। मुनितिलको मुनिश्रेष्ठः यः विश्वामित्रः एकः असहाय एव त्रयो लोकास्त्रैलोक्यम्—चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः।—पातुं रक्षितुं परिभवितुं तिरस्कर्तुं वा क्षमः समर्थः कुप्येत् क्रुध्येच्चेत्—कुप कोपे इत्यस्मात् लिङ—तदा सकलजगन्ति सकलभुवनानि दग्धु भस्मीकर्तुम् ईष्टे शक्नोति—ईश ऐश्वर्ये इत्यस्मात् लट्। शप्येद् वा शपेत चेत् (तर्हि) मम कुलं वंशः कुत्सितं गर्हितं स्यात्। अस्तेर्लिङ। शप्येदित्यत्र शप आक्रोशे इत्यस्माद् दैवादिकात् लिङ ॥ २-५७ ॥

(प्रद्यो-२-५८) **बालोऽयमिति**। तुरिः [27]समुद्रस्तस्य पयसि . . . . पारिजात इव। मे सन्ताने वंशे कथमपि कथंचित् चिराय बहुकालात्—विभक्तिप्रतिरूपकमव्ययम्—बालो जातः। हरिः विष्णुः सुत्रामणे गोत्रभिदे—सुत्रामा गोत्रभिद् वज्री इत्यमरः—तं पारिजातमिव अस्मै विश्वामित्राय दायादं सुतम्—दायादौ सुतबान्धवावित्यमरः—प्रदाय दत्त्वा देहं कथमिव कथं धारयामि। धृञ् धारणे इत्यस्मात् चौरादिकात् लट् ॥ २-५८ ॥

(प्रद्यो-२-५९) **रक्षोभ्य इति**। शिशुम् अर्भकं रामचन्द्रं रक्षोभ्यः राक्षसेभ्यः उपदाय प्रदाय कथं निद्रायाम् स्वप्याम्—(निपूर्वाद् द्रा कुत्सायां गतावित्यस्माद् विधिलिङि रूपम्)—अशनम् आहारं वा अद्याम् अश्नीयाम्। अद भक्षणे इत्यस्माल्लिङ। अद्य इदानीम् असौ अयम् सुतवधखिन्नवृद्धशापः—सुतस्य वधेन खिन्नस्य वृद्धस्य वैश्यतपस्विनः शापः प्रापद् वा यस्मात् सुतविरहः सुतेन वियोगः आजिहीते आगच्छति ॥ २-५९ ॥

(प्रद्यो-२-६०) **अन्तर्वानिति**। प्राक् पूर्वं यदा यस्मिन् काले एष दारवर्गः पत्नीगणः अन्तर्वान् गर्भवान्—अन्तर्वत्नी तु गर्भिणी इत्यमरः—अजनि अभूत् तदा तस्मिन् काले परिषदि आस्थाने—समज्या परिषद् गोष्ठी . . . . आस्थानी क्लीबमास्थानम् इत्यमरः—मे आख्यत् मह्यम् आख्यातवान्। महासुरेभ्यो महाराक्षसेभ्यो तव सुताः न भेतारः न भेष्यन्ति। प्रत्युत भवत्सुतेभ्यः—भीत्रार्थानामिति उभयत्र पञ्चमी—असुराः राक्षसाः स्वयं भेष्यन्ति ॥ २-६० ॥

(प्रद्यो-२-६१) **सिद्धानामिति** । गुरुतपसाम् गुरुणि महान्ति तपांसि कृच्छ्रचान्द्रायणादीनि येषां ते—तथोक्तानाम् अत एव तपस्सिद्धानां वसिष्ठादीनां वाचः मोघाः[28] व्यर्थाः न भवन्ति । ननु सिद्धानां गिरौ न मोघाः भवन्तु । ततः किम् । तत्राह—एष कौशिको विश्वामित्रोऽपि शापे निग्रहे अनुग्रहे च पटुः—दक्षस्तु चतुरः पटुरिति प्रतापमार्ताण्डः—अतः किं मीमांसे किं विचारयामि । किमनुमिनोमि हेतुभिः किं निश्चिनोमि । किम् ऊहे किं तर्कयामि—ऊह वितर्के इत्यस्माल्लट्—व्यामोहैः पुत्रवात्सल्यैरलम् । व्यामोहसाध्याभावात् ते न कर्तव्या इत्यर्थः । अत्र गम्यमानसाधनक्रियां प्रति करणत्वात् तृतीया । ऋषये विश्वामित्राय [29]वत्सं बालं रामं दिशामि ददामि । दिशतेर्लट् । एतावत्पर्यन्तं प्रहर्षिणीवृत्तम् ।। २-६१ ।।

(प्रद्यो-२-६२) **इति मनसीति** । स दशरथः इति इत्थं विमृश्य विचार्य सदसि सभायां वसिष्ठवामदेवौ प्रकाशं प्रकटम् उच्चैः बभाण उवाच । भण शब्दे इत्यस्माल्लिट् । किमिति—इह अस्मिन् कार्ये किं करोमि कथयतम् ब्रूतम् । कथ वाक्यप्रबन्धे इत्यमाल्लोट्—द्विवचनम्—नन्वखिलभुवानाधीश्वरः (त्वम्) आवां ब्राह्मणौ पृच्छसि—तत्राह—अहितहितेषु अनिष्टेष्टरूपेषु कार्येषु प्रयोजनेषु नः अस्माकं युवां भवन्तौ प्रमाणं निर्णायकौ हि । युवयोः सर्वज्ञत्वादिति भावः । औपच्छन्दसिकं वृत्तम् ।। पर्यन्ते यौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम् इति (लक्षणं वृत्तरत्नाकरे) ।। २-६२ ।।

(प्रद्यो-२-६३) **शिशुरिति** । अयं रामः शिशुः—एकवचनादमहाय इति गम्यते । अरयस्तु—तुशब्दश्चकारार्थे—यातुधानाः राक्षसाः—यातुधानः पुण्यजनः इत्यादिरमरः । तर्हि प्रत्याख्येय इति (चेत्) तत्राह—कुशिकसुतः—अनेन क्षात्रं तेजो गम्यते । मुनिः विश्वामित्रः—अनेन ब्राह्मण्यं तेजो गम्यते । अतो [30]दुर्विलङ्घः—ईषद्दुस्सुषु इत्यादिना खल् प्रत्ययः—अपरिहरणीय इत्यर्थः । विततभासि विततं विस्मितं भास्तेजो यस्मिन् तस्मिन् रामचन्द्रे रघुनाथे वियति (इणः शत्रन्तस्य सप्तम्यन्तमिदम्) गच्छति सति—(तथा) वियति गगने रामचन्द्रे मनोहरचन्द्रमसि विततभासि प्रकाशमाने सति इति (अपि) अर्थः । नलिनानां कमलानां या रुचिस्ता नः अस्माकं नयनानि नेत्राणि बिभ्रते धारयन्ति । स्वरितेत्त्वादात्मनेपदम् । चन्द्रोदये कमलानीव रामवियोगे अस्मन्नयनानि मुकुलीभवन्ति इति भावः । औपच्छन्दसिकं वृत्तम् ।। २-६३ ।।

(प्रद्यो-२-६४) **रामलक्ष्मणेति** । रामलक्ष्मणावेव महामणिदीपौ महामाणिक्यदीपौ । ताभ्यां भ्राजितानि दीपितानि मे अखिलानि भवनानि सकलगृहाः । ताभ्यां रामलक्ष्मणाभ्यां वियोगेन विश्लेषेण विधुराणि विकलानि—विधुरो विकलेऽन्यवदिति

विश्वः—समन्तात् सर्वतः ध्वान्तं तिमिरं भजन्तीति ध्वान्तभाञ्जि—भजो ण्विः (३-२-६२) इति ण्विप्रत्ययः पुरा न विभान्ति न शोभिष्यन्ते—यावत्पुरनिपातयोरिति भविष्यदर्थे लट्। स्वागता वृत्तम्। स्वागतेति रनभाद् गुरुयुग्मम् इति लक्षणम् (वृत्तरत्नाकरे) ॥ २-६४ ॥

(प्रद्यो-२-६५) **तन्निशम्येति**। कुशाः दर्भा हस्तयोः ययोस्तौ कुशहस्तौ याजकौ पुरोधसौ—वसिष्ठवामदेवावित्यर्थः—क्षितिभर्तुः दशरथस्य तद् वचनं निशम्य श्रुत्वा रहः एकान्ते। एका मतिर्ययोस्तौ। तयोर्भावः ऐकमत्यम् एकवाक्यत्वम् उपगम्य प्राप्य मनुजदेवमुनीनां मनुजदेवानां राज्ञां मुनीनां ऋषीणां च संनिधौ समक्षम् जगदतुः ऊचतुः। गद व्यक्तायां वाचीत्यस्माल्लिट्। स्वागता वृत्तम् ॥ २-६५ ॥

(प्रद्यो-२-६६) **गच्छतामवितुमिति**। एतौ रामलक्ष्मणौ अध्वरं यागम् अवितुं रक्षितुं गच्छताम् याताम्—गमेर्लोट्—द्विवचनम्—हे तात जनक ते तव तनयौ कुमारौ मुनये कौशिकाय यच्छ देहि। दाणो लोटि यच्छादेशः। कुशिकसंभवस्य विश्वामित्रस्य तेज एव वज्रपञ्जरः—तं गते प्राप्ते—गतीति पाठे गमेः क्विपि सप्तम्येकवचनम्—अपत्यविशेषणम्—अपत्यविषये किं भयम्—न कापि भीरिति योजना—अस्मिन् अपत्यशब्दः सामान्येन। किंतु रामलक्ष्मणपरो व्याख्येयः। त्वदपत्ये तव अपत्ये—रामलक्ष्मणौ प्रति किं भयम्—न कापि भीरित्यर्थः। स्वागता वृत्तम् ॥ २-६६ ॥

(प्रद्यो-२-६७) **राम एष** इति। एष रामः पालको रक्षकः यज्ञपूरुषः यज्ञेशः—पुरुष एव पूरुषः—अतः बाल्य एव बालः एव पौरुषेण पुरुषाकारेण मुनियज्ञरक्षणं विश्वामित्रयागरक्षणं विदधातु करोतु। तथा हि बालकोऽपि शिशुरपि रविः सूर्यः तमः हरते हिनस्ति हि। रथोद्धता वृत्तम्—रान्नराविह रथोद्धता लगौ इति लक्षणात् (वृत्तरत्नाकरे) ॥ २-६७ ॥

(प्रद्यो-२-६८) **इत्यमोघेति**। वसुन्धरापतिः दशरथो भूपः इति एवम् अमोघवचसोः अवितथवचनयोः—कुतः—ज्ञानसिन्धोः ज्ञानाब्धेः निरपायरोधसोः निरपाये रोधसी तीरे ययोस्तयोः। अत एव वेधसः कमलासनात् शोभना धीर्ययोस्तयोः—सुधियोः शोभना मेधा धारणसमर्था बुद्धिर्ययोस्तयोः—सुमेधसोः—नित्यमसिच् प्रजामेधयोः इति असिच् समासान्तः—धीर्धारणावती मेधेत्यमरः—पुरोधसोः पुरोहितयोः वसिष्ठवामदेवयोः वाक्यम् वचनम् आदृत आदृतवान्। दृङ् आदरे इत्यस्मात् लुङ्। रथोद्धता वृत्तम् ॥ २-६८ ॥

(प्रद्यो-२-६९) **तत इति ।** ततः गुरवाक्यानन्तरम् पितुः जनकस्य गिरा वाक्येन कुमारावपि रामलक्ष्मणौ अन्तःपुरम् शुद्धान्तम् अभ्यपप्तताम् प्राप्तवन्तौ——पत्लृ गतौ इत्यस्मात् लुङ । मातृः जननीः प्रणम्य नत्वा [31]वर्मणी तनुत्रे——तनुत्रं वर्म दंशनम् इत्यमरः——अपिनह्य (आबध्य)——गह बन्धने इत्यस्मात् ल्यपि रूपम्——धरत इति धरौ——निषङ्गकोदण्डयोः धरौ——निषङ्ग इषुधिर्द्वयोरिति धनुश्चापो धन्वशरासनको-दण्डेत्यादिश्च अमरः——निरीयतुः निर्जग्मतुः——इणो लिट्——अन्तःपुराद् इति शेषः । वंशस्थं वृत्तम् । जतौ तु वंशस्थमुदीरितं जराविति लक्षणात् । (वृत्तरत्नाकरे) ॥ २-६९ ॥

(प्रद्यो-२-७०) **आगत इति ।** राघवो रामः आशु शीघ्रम् आगतः——अनेनौत्सुक्यं प्रतीयते——पितरं जनकं ववन्दे ननाम । वदि अभिवादनस्तुत्योः इत्यस्मात् लिट् । परिषदा सभया अभिननन्दे अभिनन्दितः——नन्दतेः कर्मणि लिट् । मुनिबृन्दे मुनिसमूहे विस्मयः अजनि जातः । जनेः कर्तरि लुङ । नरपतिर्दशरथः नागरैः नगरजनैः निनिन्दे निन्दितः । निदि कुत्सायामित्यस्मात् कर्मणि लिट् । स्वागता वृत्तम् ॥ २-७० ॥

(प्रद्यो-२-७१) उक्तमेवार्थं भङ्ग्यन्तरेणाह——**राघव इति ।** राघवः जनयितारं जनकम् अनंसीत् अनमत् । जनयिता जनकः तं राघवम् अशंसीत् स्तुतवान् । शंसु स्तुता-वित्यस्मात् लुङ । जनो लोकः——लोकस्तु भुवने जने इत्यमरः——अनर्हे अनुचिते कर्मणि प्रयतमान प्रयत्नं कुर्वन्तं तं नरपतिं च जगर्हे निनिन्द——गर्ह कुत्सायामित्यस्मात् लिट् । स्वागता वृत्तम् ॥ २-७१ ॥

(प्रद्यो-२-७२) **करेणेति ।** श्रुतः तस्य कौशिकस्य प्रभावः येन स तथोक्तः नरेन्द्रः कमलायताक्षौ——कमले इव आयते प्रसन्ने अक्षिणी ययोस्तौ तथोक्तौ——बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्——रामलक्ष्मणौ करेण धृत्वा गृहीत्वा शिशू बालौ रक्ष्याविति वदन् अवसन्नः गद्गदः कण्ठः कण्ठस्वरो यस्य स तथोक्तः । कण्ठशब्देन कण्ठस्वरो लक्ष्यते । अत एव साश्रुः सबाष्पः मुनीन्द्राय कौशिकाय ददौ दत्तवान् । किमर्थम् । शुश्रूषणाय सेवायै——क्रियार्थोपपदस्येति चतुर्थी——उपजातिर्वृत्तम् ॥ २-७२ ॥

(प्रद्यो-२-७३) **अङ्कद्वयमिति ।** स विश्वामित्रः हृष्टः सन् तौ रामलक्ष्मणौ अङ्क-द्वयमधिरोप्य अग्रे पुरतः [32]गद्गदकण्ठं हीनस्वरं नृपं दृष्ट्वा प्रियं कर्ता प्रियं [33]करिष्णुः ——अपलितः पलितो भविता पलितंभविष्णुः तम्——कर्तरि भुवः खिष्णुच्——खुकञौ (३-२-५७) इति खिष्णुच्——अर्हद्विषदित्यादिना मुम् । पलितं जरसा शौक्ल्यं केशानां विस्रसा जरेत्यमरः——तत्र पलितवानपि पलित इत्युच्यते——पुत्रवियोगदीनाम्——पुत्रयोः

विश्लेषेण कृपणम् आश्वासयत् आश्वासयामास श्वस प्राणने इत्यस्मात् णिजन्तात् लङ्। उपजातिर्वृत्तम् ॥ २-७३ ॥

(प्रद्यो-२-७४) किमित्यत आह--**परिदेवनेनेति।** हे नरदेव मनुजाधिप ईदृशा ईदृग्विधेन परिदेवनेन विलापेन दुःखेन--विलापः परिदेवनमित्यमरः--हृदयं न विदाहय न परितापय। दह भस्मीकरणे इत्यस्मात् (णिजन्तात्) लोट्। वृथैव व्यर्थमेव मा तमः तान्तो न भव--तमु ग्लानावित्यस्मात् णिचि माङि लुङ इति लुङ। न माङयोगे इत्यडागमाभावः। तमस्तिमिरं कदापि जात्वपि भास्करं न पिदधाति न तिरोदधाति। अरिगणः शत्रुसमूहः तव आत्मजौ तव पुत्रौ न तिरस्करोति न परिभवति। मञ्जुभाषिणी वृत्तम्। सजसा जगौ भवति मञ्जुभाषिणी इति लक्षणात् (वृत्तरत्नाकरे) ॥ २-७४ ॥

(प्रद्यो-२-७५) **राघवाविति।** मया उपदिष्टानि दत्तानि बलातिबलादीनि महास्त्राणि दिव्यास्त्राणि ययोस्तौ तौ राघवौ प्राप्य रणेषु युद्धेषु राक्षसाः किमु विदध्युः किं कुर्युः। केवलं राघवौ प्राप्य किंचिदपि कर्तु न शक्ताः। प्रत्युत स्वयमेव नश्यन्ति। किं पुनः मदुपदिष्टमहास्त्रौ इति भावः। तत्र दृष्टान्तमाह--उज्ज्वलितम् उदर्चिषमग्निम् उदर्कमर्कम्--उद् अधिकम् अर्कयति तापयतीत्युदर्कः--तम् अर्कम् भास्करम् उपदीपाः समीपदीपाः--उपदीका इति पाठे जन्तुविशेषाः--ते च वल्मीककारिणः --ऊर्ज वहेत गं तरसं पृथिव्या, उपदीका यद् वल्मीकम् इति [34]श्रुतिदर्शनात्--किंनु कर्तु किं वा कर्तुम् उपयन्ति प्राप्नुवन्ति। प्राप्य किमपि न कुर्वन्ति। प्रत्युत दीपा निष्प्रभा भवन्ति। उपदीकास्तु स्वयमेव नश्यन्तीत्यर्थः। स्वागता वृत्तम् ॥ २-७५ ॥

(प्रद्यो-२-७६) **मा भैषीरिति।** हे महीश राजन् मा भैषीः न बिभीहि। ञि भी भये इत्यस्मात् लुङ। मनसि मा चिचिन्तः चिन्तां न कुरु। चिति स्मृत्यामित्यस्मात् लुङ। अयं सन्तानः तव ते अपत्यम्--सन्तानः सन्ततौ गोत्रे, स्यादपत्ये सुरद्रुमे इत्यमरः--त्रयाणां भुवनानां समाहारस्त्रिभुवनम्। तद्धितार्थेत्यादिना समासः। पात्रादित्वात् स्त्रीत्वप्रतिषेधः। नपुंसकत्वम्। तस्य त्रिभुवनस्य रक्षकः। वायुर्देवता अस्येति वायव्यम्। वायुवृतुपित्रुषसो यत् (४-२-३१) इति यत्। तत् आदिर्येषां तानि वायव्यादीनि अखिलानि महास्त्राणि। तैर्वित्तः प्रसिद्धः वायव्याद्यखिलमहास्त्रचुञ्चुः। तेन वित्तश्चुञ्चुप्चणपौ (५-२-२६) इति चुञ्चुप् प्रत्ययः। अस्मै रामाय --श्लाघह्नुङस्थाशपां ज्ञीप्स्यमान इति चतुर्थी। कोऽपि कश्चिदप्याततायी शस्त्रपाणिः --अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहौ चैव षडेते आततायिनः ॥

इति (शुक्रनीतौ—३-४२) । युधि मा स्थित न तिष्ठताम्—आत्मानं न प्रकाशये-दित्यर्थः—तिष्ठतेर्लुङ । प्रकाशनस्थेयाख्ययोश्चेति आत्मनेपदम् । न माङयोगे इत्यड-भावः । प्रहर्षिणी वृत्तम् ।। २-७६ ।।

(प्रद्यो-२-७७) **इत्युक्त्वेति ।** मुनिः कौशिको विश्वामित्रः इति उक्तप्रकारेण उक्त्वा हस्ताभ्यां तौ रामलक्ष्मणावावलम्ब्य आदाय सरभसं सवेगं यथा भवति तथा आसनात् कुशासनात् उदस्थात् उत्थितवान् । उदोऽनूर्ध्वकर्मणि इति ऊर्ध्वकर्मणि (आत्मनेपदप्रतिषेधात्) परस्मैपदम् । नरपतिर्दशरथः आद्वारं द्वारपर्यन्तम्—आङ् मर्यादायाम्—अन्वितः अनुगतः कुमारौ आश्लिष्य आलिङ्ग्य उदश्रुः उद्बाष्पः सन् आप्तवर्गैः सुहृद्गणैः सह न्यवृनत् निवृत्तवान् ।। २-७७ ।।

(प्रद्यो-२-७८) **प्रत्यावृत्त इति ।** (प्रार्चितः पूजितः अर्थो येन सः) यद्वा [35]प्रार्थितः अन्तर्हितः अर्थो विश्वामित्ररूपो यस्य सः । प्रार्थितो याचिते शत्रुसंरुद्धेऽन्तर्हितेऽपि च इति विश्वः । रामलक्ष्मणसमेतं विश्वामित्रं यावदक्षिगोचरं दृष्ट्वा प्रत्यावृत्तः निवृत्तः पार्थिवो राजा कौसल्यायाः कल्याणसौधं मङ्गलराजसदनं प्राप्य—सौधोऽस्त्री राजसदनम् इत्यमरः—पर्यङ्कस्थः शयनस्थितः—शयनं मञ्चपर्यङ्केत्यादिरमरः—हा हा राम—हा हा खेदे हू हू हर्षे गन्धर्वेऽमू त्वनव्ययौ इति विश्वः—हा लक्ष्मण क्व स्थः क्व भवथः इति एवंप्रकारेण कष्टं दैन्यं यथा भवति तथा पर्यदेविष्ट व्यलापीत् । देवृ देवने इत्यस्मात् लुङ । शालिनी वृत्तम् । शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः इति लक्षणात् (वृत्तरत्नाकरे) ।। २-७८ ।।

(प्रद्यो-२-७९) **विश्वामित्रमिति ।** अनेके बहवः पौराः पुरि भवाः लोकाः—राजपुत्राभ्यां रामलक्ष्मणाभ्याम् अनुयातम् अनुगतं विश्वामित्रम्—मित्रे चर्षौ इति मित्रशब्दे परे विश्वशब्दस्य दीर्घः । पण्यवीथीषु विपणिषु—विपणिः पण्यवीथिकेत्यमरः—वीक्ष्य आलोक्य गर्हं गर्हं मुहुर्मुहुर्निन्दित्वा—आभीक्ष्ण्ये णमुल्—वीप्सायां द्विर्भावः राम एव चन्द्रस्तस्यावलोकनात् स्फाराणि भद्राणि मनोहराणि चक्षूंष्येव चकोराः येषां ते तथोक्ताः आसन् अभवन् । अस्तेर्लङ । स्फारं भद्रं बृहद् व्यूढमिति वैजयन्ती । शालिनी वृत्तम् ।। २-७९ ।।

(प्रद्यो-२-८०) **पुञ्जिताश्चेति ।** पौराः पुरवीथिषु पुञ्जिताः पुञ्जीकृताः—तत्र संघीभूता इत्यर्थः—पुञ्जशब्दात् तत्करोतीति ण्यन्तात् कर्मणि क्तः । तस्य रामस्य रमणीयानां गुणानाम् औदार्यादिगुणानाम् ओघैः समूहैः रञ्जिताः अनुरञ्जिताः—पौरा इति पूर्वेणान्वयः—जनाः अञ्जनेनाक्ताभ्यां नयनाभ्याम् अञ्चितौ पूजितौ शोभितौ

कर्णौ श्रवणौ यस्य तं तथोक्तम् सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भवेत् । लोचने तेन भवतः सुस्निग्धघनपक्ष्मणी ।। . . . . मनोज्ञे सूक्ष्मदर्शने ।। इति यद्यपि वैद्यशास्त्रे नित्यमञ्जनधारणं व्यधायि, तथापि मधुमासांञ्जनोच्छिष्टशुक्तास्त्रीप्राणिहिंसनम् इत्यादिना योगीश्वरेण उपनीतत्रैवर्णिकद्विजातेरिति अक्ष्णामञ्जनस्य निषिद्धत्वाच्च उपनयनात् प्राक् अञ्जनाक्तनयनत्वमित्यनुसन्धेयम् ।। अञ्जनवर्ण अञ्जनश्यामम् । तं रामं ददृशुः । स्वागता ।। २-८० ।।

(प्रद्यो-२-८१) **राम एष इति ।** इह अस्मिन् लोके एष रामः रमणीयगुणाढ्यः मोहनगुणसंपन्नः । लक्ष्मण इति नाम यस्य स लक्ष्मणनामा लक्ष्मणानि पद्मरेखादि-शुभचिह्नानि तैराढ्यः । ताविमौ रामलक्ष्मणौ एष नृपतिः विमोक्तुं नार्हति इत्येवं जनता जनसमूहः—ग्रामजनबन्धुभ्यस्तल्—विजगर्हे निनिन्द । गर्ह कुत्सायाम् इत्य-स्मात् लिट् । स्वागता वृत्तम् ।। २-८१ ।।

(प्रद्यो-२-८२) **कन्दमूलेति ।** मण्डलेशशिशुः भूम्येकदेशभर्तुः सूनुः भूम्येकदे-शभर्ता यः स भवेन्मण्डलेश्वरः । देशे ग्रामसमूहः स्याद् बहुदेशस्तु मण्डलः ।। इति प्रतापमार्तण्डः । कन्दाः सूरणाद्याः । मूलानि आर्द्रकादीनि फलानि च कन्दमूलफलम् । जातिरप्राणिनामित्येकवद्भावः । स नपुंसकम् इति नपुंसकत्वम् । कथं वा अत्तु अश्नातु । अद भक्षणे इत्यस्मात् लोट् । कन्दरासु दरीषु-वर्तमानमिति शेषः—अम्बु कथं वा पिबेत् । पिबतेर्लिङ् । स्थण्डिले भुवि अनास्तृतप्रदेशे—चूतवृक्ष इत्यादिवत् स्थण्डि-लभूशब्दयोः सामान्यविशेषभावात् सहप्रयोगः । स्थण्डिलेषु विशयीत कथं वा इति वा पाठः । शयीत स्वप्यात् । शीङ् स्वप्ने इत्यस्मात् लिङ् । इति एवम् जनता अनुशिश्ये समशयिष्ट । स्वागता वृत्तम् ।। २-८२ ।।

(प्रद्यो-२-८३) **विग्रहायेति ।** विबुधारिभिः समम् सुरवैरिभिः सह—साकं सत्रा समं सहेत्यमरः—विग्रहाय विरोधाय मुनियज्ञघातिनां विश्वामित्राध्वरघातिनां निग्रहाय वधाय नरपतिना दशरथेन शिशुः कथं प्रेषितः । योषितः स्त्रियो वा किमिति न न्यषे-धिषुः न निषेधितवत्यः । षिध गत्यामित्यस्मात् लुङ् । रथोद्धता वृत्तम्, ।। २-८३ ।।

(प्रद्यो-२-८४) **इत्यगादिषुरिति ।** नागराः पौराः इति एवम् । अगादिषुः अवोचन् । गद व्यक्तायां वाचीत्यस्मात् लुङ् । अगाधमहिम्ने अपारसामर्थ्याय गाधिजाय कौशिकाय मुनये शपमानाः—मुनिमुपालभमानाः इत्यर्थः—श्लाघङ्हनुस्थाशपां ज्ञीप्स्य-मान इति संप्रदानत्वम् । रामक्ष्मणयोः गुणान् औदार्यादीन् [36]अववर्णन् वर्णयामासुः । नृपं दशरथम् अमन्दम् अधिकम् अनिन्दन् निन्दितवन्तः । स्वागता वृत्तम् ।। २-८४ ।।

(प्रद्यो-२-८५) **पुरजनगिर इति ।** पुराणमुनीश्वरः चिरन्तममुनिः शिखण्डकधारिणौ—बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डकः इति हलायुधः । उभौ क्षितिपतिसुतौ दाशरथी आदाय अवलम्ब्य पुरजनगिरः पौरजनवाचः श्रावं श्रावं श्रुत्वा श्रुत्वा—आभीक्ष्ण्ये णमुल्—रघुनगरतः रघुनगरात्—पञ्चम्यास्तसिल्—निर्गत्य निष्क्रम्य तयोः रामलक्ष्मणयोः हृद्ये हृदयस्य प्रिये—हृदयस्य प्रियः (४-४-९५) इति यत् प्रत्ययः । श्रमभयनुदौ श्रान्तिभीतिहरे बलातिबले बलातिबलाख्ये विद्ये सारवे पयसि—सरयूवां भवं सारवम्—देविकायां सरयूवां च भवे दाविकसारवौ इत्यमरः—दाण्डिनायनेत्यादिना साधुः—सारवे पयसि सरयूजले अदात् (विद्ये) दत्तवान् । तथा चोक्तं दशपटले—संगृह्य मन्त्रं शुद्धात्मा मन्त्रशुद्धाद् गुरोः शुचिः । साभिषेकं सुसंकल्प्य तदनुज्ञामवाप्य च ।। महोदधेस्तटेऽरण्ये यदि वाचलमस्तके । समुद्रगानदीतीरे सरस्युपवनेषु वा शिवस्य गेहे विष्णोर्वा यत्र वा रोचते मनः ।। इति । हरिणी वृत्तम् । रसयुगहयैः न्सौ म्रौ स्लौ गो यदा हरिणी तदा—इति (वृत्तरत्नाकरे) ।। २-८५ ।।

(प्रद्यो-२-८६) **बलया तयेति ।** बलया तया अतिबलया च कलया विद्यया हेतुना—कला शिल्पे कालभेदे इत्यमरः—उभौ सबलौ बलया सहितौ किमपि किंचिदपि नाश्रमताम् श्रान्तौ नाभूताम् । श्रुमु तपमि खेदे च इत्यस्मात् लुङ् । पदचारिणौ च पथि मार्गे न अक्लमताम् न मम्लतुः । क्लमु शोषणे इत्यस्मात् लुङ् । पवनेन वायुना किंचिदपि नातमताम् ग्लानौ नाभूताम्—तमु ग्लानौ इत्यस्मात् लुङ् । प्रमिताक्षरा वृत्तम् । प्रमिताक्षरा ससजैरुदिता इति लक्षणात् (वृत्तरत्नाकरे) ।। २-८६ ।।

(प्रद्यो-२-८७) **नाखिन्दातामिति ।** एतयोः रामलक्ष्मणयोः पादयुग्मे कर्तृणी न अखिन्दाताम् न खिन्ने । खिद दैन्ये इत्यस्मात् रौधादिकात् लङ् । कानने आनने मुखे कर्तृणी न अग्लासिष्टाम् ग्लाने नाभूताम् । ग्लै हर्षक्षये इत्यस्मात् लुङ् । अध्वनि मार्गे क्षुत्पिपासे क्षुत्तृष्णे नाबाधेताम् नापीडयताम् । रामलक्ष्मणौ (कर्मणी) इति शेषः । मानसे मनसि आलस्यं वा अलसत्वं च न व्यानशे न व्याप्नोति स्म । अशू व्याप्तावित्यस्मात् लिट् । बलया अतिबलया च हेतुना इति भावः । अत्र श्रीरामायणम्—क्षुत्पिपासे न ते राम भविष्येते नरोत्तम । बलामतिबलां चैव पठतः पथि राघव ।। इति । (बाल-२२-१६) । शालिनी वृत्तम् ।। २-८७ ।।

(प्रद्यो-२-८८) **अथ ताटकयेति ।** अथ अनन्तरम् रामलक्ष्मणौ ताटकया मारीचमात्रा खिलीकृताम्—अखिलां खिलां संपद्यमानां कृताम् खिलीकृताम्—खिलं [37]प्रतिहतं स्थानम् इति हलायुधः—अटवीमरण्यं प्राप्य धन्वनी धनुषी अधिरोप्य अधिज्ये

कृत्वा च ज्ययोः मौर्व्योः—मौर्वी ज्या शिञ्जिनी गुण इत्यमरः—आरवैः ध्वनिभिः दिशः आशाः बधिराश्चक्रतुः । वैतालीयं वृत्तम् ।। २-८८ ।।

(प्रद्यो-२-८९) **ज्यानादमिति ।** सुकेतोः दुहिता सुता मारीचमाता ताटकाख्या राक्षसी नरेन्द्रसून्वोर्दाशरथ्योः रामलक्ष्मणयोः ज्यानादं गुणध्वनिम् आकर्ण्य श्रुत्वा अट्टहासैः वनं काननम् आनादयन्ती ध्वनयन्ती अध्वनि मार्गे आविर्बभूव प्रादुरासीत् ।। इन्द्रवज्रा वृत्तम् ।। २-८९ ।।

(प्रद्यो-२-९०) **कङ्कालमैभमिति ।** ऐभं गजसंबन्धि कङ्कालं शरीरास्थि—स्यात् शरीरास्थि कङ्कालमित्यमरः—करेण दधती दधाना कालरात्रिप्रतिमा—कालरात्रिः संहाररात्रिः प्रतिमा उपमानं यस्याः सा खम् आकाशमश्नुवाना व्याप्नुवाना तापसानां तपस्विनाम्—तपस्वी तापस इत्यमरः—चेतसि मनसि शङ्काकरी भयंकरी काली भीषणा राक्षसी तं कुमारम् कालिकेव मेघमालेव अभ्यपतत् । कालिका योगिनीभेदे कार्ष्ण्ये गौर्यां घनावली इति विश्वः । इन्द्रवज्रा वृत्तम् ।। २-९० ।।

(प्रद्यो-२-९१) **जहि जहीति ।** हे वत्स राम स्त्री न वध्येति शङ्का न कार्या । आततायित्वादियं राक्षसी वधमर्हतीति आदौ तावद् वधमेव विधत्ते जहि जहीति । हे वत्स ताटकां लघु क्षिप्रं जहि हन्याः । [38]चापले द्वे भवतः (८-१-१२ सूत्रवृत्तिः काशिका दृश्यताम्) इति वक्तव्यत्वात् द्विर्भावः । संभ्रमेण प्रवृत्तिश्चापलम् । हन्तेर्लोट् । मध्यमपुरुषैकवचनम् । विलम्बनं प्रत्याह—हे तात अनुकम्प्य—तातोऽनुकम्प्ये इति विश्वः—क्षिप्रं ताडय ताडय ताडनं कुरु—पूर्ववद् द्विर्भावः—तड आघाते इत्यस्मात् चौरादिकात् लोट्—आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन ।। इति मनुस्मरणात् इति भावः । हे रघूनरपालनन्दन रघुराजपुत्र कृपालय कृपानिधे इह अस्मिन्नवसरे शरणागतान् अस्मान् पालय पालय रक्ष रक्ष—अन्यथा शरणागतोपेक्षा दोषः दण्ड्यादण्डनदोषश्च भवेतामिति भावः—स रामः इति उक्तप्रकारेणोक्तवन्तं गुरुं विश्वामित्रमभिवाद्य प्रणम्य घृणां कृपां जुगुप्सां च—घृणा जुगुप्साकृपयोरिति विश्वः—अपहाय त्यक्त्वा उरसि उरु गाढम् [39]अतिगाढं बाणं निखाय प्रहृत्य उग्रराक्षसीं भयंकरयातुधानीं क्षणादेव अपातयत् पातयामास । पत्लृ गतावित्यस्मात् (णिजन्तात्) लङ् । . . . . . [40]चम्पकपुष्पमालिका वृत्तम् । (न-ज-भ-ज-जा-ज-रा-वभिवदन्ति हि चम्पकपुष्पमालिकाम्) इति [41]लक्षणात् ।। २-९१ ।।

(प्रद्यो-२-९२) **रघुपतीति।** अधिक्षेपणध्वनिना तिरस्कारध्वनिना—असह्यध्वनिनेत्यर्थः—जडिताः[42] स्तब्धीकृताः दिश एव दिशाः—आपं चैव हलन्तानां यथा वाचा निशा दिशा इति वचनात् टाबन्तत्वम्—तासां दिशानां निलिम्पाः देवाः—तेषामीशाः इन्द्रादिलोकपालकाः—तेषां कम्पः चलनम् यस्य तस्मिन् (अधिक्षेपणध्वनिजडितदिशानिलिम्पेशकम्पे रक्षसि)—दलितवक्षसि—दलितं विदारितं वक्षः उरः यस्य तस्मिन्—उग्ररक्षसि उग्रं भयंकरं रक्षः (राक्षसी) तस्मिन्—ताटकायामित्यर्थः—पतति सति—रघुपतिशरघातनिर्घातनिर्घोषनिर्घट्टिता—रघुपतेः रामस्य शरस्य सायकस्य घातेन अभिहननेन (यो) निर्घातवत् निर्घोषः ध्वनिः तेन निर्घट्टिता संघट्टिता—भयचकितकुरङ्गसारङ्गमातङ्गसंघाकुला—भयेन चकितानां विह्वलानां कुरङ्गणां हरिणानां सारङ्गाणां चातकानां मातङ्गानां गजानां संघाः समूहाः—तैराकुला व्याकुला तथोक्ता—मृगे कुरङ्गेत्यादिरमरः—सारङ्गश्चातके इति विश्वः—गजेऽपि नागमातङ्गावित्यमरः—(तथोक्ता) भूः भूमिः चकम्पे कम्पितवती। कम्प चलने इत्यस्मात् लिट्। वेणुपत्रवृत्तम्। [43]वसुगणगुणसिन्धुविच्छेदयुग्भिर्नयुग्माब्धिरैः प्रकथितमिव वेणुपत्राख्यमेतत्सुधीभिः परम् इति लक्षणात्। (सिंहविक्रीडितमिति वृत्तरत्नाकरे) ॥ २-९२ ॥

(प्रद्यो-२-९३) **अनिमिषवृन्दमिति।** सुरसंघः अमन्दरवम् अधिकध्वनिम् दुन्दुभिं भेरीम्—भेरी स्त्री दुन्दुभिः पुमानित्यमरः—उद्धतम् अधिकम् अध्वनयत्। अवादयत्। ध्वन शब्दे इत्यस्मात् (णिजन्तात्) लङ्। इन्दुमतीसुतनन्दनमूर्धनि—इन्दुमतीसुतो दशरथः—तस्य नन्दनो रामः तस्य शिरसि—विभाषा ङिश्योरिति विकल्पादल्लोपाभावः—नन्दनो हर्षके सुते इत्यमरः—नन्दनपुष्पततीः इन्द्रोद्यानपुष्पवर्षाणि निरमुचत् अवर्षत्। मुञ्चतेर्लुङ्। लृदित्वादङ्। मुनयः विश्वामित्रादयः हे राम गुणैः शौर्यादिभिः अभिराम मनोहर विरोधिविराम शत्रूणां विनाशक जय जय सर्वोत्कर्षेण वर्तस्व। चापले द्वे भवत इति वक्तव्याद् द्विर्भावः—जयतेर्लोट्। रघूपालक रघुणां रक्षक निरामयतां निर्गदत्वम्—आरोग्यमित्यर्थः—रोगव्याधिगदामया इत्यमरः—भज प्राप्नुहि। हे बालक वत्स जीव चिराय आयुषा वर्धस्व—जीव प्राणधारणे इत्यस्मात् लोट्। जय प्रतिपक्षान् अभिभव इति एवं रामम् अन्वनयन् (मुनयः) विश्वामित्रादयः (वृत्तं हंसगतिरिति हेमचन्द्रः) ॥ २-९३ ॥

(प्रद्यो-२-९४) **तत इति।** ताटकायाम् अरण्ये वने हतायां सत्यां ततः अनन्तरं सर्वे मुनीन्द्राः—शरण्यस्य शरणे रक्षणे साधुः शरण्यः—शरणं रक्षणे गृहे इति विश्वः—तस्य रामस्य कृताशीःसहस्राः कृतानामाशिषां सहस्राणि यैस्ते तथोक्ताः सन्तः—

उदस्राम्बुपूरैः उद्गतानि अस्राणि आनन्दबाष्पाः—त एव पूराः तीर्थोदकप्रवाहाः—तैः सर्वलोकानाम् एकवीरस्य योग्यमभिषेकम् व्यधुः अकार्षुः। दधातेर्लुङ्। भुजंगप्रयातं वृत्तम् ॥ २-९४ ॥

(प्रद्यो-२-९५) **साकेतेति।** साकेतवीथिषु अयोध्यामार्गेषु—साकेतं स्यादयोध्यायामिति यादवः—वीथ्यालिरावलित्यिमरः—शिशुरित्युदीर्णः उदीरितः स रामभद्रः सुकेतोरपत्यं स्त्री सौकेतवी तां ताटकाम् [44]अभिनिहत्य हत्वा (भुवनत्रयरक्षिता रक्षकः आसीदिति) देवैरमरैः सुमनसां प्रकरेण पुष्पपूगेन—स्त्रियः सुमनसः पुष्पमित्यमरः—अपूजि पूजयतेः कर्मणि लुङ्। भूमिदेवैः अग्रजन्मभिः—द्विजात्यग्रजन्मेत्यादिरमरः—रामभद्रः भुवनत्रयरक्षिता आसीदिति अभाणि॥ वसन्ततिलका वृत्तम् ॥ २-९५ ॥

(प्रद्यो-२-९६) [45]**त्राता य एक** इति। मुनिः कौशिकः यो राम एकः जगतां लोकाना त्राता रक्षकः—कर्तृकर्मणोः कृतीति कर्मणि षष्ठी—नद्यां सरिति स्नाताय स्नातवते सलक्ष्मणाय अमुष्मै अस्मै रामाय—कर्मणा यमभिप्रैतीत्यादिना संप्रदानत्वम्—अस्त्रशास्त्रं प्रादत्त दत्तवान्। स रामः जृम्भकास्त्रणि जृम्भकाख्यानि अस्त्राणि प्रत्यक्षमपरोक्षमैक्षिष्ट दृष्टवान्। इन्द्रवज्रा वृत्तम् ॥ २-९६ ॥

(प्रद्यो-२-९७) **सरहस्येति।** सहरस्यं रहस्यशास्त्रसहितं यथा भवति तथा जृम्भककलापस्य जृम्भकाख्यस्यास्त्रसमूहस्य भरेण भरितौ भारवन्तौ रामलक्ष्मणौ यस्य सः तथोक्तः ऋषिः विश्वामित्रः शनैर्मन्दं कामवनम् मन्मथवनम्—यत्र वने कामो रुद्रेण भस्मीकृतः इत्यर्थः—उपजगाम प्राप। तत्र आश्रमे रात्रिमत्यवाहयत् अनयत्। अतिपूर्वाद् वहेर्लङ् णिजन्तात् ॥ उद्गता वृत्तम् ॥ २-९७ ॥

(प्रद्यो-२-९८) **सिद्धाश्रममिति।** ततः अनन्तरं प्रभाते उषसि सिद्धाः तपोमन्त्रादिसिद्धाः विश्वामित्ररामलक्ष्मणाः सिद्धाश्रमं कौशिकाश्रमं प्राप्य अध्वनो अध्वगमनात् जातं श्रमं श्रान्ति तत्यजुः त्यक्तवन्तः। कुमारयोर्यानाद् आगमनात् कृतकार्यसिद्धेः निष्पन्नप्रयोजनस्य कौशिकस्य ईषदल्पोऽपि श्रमो नासीत्। उपजातिः वृत्तम् ॥ २-९८ ॥

(प्रद्यो-२-९९) **संबभ्रिरे** इति। यज्ञमध्वरमर्हन्तीति यज्ञियानि—तत्कर्मार्हं तु यज्ञियमित्यमरः—यज्ञर्त्विग्भ्याम् घखञौ इति घः। स्रुवप्रभृतीनि यज्ञियानि च तानि साधनानि च तथोक्तानि—संभारजातानि—सिकतादिसमूहान्—दशायुधानि स्रुवप्रभृतीनि प्रसिद्धानि—संबभ्रिरे संभृतानि (शिष्यैः)। मुनीन्द्रः पुण्ये अह्नि शोभने दिने महतां प्रधानानाम् ऋत्विजाम्—अध्वर्युप्रभृतीनां चतुर्णामित्यर्थः—वरणं कृत्वा

. . . . . यज्ञक्रतवे—क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति चतुर्थी—अत्र [46]भट्टभास्करेण यज्ञक्रतुना अग्निष्टोमादिनेति व्याख्यातम्—दिदीक्षे। दीक्षणीयेष्टि कर्तु—वाससा दीक्षयतीति वर्तमानत्वात्—वासांसि कृष्णाजिनादीनि धृतवान् (इत्यर्थः)। इन्द्रवज्रा वृत्तम् ॥ २-९९ ॥

(प्रद्यो-२-१००) **रक्षार्थमिति।** मौनी वाचंयमो मुनिः, विश्वामित्रः रक्षार्थं यज्ञस्य रघुवीरौ रघुश्रेष्ठौ रामलक्ष्मणौ आदिश्य आज्ञाप्य मखं क्रतुमपि अविघ्नम् अनन्तरायं मेने अमंस्त—विघ्नोन्तराय इत्यादिरमरः—द्वौ तौ रामलक्ष्मणो अधियज्ञ-वाटम् यज्ञशालायाम्—विभक्त्यर्थेऽव्ययीभावः सव्या पसव्यक्रमणयोः दक्षिणवामयोः अप्रमत्तौ अवहितौ भ्रेमतुः चेरतुः। इन्द्रावज्रा वृत्तम् ॥ २-१०० ॥

(प्रद्यो-२-१०१) **प्रवृत्ते ततः** इति। ततः अनन्तरं सप्ततन्तौ क्रतौ—सप्त-तन्तुर्मखः क्रतुरित्यमरः—प्रवृत्ते प्रवर्तमाने सति सुबाहुं पुरस्कृत्य अग्रे कृत्वा मारीचः मुख्यः आदिर्येषां ते तथोक्ताः पलाशाः राक्षसाः—पलाशः किंशुके शट्यां हरिते राक्षसेऽपि चेति विश्वः—समन्तात् सर्वतः—यागभूमेरित्यर्थः—असृग्वृष्टिं रुधिरवर्षम् उत्सृष्टवन्तः त्यक्तवन्तः। क्षुरप्रैः बाणविशेषैः अर्थात् चन्द्राकृतिभिः अतिदीप्राः अत्यन्तं प्रकाशमानाः—निशि रात्रौ प्रादुरासन् प्रादुरभवन्। भुजंगप्रयातं वृत्तम् ॥ २-१०१ ॥

(प्रद्यो-२-१०२) **वसारुधिरेति।** अमर्षः क्रोधः एषामस्तीति ते अमर्षिणः तैः। वसां हृन्मेदसं रुधिरं च वर्षन्तीति ते तथोक्ताः तैः। भीषणैः रजनीचरैः रात्रिचरैः राक्षसैः—यज्ञवाटो यज्ञशाला-तत्र वर्तते इति तथोक्तो जनो लोकः अधर्षि धर्षितः। ऋत्विजां गणस्तु तत्र जुहूम् उपभृतम् ध्रुवां स्रुवं स्रुचं च . . . . . त्यजन् विसृजन् त्रुटितो विच्छिन्नः वर्गः संघातो यथा भवति तथा व्यलीयत विलीनः पलायत (च) अधावत् (च)। पृथ्वी वृत्तम् ॥ २-१०२ ॥

(प्रद्यो-२-१०३) **वायव्येति।** अम्बुदाभो मेघकान्तिः रघुपतिः रामः सुन्दस्या-पत्यं पुमान् सौन्दिः—अत इञ्—मारीचः तम्—वायुर्देवता अस्येति वायव्यम् तच्च तदस्त्रं च—तेन अम्बुधौ उदधौ अधुनात्—अपातयत्। धूञ् कम्पने इत्यस्मात् लङ्। लक्ष्मणोऽपि प्रोद्यद्बाहुं सुबाहुनामानं रजनिचरैः सह अक्षिणोत् निहतवान्। क्षि हिंसायामित्यस्मात् लङ्। अनिमिषाः देवाः आकाशात् पुष्पवृष्टिं मुमुचुः ववर्षुः। मुञ्चतेर्लिट्। कृष्टिवर्गाः सूरिगणाः—धीमान् सूरिः कृती कृष्टिः लब्धवर्णो विचक्षणः इत्यमरः—तुष्टुवुः स्तुतवन्तः—रामलक्ष्मणाविति शेषः—ष्टुञ् स्तुतावित्यस्मात् लिट्

--अविहतम् अकुण्ठितं हविः होतव्यं यस्मिन् तस्मिन् अविहतहविषि सप्ततन्तौ संपूर्णे समाप्ते सति महर्षिः कौशिकः हर्षं सन्तोषं प्राप । स्रग्धरा वृत्तम् । म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमिति लक्षणात् ।। २-१०३ ।।

श्रीमन्मायिमहासुधीतनुभुवः श्रीचौण्डिसूरेः कृता-
बज्ञानां हृदयान्धकारदलनात् प्रद्योतनीनामनि ।
भूमौ भास्वदुदारराघवमहाकाव्यस्य नित्योल्लसद्-
व्याख्याने विदुषां मनोहरतमः सर्गो द्वितीयोऽगमत् ।।

इति [47]उदारराघवे महाकाव्ये द्वितीयस्य सर्गस्य
टीका प्रद्योतनी समाप्ता ।

(इति शम्)

NOTES TO PRADYOTANĪ—Canto II

[1] MS. 2 reads: *vaiśyasya tapasvisūnoḥ*. MSS. 7 & 8 read *vaiśyatapasvi-sūnoḥ*. See also the verse I. 80.

[2] In the V. R. it is not Vasiṣṭha that narrates the story of *Ṛṣya-śṛṅga* (but Sūta). See V. R. I. 9.

[3] Ms.2 reads: *Kliśnantam*. MSS. 7 & 8 read *kliṣṭam*.

[4] MSS. read: *mā khinthāḥ* (with nasal), which may be taken as: *mā akhintāḥ* (in *laṅ*—Imperative). If it is to be *luṅ* (Aorist) because of *māṅi luṅ* (3. 3. 175), then—it must be: *mā khitthāḥ*, without the nasal, as the *vikaraṇa-pratyaya*: *śnam* is not applicable in the *luṅ*. See Nāgeśa on *mā bhukthāḥ* (in *Uddoyta* on *Sthāne'ntaratamaḥ* (Vol. I, page 419; N. S. P. Edn.). Some writers do not seem to follow the recording of *māṅi luṅ*.

[5] Bombay edn. of the *Udārarāhgava* reads: Lomapādaḥ. The MSS. I collated read Romapādaḥ.

[6] Regarding this usage (*varṣṭāram*) and the absence of the *iṭ* (*āgama* therein, see the *Sāhityakaṇṭakoddhāra*, p. 53, and my Note 205. Publ. by Motilal Banarsidass, Delhi, 1980).

[7] MSS. read *tutoṣa*. It is obviously due to confusion of the scribe. It must be *tuṣṭāva*, from *ṣṭuñ stutau*.

[8] Bombay edn. reads: *pravavṛdhire*. The MSS. I collated read: *pravavṛtire*.

[9] Bombay edn. reads: *bhindānam*, instead of *dhunvānam* of these MSS.

[10] [11] Note: This reference to the dream of the *Caturviṣāṇa-gaja* of Vasiṣṭha was not seen by me elsewhere. It may be a poetic invention of our author making use of a similar reference occurring (twice) in the *svapna* of Trijaṭā in the *Vālmīki-rāmāyaṇa* thus:

> Rāghavaś ca punar dṛṣṭaś *caturdantaṃ mahāgajam*,
> *ārūḍhaḥ śailasaṃkāśaṃ cacāra sahalakṣmaṇaḥ*.

and again.

> *Kṣīrodadhijale madhye śvetaḥ śailaḥ samutthitaḥ*,
> *Tasya mūrdhni tataḥ śvetaścaturdanto mahāgajaḥ*.
> *Tasya pṛṣṭhe sthitaḥ śrīmān rāmo rājīvalocanaḥ*,
> (Both in *Sundarakāṇḍa*; Chapter 27, vv. 11 & 19)

[12] Bombay edn. reads: *vyācaṣṭe* in the present tense form.

[13] Bombay edn. reads: *sāṃgrahiṇyā* (with "i") after "h". See M. M. Chinnaswami śastri's *Yajñatattvaprakāśa* (1953), p. 116. The reading in the MSS. I collated and according to the *Yajñatattvaprakāśa* is and should be as: *sāṃgrahaṇyā* (with "a", and not "i").

[14] For the *Citrā-nakṣatra* and other details about the *Aśvamedha*, see the *Yajñatattva-prakāśa*, p. 116.

[15] Bombay edn. reads: *haris tirodadhe* for *harau tirohite* of the MSS. I collated.

[16] Printed edn. of the *Śāśvata-kośa* has a slightly different reading here.

[17] Bombay edn. reads: *sāścaryāḥ* instead of *sāś caryam* of these MSS.

[18] Division and giving of the *caru* (i.e. *pāyasānna;* see *Raghu.* X.54, and Mallinātha thereon) into 4 equal parts is not recorded in the V. R. (I. 16) according to which the distribution is as follows: Kausalyā got one ½; ¼ was given first to Sumitrā; of the remaining ¼ one half (i. e. ⅛) was given to Kaikeyi, and the remaining one-eighth was given again to Sumitrā. Kālidāsa and Bhoja too have the different distribution from that of the V. R. Mallinātha points out these facts in his Commentary on the *Raghuvaṃśa* X. 56, and Rāmacandra Budhendra echoes it in his Commentary on the *Campū-rāmāyaṇa* (on *Kausalyāyai prathamam adiśat* etc.). Cauṇḍasūri also is echoing Mallinātha's comments. Why Kālidāsa, Bhoja and Bhaṭṭamalla are not following the accounts of the V. R., but are depending on the *Nārasiṃha-purāṇa* is not clear.

[19] On the root: *ṣu prasavaiśvaryayoḥ* (*Bhvādi*) Bhaṭṭoji notes thus: *prasavaḥ = abhyanujñānam*, which is further explained by *Bālamanoramā* as: *atra prasava-śabdasya garbhamocanatvabhramaṃ vārayati—prasavo'bhyanujñānam iti.* Thus according to Bhaṭṭoji this root (i. e. *ṣu prasavaiśvaryayoḥ*) cannot be used in the sense of giving birth to a child. Bhaṭṭamalla too in his *Ākhyāta-candrikā* says: *prasūyate prasūte ca garbhamokṣe vijāyate;* and *savatīti padaṃ dhātoh prasavaiśvaryayor gatau.* The usage of *suṣāva* here seems to be inconsistant with his own statements in the *Ākhyāta-candrikā.*

[20] *Caraka-saṃhitā* has some details about the *Rakṣā-vidhāna*, p. 349; N. S. P. edn.; Bāṇa's *Kādambarī* has some very nice descriptions of the *Sūtikāgṛha* regarding similar protective measures in the context of the birth of Candrāpīḍa.

[21] For a discussion on: *āśitaḥ* see the *Bālamanoramā* and the *Tattvabodhinī* on the rule: *āśitaḥ kartā* (6. 1. 207).

[22] I am unable to trace the source.

[23] Printed edn. of the *Vaijayantī* (V. V. R. & S.) has a slightly different reading here.

[23a] That the sage Viśvāmitra was the discoverer of the Gāyatrī is a well-known fact from the tradition. During the daily *Sandhyā-vandana*, mentioning the triple reference—to *Ṛṣi*, *Chandas* and *Devatā*—, sage Viśvāmitra is noted as the *Ṛṣi* = Draṣṭā of the Gāyatrī. See this:

Viśvāmitras tu gāyatryāḥ ṛṣiś Chandaḥ svayaṃ smṛtam,
Savitā devatā caiva etc. (attributed to Pitāmaha).

In a modern-day movie (where Viśvāmitra is acted by Śivāji Gaṇeśan is Rājarṣi) the sage is portrayed as having received the revelation of the Gāyatrī, from Lord Śiva as a result of the great *tapas* of the sage. But it is not clear what was the source for this point, Śākalya Malla and his Commentator clearly mention that the Sage obtained (the revelation of) the Gāyatrī from Brahmā, the CREATOR (Of course it must have been as a result of his penances). The popular belief created by the Movies may not be dependable, always.

[24] See the Commentary on verse 2. 17.

[25] The *Vālmīki-Rāmāyaṇa* has the following:
jyeṣṭho bhrātā pitā vāpi yaś ca vidyāṃ prayacchati,

trayas te pitaro jñeyā dharme ca pathi vartinaḥ
yavīyān ātmanaḥ putraḥ śiṣyaś cāpi guṇoditaḥ,
putravat te trayaś cintyā dharmaś caivātra kāraṇam.
V. R. Kiṣkindhā 18. vv. 13. & 14)

[26] This is a new approach. See also Mallinātha's comments on: *trilokanātha* Kumāra, V. 77, where he takes the compound by the rule: *Taddhitārtha-etc.* as a case of *uttarapada-samāsa.*

[27] Bombay edn. reads: *santāno'mbudhipayasīva pārijātaḥ.* Instead of this straightforward reading, the MSS. I collated read: *santāne turipayasīva pārijātaḥ.* The Commentary also explains as: *turiḥ samudraḥ* etc. It also explains: *santāne* (locative form) as *vaṃśe* (instead of *santāno* (Nominative form) of the Bombay edn. After the expressions: *tasya payasi*, the MS. 2 seems to quote some *liṅga-sūtra* to support the masculine gender of the word *turi.* But the syllables are highly illegible. I am unable to make out any readable line.

[28] Bombay edn. reads: *mithyāḥ*, instead of *moghāḥ.*

[29] Bombay edn. reads: *rāmam* for *vatsam.*

[30] Bombay edn. reads: *durvilaṅghyaḥ.* From the explanation in the Commentary (*khal*), it seems it must be *durvilaṅghaḥ.*

[31] Bombay edn. reads: *apinahya varmaṇā* (in the instrumental case).

[32] Bombay edn. reads: *gadgadasannakaṇṭham.* These MSS. and the Commentary read: *gadgadakaṇṭham agre.*

[33] In the rule: *bhuvaś ca* (3. 2. 138) only the root: *bhū* is mentioned as eligible for the suffix *īṣṇuc* (seen in the usage *bhaviṣṇuḥ.* and it too only in *Chandas.* But the "*ca*" of the rule is interpreted by the *Kāśikā* as: *cakāraḥ anuktasamuccayārthaḥ*, and an example: *bhrājiṣṇunā lohitacandanena* is also cited therein. On this the *Nyāsakāra* comments thus: *laukikaprayogopanyāsaḥ bhāṣāyam api īṣṇuc-pradarśanārthaḥ.* Accordingly to the root *kṛñ* also, not

only to the root *bhū*, the application of the *iṣṇuc* is thus possible. Therefore we can explain the usage: *priyaṃkariṣṇuḥ* too as an idiomatic one. This usage consists of two words: *priyam* and *kariṣṇuḥ*. In this usage the *ṣāṣṭhī-vibhakti* on *priya* is prohibited by the rule: *na lokavyaya*-etc. (2. 3. 69) and therefore the *dvitīyā* appears. See also Mallinātha on Bhaṭṭi's usage: *nirākariṣṇavo bhānum* (7. 3), where the grammatical points are noted.

[34] See also the *Vaijayantī: vamro vamry upadīkāpi* etc.

[35] Bombay edn. reads: *prārcitārthī*. In the Commentary the explanation here begins with *yadvā*. It seems to imply that there must have been some portion preceding this line. Probably it was the reading of: *prārcitārthī*, and perhaps the explanation of it was missing in the MS. 2. through oversight of the scribe.

[36] Bombay edn. reads: *avakarnan;* probably a printing mistake.

[37] Printed edn. of the *Halāyudha* and the *Vaijayantī* read: *aprahatam*.

[38] Bhaṭṭoji gives it as: *saṃbhrameṇa pravṛttau* etc. The *Kāśikā* gives it: *cāpale* etc. which is the reading in the *Bhāṣya* too. Perhaps our author was not later than Bhaṭṭoji, or was not yet aware of his *Kaumudī*.

[39] Bombay edn. reads: *uragābham* instead of *urugāḍham* of these MSS.

[40] All the MSS. read clearly as *Campakamālikāvṛttam* but the definition is given with some defective syllables. Of this line the last part reads clearly as: *Campakamāliketi lakṣaṇāt*. This part shows the 6th *gaṇa* (of the 7 *gaṇas*) as a *bha-gaṇa*. But this does not tally with the actual lines of the verse. In the actual verse the 6th *gaṇa* is seen as a *ja-gaṇa* (not *bha-gaṇa*) I do not find this metre in the *Vṛttaratnākara* and other sources available to me. Monier William's and Apte's mere noticing of this was not helpful to me. They also read the name as: *Campakamālikā*. But with some working out of the *gaṇas* from the actual lines, I thought that the name should have been as: *Campaka-puṣpa-mālikā* not mere *Campakamālikā* (as seen in the MSS.). Accordingly I mentioned the *gaṇas* within brackets in the Commentary portion. It is only my guess.

[41] Bombay edn. gives the four lines (of this verse) as *TWO VERSES*, and the numbers as: 91 & 92. In fact these four lines constitute one verse, i.e. verse 91 only. Numbers in the subsequent verses also have been incorrectly given in the Bombay edn. Further, the Bombay edn. leaves out one more *tāḍaya* in the first line of the verse. It is a mistake and we should have the expression: *tāḍaya* TWICE, as is clear from the Commentary and the actual corresponding position of the next THREE lines.

[42] Bombay edn. reads: *janita* (instead of *jaḍita*).

[43] MSS. are defective here. The definition has defective syllables. With some difficulty and working on the actual lines of the verse, I thought out and gave the line of definition and, it is only my guess. I do not find this metre with this name in the *Vṛttaratnākara* and other sources available to me. There is one Siṃhavikrīḍita in the *Vṛttaratnākara*, and it seems to agree with this:

[44] This seems to be a case of *bhinnakartṛka-prayoga* of *ktvā* but can be explained otherwise.

[45] Bombay edn. reads: *dhātā*, instead of *trātā* of these MSS.

[46] Bhaṭṭabhāskara was probably an earlier Commentator.

[47] This line is supplied by the Editor. At the end, in these MSS. are found some expressions conveying the salutations (of the scribe, perhaps).

(a) In the Mysore MS. (8), these are:
śrī-sītā-lakṣmaṇa-bharata-śatrughna-hanumat-sameta-śrīrāmacandrasvāmine namaḥ.

(b) In the Madras MS. (2), these are:
śrī-kṛṣṇāya namaḥ.śrī-paradevatāyai namaḥ. śrī-hayagrīvāya namaḥ. śrī-dattātreyāya namaḥ.

उदारराघवे महाकाव्ये तृतीयसर्गस्य व्याख्या प्रद्योतनी

चौण्डिपण्डितेन कृता

(प्रद्यो-३-१) **अथेति।** अथ ऋतुपूर्त्यनन्तरम् समाहितचेताः स्वस्थचित्तः गरीयान् स ऋषिः—द्विवचनेत्यादिना (५-३-५७) ईयसुन्-प्रत्यये प्रियस्थिरेत्यादिना (६-४-१५७) गुरुशब्दस्य गरादेशः—(स ऋषिः) शिष्यसमेतः दाशरथिभ्यां राम-लक्ष्मणाभ्यां सह पुष्ययुजि पुष्यक्षत्रयुक्ते अह्नि दिवसे सवदर्शनाय यागनिरीक्षणाय—यज्ञः सवोऽध्वरो यागः इत्यमरः—मैथिलस्य नगरीम् मिथिलाम् अभिगन्तुम्[1] अभियातुम् ऐहत[2] ऐच्छत्। ईहतेर्लङ्। आडजादीनाम् (६-४-७२) इत्याडागमः। आटश्च (६-१-९०) इति वृद्धिः। सर्गे अत्र मञ्जरी-वृत्तम्। इह मञ्जरी सजससा गुरुयुक्ता इति (लक्षणम्-) पुष्यं प्रयाणनक्षत्रम्। तथा च वसिष्ठः—

पौष्यद्वयादित्यकरेज्यमित्रविष्ण्वेन्दुवस्वाह्वय(प)भानि यानि।
श्रेष्ठानि यात्रासु नवैव तारा मुक्त्वा(?) त्रिपञ्चादिमसप्तभानि॥

किं च तथा ज्योतिषरत्नमालायाम्—

हस्तेन्दुमैत्रश्रवणं खपुष्य-पौष्यश्रविष्ठा खपुनर्वसू च।
श्रेष्ठानि धिष्ण्यानि; न तत्प्रयाणेषूक्ता(:)? त्रिपञ्चादिमसप्ततारा:(?)॥

(प्रद्यो-३-२) **विधृतेति।** त्रयाणां दण्डानां समाहारस्त्रिदण्डम्। पात्रादित्वात् (पात्राद्यन्तस्य नेति) स्त्रीत्वप्रतिषेधेन (स नपुंसकम् इति) नपुंसकत्वम्। विधिसूत्रं विधेरनुष्ठानार्थं सूत्रं यज्ञोपवीतम्। त्रिदण्डं च विधिसूत्रं च शिखण्डाः शिखाश्च तथोक्ताः विधृताः त्रिदण्डविधिसूत्रशिखण्डाः यैस्तथोक्तैः। त्रिदण्डधारणे देवलः—कापायी मुण्डस्त्रिदण्डी कमण्डलु-पवित्रपादुकासनकन्थामात्रः इति। गौतमसूत्रं (च)—मुण्डशिखी वा (१-३-२१) इति। स एव प्राजापत्येष्ट्यनन्तरम्—त्रिदण्डान् वैणवान् मूर्धप्रमाणान् दक्षिणपाणिना धारयेत्। सव्येन मोदकं कमण्डलुम् इति—करकश्रुतिः(?) (अपि)। सशिखान् केशान् निर्वर्त्य विसृज्य यज्ञोपवीतम् इति।—सकमण्डलुपीठैः करकपीठसहितैः मुनिमण्डलैः। मस्तके अधिमस्तकम्—विभक्त्यर्थे अव्ययीभावः। निहिताः पुस्तकानां भाराः येषां तैस्तथोक्तैः। तीव्रपटुभिः नितान्तदक्षैः—

तीव्रैकान्तनितान्तानि इत्यमरः। दक्षस्तु चतुरः पटुः इति प्रतापमार्ताण्डः। वटुभिः ब्रह्मचारिभिः च परिवव्रे परिवृतः। वृञः कर्मणि लिट् ॥ ३-२ ॥

(प्रद्यो३-३) **समभाण्डयन्तेति।** सकुटुम्बाः सपोष्यवर्गाः गृहिणो गृहस्थाः—ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये इत्यमरः। समभाण्डयन्त संभरणीयद्रव्याणि समचिन्वन्। पुच्छभाण्डचीवरात् णिङ (३-१-२०) इति भाण्डशब्दात् समुच्चयार्थे (राशीकरणार्थे) णिङ-प्रत्ययः भाण्डात् समाचयने इति (वार्त्तिकवचनात्)। (भाण्डशब्दो भडि कल्याणे इत्यस्मात् निष्पन्नः।) समभाण्डयन्तेति णिङन्तात् लङि रूपम्। वने चरन्तीति वनचारिणः मुनयः—तेऽपि समचीवरयन्त चीवराणि पर्यदधत। अत्रापि पुच्छभाण्डेत्यादिसूत्रेण चीवरशब्दात् परिधानार्थे णिङ—चीवरादर्जने परिधाने चेति (वार्तिक-) वचनात्। (चीवरशब्दः छित्वरेत्यादिना उणादिसूत्रेण निपातितः।) भसितानि भस्मना कृतानि धृतानि वा त्रिपुण्ड्राणि—त्रिरेखामयतिलकानि—येषां तानि। तथोक्तानि निटिलानि ललाटानि येषां ते भसितत्रिपुण्ड्रनिटिलाः। तिर्यक् पुण्ड्रं त्रिपुण्ड्रं स्यात् ललाटे लोचनादिना (रोचनादिना।) इति शैवागमे। जटाः एषां सन्तीति जटिलाः—जटावन्तः मुनयः। तेषामोघाः संघाः। जटिलशब्दे (लोमादीतिसूत्रस्थेन—५-२-१००—जटाघटाकलाभ्यः इति वार्त्तिकेन) पिच्छादित्वात् इलच्-प्रत्ययः। ऊर्ध्वानि ऊर्ध्वाकाराणि तिलकानि येषां ते तथोक्ताः। तथा चान्ये समगंसत। सर्वे मिथिलां गन्तुं मिलिता इत्यर्थः। समगंसतेत्यत्र (गमेर्लुङि) समो गम्यृच्छिभ्याम्—१-३-२९ इत्यात्मनेपदम्। (वा गमः—१-२-१३-इति कित्त्वाभावपक्षे सिचो लुगभावे रूपम्।) ॥ ३-३ ॥

(प्रद्यो-३-४) **करवीरेति।** मृगशावाः हरिणशावाः पृथुकाः—पृथुकः शावकः शिशुः इत्यमरः—करवीरं रक्तकरवीरकुसुमम्—तद्वत् ताम्रं मुनेश्चीरं कौशिकस्य चीवरं वस्त्रम् अजिघ्रन् अघ्रासिषुः। घ्रा गन्धोपादाने इत्यस्मात् लङ। पाघ्रेत्यादिना (७-३-७८) जिघ्रादेशः। (मुनीनां) करेषु (स्थितान्) कुशान् दर्भान् आस्वादयन्। लिह आस्वादने इत्यस्मात् लङ। [3]उपलोचनानि अपाङ्गानि अपुफुल्लन् अविकासयन्। फुल्ल विकसने इत्यस्मात् (णिजन्तात् लुङ।) गृहेषु जीर्णकुरङ्गाः वृद्धहरिणाः उदपुच्छयन्त पुच्छानि उदस्यन्। अत्रापि पुच्छभाण्डेत्यादिना (३-१-२०) —पुच्छादुदसने इति वार्त्तिकात् उदसनार्थे—णिङ पुच्छशब्दात्। हर्षातिरेकादिति भावः ॥ ३-४ ॥

(प्रद्यो-३-५) **निलयादिति।** मुनिबृन्दैः सह मुनौ कौशिके निलयात् आलयात्—निकाय्यनिलयालयाः इत्यमरः—निरीयुषि (निर्गते सति) कपीनां वानराणां

गृह्यकानां (गृहासक्तानां पक्षिमृगाणाम्—गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते—इत्यमरः—) यूथाः समूहाः—सजातीयैः कुल यूथं तिरश्चां पुंनपुंसकम् इत्यमरः —सहन्ते इति सहाः—पचाद्यच्—ततो नञ्समासे न सहाः इति असहाः । विरहस्यासहाः विरहासहाः प्रसह्य बलात्कारेण निरगुः निरगमन् । इणो गा लुङि (२-४-४५) इति (गादेशे इणो लुङि रूपम् ।) क्रतौ यागे—मन्त्राः इषे त्वा-इत्यादयः—तन्त्रम् अनुष्ठानम्—विनियोगः श्रुत्यादिविनियोजकप्रमाणम् विधिः प्रवर्तकं वाक्यम् (तेषां द्वन्द्वे मन्त्रतन्त्रविधयः) तान् जानन्तीति क्रतुमन्त्रतन्त्रविनियोगविधिज्ञाः । तथोक्ताः कीराः शुकाः विरहासहाः सन्तः प्रसह्य [4]निरहासन निरगमन् । ओ हाङ गतावित्यस्मात् लुङ ।। ३-५ ।।

(प्रद्यो-३-६) **अभित इति ।** शुभसूचनदक्षाः शुभावेदनचतुराः [5]मृगपक्षिसमूहाः पूर्वोक्ताः मृगाणां हरिणादीनां [6]पक्षिणां शुकादीनां च समूहाः त विश्वामित्रम् अभितः समेत्य प्रददक्षिरे प्रदक्षिणं चक्रुः । अत्र ज्योतिषरत्नमालायाम्—

मृगा विहङ्गाश्च गताः प्रदक्षिणं
महीभृतां काङ्क्षितकार्यसिद्धये ।। इति ।

महर्षिः विश्वामित्रः शुभलक्षणानि शुभावेदकनिमित्तानि पूर्वोक्तानि परीक्ष्य सर्वतः पर्यालोच्य कुमारावपि वीक्ष्य निरीक्ष्य मनसि जहर्ष तुतोष । हृष हृष्टावित्यस्मात् लिट् ।। ३-६ ।।

(प्रद्यो-३-७) **स निशम्येति ।** स मुनिः दाशरथी रामलक्ष्मणौ—तयोः दक्षिणबाह्वोः स्फुरणं स्पन्दनं निजाक्षिचलनं स्वदक्षिणाक्षिस्पन्दनं च निशम्य उपलभ्येत्यर्थः ।

अङ्गस्पन्दं प्रवक्ष्यामि यदुक्तं ब्रह्मयामले ।

इत्युपक्रम्य

नेत्रे नेत्रप्रियावाप्तिः कर्णे कर्णसुखं भवेत् ।
बाहुमूले प्रियावाप्तिः पाणिमध्ये धनागमः ।।

इति मध्ये परामृश्य अन्ते च

दक्षिणाङ्गं शुभं पुंसा वामाङ्गं योषितां तथा ।

इत्युपसंहारात् (इदं शुभसूचनं वेदितव्यम्) । गमनं शुभोत्तरं शुभोदर्कं विभाव्य विचार्य इह अस्या यात्रायां रघुनाथो रामः निमिनाथेन जनकेन बान्धवं बन्धुत्वम् इयात् प्राप्नुयात्—इति ननाथे प्रार्थयांचक्रे । इयादिति इणः संभावनायां लिङ । ननाथे इति नाथृ याच्ञायामित्यस्मात् लिट् ।। ३-७ ।।

(प्रद्यो-३-८) **परमेऽपीति** । असौ कौशिकः गुणाः शौर्यादयः—ते एव रत्नानि —तेषां धाम स्थानं यस्मिन् तस्मिन्-गुणरत्नधामनि—धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः इति विश्वः—रघुसिंहे रघुश्रेष्ठे—सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थ-वाचका इत्यमरः—यथा रमेत विहरेत्—रमतेर्लिङ्—तथा परमेऽपि पुंसि श्रीपुरु-षोत्तमेऽपि (न रमेत) न विहरेत् । मुनयोऽपि पथि मार्गे अग्रे पुरतः विनयोत्तरं प्रश्रयप्रधानम् अभिरामम् आपन्निवारकत्वाद् आह्लादकम् रामचन्द्रं वीक्ष्य अवलोक्य अनन्दन् ।। ३-८ ।।

(प्रद्यो-३-९) **अदवीयसीमिति** । स गाधितनूजः कौशिकः अदवीयसीम् अदूरत-राम्—दूरशब्दाद् द्विचनेत्यादिना (५-३-५७) ईयसुन् प्रत्ययः—स्थूलदूरेत्यादिना (६-४-१५६) यणादेः परस्य लोपः—पूर्वस्य च गुणः—उगितश्चेति (४-१-६) ङीप्—[7]कियतीचित् पदवीम् कियन्तमपि मार्गम्—किमिदंभ्यां वो घः (५-२-४०) इति वकारस्य घादेशविधान[8]मामर्थ्यादेव किम्शब्दात् परिमाणार्थात् वतुप् प्रत्ययः—उगितश्चेति ङीप्—व्यतिलङ्घ्य अतीत्य—सैकतं सिकतामयम् इत्यमरः—तच्च तत् मृदुस्थलं च—तत् सीमा मर्यादा अवधिः यस्याः सा ताम् सैकतमृदुस्थलसीमाम्—डा-बुभाभ्यामन्यतरस्याम् (४-१-१३) इति डाप् प्रत्ययः—विहरन्तः क्रीडन्तः विहङ्गमानां पक्षिणां भुजङ्गमानां सर्पाणां च संघाः समूहाः यस्यां सा—तां तथोक्ताम् अटवीम् अरण्यम् अगाहत प्राविशत् । गाहू विलोडने इत्यस्मात् लङ् ।। ३-९ ।।

(प्रद्यो-३-१०) अथ त्रिभिरटवी वर्णयति **घनेत्या**दिना । घनाः सान्द्राः मेघाश्च गण्डशैलाः गिरेश्च्युताः स्थूलोपलाः—तेषां निभानां तत्सदृशानां गण्डकानां खड्गमृगाणां यूथाः संघाः समूहाः यस्यां सा—तां तथोक्ताम्—घनस्तु सान्द्रे मेघे चेति विश्वः—गण्डशैलास्तु च्युताः स्थूलोपलाः गिरेः इत्यमरः—गण्डके खड्गखड्गिनौ इत्यमरः—हरीणां केसरिणाम्—हर्यक्षः केसरी हरिः इत्यमरः—पुण्डरीकाणां च रवस्य आरवस्य चण्डिम्ना आधिक्येन—व्याघ्रेऽपि पुण्डरीको ना इत्यमरः—चण्डस्त्वत्यन्तकोपनः इति च—घोरां भयंकराम्—घोरं भीमं भयानकम् इत्यमरः—तरूणां वृक्षाणां षण्डे संघे हिण्डितं पुञ्जितं तमालवत् कालस्कन्धवत् तमिस्रं तिमिरं यस्यां सा—तां तथोक्ताम्—कालस्कन्धस्तमालः स्यादित्यमरः—षण्डः पद्मादिसंघातः इति विश्वः—तटिनीतटे नदीतीरे—तटिनी ह्रादिनीति नदीपर्यायेष्वमरः—कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु इत्यमरः—उन्नतानाम्—अतिदीर्घाणां तिरीटाणां लोध्रवृक्षाणां सहस्राणि यस्यां सा—तां तथोक्ताम्—गालवः शाबरो लोध्रस्तिरीटः इत्यमरः—अटवीमगाहतेति पूर्वेणान्वयः ।। ३-१० ।।

(प्रद्यो-३-११) **कपीति** । कपीनां वानराणां झम्पितक्रमणम् उत्प्लुत्य गमनम् तेन कम्पिताः चलिताः शाखाः यस्यां सा—तां तथोक्ताम्—कपिप्लवङ्गप्लवगेत्यादिरमरः—चलद्भिः संचरद्भिः अच्छभल्लैः भल्लूकैः—ऋक्षाच्छभल्लभल्लूका इत्यमरः—हताः भिन्नाः पल्लवाः यासां ताः—तथोक्ताः वल्ल्यो लताः यस्यां सा—तां तथोक्ताम्—वटेषु न्यग्रोधवृक्षेषु झाटेषु (झाटेषु) न्यग्रोधशाखासु दण्डाकारेण लम्बमानमूलेषु निकुञ्जेषु वा झाटलेषु गोलीढाख्यवृक्षविशेषेषु च रटन्तीनां क्रोशन्तीनाम्—कुटत्पटुझिल्लीति वा पाठः—तदा कुटन्तीनामित्यर्थः—कुटिलं चलन्तीनाम् पटूनां समर्थानाम् झिल्लीनां झंकारकारिणां पक्षवतां कीटविशेषाणां गणानां समूहानां झंकृतानां झंकाराणाम् आरभटी ध्वनिरित्यर्थः । कृदिकारादक्तिनः इति (बह्वादिभ्यश्चेति सूत्रे (४-१-४५) अन्तर्गणसूत्रमिदम्) ङीषो विकल्पादत्र (ह्रस्वः) इकारः । तया भीषिताः त्रासिताः भिल्ल्यः शबराङ्गनाः यस्यां सा—तां तथोक्ताम् अटवीमगाहतेति पूर्वेणान्वयः । झाटो निकुञ्जे कान्तारे इति विश्वः—गोलीढो झाटल इत्यमरः—शबरो भिल्ल—इत्यादिः प्रतापमार्तण्डः ।। ३-११ ।।

(प्रद्यो-३-१२) पुनः कथंभूताम्—तत्राह **कलभेति** । कलभानां करिपोतानाम्—कलभः करिशाबकः इत्यमरः—इभानां महागजानान्—इभः स्तम्बेरमः पद्मी इत्यमरः—सिंहानां मृगेन्द्राणां शरभाणाम् अष्टापदमृगाणाम् एणानां हरिणानाम् वराहाणाम् आरण्यसूकराणाम् च ग्रहणाय परिग्रहणाय—शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तरे इति विश्वः—वराहः सूकरो घृष्टिरित्यमरः—वागुरिकैः जालिकैः—द्वौ वागुरिकजालिकावित्यमरः—वागुरा मृगबन्धनी इति च—तया चरन्तीत्यर्थे चरति (४-४-८) इति सूत्रेण ठक् प्रत्ययः (वागुराशब्दात्)—क्लृप्तानि कुटीराणि स्वल्पसदनानि यस्यां सा—तां तथोक्ताम्—करिपोतानां कलभानां दन्ताः त एव—तथा किरीणां वराहाणाम् पोत्राणि मुखाग्राण्येव खनित्राणि अवदारणानि—तैः क्षताः विदारिताः—पोत्रं पक्षिमुखाग्रे च सूकरस्य हलस्य च इति विश्वः—वामलूराः वल्मीकानि—वामलूरश्च नाकुश्च वल्मीकमित्यमरः—तेभ्यः धुताः उद्धृताः धूमलाः धूमवर्णाः—धूसरेति वा पाठः—तत्र धूसरवर्णाः धूलयः यस्यां सा—तां तथोक्ताम् अटवीमगाहतेति पूर्वेणान्वयः ।। ३-१२ ।।

(प्रद्यो-३-१३) **अभित इति** । सुमनाः कोविदः—सुमनाः पुष्पमालत्योः त्रिदशे कोविदेऽपि च इति विश्वः—स मुनिनाथः कौशिकः दुरन्तं दुष्प्रवेशं वनम् अभितः सर्वतः वनमवलोक्य—अभितः परित इत्यादिना द्वितीया—सकलो द्विजलोकः मा

उद्विजिष्ट (मा भैषीत्) इति (धिया)—ओ विजी भयचलनयोः इत्यस्मात् लुङ्—धनुषि लाघववन्तौ धनुःप्रयोगे दक्षौ राघवौ रामलक्ष्मणौ पथि मार्गे ममनाहयत् संनाहयति स्म । णह बन्धने इत्यस्मात् (णिजन्तात्) लङ् ।। ३-१३ ।।

(प्रद्यो ३-१४) **रघुनन्दनाविति ।** गुरोः विश्वामित्रस्य वन्दनेन नमस्कारेण नम्रौ रघुनन्दनौ रामलक्ष्मणौ धनुषी चापौ गुणिनी सज्जे विधाय कृत्वा धृतवन्तौ । अध्वनि मार्गे गुणध्वनिभिः ज्यानादैः मुनिमण्डलाय मुनिसमूहाय अनुवेलम् प्रतिक्षणं मुदं प्रीतिं विदधाते विहितवन्तौ । दधातेः लिट् । मुत् प्रीतिः प्रमदो हर्षः इत्यमरः ।। ३-१४ ।।

(प्रद्यो-३-१५) **ग्रहेति ।** ग्रहमण्डलेषु चन्द्रादिग्रहेषु शरदि शरत्काले विवस्वान् सूर्य इव—एतेन निरवरोधत्वं प्रतीयते—उडुमण्डलेषु तारादिगणेषु—तारकाप्युडु वा स्त्रियामित्यमरः—कलानिधिः सकलानां कलानां निधिः—सकलकलापूर्ण इत्यर्थः—तादृगिन्दुरिव—मरुतां देवानां गणेषु मरीचिरिव—महर्षिरिव—मरीचिः . . . . ऋषिभेदमयूखयोः इति विश्वः—गाधितनूजः विश्वामित्रः अटव्यां विपिने तपोनिधिषु मुनीश्वरेषु व्यरुचत् अरोचिष्ट—रुच दीप्तावित्यस्मात् लुङ्—द्युद्भ्यो लुङि (१-३-९१) इति विकल्पात् परस्मैपदम्—पुषादीति (३-१-५५) च्लेरङादेशः ।। ३-१५ ।।

(प्रद्यो-३-१६) **वनराजीति ।** महनीयतेजसि पूज्यतेजसि अर्यमणि सूर्ये मयूखसहस्रैः सह उदिते सति सूर्यमणीनां सूर्यकान्तानां गणः संघः इव अधिकप्रकाशिनि मुनिराजि—मुनिषु राजते इति मुनिराट्—तस्मिन् मुनिराजि कौशिके वनराजिभाजि—वनानां राजि भजतीति . . . भाक्—तस्मिन् वनराजिभाजि सति मुनीनां गणः प्रचकाशे । काशृ दीप्तावित्यस्मात् लिट् ।। ३-१६ ।।

(प्रद्यो-३-१७) **वनेति ।** (वनसिन्धवः) वननद्यः—तासु मग्नाः मदसिन्धुराः मदोपेता वारणाः—विषाणी द्विरदः कुम्भी सिन्धुरो वारणः करी इति प्रतापमार्ताण्ड—तेषां दानद्रवो मदोदकम्—तस्य गन्धेन बन्धुरितः छुरितः—स चासौ मन्थरयानो मन्थरगतिः वनसिन्धुमग्नमदसिन्धुरदानद्रवगन्धबन्धुरितमन्थरयानः—एतेन—शैत्यमान्द्य-सौरभाण्युक्तानि—घनान् सान्द्रान् गन्धसारान् मलयजान्—घनसारान् कर्पूरतरून् विलङ्घति स्पृशतीति तथोक्तः—घनं निरन्तरं सान्द्रम्—इति-गन्धसारो मलयजः—इति—अथ कर्पूरमस्त्रियाम्-इति-घनसारश्चन्द्रसंज्ञः इति चामरः—अनिलो वायुः मुनिलोकमुख्यं मुनिगणश्रेष्ठं विश्वामित्रं निषिषेवे नितरां सेवितवान्—सेवृ सेवाया-

मित्यस्मात् लिट्। [परिनिविभ्यः सेवसितेद्या-दिना (८-३-७०) स्थादिष्वभ्यासेन चाभ्यासस्य (८-३-६४) इत्यनेन च उभयत्रापि षत्वम्—संपादकस्य] ।। ३-१७ ।।

(प्रद्यो-३-१८) **मकरन्देति** । मकरन्देषु पुष्परसेषु लुब्धं लोलुपम्—मकरन्दः पुष्परसः इत्यमरः—अलिबृन्दं कर्तृ अरविन्दवनानि कमलवनानि व्यतिलङ्घ्य अतिक्रम्य मञ्जुवनं मनोज्ञारण्यम्—मनोज्ञं मज्जु मञ्जुलमित्यमरः—तत्र वञ्जुलवीरुधः अशोकलताः—तासां नवमञ्जरीणां [9]ललितपुञ्जं मनोहरसंघम्—वञ्जुलोऽशोके इति —लता प्रतानिनी वीरुद् गुल्मिन्युलप इत्यपि—इति चामरः—उपेत्य अमुष्य विश्वामित्रस्य पथि मार्गे मन्दं शनैः मञ्जु चारु यथा भवति तथा अगुञ्जीत् । गुजि अव्यक्ते शब्दे इत्यस्मात् लुङ ।। ३-१८ ।।

(प्रद्यो-३-१९) **सशिखण्डकाविति** । सशिखण्डकौ सकाकपक्षौ—काकपक्षः शिखण्डकः इति यादवः—विधृतपिप्पलदण्डौ धृतबोधिद्रुमदण्डौ—बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः इत्यमरः—वरवर्णिनौ उत्तमब्रह्मचारिणौ—वर्णात् ब्रह्मचारिणि (५-२-१३४) इति इनिः—कुवलचम्पकयोः नीलोत्पलचम्पकयोः वर्णः कान्तिरिव कान्तिर्ययोस्तौ तथोक्तौ—क्रमेण रामलक्ष्मणावित्यर्थः—कुवलं चोत्पले मुक्ताफले बदरीफले इति विश्वः—दवं वनम् आभीक्ष्ण्येन पश्यतः इति दवदर्शिनौ—दवदावौ वनारण्यवह्नी इत्यमरः—आभिक्ष्ण्ये णिनिः—दशरथस्य तनूजौ रामलक्ष्मणौ मददृशा मुनिना कौशिकेन समं सदृशं यथा भवति तथा—मृगदृशाविति पाठे मृगस्य दृगिव दृक् ययोस्तौ इत्यर्थः—ससंमददृशा इति पाठान्तरे सहर्षदृष्टया इत्यर्थः—प्रमदसंमदौ हर्षे (३-३-६८) इति निपातनात् साधुः—मुत् प्रीतिः प्रमदो हर्षः इत्यमरः—ददृशाते दृष्टौ । दृशिर् प्रेक्षणे इत्यस्मात् कर्मणि लिट् ।। ३-१९ ।।

(प्रद्यो-३-२०) **नवमालिकेति** । [10]नवमालिकायाः—सप्तला नवमालिका इत्यमरः—कुसुमैः पुष्पैः नद्धौ बद्धौ शिखण्डौ ययोस्तौ तथोक्तौ । नवकर्णिकारेण नवपरिव्याधकुसुमेन कृतः कर्णवतंसः कर्णावतंसः ययोस्तौ तथोक्तौ—कर्णिकारः परिव्याधः इत्यमरः—(कर्णवतंसेत्यत्र अवतंसशब्दे अवेत्युपसर्गाकारस्य) वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरिति लोपः—पुराणपुरुषस्य श्रीविष्णोः अंशौ अंशभूतौ च तौ कुमारौ च तथोक्तौ रामलक्ष्मणौ—कुमारो बालके स्कन्दे इति विश्वः—शिशू शिशुरूपधारिणौ मधुमाधवाविव चैत्रवैशाखाविव—स्याच्चैत्रे चैत्रिको मधुः वैशाखे माधवो राधः इत्यमरः—पुरतः अग्रतः—मुनेरिति शेषः—शुशुभाते रेजतुः । शुभ दीप्तावित्यस्मात् लिट् । नवमालिकादिविशेषणं मधुमाधवयोरपि योज्यम् ।। ३-२० ।।

(प्रद्यो-३-२१) **नवपल्लवेति** । नवपल्लवाः नवकिसलयान्येव अङ्गुलयः करशाखाः यासां ताभिः—अङ्गुल्यः[11] करशाखाः स्युः इत्यमरः—उल्लसन्ति विकसन्ति अम्भोरुहाणि कमलान्येव दृष्टयो यासां ताभिः उल्लसदम्भोरुहदृष्टिभिः—परिमलेन नानापुष्पसौरभेण—विमर्दोत्थे परिमलो गन्धे जनमनोहरे इत्यमरः—उल्लसिताभिः हृष्टाभिः वनदेवतानाम् आलिभिः वनाधिष्ठितदेवतासमूहैः—मदोपेताः भृङ्गयः भृङ्गाङ्गनाः तासां विरुतस्य झंकारस्य छलेन व्याजेन उभौ रामलक्ष्मणौ मुहुः प्रतिक्षणम् आजुहुवाते आहूतौ—कामुकीभिरिवेति भावः—ह्वेञ् स्पर्धायां शब्दे च इत्यस्मात् (कर्मणि) लिटि रूपम् ।। ३-२१ ।।

(प्रद्यो-३-२२) **हरिपुण्डरीकेति** । रघुवीरौ रामलक्ष्मणौ अण्डजानां पक्षिणां तुण्डानीव मुखानीव मुखानि येषां तैः अण्डजतुण्डैः—गृध्रमुखैरित्यर्थः—पतत्रिपत्रिपतगपतत्-पत्ररथाण्डजाः इति—वक्त्रास्ये वदनं तुण्डम् इति चामरः—इषुभिः बाणैः हरिपुण्डरीककिटिगण्डकसंघान् हरीणां सिंहानाम् पुण्डरीकाणां व्याघ्राणाम् किरीणां वराहाणाम् संघान् समूहान् अचखण्डताम् खण्डयामासतुः—खडि भेदने इत्यस्मात् णौ चङि रूपम्—वनानि परितः समन्तात्—अभितः परित इत्यादिना द्वितीया—हरितः आशाः—आशाश्च हरितश्च ताः इत्यमरः—ध्वनयन्तौ नादयन्तौ मुनेः पुरतः चरतः स्म चेरतुः—चरतेः लट् स्मे (३-२-११८) इति भूतार्थे लट् ।। ३-२२ ।।

(प्रद्यो-३-२३) **मधुमाधवाविति** । कलकण्ठाः परभृतः—कलकण्ठः परभृतो परपुष्टो वनप्रियः इति प्रतापमार्तण्डः—कुमारौ रामलक्ष्मणौ मधुमाधवौ चैत्रवैशाखौ इति विचिन्त्य कलनिस्स्वनम् अव्यक्तं ध्वनिम् चकलिरे चक्रुः—कल अव्यक्ते शब्दे इत्यस्मात् लिट्—शितिकण्ठाः नीलकण्ठाः गुणशब्दं ज्यानादम् अब्दरवः मेघध्वनिरिति अवयन्तः जानन्तः—मन्यमानाः इत्यर्थः—अत्र इतिशब्देन अभिहितत्वात् कर्मत्वेऽपि न द्वितीया—यथाह वामनः निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिरिति (काव्यालंकारसूत्रे ५-२-२२)—नगमण्डलेषु पर्वतकदम्बेषु—स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च इति विश्वः—ननृतुः नर्तनं चक्रुः—नृती गात्रविक्षेपे इत्यस्मात् लिट् ।। ३-२३ ।।

(प्रद्यो-३-२४) **मलयानिलेति** । मलयानिलाः मन्दवायवः वनवल्लीः वन्यलताः [12]दुधुविरे कम्पयामासुः—धूञ् कम्पने इत्यस्मात् लिट्—[13]वनवल्लयोऽपि वनलताश्च कुसुमानि चकरुः चिक्षिपुः—कॄ विक्षेपे इत्यस्मात् लिट्—ऋच्छत्यॄताम् (७-४-११) इति गुणः—तानि कुसुमानि पुष्पाणि मधुपालीः भ्रमरपङ्क्तीः अमदयन् अतर्पयन्—

मदी हर्षग्लेपनयोः इत्यस्मात् (घटादौ पठितात्) लङ्—मधुपालयोऽपि मार्गे [14]मधुरं मनोज्ञं रेणुः चुकुजुः—रण शब्दे इत्यस्मात् लिट् ।। ३-२४ ।।

(प्रद्यो-३-२५) **रणदिति** । दयार्द्रहृदयौ तौ वीरौ सुभटौ—वीरस्तु सुभटः श्रेष्ठः इति विश्वः—पथि रणत् क्वणत् अस्त्रं धनुः तत्र संहिताः संयोजिताः शराः बाणाः ययोस्तौ तथोक्तावपि—शरमोक्षणसंभावनाद्योतकोऽयमपिशब्दः—रतिः सुरतं —सैव केलिः क्रीडा—तस्यां लोलाः सतृष्णाः हरिण्यः—तासां गणे रन्ता तस्य रति-केलिलोलहरिणीगणरन्तुः—रागेऽपि सुरते रतिरिति लोलश्चलसतृष्णयोरिति च विश्वः —नूतनकुरङ्गाणां बालहरिणानां नियन्ता—तस्य तथोक्तस्य हरिणस्य हरिणानाम्— जातावेकवचनम्—अधीगर्थदयेत्यादिना (२-३-५२) कर्मणि षष्ठी—अदयेताम् अन्व-कम्पेताम् न निजघ्नुरित्यर्थः—दय दानगतिरक्षणेषु इत्यस्मात् लङ् ।। ३-२५ ।।

(प्रद्यो-३-२६) **किरिघर्घरेति** । धनुषीश्वरौ धनुः-प्रयोगे ज्ञौ (निपुणौ) अत एव पुरुषोद्घौ पुरुषश्रेष्ठौ—संघोद्घौ गणप्रशंसयोः (३-३-८६) इति उद्घशब्दो निपातितः (अप्—प्रत्ययान्तः)—किरिघर्घरध्वनिषु कोलक्रूरकोलाहलेषु सत्सु—कोलः पोत्री किरिः किटिः इत्यमरः—केसरिनादे सिंहनादे सति—करिघीत्कृतेषु गजबृंहि-तारवेषु सत्सु—खरखङ्गविरावे कठोरगण्डकध्वनौ सति—परुषे कठोरे महिषारवे लुलायविरावे सति—मनसि धार्ष्ट्यं दृढत्वं धृष्टत्वम् अभयत्वम् अधार्ष्ट्यम् धृतवन्तौ —धृञ् धारणे इत्यस्मात् लुङि रूपम् ।। ३-२६ ।।

(प्रद्यो-३-२७) **धनुरारवेणेति** । धनुषोः चापयोः आरवेण ध्वनिना वनराजि वनपङ्क्तिम् उभन्तौ पूरयन्तौ—उभ पूरणे इत्यस्मात् शतृ प्रत्ययः—कमपि कंचन वन्यं वने भवम् इभम् गजम् न निजघ्नतुः न हतवन्तौ—अत्र चाक्षुषः—[15]लक्ष्मीकामो युद्धा-दन्यत्र करिवधं न कुर्यात्—इयं हि श्रीर्ये करिणः इति—तथा कालिदासेनोक्तम्— तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान् कुमारः (रघुवंशे-५-५०) इति—अन-वधीन् अवधिरहितान् असंख्यान् हरिणान् रुरून् मृगविशेषान् अवधिष्टाम् हतवन्तौ— हन्तेर्लुङ—हनो वध लिङि (२-४-४२) लुङि च (२-४-४३) इति वधादेशः— शरैर्बाणैः भीषितान् उद्वेजितान् शरभान् अष्टपदमृगान् निरभैत्ताम् विदारितवन्तौ— भिनत्तेर्लुङ—झलो झलि (८-२-२६) इति (सिचः) सलोपः ।। ३-२७ ।।

(प्रद्यो-३-२८) **अथ गौतमेति** । अथ मृगवधानन्तरम् अर्कसमभाः सूर्यसदृश-कान्तिः मुनीन्द्रो विश्वामित्रः गौतमायतनं गौतमाश्रमम् एत्य प्राप्य मुनिना अमुना गौतमेन समभावि समपूजि—सम्पूर्वाद् भवतेर्ण्यन्तात् कर्मणि लुङ—अग्रजानां

भूमिदेवानां ब्राह्मणानां मध्ये--द्विजात्यग्रजन्म--विप्रश्च ब्राह्मणोऽसौ इत्यमरः--चरता गच्छता अग्रजेन रामेण कर्त्रा पदरजोभिः पादपांसुभिः करणैः अहल्या गौतमपत्नी पुरः अग्रे पुपुवे पवित्रीकृता--पूञः कर्मणि लिट् ।। ३-२८ ।।

(प्रद्यो-३-२९) **उपलायमानेति ।** अग्रे पुरतः उपलायमानम् उपल इव आचरत् --(उपमानादाचारे इति) आचारक्यङन्तात् लटः शानजादेशः--शरीरम् अपहाय त्यक्त्वा इयम् अहल्या चपला यथा विद्युदिव--चपला कमला विद्युत् पुंश्चली पिप्पलीषु च इति विश्वः--अबलायाः वनितायाः आकृतिरिव आकृतिर्यस्याः सा तथोक्ता-- तरसा शीघ्रम्--अनेन औत्सुक्यमुच्यते--असमा तुल्यरहिता अजररूपा अजररूप-(सहिता) सती महतां पूज्यानां समाजं सभाम् अभिपत्य एत्य शिरसा प्रणनाम दण्डवत् पपात ।। ३-२९ ।।

(प्रद्यो-३-३०) **कुत आगतेति ।** सहमुनौ मुनिसहिते सकुमारे रामलक्ष्मणसहिते कुशिकात्मजे विश्वामित्र इयम् अङ्गना कुतः कस्मात् आगतेति विस्मयमाने सति आश्चर्य(-भाजि) सति अथ अनन्तरम् वृजिनस्य पापस्य अपायेन अपगमेन विकलङ्को निष्कलङ्को मुखेन्दुर्यस्याः सा तथोक्ता--कलुषं वृजिनैनोऽघम् इत्यमरः--सा अहल्या निजवृत्तं स्वकीयवृत्तान्तं निजगाद आचख्यौ--गद व्यक्ताया वाचीत्यस्मात् लिट् ।। ३-३० ।।

(प्रद्यो-३-३१) **ऋषिवेषेति ।** जम्भविरोधिनि जम्भशत्रौ देवेन्द्रे ऋषेः मुनेः वेषः आकार एव दम्भो व्याजः--तेन युज्यते इति ऋषिवेषदम्भयुक्--तस्मिन् सति-- कपटोऽस्त्री व्याजदम्भावित्यमरः--[16]अनुरोधिनी अनुकूला यद् यस्मात् कारणात् अमुना देवेन्द्रेण समगच्छे संयोगमकार्षम्--सम् पूर्वाद् गमेर्लुङ--समो गमीत्यादिना आत्मनेपदम्--सः उपयन्ता गौतमः [17]अधिमत् मयि--मद्विषये इत्यर्थः--विभक्त्यर्थे अव्ययीभावः--मन्तुम् अपराधम्--आगोऽपराधो मन्तुश्चेत्यमरः--असहन् असहमानः--सहेः परस्मैपदित्वमपि [18]धातुवृत्तिकारेणोक्तमिति [19]श्रीरङ्गराजेनोक्तम्-- प्रयोगोऽपि दर्शितः सहसि परिभवमिति--प्राह सहते सर्व इति च--आख्यातचन्द्रिकायामपि--तितिक्षतेऽधिकुरुते क्षान्तौ सहति सद्यति । मृष्यतीदं मर्षति चेत्यात्मनेऽपि चतुष्टयम् ।। (१-३-६९) । [20]क्रियारत्नकोशेऽपि मृष्यति मर्षतीत्येतौ द्वयोः सहति-- इति । [21]वीरपाण्ड्योऽपि--मृष्यति मर्षति तथा मृषति मर्षयति । क्षाम्यति च क्षमते मृष्यत्यसौ सहतीति ।। मघवानम् इन्द्रम्--इन्द्रो मरुत्वान् मघवा इत्यमरः--अत्र मघोनः ज्ञीप्स्यमानत्वाभावात् न श्लाघह्नु--इत्यादिना संप्रदानत्वम्--विफलो भव

ध्वस्तमुष्को भव इत्यशाप्सीत्—शप्तवान्—शप आक्रोशे इत्यस्मात् लुङ्—तथा श्रीरामायणे—

. . . . अकर्तव्यमिदं यस्माद् विफलस्त्वं भविष्यसि ।। (१-४८-२८)

गौतमेनैवमुक्तस्य सुरोषेण महात्मना ।
पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् ।। (१-४८-२९) इति ।।३-३१।।

(प्रद्यो-३-३२) **उपलात्मिकेति** । हे चपले पुंश्चलि—चपला कमला विद्युत् पुंश्चलीति विश्वः—अत्र वने असह्यं सोढुमशक्यं दुःखं कलयन्ती अनुभवन्ती उपलात्मिका उपल एव आत्मा देहः यस्याः सा तथोक्ता सती वस तिष्ठेति मह्यं मामित्यर्थः—क्रियाग्रहणात् संप्रदानत्वम्—न तु श्लाघेत्यादिना—तस्य उपालम्भनार्थविषयत्वात्—अशप्त शशाप—शप उपालम्भे इत्यस्मात् लुङ्—स्वरितेन्वादात्मनेपदम्—अथ अनन्तरम् रामपदरेणुकणाः रघुपतिपदपांसुलेशाः त्वां भवती पुरा पुनते पवित्रीकरिष्यन्ति—(यावत् पुरानिपातयोरिति) पुराशब्दयोगे भविष्यदर्थे लट्—इति पुनः भूयः कृपया अवदिष्ट—उपसान्त्वयति स्म—वदतेर्लुङ् ।। ३-३२ ।।

(प्रद्यो-३-३३) **मघवन्निमित्तमिति** । मघवान् इन्द्रः निमित्तं कारणं यस्य तत् तथोक्तम्—अघवत् दोषयुक्तम्—मुनेः गौतमस्य शापेन दग्धम् नष्टम्—अत एव अनिशम् अनवरतम् भृशमत्यर्थं दुःखम् क्लेशो यस्य तत् तथोक्तम् मम देहम् कथमपि कथंचित् अवास्थित अवातिष्ठत्—तिष्ठतेर्लुङ्—समवप्रविभ्यः स्थः (१-३-२२) इत्यात्मनेपदम्—इदानीम् तत् तच्छरीरम् रघुनन्दनस्य पदपांसुः पादरजः—पांसुर्ना न द्वयो रजः इत्यमरः—अपावीत् अशोधयत्—पूञ् पवने इत्यस्मात् लुङि रूपम् ।। ३-३३ ।।

(प्रद्यो-३-३४) **समगंसीति** । पुरेव पूर्वमिव मुनिवरेण गौतमेन समगंसीति यत् संगतास्मीति यत्—सम्-पूर्वाद् गमेर्लुङ्—समो गमीति आत्मनेपदम्—तेन कारणेन प्रकृतेन प्रस्तुतेन सुकृतेन कुमारो रामः अचिरेण शीघ्रं मैथिलसुतां सीतां परिणेता परिणेष्यति—परिपूर्वान्नयतेः लुट्—सुचिरं बहुकालं सुखानि अनुभविष्यति—(भवतेः) लृट् ।। ३-३४ ।।

(प्रद्यो-३-३५) **समरे** इति । अयमर्भकः रामः समदान् दृप्तान् असुरौघान् राक्षससंघान् समरे युद्धे विजित्य जित्वा यदा तव अध्वरं यागम् आवीत् अरक्षत्—अवतेर्लङ्—तदैव मनयः—निमयः इति पाठे निमिभूपाः—मिथिलायां जनकराज-

धान्यां सीतारघुवीरयोः परिणयं विवाहं निरचेषत निश्चितवन्तः—निस्-पूर्वात् चिञ् चयने इत्यस्मात् लुङ् ।। ३-३५ ।।

(प्रद्यो-३-३६) **विदित इति।** अयं रामः ऐशं शांकरं धनुः अधिज्यम् आततज्यम् दधीत यद् (यस्मात्) कुर्यात् (तत्) गुरुबुद्धेः (गुरोः बृहस्पतेः बुद्धिरिव बुद्धिर्यस्य) सः—जनकस्य पुरोधाः पुरोहितः मम तनयः शतानन्दः विदेहनगरे मिथिलायां विदितः विख्यातोऽस्ति—विद्यते—स शतानन्दः अस्य रामस्य शीघ्रं विवाहं घटयिष्यति—संघटयिष्यति—घट चेष्टायामित्यस्मात् लृट् ।। ३-३६ ।।

(प्रद्यो-३-३७) **धनुष इति।** धराधरमयस्य पर्वतमयस्य—विकारार्थे मयट् फणिराज एव शेष एव गुणः सन् मौर्वी सन् पुरा पूर्वम् आजौ युद्धे विरराज शुशुभे—राजतेर्लिट्—धन्वी धनुष्मान् हरिणाङ्ककिरीटः चन्द्रमौलिः स ईश्वरः हरिणा विष्णुनैव शरेण बाणेन अमुना धनुषा पुरत्रयम् त्रिपुरम् अभित्त व्यदारयत्—भिदिर् विदारणे इयस्मात् लङ् ।। ३-३७ ।।

(प्रद्यो-३-३८) **नयेति।** हे कौशिक अपनीता मदार्तिः मत्पीडा येन तं तथोक्तम् सुकुमारमूर्तिं कोमलाङ्गम्—सुकुमारं तु कोमलम् (इति अमरः)—मूर्तिः काठिन्यकाययोः इति (च) अमरः—नरेन्द्रकुमारं दशरथसूनुम् तत्र मिथिलायां नय—मिथिलां प्रापयेत्यर्थः—गिरिः धनुर्यस्य सः गिरिधन्वा ईश्वरः—धनुषश्च (५-४-१३२) इति अनङादेशः—तस्य धन्वनि (धन्व) धनुः—(तस्मिन्—विषये) कुमारे कर्तरि बाह्वोः स्वभुजयोः बलं वितन्वति प्रकटयति सति (अत्र प्रकटनविषये) चित्रम् आश्चर्यमिति लोको वक्ष्यति वदिष्यति—वच परिभाषणे इत्यस्मात् लृट् ।। ३-३८ ।।

(प्रद्यो-३-३९) **इति वादिनीमिति।** इति एवं वादिनीं ब्रुवतीम् ऋषिकलत्रम् अहल्यां महान्तः सन्तः अनघेति दोषरहितेति समवदन्त व्यक्तमवदन्—वदेर्लङ—व्यक्तवाचां समुच्चारणे (१-३-४८) इति आत्मनेपदम्—सः गौतमश्च मुनिगिरा कौशिकवाक्येन अनुकम्पया स्वां गृहिणीं भार्यां स्वगृहेषु अनुजगृहे अनुगृहीतवान् ।। ३-३९ ।।

(प्रद्यो-३-४०) **पुरभिदिति।** पुरभिदो महेश्वरस्य धनुषो महिमनि सामर्थ्ये प्रथमाने प्रख्याते (भवति) तद् धनुः [22]कथमानमेत कथं प्रह्वीभवेत्—नमतेः (कर्म-) कर्तरि लिङ—न दुहस्नुनमां यक्चिणौ (३-१-८९) इति यक्प्रतिषेधः—इति एवं व्यथमानं दुःखायमानं मुनिमण्डलम् ऋषिबृन्दं समशयिष्ट सन्देहं प्रापेत्यर्थः— सम्-पूर्वात् शीङ स्वप्ने इत्यस्मात् लुङ—साक्षी साक्षाद्द्रष्टा—साक्षाद्द्रष्टरि संज्ञायम् (५-२-९१) इति इनिप्रत्ययः—रामभुजयोः विक्रमस्य साक्षी—ताटकावधादिति

भावः—मुनीन्द्रः कौशिकः निरचेष्ट निश्चितवान्—चिञ् चयने इत्यस्मात् लुङ ॥ ३-४० ॥

(प्रद्यो-३-४१) **अथ गाधिराजेति ।** अथ अनन्तरम् गाधिराजतनयः शिष्यैः सह जनकाधिराजमखदर्शनकाङ्क्षी—जनकानामधिराजः सीरध्वजः तन्मखस्य दर्शनं काङ्क्षतीति तथोक्तः सन् चिरविप्रकृष्टगृहिणी स्पृहयित्वा गौतमेन सह मिथिलाभिमुखोऽभूत् । भवतेर्लुङ ॥ ३-४१ ॥

(प्रद्यो-३-४२) **नगरेति ।** मुनीन्द्रे कौशिके नगरोपकण्ठं पत्तनान्तिकम् उपयाति सति तदैव मुदा हर्षेण सहिताः समुदः सन्तः (पौराः पुरजनाः) समशृण्वत अशृण्वन्—शृणोतेर्लङ—(अतिश्रुदृशिभ्यश्चेति वक्तव्यम् इति वार्त्तिकात्) आत्मनेपदम्—स जनकेन्द्रः अहस्करदीप्रैः (सूर्यवत्) प्रकाशमानैः—नमिकम्पीत्यादिना रप्रत्ययः—मणिमयदण्डकेतुभिः—मणिमया दण्डाः येषां ते तथोक्ताः—तैः केतुभिः ध्वजैः नगरीम् मिथिलाम् समचस्करत्—अलंकारयामास—करोतेर्ण्यन्तात् लुङि चङि रूपम्—सम्—परिभ्यां करोतौ भूषणे (६-१-१३७) इति सुटि अभ्यासस्य लघुत्वाभावात् सन्यतः (७-४-७९) इति इत्वम् दीर्घो लघोः (७-४-९४) इति दीर्घश्च न (भवतः) ॥ ३-४२ ॥

(प्रद्यो-३-४३) **सहनृत्तेति ।** नृत्तं नर्तनम्-तथा गीतम्-बहवो वाद्यविशेषाः मृदङ्गादयश्च तथोक्ताः—तैः सह—सहपुरोधसा पुरोहितसहितेन—सहमन्त्रिगणेन सामात्यवर्गेण—वोपसर्जनस्य (६-३-८२) इति (बहुव्रीहौ) सहशब्दस्य सभावविकल्पः—हृदयालुना सुहृदयेन—हृदयालुः सुहृदयः इत्यमरः—बहुलं छन्दसि (५-२-१२२ सूत्रस्थेन) हृदयाच्चालुरन्यतरस्याम् इति वार्त्तिकेन आलुप्रत्ययः—स्पृहयालुना स्पृहयित्वा तेन जनकेन दयालुः कृपाशीलः [23]अनुग्रहयालुः अनुग्रहीता—स्पृहिगृहीत्यादिना (३-२-१५८) सर्वत्र आलुच् प्रत्ययः—मुनिः कौशिकः अभ्यगमि अभ्युद्गतः—गमेः कर्मणि लुङ—[24]अभ्यगमि इत्यत्र अत उपधायाः (७-२-११६) इति वृद्ध्यभावः चिन्त्यः—न च व्यगमि इत्यादि[25]माघकाव्यप्रयोगः उदाहरणम्—तत्रापि व्याख्यातृ[26]-वल्लभेनापि तस्य असामञ्जस्याभिधानात् ॥ ३-४३ ॥

(प्रद्यो-३-४४) **स्वपुरोधसेति ।** स जनकः स्वपुरोधसा स्वपुरोहितेन अहल्यातनयेन शतानन्देन यद् अतिथिकृत्यमुपदिष्टं तद् व्यधित अकरोत्—विपूर्वाद् दधातेः कर्तरि लुङ—शिष्यैः सह ऋषिं कौशिकं पुरं मिथिलामपि अवीविशत् प्रावेशयत्—

विशतेर्णौ लुङ्—इतरान् मुनींश्च नितराम् बहु मेने बहु कृतवान्—बहु इति क्रिया-विशेषणम् ।। ३- ४४ ।।

(प्रद्यो-३-४५) **स मुनिरिति।** अभिरामरूपेण मनोहरस्वरूपेण जितौ कामगुहौ मदनस्कन्दौ याभ्यां तौ तथोक्तौ—ताभ्यां दशरथस्य सुताभ्यां समम्—ग्रहप्रति-मशिष्यसमेतः—ग्रहाः चन्द्रादयः प्रतिमा उपमानं येषां ते तथोक्ताः—तैः शिष्यैः समेतः भास्करतेजाः मुनिः विश्वामित्रः मिथिलां प्रविशन् सन् उपास्कुरुत अलंचकार —सम्परिभ्यां करोतौ भूषणे (६-१-१३७) इति उपात् प्रतियत्नवैकृतवाक्याध्या-हारेषु च (६-१-१३९) इति च—सूत्राभ्याम् सुट् आगमः (उपास्कुरुत इति पदे) ।। ३-४५ ।।

(प्रद्यो-३-४६) **तरसेति।** मिथिलाजनोऽपि शिथिलापरकृत्यः उपरतव्यापा-रान्तरः सन् पुरस्य गोपुराणि द्वाराणि—पुरद्वारं तु गोपुरम् इत्यमरः—सौधान् राज-सदनानि—सौधोऽस्त्री राजसदनम् इत्यमरः—वरणः प्राकारः—प्राकारो वरणः शालः इत्यमरः—अट्टः क्षौमम्—स्यादट्टः क्षौममस्त्रियाम् इत्यमरः—हस्तिनखः पूर्द्वारिकूटम् —कूटं पूर्द्वारि यद् हस्तिनखः इत्यमरः—देवगृहालयः देवालयश्चेण्यः—ताः तरसा शीघ्रम् अधिरुह्य नयनानि कृतकृत्यभावम् कृतार्थत्वम् अनयत् प्रापयत्—नयतेर्लङ्—रामावलोकनादिति भावः ।। ३-४६ ।।

(प्रद्यो-३-४७) **रघुनन्दनाविति।** असितायतकेश्यः—असिताः कृष्णाः आयताः दीर्घाः केशाः यासां ताः तथोक्ताः—सौन्दर्यवत्यः इत्यर्थः—स्वाङ्गाच्च उपसर्जनात् (४-१-५४) इति ङीष्—पुरयोषितः पौरस्त्रियः रघुनन्दनौ रामलक्ष्मणौ अवलुलो-किषमाणाः अवलोकितुमिच्छन्त्यः—लोकतेः सन्नतात् शानच्—विकृतभूषणवेषाः संभ्रमात् व्यत्यस्ताभरणनेपथ्याः—आकल्पवेषौ नेपथ्यम्—विपणिषु पण्यवीथिकासु—विपणिः पण्यवीथिका इत्यमरः—प्रसरन्त्यः संचरन्त्यः—सखीभिः वयस्याभिः हसिताः—विकृतवेषदर्शनादिति भावः—आलिः सखी वयस्या चेत्यमरः—विरराजिरे शुशुभिरे —राजतेर्लिट्—फणां च सप्तानाम् (६-४-१२५) इति विकल्पाद् एत्वाभ्यासलोपा-भावः ।। ३-४७ ।।

(प्रद्यो-३-४८) अथ विकृतभूषणवेषमेव प्रपञ्चयति—**अधिरुह्येति।** वनिताः अतिदूरात् सौधानां शिखरान् अग्रभागान्—शिरोऽग्रं शिखरं वा ना इत्यमरः—अधिरुह्य आरुह्य गवाक्षनिहितायतनेत्राः—वातायनविन्यस्तायतनयनाः सत्यः रघुनन्दनं कुशिक-नन्दनं कौशिकम् ऊचुः अवादिषुः—ब्रुवो लिट्—ब्रुवो वचिः इति वचिरादेशः—कौशिकं कुशिकात्मजं दशरथात्मजम् रामम् ऊचुः ।। ३-४७ ।।

(प्रद्यो-३-४९) **पदपद्मयोरिति।** काचिद् अङ्गना (कुचकुम्भयोर्योग्यं) मृगमदं पदपद्मयोः—पदे पद्मे इव पदपद्मे-तयोः निदधाना निदधती (पदपद्मयोर्योग्यं) नवयावक-पङ्कं कुचकुम्भयोः-कुचौ कुम्भाविव तथोक्तौ-तयोश्च निदधाना—ललाटे (निक्षेप्यं) तिलकं कपोलफलके च दधाना—चकारेण कपोलफलके निक्षेप्यं पत्रभङ्गादिकम्—(अन्यत्र) दधाना स रामभद्रः क्व नु क्व आस्ते इति एवम् अमार्गीत् अन्वेषितवती—मार्ग अन्वेषणे इत्यस्मात् लुङ—

. . . . रचिता कुङ्कुमादिना ।
कपोलस्तनकण्ठादौ नानाविन्यासभेदतः ।।

पत्रं पत्रावली पत्रलेखा पत्रवलिर्भवेत् ।
पत्रभङ्गः पत्रवल्ली तथा पत्रकमित्यपि ।।

इति प्रतापमार्तण्डः ।। ३-४९ ।।

(प्रद्यो-३-५०) **अपहायेति।** मत्तगजमन्थरयाना-मत्तगजस्येव मदगजस्येव मन्थरं यानं मन्दगमनं यस्याः सा तथोक्ता काचन काचिद् अङ्गना (रत्नमय) रत्नप्रचुरं—प्राचुर्ये मयट्—अञ्जनपात्रं कज्जलकरण्डम् अपहाय त्यक्त्वा करसंगतामपि (करस्थि-तामपि) शलाकां कणिकां निरस्य तिरस्कृत्य मसृणेन स्निग्धेन-चिक्कणं मसृणं स्निग्धम् इत्यमरः—घुसृणेन कुङ्कुमेन—घुसृणं कुङ्कुमं रम्यम् इति यादवः—विलोचनं नयनम् आञ्जीत् अलंचकार-अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु इत्यस्मात् लुङ ।। ३-५० ।।

(प्रद्यो-३-५१) **अविलम्बमिति।** हे अम्ब मातः—अम्बार्थनद्योः ह्रस्वः (७-३-१०७) इति ह्रस्वः—अविलम्बम् आशु पुनः भूयः—पश्चादित्यर्थः—[27]अभ्य-नजानि (अभ्यङ्गं) करोमि—अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु इत्यस्मात् लोडुत्तम-पुरुषैकवचनम्—रुधादित्वात् श्नम्—मेर्निः (३-४-८९) इति (लोडुत्तमैकवचनस्य) मेः निः आदेशः—आडुत्तमस्य पिच्च (३-४-९२) इति आडागमः—(पुनरभ्य-नजानि) इति एवं मातरम् अभिधाय उक्त्वा [27]तैलं स्नेहम् अपास्य कापि अङ्गना गमनत्वरागलितकेशकलापा—गमनत्वरया वेगेन गलितः विश्लेषितः केशकलापः केशपाशः यस्याः सा तथोक्ता जघनस्य नितम्बस्य श्रोणिभागस्य गरिमाणं गुरुत्वम् अगर्हीत् अगर्हिष्ट—गर्ह कुत्सायाम् इत्यस्मात् लुङ—तद् (उक्तम्) [28]आख्यात-चन्द्रिकायाम्—जुगुप्सते वाचयति प्रवदत्यपि गर्हते । त्रयः क्षिपत्यात्मनेऽपि चोपक्रो-शति निन्दति इति (१-४-पद्यम् १०३)—तथा [29]क्रियारत्नकोशेऽपि—गर्हति अर्हयति (अप)वदति क्षिपति द्वयोः इति ।। ३-५१ ।।

(प्रद्यो-३-५२) **जनदृष्टमिति** । सख्या सह नवेक्षाकुतुकेन नूतनवस्तुदर्शने कुतूहलेन संभ्रमवती (त्व)रा(वती) करिकुम्भकुचा करिकुम्भाविव कुचौ यस्याः सा तथोक्ता अन्या अङ्गना जनदृष्टं लोकविलोकितम् ऊरुम् ऊरुभागम् अनवेक्ष्य अदृष्ट्वा घननितम्बनिरस्तम्—घनेन पृथुना नितम्बेन जघनेन निरस्तं तिरस्कृतं गलत् स्रंसमानम् अम्बरम् वसनं कथमपि कथंचित् अवस्त (आच्छादयति स्म)—वस आच्छादने इत्यस्मात् लङ् ।। ३-५२ ।।

(प्रद्यो-३-५३) **करयोरिति** । करयोः हस्तयोः मणिनूपुरयुग्मं मणिखचित-मञ्जीरयुगलं निधाय चरणे च हस्तवलयं हस्तकटकं कङ्कणं कलयन्त्या निक्षिपन्त्या गलनद्धकाञ्चिलतया—गले कण्ठे नद्धा काञ्चिलता काञ्चीवलयः कटिसूत्रं यया सा तथोक्ता-तया—कृदिकारादक्तिनः इति विकल्पाद् ईकारो न—कृतयानत्वरया कृता याने गमने त्वरा वेगः यया तथोक्तया तया कयापि कयाचिद् अङ्गनया निशान्तात् सदनात् निरयायि निरगामि—यातेर्भावे लुङ् । निशान्तवस्त्यसदनेत्यादिरमरः ।। ३-५३ ।।

(प्रद्यो३-५४) **शिरसेति** । कापि वनिता सुकचा सुकेशा—कचः केशः शिरोरुहः इत्यमरः—शिरसा प्रणम्य विकचानि स्फुटानि—व्याकोचविकचस्फुटाः इत्यमरः—कुसुमानि पुष्पाणि कराभ्यां हस्ताभ्यां विचकार अवाकिरत्—किरतेः लिट्—अर्थाद् रामोपरीति गम्यते—उच्चैः मकरन्दनन्ददलिबृन्दनिनादः—मकरन्देन पुष्परसेन नन्दन्ति अलिबृन्दानि भ्रमरसमूहाः—तेषां निनादो यस्मिन् स तथोक्तः मकरन्द—निनादः स पुष्पनिकरः राजनन्दनं रामम् अनन्दयत् समतोषयत् । नन्दतेर्लङ् ।। ३-५४ ।।

(प्रद्यो-३-५५) **अवशेनेति** । मृगशाबकनेत्रा अन्या अङ्गना अपरा (वनिता) असितोत्पलनीलम् इन्दीवरश्यामं रामम् अवशेन यदृच्छया अवलोकयमाना पश्यन्ती सरसा सानुरागा अत एव विवशा परवशा हसितेन उपलक्षिता करसंज्ञया मन्दं शनैः आह्वयत् आजुहाव । आङ्पूर्वात् ह्वयतेः लङ् ।। ३-५५ ।।

(प्रद्यो-३-५६) **इति पौरेति** । मनुजेन्द्रसूनुः रामः अनुजेन यवीयसा लक्ष्मणेन समम् इति एवंविधान् यौवतविलासविकारान्—युवतीनां समूहो यौवतम्—तस्य समूहः (४-२-३७) इत्यनेन समूहार्थे अण् प्रत्ययः—पुरि वर्तमानं पौरम्—पौरं च तत् यौवतं च पौरयोवतम्—तस्य विलासानेव विकारान् अवलोकयन् पश्यन्—बालस्य भावो बालिमा धृतो बालिमा येन स तथोक्तः मघवा इव इन्द्र इव तं मखवाटं यज्ञशालां मुनीन्द्रमनु—मुनीन्द्रेण सममित्यर्थः—अनुर्लक्षणे इति (कर्मप्रवचनीयसंज्ञा—) कर्म-प्रवचनीययुक्ते द्वितीया इति द्वितीया—अयासीत् अगात् । यातेर्लुङ् ।। ३-५६ ।।

(प्रद्यो-३-५७) **सपदीति** । अथ अनन्तरम् यजनकर्मणि यागक्रियायां नियुक्ताः नियोजिताः द्विजपुङ्गवाः ब्राह्मणश्रेष्ठाः अध्वर्युप्रभृतयः रघुवरौ रामलक्ष्मणौ अवलोकितुम् सपदि तत्क्षणमेव ध्रुवाम् उपभृतं च जुहूं च स्रुचं च स्रुवं च व्यपनीय त्यक्त्वा अभिपेतुः अभिजग्मुः——पत्लृ गतावित्यस्मात् लिट्——जुह्वादेः स्रुग्भावश्चिन्त्यः(?)। न च जुह्वादिविशेषणत्वं स्रुक्शब्दस्य——स्रुचमपीति समुच्चयविरोधात् ।। ३-५७ ।।

(प्रद्यो-३-५८) **कुशविष्टरेष्विति** । मिथिलेश्वरः जनकः कुशिकात्मजः विश्वामित्रः मुख्यः वरेण्यः येषां ते तथोक्ताः——नान्——मुख्यवर्यवरेण्यश्चेत्यमरः——समदि सभायाम्——सभासमितिसंसदः इत्यमरः——कुशविष्टरेषु दर्भासनेषु——विष्टरश्च महीरुहे आसने कुशमुष्टौ च इति विश्वः——उपवेश्य (उपविष्टान् कृत्वा) यथार्हं यथायोग्यम् आर्चीत् अपूजयत्——अर्चतेः भौवादिकात् लुङ्——[30]केचिदनुप्रासलोभात् आर्हीत् इति पठन्ति——तदसत्——अर्हतेः नित्य-[31]चुरादित्वात् आर्हिहत् इति भवितव्यम्——अथ अनन्तरं पृथुलवक्षसि विशालोरसि रामे अनिमेषां——न विद्यते निमेषः पक्ष्मपातः यस्यास्तां दृशं दृष्टिमपि सुचिरं बहुकाल न्यधत्त निहितवान् । दधातेः लङ् ।। ३-५८ ।।

(प्रद्यो-३-५९) **कुलमेष इति** । एष कुमारः कस्य कुलं वंशम् अकलङ्कं निष्कलङ्कं कलयति वहति——कलतेः ण्यन्तात् लट्——एष कस्य सुतः——अस्य नाम किम्——एष वनवासिभिः तपस्विभिः भवद्भिः कथं समगच्छत संगतवान्——सम्पूर्वात् गमेः लङः——वद ब्रूहि——इति एवम् राजा समपृच्छत पृष्टवान्——सम्पूर्वात् पृच्छतेः लङ्——उभयत्र समो गमीत्यादिना (सूत्रेण-१-३-२९)——विदिप्रच्छीत्यादिवार्त्तिकेन च आत्मनेपदम् ।। ३-५९ ।।

(प्रद्यो३-६०) **मनुसन्ततिरिति** । पूर्वोक्तप्रश्नानाम् उत्तराण्याह——मनुसन्ततिरित्यादिना——मनुसन्ततिः दशरथस्य तनूजः एष रामः मम मखं क्रतुम् अविघ्नम् आवत् अरक्षत्——अवतेः लङ्——मखरक्षणार्थम् अस्माभिः संगतवानित्यर्थः——ऐश्वरम् ईश्वरसंबन्धि धनुः विनमय्य नमयित्वा ते तव सुतां सीतां परिणेष्यति परिणेता इति स मुनीन्द्रः विश्वामित्रः बभाण उवाच । भण शब्दे इत्यस्मात् लिट् ।। ३-६० ।।

(प्रद्यो-३-६१) **मुनिवाक्येति** । भूपः जनकः मुनिवाक्यं कौशिकवचनमपि अवितथं कलयन् (यथार्थं) जानन् धृतकाकपक्षम्——धृताः काकपक्षाः शिखण्डकाः येन तम् तथोक्तं रामम् अवेक्ष्य कमठपृष्ठगरिष्ठं कूर्मपृष्ठकठोरम्——अतिशायने तमबिष्ठनौ इति इष्ठन् प्रत्ययः——प्रियस्थिरेत्यादिना गरादेशः——कठिनं धनुः मनसा समीक्ष्य आलोच्य समधिक्षत संदिग्धवान्——दिह उपचये इत्यस्मात् लुङ्——शल इगुपधादनिटः क्सः इति क्सादेशः ।। ३-६१ ।।

(प्रद्यो-३-६२) **प्रथममिति।** सः हलकेतुः सीरध्वजः जनकः प्रथमं पूर्वम् विश्वसितनारदवाक्यः—विश्वसितं प्रत्यायितं नारदस्य वाक्यं येन सः तथोक्तः सन् रामं परमं पुमांसम् अवगम्य ज्ञात्वा धृताङ्गपुलकः धृतरोमाञ्चः कुशध्वजनाम्ना अनुजेन सह मुमुदे तुतोष। मुद हर्ष इत्यस्मात् लिट् ॥ ३-६२ ॥

(प्रद्यो-३-६३) **धनुष इति।** जनकेन्द्रकुमारी सीता अनुषङ्गिणं परम्परागतम् धनुषः प्रसङ्गं वृत्तान्तम् आलीजनतः सखीजनात्—पञ्चम्यास्तसिल्—आलिः सखी वयस्या चेत्यमरः—निशम्य श्रुत्वा उपरिसौधम् सौधोपरिगृहम् अधिरुह्य आरुह्य गवाक्षनिहितायतनेत्रा जालान्तरन्यस्तनेत्रा—गवाक्षविवराहितनेत्रा इत्यपि पाठः—तत्रापि जालान्तरप्रेषितदृष्टिः सती इत्यर्थः—स्ववरं भाविनम् व्यलुलोकत् अद्राक्षीत् —लोकृ दर्शने इत्यस्मात् लुङ ॥ ३-६३ ॥

(प्रद्यो-३-६४) **जलदोदय इति।** जानकी सीता जलदोदयः मेघोदयः त्वामनुमोदयति किम्—संतोषयति किम् इति—निजसखी स्ववयस्यां समलापीत् समवादीत् —किम्शब्दः प्रश्ने—अनुमोदयति इति मुदधातोः (ण्यन्तात्) लट्—समलापीदित्यत्र सम्पूर्वात् लपतेः लुङ—विदग्धा दक्षा सा सखी (च) हे तरलाक्षि चञ्चलाक्षि अत्र सौधे सरला ऋज्वी—सकलेति वा पाठः—तत्र कान्तिमतीत्यर्थः—कापि तडित् विद्युत् स्फुरति प्रकाशते इति उत्तरं प्रतिवचनम् अदत्त दत्तवती। ददातेः लङ ॥ ३-६४ ॥

(प्रद्यो-३-६५) **क्व धनुरिति।** औग्रम् ऐशम्—उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् इत्यमरः—उदग्रम् अधिकं कठोरं कठिनमिदं धनुः क्व—रघुशिशोः दशरथार्भकस्य असमग्रम् असंपूर्णम्—समग्रं सकलं पूर्णमित्यमरः—दोर्युगं बाहुद्वयं क्व च—अमुना रामेण एतद् धनुः कथमधिज्यं क्रियेत विधीयेत—करोतेः कर्मणि लिङ —अद्य कुपणे कुत्सितपणे उद्यतः उद्युक्तः—तातो जनकः—तातस्तु जनकः पिता इत्यमरः—तातोऽनुकम्पे जनके चेति विश्वः—कृपणः दीनः अजनि जातः—जानातेः कर्तरि लुङ ॥ ३-६५ ॥

(प्रद्यो-३-६६) **धनुष इति।** इह रामादिविषये क्षितिपो जनकः धनुषः अधिरोपणपणेन—अधिरोपणम् आरोपणमेव पणं शुल्कम्—तेन यदि पणेत व्यवहरेत्—पण व्यवहारे स्तुतौ च इत्यस्मात् लिङ—तर्हि विवाहो विघटेत (न स्यात्)—घटतेः लिङ—यद् यस्माद् अयं जनकः मां रघुवत्सकाय रामभद्राय तूष्णीम् पणं विना न दित्सति दातुं नेच्छति तत् तस्मात् अस्य विदेहेश्वरस्य हृदयम् अदयं निर्दयम्—दयाशून्यमित्यर्थः ॥ ३-६६ ॥

(प्रद्यो-३-६७) **सुरसिद्धेति।** वृथैव पणः अनेन कृतः इति रागातिरेकाद् आह-**सुरेत्यादिना।** सुराः इन्द्रादयः—सिद्ध्यन्तीति सिद्धाः अणिमादिगुणवन्तः वसुप्रभृतयः—कुत्सिताः पुरुषाः किंपुरुषाः—कि क्षेपे इति समासः—किन्नराः किंचिन्नराः अश्वादिमुखाः—विद्याधराः (खर्वपद्म)काञ्चनादिविद्याधारिणः जीमूतवाहनादयः—यक्षाः कुबेरादयः—राक्षसाः रावणप्रमुखाः—नरेन्द्राः भूपाः—तेषाम् इन्द्राः—तेषां कुलेषु अस्माद् रामाद् अन्यं तुलितेशचापमपि वरं भर्तारं (न वृणीय) न वृणुयाम्—वृणोतेः लिङ—तातपणेन जनकशुल्केन किमु किं वा प्रयोजनमित्यर्थः ।। ३-६७ ।।

(प्रद्यो३-६८) **वरणागतेति।** मिथिलापतिः जनकः पणबन्धं पणकरणम् अपास्य त्यक्त्वा वरणागताय वरणार्थमागताय-शरणागतरक्षामणये शरणं रक्षितारम् आगतानां प्राप्तानां रक्षामणये चिन्तामणये—शरणं गृहरक्षित्रोः इत्यमरः—वराय अस्मै रामाय मां ददीत यदि दद्यात् चेत्-तर्हि विधिः दैवम् आनुकूल्यम् अनुकूलत्वम् अयते प्राप्नोति—अयतेर्लट्—मे दयते (माम् अनु)कम्पते इत्यर्थः—अधीगर्थदयेशां कर्मणि इति षष्ठी ।। ३-६८ ।।

(प्रद्यो-३-६९) **इति वाचमिति।** रघुराजनन्दनः रामः—तस्य विलोकने दर्शने लोला लोलुपा—प्रीतिमतीति यावत्—लोलुपो लोलुभो लोलो लम्पटो लालसोऽपि च इति प्रतापमार्ताण्डः—सीता आलिषु सखीषु मिथः इति एवंविधा वाचं वाणीम् अनुलपन्ती वदन्ती चपलायाः विद्युतः—विद्युत् चञ्चला चपला अपि इत्यमरः—स्फुरणात् प्रकाशनात् प्रचलाकिनीव कलापिनीव—कलापी बर्हिणो बर्ही प्रचलाकी भुजङ्गभुक् इति प्रतापमार्ताण्डः—अदक्षिणदृशः वामनयनस्य स्फुरणात् स्पन्दनात् हृषिता हृष्टरोमा अजनि अभूत्—जनेः कर्तरि लुङ—[31a]दक्षिणाङ्गं शुभं पुंसां वामाङ्गं योषितां तथा इति न्यायात् इति भावः ।। ३-६९ ।।

(प्रद्यो-३-७०) **अथेति।** अथ अनन्तरं सदसि सभायां मिथिलाजने पौरजने विस्मयमाने सति गाधिसूनुगिरं विश्वामित्रवाक्यम् आद्रियमाणः विश्वस्तः सन् स जनकः दाशरथेः रामस्य शक्तिपरीक्षी शक्तिं बलं परीक्षते इति तथोक्तः—रामभुज-बलं जिज्ञासुरित्यर्थः—धरणीशसमाजम् राजसभाम् धनुः ईश्वरचापम् आनिनाय प्रापयामास । नयतेर्द्विकर्मकात् लिट् ।। ३-७० ।।

(प्रद्यो३-७१) कथंभूतं धनुः—तत्राह—**कमठादित्यादिना।** कमठात् कूर्मात् उपात्ता स्वीकृता कठिना दृढा आकृतिः आकारः यस्य तत् तथोक्तम्—कूर्मे कमठ-कच्छपौ इत्यमरः—शेषात् शेषाख्यादहितः सर्पात्—पञ्चम्यास्तसिल्—गृहीते महिते

पूजिते उन्नतिदैर्घ्ये औन्नत्यायामौ येन तत् तथोक्तम्—कुलपर्वतात् कुलाचलात् अधिके गुरुत्वमहत्त्वे यस्य तत् तथोक्तम्—पृथिवीभृतां राज्ञां भुजसारम् बाहुबलम्—सारो बले स्थिरांशे चेत्यमरः—हसदिव हासं कुर्वदिव स्थितम्—धनुः आनिनायेति पूर्वेणान्वयः ।। ३-७१ ।।

(प्रद्यो-३-७२) **उचितमिति ।** सुरतक्ष्णा विश्वकर्मणा—तक्षा तु वर्धकिस्त्वष्टा इत्यमरः—रचितं कृतम्-हरस्य ईश्वरस्य उचितं युक्तम्-(लस्तकपदे धनुर्मध्ये स्थाने) लस्तकस्तु धनुर्मध्यमित्यमरः—नवरत्नैः खचितं प्रत्युप्तम्—तथा तटिद्भिः सौदामिनीभिः निचितम् अनुबद्धम् ऐन्द्रं धनुरिव स्थितं तद् धनुः बहुभिः अनेकैः अनुजीविभिः उपनिन्ये प्रापि—नयतेः कर्मणि लिट् ।। ३-७२ ।।

(प्रद्यो-३-७३) **पुरभिदिति ।** अथ अनन्तरं पुरभिद्धनुर्भरणभुग्नगलानाम्—पुरभिदः ईश्वरस्य धनुषः चापस्य भरणेन भारवहनेन भुग्नगलानां नतकण्ठानां वीरभटानां बहुलोत्सवं महोत्सवं निकुरुम्बं कदम्बकम्—निकुरुम्बं कदम्बकमित्यमरः—कृतः हलाहलेत्यारवः—स एव कोलाहलः कलकलः-कोलाहलः कलकलः इत्यमरः—तेन मिश्रिताः आरभट्यः आटोपाः (रीतयः) यस्मिन् कर्मणि तद् यथा भवति तथा सिंहनादम् (वीरभटाना कदम्बकम्) अकरोत् ।। ३-७३ ।।

(प्रद्यो-३-७४) **भुजगेन्द्रेति ।** भुजगेन्द्रभूषणभुजप्रणयि—ईश्वरस्य भुजयोः प्रणयि परिचयवत्—गिरिराजदण्डम्—गिरिराजो मेरुः—स एव दण्डो यष्टिः यस्य तत् तथोक्तम्—अहिराजदृढज्यम्—अहिराजो [32]वासुकिः—स एव दृढा ज्या मौर्वी यस्य तत् तथोक्तम्—नहुषाजगराभम्—नहुषो नाम राजा—स च अगस्त्यशापात् महानजगरोऽभूत् इति पुराणप्रसिद्धिः—स एवाजगरः सर्पविशेषुः-तस्य आभेव आभा यस्य तत् तथोक्तम्—तिलित्सः स्यादजगरः—इदं धनुः नलिनाक्षः कमलाक्षः एष बालः रामः कथ नु नमयेत्—नुशब्दो वितर्के—नमयेदिति नमेर्ण्यन्तात् लिङ्—इति जनौघः जगाद उवाच । गदतेर्लिट् ।। ३-७४ ।।

(प्रद्यो-३-७५) **अविमुक्तेति ।** अविमुक्तगौरवम् अवियुक्त-गुरुत्वम्—अनन्तो वासुकिरेव (?) गुणः मौर्वी-तेन आढ्यं संपन्नम्-असंख्यातगुणाढ्यमिति वा—हरकार्मुकं नमयसीति न युक्तम् अयुक्तम् अनुचितमित्यर्थः—वर्तमानसामीप्ये वर्तमानवद् वा इति भविष्यदर्थे लट्—यदि शक्तिरस्ति सामर्थ्यमस्ति चेत् तर्हि इह हरकार्मुकविषये भुजसत्त्वं बाहुबलं प्रथय प्रदर्शय—प्रथ प्रख्याने इत्यस्मात् (ण्यन्तात्) लोट्—इति एवं मिथिलेश्वरः जनकः रामं रघुपतिम् अवदत् अवोचत्—वदतेः लङ् ।। ३-७५ ।।

(प्रद्यो-३--७६)) **धनुष इति।** मुनिः कौशिकः हे वत्स राम अत्र प्रदेशे धनुषः करेण ग्रहणपूर्वकं स्वीकारपूर्वकं क्षितिजायाः सीतायाः करग्रहणं पाणिपीडनम् आचर --निरवग्रहः निष्प्रतिबन्धः सन् इदं धनुर्नमयन् एषां जनौघादीनां संशयं सन्देहं शमय विनाशय--इति एवं रहसि एकान्ते राममवोचत् अवदत् ।। ३-७६ ।।

(प्रद्यो-३-७७) **स तथेति।** सः रामः तथेति--उक्त्वेति शेषः--गम्यमानत्वाद-प्रयोगः--कौशिकनमस्कृतिपूर्वम्--कौशिकस्य नमस्कृतिः नमस्कारः-स एव पूर्वं यस्मिन् कर्मणि तद् यथा भवति तथा--सहसा वेगेन उत्तरीयपरिवेष्टितमध्यः-उत्तरीयेण उत्तरवाससा परिवेष्टितं वीतं मध्यं येन सः तथोक्तः--मध्यमं चावलग्नं च मध्योऽस्त्री-त्यमरः--कवचाभिगुप्तभवचापसमीपम्--कवचेन पिधानेन अभिगुप्तं रक्षितं हर-कार्मुकम्--तस्यान्तिकं--तटिदन्तिकं सौदामिनीसमीपं जलदपोत इव अल्पमेघ इव अगात् । इणो लुङ ।। ३-७७ ।।

(प्रद्यो-३-७८) **कवचमिति।** अथ स रामः कवचं (पिधानम्) विकृष्य अपनीय विचित्रं विशेषेण रचनायुक्तम्--अत्यद्भुतं वा--ऐशम् ईशसंबन्धि धनुः रचिताञ्जलि बद्धाञ्जलि यथा भवति तथा आननाम प्रणनाम--नमतेर्लिट्--तलघातेन करतल-ताडनेन शब्दितो ध्वनितः निकुञ्चितः कुञ्चितः सञ्चितः बाहुः येन स तथोक्तः-अधिलस्तकदेशम् धनुर्मध्यप्रदेशे--विभक्त्यर्थे अव्ययीभाव--हस्तं निदधे निहितवान् ।। ३-७८ ।।

(प्रद्यो-३-७९) **धनुरिति।** धरणीन्द्रकुमारः रामः पुलकाञ्चिते रोमाञ्चालंकृते पौरजनौघे नुवति स्तुवति सति धनुरुद्दधार उद्धृतवान्--धृ धारणे इत्यस्मात् लिट्--अत्र धनुषि शंकरकराब्जं हरपाणिपद्मं कथम् अमासीत्--(यतः) मत्पाणिपद्मस्यापि न पर्याप्तमिति भावः--मा माने इत्यस्मात् लुङ--इति एवं सस्मितं समन्दहासं तद् धनुः अधिज्यमचिकीर्षत् (अधिर्ज्यं) कर्तुमैच्छत्--करोतेः सन्नन्तात् लङ ।। ३-७९ ।।

(प्रद्यो-३-८०) **पृथिवीति।** आर्यः कुलीनः--आर्यः--कुलीनः कुलजोऽभिजातः इति प्रतापमार्तण्डः--एतेन गृहीतं न परित्यजेदिति भावः--रामः ऐशं धनुः शंकरधनुः आदित स्वीकृतवान्--दधातेः लुङ--हे पृथिवि [33]स्थिरीभव स्थैर्यं भज --अभूततद्भावे च्विः--हे भुजङ्ग सर्पराज--एनां भुवं वह धारय--हे कमठराज कूर्मराज तदिदं द्वयं पृथिवीभुजङ्गौ दधीथाः धारयेः--दधातेः लिङ--हे दिग्गिभाः दिग्गजाः तदपि त्वयं भूभुजङ्गकमठान् धत्त (धारयत)--दधातेः लोण्मध्यमपुरुषबहु-वचनम्--इति एवं लक्ष्मणः ऊचे उवाच ।। ३-८० ।।

(प्रद्यो-३-८१) **अधिजान्विति ।** वध्वः एव जनाः—तेषाम् उत्पलानीव दृशः—दृगुत्पलानि-तैः कीर्णः रघुनन्दनः धन्व धनुः अधिजानु जानुप्रदेशे विनिधाय (निक्षिप्य) ततज्यम् अधिज्यं विदधत् कुर्वन्—दधातेः लटः शत्रादेशः—सपदि सद्यः नन्दने देवेन्द्रवने नन्दन्तः क्रीडन्तः सुमनसः सुपर्वाणः—तैः विसृष्टाभिः सुमनोभिः पुष्पैः अकारि क्षिप्तः—किरतेः कर्मणि लुङ् ।। ३-८१ ।।

(प्रद्यो-३-८२) **जनसंहताविति ।** जनसंहतौ मनुष्यसंघे जय जयेति—[34]चापले द्वे भवतः इति वक्तव्याद् (वार्त्तिकाद्) द्विर्वचनम्—संभ्रमेणोच्चारणं चापलमिति (काशिका)—जय जयेति वदन्त्यां सत्याम् दिवि आकाशे सुरेषु देवेषु साधु साध्विति वदत्सु सत्सु रघुराजकुमारः रामः जनकराजकुमार्याः सीतायाः मनसा समम् धनुराचकर्ष सीताया मनो जहारेत्यर्थः—कर्षतेर्लिट् ।। ३-८२ ।।

(प्रद्यो-३-८३) **धृतवामेति ।** धृढवाममुष्टिना धृते लस्तके धनुर्मध्यभागे रत्नैः रत्नकिरणैः छुरिताः संगताः अङ्गुलीयेषु मणयः रत्नानि—तेषु लग्नाः संसक्ताः नखांशवः दीप्तयः यस्य स तथोक्तः—भुजो दण्ड इव भुजदण्डः—तेन मण्डलितं मण्डलीकृतं धूर्जटेरीश्वरस्य धन्व धनुः येन स तथोक्तः—धनुषश्च इत्यनङादेशः—रामः परिवेविषाणः परिवेषं कुर्वाणः—परिवेषस्तु परिधिरुपसूर्यकमण्डले (इत्यमरः?)—विष्लृ व्याप्तावित्यस्मात् श्लुविकरणात् लटः शानजादेशः—निजां त्रयाणामिति अभ्यासस्य गुणः—शानचः तिङशित् सार्वधातुकम् इति (ङित्वात्) क्ङिति च इति (निषेधात्) (धातोरिकारस्य) गुणाभावः—भानुः भास्करः इव अभासीत्—भातेर्लुङ् ।। ३-८३ ।।

(प्रद्यो-३-८४) **अमुनेति ।** जानुनोः समीपम् उपजानु—तं प्राप्तौ औपजानुकौ—उपजान्वित्यादिना ठक्—इसुसुक्तान्तात् कः (७-३-५१) इति कादेशः—इकोऽपवादोऽयम्—तौ भुजौ यस्य स तथोक्तः—तेन गुणधाम्ना गुणनिधिना अमुना रामेण—उपकर्ण प्राप्तः औपकर्णिकः गुणो मौर्वी यस्य स तथोक्तः—पूर्वोक्तसूत्रेणैव ठक्—ऐशं धनुः बाह्वोः हस्तयोः-(मात्रां) प्रमाणम् अतिक्रान्तम् अतिमात्रम्-तत् कर्षणम्-तस्य भरेण भारेणरभसेन वेगेन उच्चलन् उद्गच्छन् चट चट इति ध्वनिः यस्मिन् कर्मणि तद् यथा भवति तथा बभञ्जे भग्नम्-भञ्जो आमर्दन इत्यस्मात् कर्मणि लिट् ।। ३-८४ ।।

(प्रद्यो-३-८५) **भुवमिति ।** धनुषि चापे राघवेण भग्ने कृते सति [35]उद्गतः उत्थितो ध्वनिः भुवमानशे व्याप—अश्नोतेः लिट्—दिवमाकाशम् इयाय प्राप—इणो

लिट्—दिगन्तान् अललङ्घत्-लङ्घितवान्—चौरादिकात् णौ चङि रूपम्—अब्धिवलयं विललङ्घे लङ्घेर्भौवादिकात् लिट्—फणिलोकम् नागलोकम् आवृत आच्छादयत् वृणोतेर्लुङ—धुनीः नदीः अधुनीत अकम्पयत्-धूञ् कम्पने इत्यस्मात् लङ ।। ३-८५ ।।

(प्रद्यो-३-८६) **हठेति** । हठात् बलात् भज्यमानहरकार्मुकनादे—प्रसभं तु बलात्कारो हठः इत्यमरः—अजाण्डकुहरं ब्रह्माण्डच्छिद्रम्—कुहरः कोटरे छिद्रे इति विश्वः—बहिरन्तः बाह्यान्तरे दलयति विदारयति सति भयेन भीत्या कम्पमानस्य फणिराजस्य फणाली फणापङ्क्तिरेव निलयः स्थानं यस्य तेन भूमिवलयेन कर्त्रा ववल्ले अचालि—वल्लतेः भावे लिट् ।। ३-८६ ।।

(प्रद्यो-३-८७) **चकितस्येति** । चकितस्य भीतस्य संभ्रमेण गलन्ती स्रंसमाना गलरज्जुः कण्ठपाशः यस्य तस्य सुरवारणस्य ऐरावतस्य निगलेन शृङ्खलेन जगले स्रस्तम्—गल स्रंसने इत्यस्मात् भावे लिट्—दानकुपितेन मदोद्रिक्तेन मदक्रुद्धेन तेनाप्यैरावतेन कर्त्रा करदन्तकोटिभिः करेण तुण्डेन दन्तानां कोटिभिः श्रेणिभिश्च दिवि स्वर्गे तिष्ठन्तीति दिविष्ठाः—तत्पुरुषे कृति बहुलम् इत्यलुक्—अम्बाम्बेत्यादिना (८-३-९७) षत्वम्[36]—अट्टाः अट्टालकाः अमोटिषत खण्डिताः—मुट खण्डने इत्यस्मात् कर्मणि लुङ ।। ३-८७ ।।

(प्रद्यो-३-८८) **भवधन्वेति** । भवधन्वनः (शर्व)धनुषः भङ्गेन यो रवः तेन भङ्गुराणि चित्तानि येषां ते तथोक्ताः दिगिभेन्द्राः दिग्गजाः—भुवं (कथमपि अ)बिभ्रत अधारयन्—भृञो लङ—चकितेन भयेन उत्पततां तिमीनां शतयोजनविस्तीर्णानां मत्स्यानां तिमिङ्गिलानां तद्भक्षकानां मत्स्यानां सङ्घैः समूहैः हेतुभिः कलिलेन कलुषेण सिन्धुसलिलेन बभूवे (जातम्)—भवतेः भावे लिट् ।। ३-८८ ।।

(प्रद्यो-३-८९) **हरिरिति** । जलधौ उदधौ कलधौतस्य रूप्यस्य—कलधौतं रूप्यहेम्नोः इत्यमरः—द्युतिरिव द्युतिर्यस्य-तेन कम्बुराजेन शङ्खराजेन—पाञ्चजन्येनेत्यर्थः—भरितः संभृतः प्रतिशब्दः प्रतिध्वनिः—तस्मिन्—(सति) शङ्खः स्यात् कम्बुरस्त्रियाम् इत्यमरः—हरिः विष्णुरपि अबुद्ध अबुध्यत बुद्धवान्—बुध धातोः लुङ—मुखरैः शब्दायमानैः अहार्यशिखरैः पर्वतशिखरैः—अहार्यधरपर्वताः इत्यमरः—(अनुसस्रे-निपतितम्) भावे लिट्-गिरिगह्वरैः पर्वतकन्दरैः—दरी तु कन्दरो वा स्त्री देवखातबिले गुहा गह्वरम् इत्यमरः—परितः सर्वतः प्रतिनेदे नदितम्—नदतेः भावे लिट् ।। ३-८९ ।।

(प्रद्यो-३-९०) **प्रसरदिति।** गिरिजा गौरी प्रसरत्प्रतिध्वनिपतन्मृगयूथम् प्रसरता व्याप्नुवता प्रतिध्वनिना पतन्ति मृगयूथानि यस्मिन् तत् तथोक्तम् वलमानशाखि-वलमानाश्चलन्तः शाखिनो वृक्षाः यस्मिन् तत् तथोक्तम्-विचलत्प्रचलाकि-विचलन्तः संचलन्तः प्रचलाकिनः भुजङ्गभुजः यस्मिन् तत् तथोक्तम्--कलापी बर्हिणो बर्ही प्रचलाकी भुजङ्गभुक् इति प्रतापमार्ताण्डः--अद्रिगह्वरं गिरिगह्वरम्--भयविह्वला भयेन विह्वला चकिता सती उपह्वरयन्ती एकान्तं कुर्वती--विविक्तविजनच्छन्ननिः--शलाका उपह्वरे इति (प्रतापमार्ताण्डः ?)--पशुपतिम् ईश्वरम् परिरेभे आलिलिङ्ग --रभ धातोर्लिट् ।। ३-९० ।।

(प्रद्यो-३-९१) **इभेति।** गिरिशोऽपि (ईश्वरोऽपि)--गिरीशो गिरिशो मृडः इत्यमरः--इभकुम्भाभ्यां करिकुम्भाभ्यां तुल्यं कुचकुम्भयोर्युगं यस्याः सा तथोक्ता --तस्याः भवान्याः--इन्द्रवरुणेत्यादिना (४-१-४९) ङीप् आनुगागमश्च--शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गलेत्यमरः--पार्वत्याः परिरम्भे आश्लेषे संभ्रमः--तेन जनितं सुखम्--तेन चापदलनं चापस्य दलनं बहु मेने बहु मतवान्--बह्विति क्रियाविशेषणम्-मन्यतेः कर्तरि लिट्--तथा हि कामी कामुकः कामार्तः वस्तुहानिं द्रव्यनाशम् नानुशोचति--न हि सुखार्थी द्रव्यनाशं गणयेदिति भावः ।। ३-९१ ।।

(प्रद्यो-३-९२) **धनुषीति।** विदेहनरेन्द्रः जनकः धनुषि रामविधूते रामेण विधूते द्विधा पतति--भवतीति वा--शकलद्वयं भवति सति--आकर्षमात्रेण भग्ने सतीत्यर्थः--नितान्तम् अत्यर्थं कराले भयंकरे निनदे च शाम्यति शान्ते सति भयविस्मयप्रमदविप्रतिसारैः भीत्याश्चर्यहर्षानुतापैः--पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि इत्यमरः --एतच्छ्रुत्वा शंकरः किं करिष्यतीति भयम्-धूर्जटिधनुर्भञ्जनाद् विस्मयः--प्रतिज्ञासिद्धेः प्रमदः न्यासधनुर्नाशाद् विप्रतीसारः--कृदिकाराद् अक्तिन इति विकल्पाद् ईकाराभावः--भृशम् अत्यर्थम् आकुलः व्याकुलः अजनि--जनेः कर्तरि लुङ्--दीपजनेत्यादिना (च्लेः) चिण् ।। ३-९२ ।।

(प्रद्यो-३-९३-९४) **विदलयेति सुरेतियुग्मेन** कुलकमाह--सदसि सभायां रामे धूर्जटेरीश्वरस्य धनुः विदलय्य भङ्क्त्वा त्रपमाणे विलज्जमाने--राज्ञां समूहो राजकम्--गोत्रोक्षेत्यादिना वुञ् प्रत्ययः--मुनीनां राजकस्य च स्तुतिभरेण अतिस्तुत्या स्मयमाने स्मितं कुर्वाणे गुरोर्विश्वामित्रस्य वन्दनाय त्वरमाणे वृद्धं जनकं च अभिवादयमाने नमस्कुर्वाणे **(सुरमुक्तेति)** सुरमुक्तदिव्यकुसुमानि सुरैः मुक्तानि उत्सृष्टानि दिव्यकुसुमानि पारिजातकुसुमानि दधाने धृतवति जनकात्मजायाः सीतायाः अभिलषितं

मनोरथं विदधाने पूरयति सीताभिलाषं कुर्वाणे (ईदृशे रामे) तन्मुनिबृन्दं विशति सति मुनिसमूहमध्ये प्रविशति सति दिवि आकाशे दुन्दुभिध्वनिः भेरीनादः—भेरी स्त्री दुन्दुभिः पुमानित्यमरः—अमन्दम् उच्चैः उदैष्ट[37] उदियाय ।। ३-९३-९४ ।।

(प्रद्यो-३-९५) **कलमिति ।** सदसि गायकसंघैः कलम् अव्यक्तम् उज्जगे उद्गीतम्—गै शब्दे इत्यस्माद् भावे लिट्—नटानां नर्तकानां नटीनां नर्तकीनां च समुदायैः ननृते अनर्ति—नृती गात्रविक्षेपे इत्यस्माद् भावे लिट्—वेणुः (वेणुवादनम्) शिल्पं येषां ते वैणविकाः—वेणुध्माः स्युर्वैणविकाः इत्यमरः—शिल्पम् (४-४-५५) इति ठक् . . . . . इमुसुक्तान्तादिति (७-३-५१) इति [38]कादेशाभावश्चिन्त्यः । तेषां वेणुनिनादैः वेणुध्वनिभिः उदलासि उल्लसितम्—लसधातोः भावे लुङ्—वीणा (वीणावादनम्) शिल्पं येषां ते वैणिकाः—वीणावादाः—तेषां करैराहताः आस्फालिताः —ताश्च ता वीणाः तथोक्ताः—वीणावादास्तु वैणिकाः इत्यमरः—अकलन्त अध्वनन् —कल अव्यक्ते शब्दे इत्यस्मात् लङ् ।। ३-९५ ।।

(प्रद्यो-३-९६) **अथ मैथिलीति ।** अथ अनन्तरं पुरि नगर्याम् पुरन्ध्रिपरीता— पुरन्ध्र्यः कुटुम्बिन्यः—गृहाश्चापत्ययुक्तास्तु पुरन्ध्री च कुटुम्बिनी इति प्रतापमार्तण्डः —कृदिकारादित्यादिना विकल्पाद् ईकाराभावः—ताभिः परीता—जननीजनेन परिधापितवस्त्रा परिधापितं वस्त्रं यस्याः सा तथोक्ता मैथिली सीता सदसि स्थितं सविजयम् विजयवन्तं—सुविजयमिति वा पाठः—वरिष्ठं (श्रेष्ठम्) इष्टं प्रियं रामम् स्रजयन्ती स्रजमासज्जयन्ती—स्रग्विन् शब्दात् तत्करोतीति ण्यन्तात् लटः शतरि टाप्—णाविष्ठवद्भावे विन्मतोर्लुक् (५-३-६५) इति लुक्—अवरिष्ट वृतवती—वृणोतेर्लुङ् ।। ३-९६ ।।

(प्रद्यो-३-९७) **गुणवन्नतमिति ।** अर्भकः शिशुः अयं रामः विविवक्षुः विवोढुमिच्छुः गुणवत् सज्यम् गुणाढ्यं च नतं नम्रं प्रणतं च ऐशम् ईश्वरसंबन्धि स्वामिसंबन्धि च धनुः अभाङ्क्षीत् बभञ्ज इति यत् तद् उचितं युक्तम्—बालानां स्त्रीलोकानां च प्रायेणाविमृश्यकारित्वादिति भावः—अमुष्य रामस्य जरठो वृद्धोऽपि जनकः वैदेहः—पितापि ते—सः श्वशुरोऽभूदिति यत् तद् उचितं किम्—नोचितमेवेत्यर्थः— प्रायेण वृद्धानां विमृश्यकारित्वादिति भावः—इति जनौघः उपजहास हसितवान्— हसतेर्लिट् ।। ३-९७ ।।

(प्रद्यो-३-९८) **मुनय इति ।** अथ अनन्तरं गाधिसुतगौतममुख्याः विश्वामित्रगौतमौ प्रधानभूतौ येषां ते तथोक्ताः मुनयः ते जनकादयः जगतीपतयश्च दशरथ-

स्यानयनाय आह्वानाय प्रणिधीन् दूतान् अयोध्यां प्रति अतिशीघ्रम् प्रणयादृतं प्रणयेन प्रेम्णा सत्कृतं यथा भवति तथा प्रजिघ्युः प्रेषयामासुः—हि गतौ इत्यस्मात् लिट् ॥ ३-९८ ॥

(प्रद्यो-३-९९) **विविधानिति** । प्रमनसः हृष्टमानसाः—प्रमनाः हृष्टमानसः इत्यमरः—धृतलेखाः मैथिलदूताः विविधान् नानाप्रकारान् विषयान् देशान् विलङ्घ्य अतिक्रम्य मनुसृष्टां मनुना निर्मितां पुरीम् अयोध्यां विविशुः—विशेर्लिट्—सदसि सचिवैर्वृतम् अमात्यैर्वृतं सवसिष्ठं वसिष्ठसहितं तं दशरथं ददृशुः—अपश्यन् दृशेर्लिट् ॥ ३-९९ ॥

(प्रद्यो-३-१००) **विशिखे इति** । विशिखे बाणे-बाणविशिखावित्यमरः—धनुः चापं भनक्ति आमर्दयति इति धनुर्भक्—तस्मिन्-धनुर्भजि—क्विप्—एवं सति तस्य आरवात् भीत्या भयेन रथे चलिते गतवति सति रथिनि रथिके [39]तद्ध्वनिना हृष्टे संतुष्टे सति शयनात्मजौ शय्यापुत्ररूपौ गुणसारथी मौर्वीयन्तारौ शरम् आनविषाताम् (अस्तुवाताम्—नु स्तुतौ इत्यस्मात् लुङ्–आङि नुप्रच्छ्योरित्यात्मनेपदम्—) इति —उक्त्वेत्यर्थः—शुभलेखं शुभपत्रिकां ददुः अर्पयमासुः—अयं च लेखार्थः त्रिपुरजयवृत्तान्तवेदिनां सुगमः—स चोत्तरश्लोकद्वयेन स्वयमेव व्यक्तीभविष्यति ॥ ३-१०० ॥

(प्रद्यो-३-१०१) पत्रिकार्थतात्पर्यमाह—**अधिलेखमिति** । सुमन्त्रो नाम मन्त्री लेखे अधिलेखम्—पत्रिकायामित्यर्थ—विभक्त्यर्थेऽव्ययीभावः—अर्थम् अवगम्य ज्ञात्वा (प्रह)सन् स्मेराननः सन् भवशरासनम् ईश्वरचापं कर्षतीति तथोक्तः (भवशरासन-कर्षी) भरताग्रजो रामः निमिकन्यया सीतया स्वयमेव अवारि स्वयं वृतः किल—वृणोतेः कर्मणि लुङ्—इति एवं रूपम् उदन्तं वार्त्ताम्—वार्त्ता प्रवृत्तिवृःत्तान्त उदन्तः इत्यमरः—संसदि अधिसंसत् सभायामित्यर्थः—विभक्त्यर्थे अव्ययीभावः—अशंसत् आचख्यौ—शंसतेर्लङ् ॥ ३-१०१ ॥

(प्रद्यो-३-१०२) **विशिख इति** । अथ पत्रिकार्थं वसिष्ठः पदशो व्याचष्ट—इत्याह—विशिख इति । अयं पूर्वोक्तो विशिखो बाणोऽपि नाम विष्णुः ते सुतः तव पुत्रः—राम इत्यर्थः—स पूर्वोक्तो रथो नाम धरैव भूमिरेव—सः पूर्वोक्तो रथी नाम गिरिधन्वा मेरुधन्वा ईश्वरः—शयनात्मजौ शय्यातनूजरूपौ गुणसारथी शेषविरिञ्ची शेषब्रह्माणौ कलय जानीहि इति वसिष्ठो जगाद उवाच ॥ ३-१०२ ॥

(प्रद्यो-३-१०३) **अजनन्दन इति ।** अजनन्दनः राघवः (दशरथः) कर्णहृदययोः श्रवणमनसोः अमृतधारारूपां निजनन्दनवार्त्ताम् स्वपुत्रवृत्तान्तम् उपकर्ण्य आकर्ण्य पुरि नगर्यां विहितोत्सवः कृतोद्धवः——मह उद्धव उत्सवः इत्यमरः——दारसमेतः भार्यासमेतः अमृतोत्समग्न[40] इव अमृतस्य उत्से प्रवाहे मग्न इव——उत्सः प्रस्रवणं वारिप्रवाह इत्यमरः——अमृतोदमग्न इति पाठान्तरे अमृतमेवोदकं यस्य सः अमृतोदः समुद्रः——पीयूषसागर इत्यर्थः——उदकशब्दस्य उदकस्योदः संज्ञायाम् इति उदादेशः——तत्र मग्नः पौरजनोऽप्यभूत् ।। ३-१०३ ।।

(प्रद्यो-३-१०४) **महतेति ।** महेन्द्रविभवः दशरथः निमिभिः सह बान्धवाय बन्धुत्वाय——संबन्धायेत्यर्थः——स्पृहेरीप्सित इति चतुर्थी——स्पृहयालुः स्पृहयन्——स्पृहि गृहीत्यादिना आलुच्——महता बलेन चतुरङ्गबलेन भरतेन कैकेय्याः सूनुना सुमित्रातनयेन शत्रुघ्नेन च सहितः बन्धुसहितः दारैः सह भार्यासहितः निजपुर्याः अयोध्यातः निरगात् निर्गतवान्——इणो लुङ ।। ३-१०४ ।।

(प्रद्यो३-१०५) **मणिमदिति ।** वैभवमेवाह——मणिमदित्यादिना । मणिमती माणिक्ययुक्ते रथाङ्गे चक्रे यस्य तत् तथोक्तम्——चक्रं रथाङ्गमित्यमरः——शताङ्गं रथम्——शताङ्गः स्यन्दनो रथः इत्यमरः——अधिरुह्य आरुह्य दशरथेन सः वसिष्ठः पुरोदधे अग्रतः कृतः——दधातेः कर्मणि लिट् । रघुवंशराजानां रघूणां कुलस्य वृद्धचिरण्टी वृद्धसुवासिनी——चिरण्टी तु सुवासिनीत्यमरः——अरुन्धतीनाम्ना प्रसिद्धा सहचरी——सह चरतीति सह भूता पत्युः——पचादिषु चरडिति पाठात् टिड्ढेत्यादिना ङीप्——तं वसिष्ठम् अनुभेजे सिषेवे ।। ३-१०५ ।।

(प्रद्यो-३-१०६) **कुचकुम्भेति ।** मणिखचिताः शातकुम्भमयाः तपनीयविकाराः पञ्जराः——तैः गुप्ताः——तपनीयं शातकुम्भमित्यमरः——कुचौ कुम्भाविव कुचकुम्भौ——तयोः कान्त्या जिताः तिरस्कृताः कुञ्जरकुम्भाः करिकुम्भाः यासां ताः तथोक्ताः——बधिराः बर्बराः कुब्जाः वामनाश्च——तथोक्ताः——तैरन्विताः युक्ताः अब्जानि कमलानीव [41]लपनानि मुखानि यासां ताः तथोक्ताः——आननं लपनं मुखमित्यमरः——नृपनार्यः राज्ञ्यः शिबिकाभिः याप्ययानैः ययुः जग्मुः ।। ३-१०६ ।।

(प्रद्यो-३-१०७) **मदिरेति ।** मदिरामदेन मद्यमदेन विवशाः विह्वलाः नवाः शाट्यो वस्त्राणि यासां ताः तथोक्ताः नगरवारवधूट्यः वाराङ्गनाः तुरगैरगुः ययुः——इणो लुङ——घनसारेण कर्पूरेण——अथ कर्पूरमस्त्रियाम्, घनसारः इत्यमरः——पूरिताः

हिरण्मय्यः कनकमय्यः पेट्यः पेटिकाः यासां ताः तथोक्ताः चेट्यः दास्योऽपि अमूर्वाराङ्गनाः सहसा शीघ्रम् अनुवव्रजुः अनुजग्मुः—व्रजेर्लिट् ।। ३-१०७ ।।

(प्रद्यो-३-१०८) **रथिभिरिति** । रथिभिः रथिकैः मतङ्गजतुरङ्गमवाहैः—मतङ्गजाश्च तुरङ्गमाश्च—बहन्तीति तथोक्ताः-तैः-गजवाहैरश्ववाहैश्चेत्यर्थः—परितः सर्वतः पदातयः पादचराः—तेषां समूहैः संकुलं व्याकुलं सैन्यं यस्य स तथोक्तः दशरथः बलरेणुपङ्किलपयोधिः—बलानां सेनानाम् आगमनेन संभूतैः पांसुभिः पङ्किलः (पङ्कवान् कृतः) पयोधिः यस्य स तथोक्तः सन् दशभिर्दिनैः तां मिथिलाम् अयासीत् प्राप्तवान् । यातेः लुङ ।। ३-१०८ ।।

(तृतीयसर्गव्याख्यायां प्रद्योतन्याम् इयानेव भागः मातृकायाम् उपलभ्यते ।
चतुर्थसर्गे प्रथमपद्यादारभ्य पुनरपि प्रद्योतनी-व्याख्या मातृकायां लभ्यते ।

सा चतुर्थसर्गारम्भतो द्रष्टव्या ।—संपादकस्य)

NOTES TO PRADYOTANĪ—Canto III

[1] Bombay edn. reads: *adhigantum*. MS.1.(Madras) and MS.7 (Mysore) read: *abhigantum*.

[2] Bombay edn. reads: *aicchata*, which is not correct, because the root of *icchati* is always a *parasmaipadin*. MS.1. and MS.7 read: *aihata* correctly.

[3] Bombay edn. reads: *api locanāni*. MS.1 and MS.7 read: *upalocanāni*. In the light of the explanation as: *apāṅgāni* in the Commentary, *upalocanāni* seems to be the correct reading.

[4] Only MS. 1 reads the last foot as: *virahāsahāḥ samapatan dhuri dhīrāḥ*. Bombay edn. and MS.7 read: *virahāsahāś ca nirahāsata kīrāḥ*, and this agrees with the Commentary.

[5] Bombay edn. reads: *gṛhapakṣisamūhāḥ*. MS. 1 and MS. 7 read: *mṛga-pakṣisamūhāh*.

[6] *pradadakṣire* is explained as: *pradakṣiṇaṃ cakruḥ*. The expression: *dakṣiṇa* (of *pradakṣiṇa*) is derived from the root: *dakṣa* = *vṛddhau*, by adding the suffix *inan* noted in the *Uṇādi* rule: *dru-dakṣibhyām īnan* (208). The meaning of *pradakṣiṇa*, perhaps, may be noted thus: *prakarṣeṇa dakṣate* = *vardhate śubham asmād iti pradakṣiṇam* (*gamanam bhramaṇaṃ vā*). the clock-wise movement while going around the idols and the temples etc. is regarded as auspicious which, is the custom even now in India. Having all these points in mind, the Commentator rightly renders *pradadakṣire* as *pradakṣiṇaṃ cakruḥ*, which might have been intended by the poet also. See also the *Kādambarī*: *atra ca snānārtham āgatayā bhagavatyā pārvatyā taṭaśilātaleṣu vilikhitāni sabhṛṅgiriṭīni pāṃsunimagnakṛśapada-maṇḍalānumitamunijanapra-ṇāmapradakṣiṇāni tryambakapratibimbakāni vandamānā . . . . saha sakhījanena vyacaram*. (p. 298;NSP edn.1948). (2) See also the *Harṣacarita*: *athānyasminn ahany utthāya, prātar eva snātaḥ. . . . . pradakṣiṇīkṛtya prāṅmukhīṃ naicikīṃ gām . . . prītikūṭāt niragāt* (*bāṇaḥ*). (p.85, Trivandrum edn., 1958). (3) See also in the *Śākuntala* of Kālidāsa: Kāśyapaḥ: *vatse itaḥ sadyohutāgnīn pradakṣiṇīkuruṣva*. (*sarve pradakṣiṇam parikrāmanti*). 4th Act; after verse 6.

[7] Bombay edn. reads: *kiyatīṃ ca*. MS. 1 and MS. 7 read: *kiyatīṃcit*.

[8] In this context, the *Mahābhāṣya* has this (on 5.2.40): *etad eva jñā-payaty ācāryaḥ—bhavati kimidaṃbhyāṃ vatup iti—yad ayaṃ kimidaṃbhyām uttarasya vatupo ghatvaṃ śāsti*. Cauṇḍisūri is having this in mind.

[9] See the *Saṃjīvinī* (the other Commentary on *Udāra.*) which has *kalita-puñjam*, instead of *lalitapuñjam*.

[10] Bombay edn. reads: *navamallikā*—etc. MS. 1 (Madras) reads: *navamālikā* clearly. MS 7 seems to read: *vanamālikā*. But the explanation in both the Commentaries, quoting Amara as: *saptalā navamālikā*, indicates that *navamālikā* was the intended reading. *Vanamālikā* instead of *navamālikā* may be due to the scribe's understanding—some sort of metathesis.

[11] The word *aṅguli* is *Uṇādi-pratyayānta* (by the rule *Ṛ—tani-añji*-etc. (442). According to the Gaṇasūtra: *Kṛdikārād aktinaḥ* words such as: *rātri*, *aṅguli* etc. can have the forms either with short "i" or long "ī". Both are feminine and are correct.

[12] Bombay edn. has *duduvire*. MS. 1 and MS. 7 and the Commentaries have *dudhuvire*.

[13] Bombay edn. reads: *vanavallayo vicakaruḥ*. MS. 1, MS. 7, and the Commentaries read: *vanavallayo'pi cakaruḥ*.

[14] Bombay edn. reads: *pathi mañju vireṇuḥ*. MS. 1, MS. 7, and the Commentaries read: *madhuraṃ pathi reṇuḥ*.

[15] The line of the Commentary here is defective, and it seems to read: *yuddhādyaṣṭaprakūrivadham*. Mallinātha gives the quotation on *Raghu*. 5. 50 and 9. 74, and on the basis of this I surmised the reading as given. Almost all the expressions in the *Pradyotanī*. here are exactly the same as those in Mallinātha's line: *atra cākṣuṣaḥ—yuddhād anyatra karivadhaṃ na kuryāt; iyaṃ hi śrīr ye kariṇaḥ*. It is not clear as to whether we are to take from this quotation in the *Pradyotanī* that the author Cauṇḍisūri is quoting from Mallinātha or somebody else which is possible. See Note 26 also. See also my Note 5 to the *Saṃjīvinī* the other Commentary on the *Udārarāghava*.

[16] It seems to read: *anurodhinā = anukūlena*.

[17] See my Note 9 to the *Saṃjīvinī* (on *adhimat*).

[18] The referece is probably to *Maitreya-rakṣita*. (I have, no access to the *Dhātuvṛtti* here.)

[19] I am unable to identify śrī-Raṅgarāja, and to trace the quotations. One Raṅgarāja is referred to by Mallinātha, as a Commentator on the *Māgha* 6. 48. Perhaps the same author is meant.

[20] I have no means of verifying or checking about the *Kriyāratnakośa*. See also Note 28.

[21] This may be reference to Sundarapāṇḍya to whom a work *Āryāvalī* by name is attributed.

[22] Bombay edn. reads: *katham ānamed ayam iti*. MS. 1, MS. 7 and the Commentaries read: *katham ānameta tad iti. Namate daṇḍaḥ* is explained as a case of *karmakartari prayoga*. See S. K. under *Tapas tapaḥkarmakasyaiva* (3.1.88), where Bhaṭṭoji notes: *antarbhāvitaṇyartho'tra namiḥ*.

[23] The expression: *anugrahayāluḥ* (with—*grah;* with consonant "*r*") is needed here to comply with the metrical requirement (*iha mañjarī sajasasā guruyuktā*—see *Pradyotanī* on III.1). But, according to the rule: *Spṛhi-gṛahi*-etc. (3.2.158) only the expression: *anugṛhayāluḥ* (with the vowel: "*ṛ*", not with the consonant is possible; because it is applicable to the root: *Gṛha=grahaṇe* of *Curādi;* not to the root: *graha=upādāne* of *Kryādi*) is possible. Appayārya in his Commentary on the Amara (Adyar Library Publication;Vol.II, page39) says thus: *Grahayālur iti rephasahitaḥ pāṭho bhrānti-mūlaḥ*. From the word: *pāṭhaḥ* in the Commentary, there was also such a reading as: *grahayālu*, which was noticed but not approved by *Appayārya*. Our author Śākalyamalla perhaps implies by the usage, if it be the reading, approval of correctness thereof. If it so, the usage: *grahayālu* is to be justified on the strength of *bahulagrahaṇa*—in the rule: *Kṛtyalyuṭo bahulam* (3. 3. 113), where Patañjali notes: *Kṛto bahulam*. See also the *Kāśikā* on 3. 3. 113, the *Nyāsa* and the *Padamañjarī* thereon. In the use of *grahayālu* even with the help of the *bahulagrahaṇa*, the unusual points will have to be explained. One is the application of the suffix: *āluc* to the *ṇijanta* of the root: *graha=upādāne* (in order to have the element "*yā*"; otherwise it will be: *gṛhālu*). The other point is *vṛddhyabhāva*, as otherwise like the *Ṇijanta* form: *grāhayati*, the form will have to be *grāhayālu*, and the form: *anugrāhayālu* will offend against the metre. All this exercise reminds us of the Maxim: *ubhayataḥspāśā rajjuḥ* (See the *Mahā-bhāṣya* 6. 1. 68). Either it is to be admitted that *anugrahayālu* was an error on the part of Śākalyamalla, or we should think that the reading might have been different and as follows: *gṛhayālunā munir anuspṛhayāluḥ* (not as: *spṛhayā-lunā munir anugrayhayāluḥ*). As Janaka was showing his genuine intention of being a courteous receiver (*grhayālur=grahītā*), the sage Viśvāmitra felt a keener desire to attend the function that was being organised by Janaka. See also Note 25 on *Niraṅkuśāḥ kavayaḥ* and *api māṣaṃ maṣaṃ kuryāt chando-bhaṅgaṃ na kārayet*.

[24] In the usage of *abhyagami*, in view of the application of the *vṛddhi*—by the non-optional rule: *ata upadhāyāḥ* (7. 2. 116)—the proper form should have been *abhyagāmi* (not *abhyagami*). The form: *abhyagāmi* would offend against the metre. Hence *abhyagami* was used by the poet. The Commentator points out this grammatical lapse here.

[25] This is a reference to the *Śiśupālavadha*, 9. 17 (*divaso'numitram agamad vilayam* etc.) where in the expression: *sandhyayā vyagami*, Māgha has

the similar usage: *vyagami* (without *vṛddhi*). Cauṇḍi-paṇḍita notes here that even the usage: *vyagami* of Māgha was not accepted as correct by the Commentator Vallabhadeva, who for this reason reads: *nyaśami* instead of *vyagami*. See Note 26 for the details of the reason. Mallinātha has the following: *sandhyāyāpi sapadi vyagami, vyapāgāmīty arthaḥ. gameḥ svārtha-ṇyantād bhāve luṅ mittvād hrasvaḥ.*

aṇyantād upadhāvṛddhir nāyaṃ syād hetumaṇṇici,
tasmāt svārthe ṇij-utpādyo mitāṃ hrasvo yato bhavet.

On the expression: *dūti* of *dūtikṛtamārgadarśanaḥ* in the *Raghuvaṃśa* 19. 23 (*kḷptapuṣpaśayanāt* etc.) Mallinātha says: *atra ṅibantasyāpi dūtī-śabdasya chandobhaṅgabhayād hrasvatvaṃ kṛtam. "api māṣaṃ maṣaṃ kuryāt chandobhaṅgaṃ tyajed girām" ity upadeśāt.*—i.e. the shortening of long "*ī*" was adopted for the purpose of avoiding *chandobhaṅga*—if the long "*ī*" was retained, it would offend against the metre. Also on 4. 45 of the *Raghuvaṃśa*, Mallinātha says: *niraṅkuśāḥ kavayaḥ*, meaning that the poets have their own liberty, and they do not follow the general rules and conventions sometimes. If we take into consideration these points of (POETICAL) LIBERTY and METRICAL EXIGENCY—Sākalyamalla's usage of *abhy-agami* (and also Māgha's *vyagami*) can too go uncensured. The same consideration may apply to the usage of *anugrahayāluḥ* also, which was discussed in the Note 23.

[26] Vallabhadeva in his Commentary on the Māgha (9. 17) reads: *nyaśami* (for *vyagami*). Vallabha was earlier than Mallinātha. Mallinātha quotes Vallabha and criticises him in many places. See Mallnātha's Commentary on Māgha II. 44; VI. 28, VII. 41; and on XVIII. 27. Mallinātha tries to justify the usage of *vyagami* of Māgha. Cauṇḍisūri does not have any reference to these comments of Mallinātha (on Māgha 9. 17). It is not clear whether this indicates that Cauṇḍi did not know Mallinātha as he was either a senior contemporary or a bit earlier than Mallinātha. See also Note 15.

[27] This is obviously a reference to the *abhyaṅgasnāna* or *tailasnāna* (i.e. "Oil-bath", applying first seasumum oil all over the body and then having the bath and washing it off) which is common even now in some families in South India. *Carakasaṃhitā* has the following:

tathā śarīram abhyaṅgād dṛḍhaṃ sutvak ca jāyate,
praśāntamārutābādhaṃ kleśavyāyāmasaṃsaham. (I. 5. 86)

This shows that this habit of oil-bath or oil-massage was in existance even in the days of our author Sākalyamalla (who belongs to the Andhra area). Caraka also mentions about several good effects of *snehābhyaṅga, mūrdhni taila-niṣevaṇa* etc. (See *Caraka*—NSP edn. 1941 p. 42).

[28] *Ākhyātacandrikā* was written by our author Śākalyamalla.

[29] See also Note 20.

[30] This seems to be a reference to the author of the *Saṃjīvinī*. Bombay edn. and the *Saṃjīvinī* read *ārhīt*. MS. 1, MS. 7 and the *Pradyotanī* read: *ārcīt*. See also verse VIII 6.

[31] Cauṇḍi-paṇḍita's criticism of the reading of *ārhīt* and his comments are not very convincing and his understanding that *ārhīt* is not correct is questionable. Even in the *Curādi* the root: *arha* coming under the jurisdiction of the *Gaṇasūtra*: *Ādhṛṣād vā*, is treated as *vibhāṣita-nic-ka*. Our author Bhaṭṭamalla himself mentions in his *Ākhyāta-candrikā* that *arhati* is a correct and idiomatic form. So the forms without *Ṇic* such as *arhati* and *ārhīt* are handed down from Pāṇini onwards as right forms. Consequently to treat this root as *nitya-curādi*—by which probably he means that it is *nitya-ṇijanta*, and to say that *ārhīt* is wrong only indicate that Cauṇḍi's understanding of the point here is questionable.

[31a] See the commentary on III-7.

[32] Cauṇḍisūri renders *ahirāja* as Vāsuki. Later in III. 102. Śākalyamalla himself mentions Śeṣa to have been the *guna* (or *jyā*).

[33] Bombay edn., MS. 1 and the *Saṃjīvinī* read: *sthirā bhava* MS. 7 and the *Pradyotanī* read: *sthirībhava*, and the Commentary explains it as: *abhūtatadbhāve cviḥ*.

[34] See the *Mahābhāṣya* on 8. 1. 12, and Kaiyaṭa, the *Kāśikā* and the *Padamañjarī* thereon. The point of idiom of repeating an expression conveyed by the *Vārttika*: *Cāpale dve bhavataḥ* is given by Bhaṭṭoji as: *Saṃbhrameṇa pravṛttau yatheṣṭam anekadhā prayogaḥ*.

[35] MS. 1, MS. 7 and the *Pradyotanī* read: *udgatah*. Bombay edn. and the *Saṃjīvinī* read: *uddhataḥ*.

[36] After this, there is one more sentence which seems to deal with a different reading (*diviṣṭhāḥ*). But the portion is highly illegible.

[37] MSS. seem to read: *udīye*. Perhaps it should be *udaiṣṭa* (Aorist form of the root *Iṅ*—gatau). In the perfect Tense the form should be *ayāṃ cakre*. Or it would be easy, if we can find the reading as: *amandam iyāya*.

[38] Amara records the use of *Vaiṇavika*. The Commentator Liṅgaya-sūri (and others too) explain the grammatical points of this usage. It does not seem to be wrong. Cauṇḍi's comments on the matter seem to be incomplete.

[39] MS. 1 and the *Saṃjīvinī* read: *dhanvini hṛṣṭe*. Bombay edn., MS. 7 and the *Pradyotanī* read: *taddhvanihṛṣṭe*.

[40] Bombay edn. and the *Saṃjīvinī* read: *amṛtodamagna iva*. MS. 1, MS 7 and the *Pradyotanī* read: *amṛtotsamagna iva*. Gopīnātha, the author of the

Saṃjīvinī does not refer to the *pāṭhāntara* as *amṛtotsamagna* etc., whereas Cauṇḍisūri refers to the *paṭhāntara* as *amṛtodamagna* etc. which was known to Gopīnātha. Probably Gopīnātha was earlier than Cauṇḍi-sūri. Or he might have been a contemporary, and perhaps the *Pradyotanī* was not yet known at his time.

[41] Bombay edn. reads *abja-nayanā*.

उदारराघवे महाकाव्ये चतुर्थसर्गस्य व्याख्या प्रद्योतनी चौण्डिपण्डितेन कृता

(प्रद्यो-४-१) **तत इति।** ततः अयोध्याप्रवेशानन्तरम्-कदाचिद् राजा दशरथः तरुणं युवानम् गुणार्णवम् औदार्यादिगुणाकरं कुमारं पुत्रम् रामम् अवेक्ष्य पौराणां नागरिकाणाम् प्रधानानां मन्त्रिणाम्(च) अनुमतः संमतः मनीषी विद्वान्—पृषोदरादित्वात् साधुः—जगतां लोकानां हितैषी हितमिच्छतीति तथोक्तः—इषेः सुप्यजाताविति णिनिः—अभिषेक्तुम्-यौवराज्ये इति शेषः—ऐषीत् ऐच्छत्। इष इच्छायामित्यस्मात् लुङ ॥ ४-१ ॥

(प्रद्यो-४-२) **आनायिता** इति। नृपेण राज्ञा हर्षेण संतोषेण-रामाभिषेकोत्सवदर्शनाय-समन्तात् सर्वतः जानपदाः जनपदेषु भवाः—प्रजा इति यावत्—आनायिताः आनयनं कारिताः राजर्षिगणः—राजानः ऋषय इव राजर्षयः—तेषां गणः वर्गः आह्वायि आहूतः—ह्वयतेः कर्मणि लुङ—महर्षिलोकः महर्षीणां वर्गः आनायि आनीतः-नयतेः कर्मणि लुङ ॥ ४-२ ॥

(प्रद्यो-४-३) **भूमानमिति।** हर्षयोगैः सह वर्तन्ते इति सहर्षयोगाः—हृष्टाः—गाधितनूजमुख्याः महर्षयः अस्य सर्वलोकाधीश्वरस्य भूमानं महिमानम् अविमृशन्—अविचारयन्-इह अस्मिन् लोके—भूमात्रराज्ये—भूरेव भूमात्रम्—मात्रं कार्त्स्न्येऽवधारणे इत्यमरः—तस्य राज्ये—न तु त्रैलोक्यराज्ये इति भावः—एनं रामम् अभिषेक्ष्यतीति—नरेन्द्रं जहसुः हसितवन्तः—हसतेः कर्तरि लिट् ॥ ४-३ ॥

(प्रद्यो-४-४) **राज्ञेति।** रघुवंशस्य केतोः चिह्नस्य रामस्य—केतुर्ध्वजौ पताकायां ग्रहोपाहितलक्ष्मसु इति विश्वः—अभिषेक एव हेतुः—तस्य अभिषेकहेतोः—अभिषेकार्थमित्यर्थः—षष्ठी हेतुप्रयोगे (२-३-२६) इति षष्ठी—राज्ञा दशरथेन नियुक्ताः भटाः नीराकरेभ्यः नीरधिभ्यः—नीरकीराम्बुशम्बरम् इत्यमरः—निखिलापगाभ्यः सकलापगाभ्यः—स्रवन्ती निम्नगापगा इत्यमरः—सकलह्रदेभ्यः अखिलजलाशयेभ्यः—तत्रागाधजलो ह्रद इत्यमरः—अम्भांसि जलानि आजह्रुः आनिन्युः—हरतेर्लिट् ॥ ४-४ ॥

(प्रद्यो-४-५) **तीर्थेति** । गृहिणां गृहस्थानां वरिष्ठः श्रेष्ठः गुरुः आचार्यः वसिष्ठः [1]सद्भिः द्विजैः सह एत्य समागत्य [2]तीर्थाम्बुपूर्णाः पवित्रोदकपूर्णाः सरत्नाः रत्नसहिताः कलशीः कृतप्रयत्नाः कृतसंस्काराः विधिवद् विधाय कृत्वा [3]अभ्यममन्त्रत् अभ्यमन्त्रयत्-मत्रि गुप्तभाषणे इत्यस्मात् लुङ् ।। ४-५ ।।

(प्रद्यो-४-६) **काश्मीरेति** । नरेन्द्रो दशरथः काश्मीरेण कुङ्कुमेन सहितेन गन्धोदकेन सिक्ताः प्लुताः वीथ्यो रथ्याः यस्याः सा तथोक्ता-ताम्—काश्मीरं कुङ्कुमं प्रोक्तमिति विश्वः—आमुक्ताः रचिताः (मुक्ताफलाकाराः) रङ्गवल्ल्यः (अलंकारार्थ मङ्गलार्थं च विन्यस्यमानाः) रञ्जकरेखाः यस्यां सा तथोक्ता ताम्—(तत्तत्प्रतोलीषु तत्तद्राजवीथीषु) मणिमयान्येव तोरणानि-तेषाम् अङ्काः चिह्नानि यस्यां सा तथोक्ता ताम्—मणिप्रोततन्तुजालैः अलंकृतामित्यर्थः—पुरीमयोध्याम् [4]सत्कारयामास सत्कारितवान्—अलंकारितवानित्यर्थः—करोतेः ण्यन्तात् लिट् ।। ४-६ ।।

(प्रद्यो-४-७) **वस्त्राणीति** । गृहाङ्गणेषु मन्दिराजिरेषु वणिग्भिः वैश्यैः उच्चैः उन्नतैः वंशैः वेणुभिः—वंशस्तु वेणुकुलयोरिति विश्वः—चित्राणि नानावर्णानि वस्त्राणि (अनह्यन्त) नद्धानि—णह् बन्धने इत्यस्मात् कर्मणि लङ्—यच्छायया येषां वस्त्राणां छायया नीव्राणि वलीकानि तीव्रांशुमयूखजालं सूर्यकिरणसमूहः किंचिदेव (किंचिदपि) नागाहत नाविशत्—गाहतेः लङ् ।। ४-७ ।।

(प्रद्यो-४-८) **आध्मासिषुरिति** । वेणुः शिल्पमेषामस्तीति वैणविकाः—वेणुध्माः स्युर्वैणविकाः—वेणून् वंशान् आध्मासिषुः पूरयामासुः—ध्मा शब्दानिलसंयोगयोरित्यस्मात् लुङ्—काहलानां वाद्यविशेषाणां शङ्खानां कम्बूनां च नादः ध्वनिः खम् आकाशम् व्यानशे व्याप्तः—काहलो वाद्यभेदे स्यादिति विश्वः—शङ्खः स्यात् कम्बुरित्यमरः—अनन्तं सुरवर्त्म खम् इति चामरः—अशू व्याप्तावित्यस्मात् लिटि व्यानशे इति रूपम्—ढक्केति वाद्यविशेषः—हुढक्कापि—एते वाद्यप्रभेदाः स्युरिति प्रतापमार्ताण्डः—हुडुक्क इत्यपि पाठान्तरम्—हुडुक्को वाद्यभेदे स्यादिति विश्वः—आनकः पटहः—तेषा नादेन ध्वनिना मोदेन संतोषेण च पूः अयोध्यापुरी पुपूरे पूरिता—पूरयतेः कर्मणि लिट् ।। ४-८ ।।

(प्रद्यो-४-९) **पौरैरिति** । पौरैः नागरिकैः गृहाणि वेश्मानि—गृहं गेहोदवसितं वेश्मेत्यमरः—संचस्करिरे अलंचक्रिरे—सम्-पूर्वात् करोतेः कर्मणि लिट्—सम्परिभ्यां करोतौ भूषणे, सुट् कात्पूर्वः (६-१-१३५) इति सूत्राभ्याम् अडभ्यासव्यवायेऽपीति वार्त्तिकेन च कात् पूर्वः सुडागमः—वाराङ्गनाभिः वेश्याभिः वपुः शरीरं बुभूषे भूषितम्

—भूषतेः भौवादिकात् कर्मणि लिट्—सर्व कषन्तीति सर्वकषाः सर्वव्यापिनः—सर्व-कूलाभ्रकरीषेषु कषः इति खच् प्रत्ययः—अर्रुद्विषदित्यादिना मुमागमः—सर्जरसः धूपद्रव्यविशेषः—सः आदिः येषां ते तथोक्ताः—तेषां धूपाः—अभ्रंकषान् अत्युन्नतान् सौधान् राजसदनानि आरुरुहुः आरूढाः—रुह् धातोः कर्तरि लिट् ।। ४-९ ।।

(प्रद्यो४-१०) **आबालमिति ।** समस्तलोकः सकलोऽपि जनः निरस्तशोकः—निरस्तः तिरस्कृतः शोकः दुःखं येन सः तथोक्तः सन्—निरस्तलोभः [5]इति पाठे तिरस्कृतलोभ इत्यर्थः—आबालम् बालानभिव्याप्य—आङ अभिव्याप्तौ—आनञ्ज अभ्यङ्गं कृतवान्—गन्धैः मलयजैः लिलेप लिम्पति स्म—वपुरिति शेषः—माल्यानि स्रजः दधार धृतवान्—नवानि नूतनानि नानावसनानि अनेकवस्त्राणि नानावर्णानि वसनानि वा अवस्त आच्छादयत्—वस आच्छादने इत्यस्मात् लङ ।। ४-१० ।।

(प्रद्यो-४-११) **तत इति ।** ततः नगरालंकारानन्तरम् नरेन्द्रेण दशरथेन प्रहितः प्रेषितः सुमन्त्रः गुणाभिरामम् औदार्यादिगुणाभिरामं रामम् रामचन्द्रं समुपेत्य प्राप्य तेन रामेण अभ्युद्गतः प्रत्युद्गतः सुपूजितः संमानितश्च सभायां प्रमोदवार्ताम् आमोदवृत्तान्तम् अवदत् अभणत्—वदतेर्लङ ।। ४-११ ।।

(प्रद्यो-४-१२) **राज्ये इति ।** हे राम राज्ये तव अभिषेकः पट्टाभिषेकः श्वः भविता भविष्यति—अनागतेऽह्नि श्वः इत्यमरः—भवितेति भवतेर्लुट्—अद्य अभ्यज्य अभ्यङ्गं कृत्वा उपोषितः (उपवासं कुर्वन्) विभूषितः अलंकृतः रजन्यां रामासहितः सीतया समेतः आयरावृतः गुर्वाद्यभिवृतः तूर्यनादैः—सहित इति शेषः—जागृहि जागरं कुरु—जागर्तेर्लोट् ।। ४-१२ ।।

(प्रद्यो-४-१३) **पुण्याहमिति ।** पुण्याहं स्वस्तिवचनम् आवाच्य दक्षिण्यम्—दक्षिणामर्हतीति तथोक्तम्—दक्षिणेयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि इत्यमरः—पुरोहितौघम् पुरोधःसंघम् दक्षिणाभिः दक्षिणादानैः आराधय संपूजय—हे रघुवंशरत्न रघुश्रेष्ठ—रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः—तव तातः पिता राज्याभिषेके सर्वयत्नम् सर्वोद्योगं करोति ।। ४-१३ ।।

(प्रद्यो४-१४) **कुलक्रमेति ।** हे कुमार युवराज कुमारो बालके स्कन्दे युवराजे इति विश्वः—प्राज्या प्रभूता श्रीः संपत् यस्य तस्य प्राज्यश्रियः—प्रभूतं प्रचुरं प्राज्यमित्यमरः—पङ्क्तिरथस्य दशरथस्य राज्ञः नृपतेः कुलक्रमागामि कुमारराज्यम् यौवराज्यम्—कुमारेति वा छेदः—आसाद्य प्राप्य भद्रासनस्थः राजासनस्थः सन्—राजतन्त्रासनं राज्ञां भद्रासनमिति स्मृतम् इति प्रतापमार्तण्डः—नृपासनं यत् तद्

भद्रासनं सिंहासनं तु तत् इत्यमरश्च—आसमुद्रम् समुद्रानभिव्याप्य—आङमर्यादाभिविध्योरित्यव्ययीभावः—चिरं शासत् रक्षन्—शास्तेः लटः शतृप्रत्ययः—उर्व्याः पृथिव्याः भारं धुरम् भर वह—भरतेर्भौवादिकात् लोट् ।। ४-१४ ।।

(प्रद्यो-४-१५) **सत्सन्ततिमिति ।** हे वत्स पुत्र विदेहपुत्र्यां सीतायां सत्सन्ततिं सत्सन्तानम्—सन्तानः सन्ततिः स्त्री स्यात् प्रसूतिश्चेति प्रतापमार्ताण्डः—सन्ततिर्गोत्रजननेत्यादि वंशोऽन्ववायः सन्तानः इति चामरः—उत्पाद्य जनयित्वा सत्पात्रे न विद्यया केवलया इत्युक्तपात्रे समर्पितार्थः—समर्पितो दत्तोऽर्थः येन स तथोक्तः—अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इत्यमरः—हे रघुनाथ रघुपते अयोध्यापुरवासिनः तत्र स्थितान् अस्मान् रक्षन् पालयन् रक्षांसि राक्षसान् हत्वा जीयाः—जि जये इत्यस्माद् आशीर्लिङ—अकृत्सार्वधातुकयोः (७-४-२५) इति दीर्घः ।। ४-१५ ।।

(प्रद्यो-४-१६) **श्रुत्वेति ।** रामः इति इत्थम् श्रवसोः श्रवणयोः—श्रुतिः श्रवणं श्रवः इत्यमरः—असह्यं प्रधानवाक्यं (सुमन्त्रवाक्यं) श्रुत्वा प्रहसन् बभाषे उवाच—भाषतेर्लिट्—किमिति—(तत्राह) हे आर्य कुलीन—आर्यः कौलेयकोऽमात्यः कुलीनः कुलजोऽभिजः इति प्रतापमार्ताण्डः—सुमन्त्र प्रमोदवार्तेति वदन् ब्रुवाणः सन् इह अस्मिन् समये प्रमादवार्ताम्—अनर्थवार्तां प्रकटीकरोषि व्यक्तीकरोषि ।। ४-१६ ।।

(प्रद्यो-४-१७) **सुखायेति ।** हे तात वैद्यस्य भिषजः—भिषग् वैद्यश्चिकित्सकः इत्यमरः—सर्पिर्मधुनोः घृतक्षौद्रयोः ऐक्यमिव—तथा च वाहटे—

मधुसर्पिर्वसातैलपानीयानि द्विकस्त्रिकः ।
एकत्र वा समांशानि विद्यन्तेऽथ परस्परम् ।।
भिन्नांशे अपि [6]मध्वाज्ये वार्ये

इति । ज्वरातुरस्य ज्वरितस्य पय इव न पथ्यम्—एतद्वाक्यम् मम सुखाय हर्षाय न—न भवति—हे सुमन्त्र वृद्धाः स्खलन्तीति यत् तत् तथ्यम् सत्यम्—तथ्यं सत्यम् ऋतं सम्यगित्यमरः ।। ४-१७ ।।

(प्रद्यो-४-१८) **इक्ष्वाकुभिरिति ।** उदूढसत्त्वैः धृतबलैः इक्ष्वाकुभिः—इक्ष्वाकोरपत्यानि इक्ष्वाकवः—तैः तद्राजस्य बहुषु तेनैवास्त्रियाम् (२-४-६२) इति बहुवचनप्रत्ययस्य लुक्—तैः व्यूढम् धृतं महान्तम् अधिकं भारं धुरम्—रघवः रघोर्गोत्रापत्यानि पुमांसः रघवः वहन्ते-बिभ्रति—शिशुरहं बालोऽहं क्व—एष भरः राज्यभारः क्व—गजस्य पल्याणम् पल्ययनम्—पल्याणं स्यात् पल्ययनम् इत्यमरः—अजस्य छागस्य कथं वा योग्यम्—न योग्यमित्यर्थः—रघव इति तद्राजप्रत्ययान्तमिति केचित्—कौरवौ

कुरवः इति राघवः राघवौ रघवः इति--रघवः इत्यादयः तद्राजप्रत्ययान्ता न भवन्तीति पदमञ्जरीकाराः [7]आहुः ।। ४-१८ ।।

(प्रद्यो-४-१९) **अविरिति** । अविः बस्तः (एवं) मेषः एडकः--मेषवृष्णय एडके इत्यमरः--अनसि शकटे--विषयसप्तमीयम्--वीर्यं वहनव्यापारः--तदेव हेतुः--तस्य वीर्यहेतोः--वीर्यार्थमित्यर्थः--षष्ठी हेतुप्रयोगे इति षष्ठी--न भवतीति शेषः--अनः उद्वाह्यं शकटम् वोढुम् अविमेषावसमर्थावित्यर्थः--मीनः केतौ यस्य--तस्य कामस्य धन्व इक्षुधनुरित्यर्थः न स्थूणायते--स्थूणा न भवति--न स्तम्भायते इत्यर्थः--स्थूणा स्तम्भेऽपि वेश्मनः इत्यमरः--लोहितादित्वात् क्यष्--वा क्यषः (१-३-९०) इत्यात्मनेपदम्--अन्यमृगः कुरङ्गादिः सिंहालयं सिंहगुहाम् नाधिशेते--न तत्र तिष्ठतीत्यर्थः--अधिशीङस्थासां कर्म इति अधिकरणस्य कर्मसंज्ञा--रघूणां धुरं भारं रामो रामचन्द्रो न धरेत--धरेत इति धृञ् धारणे इत्यस्मात् लिङि रूपम्--ञित्त्वादात्मनेपदम् ।। ४-१९ ।।

(प्रद्यो-४-२०) **दिलीपेति** । रघुः दिलीपेन दत्तां शाकंभराम्--भूमिम्--शाकं बिभर्तीति शाकंभरा--ताम्--संज्ञायां भृतृ--इत्यादिना (३-२-४६) खच् प्रत्ययः--मुमागमश्च--तां भूमिम् अन्वशात् अपालयत्--शास्तेर्लङ--पितामहस्य ब्रह्मणः ओज इव ओजो यस्य स तथोक्तः--पितामहः पितृपिता--पितामहः पितृपिता इत्यमरः--अजश्च तां पृथ्वीम् अन्वशात्--ततः तदनन्तरम् तातपादाः पितेत्यर्थः--बहुवचनान्तप्रयोगः पूजार्थम्--क्रमाप्तां क्रमेण प्राप्तां शाकंभरां तनयैरस्माभिः साकं शासतु पालयन्तु--पिता पालयत्वित्यर्थः ।। ४-२० ।।

(प्रद्यो-४-२१) **सुमन्त्रेति** । हे सुमन्त्र शोभनविचार--इयं सोल्लुण्ठनोक्तिः--एष कस्य कुमन्त्रपाकः कुत्सितविचारफलम्--यद् अस्मिन् पाके अर्भके मयि--(पाकः शिशौ इति विश्वः) दुर्विपाकः दुष्टपरिपाकः--तस्मात् कुमन्त्रपाक इत्यर्थः--राज्ञि दशरथे राज्यं चिरं बहुकालं शासति रक्षति सति अहं च अनुजैः सह अनुजन्मभिः सह राजेव खेलन् क्रीडन् सुखी संतोषवान् स्याम् भवेयम्--अस्तेर्लिङ ।। ४-२१ ।।

(प्रद्यो-४-२२) **पुत्र इति** । हि यस्मात् कारणात् धन्यो भाग्यवान् पूरुर्नाम पुत्रः निजयौवनेन ययातेः स्वपितुः जरां वृद्धत्वम् विन्यमिनोत् विनिमयम् अनैषीत् मिनोतेर्लङ--ययातये स्वपित्रे स्वयौवनं दत्त्वा तत्संबन्धिनीं जरां गृहीतवान् इत्यर्थः--तातस्य पितुः वनेन वनवासेन राज्यं मदीयं राज्यम्--वयसा मदीयेन वयसा जरां पितृसंबन्धिनीं जरां च विनिमातुं विनिमयं कर्तुम् ईहे इच्छामि--ईह

चेष्टायामित्यस्मात् लट्—सत्यं ध्रुवम्—वृद्धानां वनवासस्य अयोग्यत्वादिति भावः ॥ ४-२२ ॥

(प्रद्यो-४-२३) **आयात्विति।** मातामहस्य मातुः पितुः मन्दिरे गृहे तिष्ठतीति तथोक्तः भक्तः मम भक्तिमान् अनुजन्मा भ्राता असौ भरतः आयातु आगच्छतु—तेन भरतेन संमन्त्र्य विचार्य अथो अनन्तरम् तातेन पित्रा यदुक्तं युक्तं योग्यं यथा भवति तथा तथैव कुर्वीय कुर्याम्—करोतेर्लिङ् ॥ ४-२३ ॥

(प्रद्यो-४-२४) **श्रुत्वेति।** मन्त्री सुमन्त्रः इति एवं वाक्यानि श्रुत्वा अभिनन्द्य बन्धुभिः पौरैश्च रामं संबोध्य प्रज्ञाप्य (भेरीभांकारमुद्घोष्य रामम्)—कथंचित् ओंकारयति स्म कथमपि संमतिं कारयामास—ओम् एवं परमं मते इत्यमरः ॥ ४-२४ ॥

(प्रद्यो-४-२५) **तत इति।** रामया सीतया सह वर्तते इति सरामः रामो दाशरथिः निजं स्वकीयम् अगारं मन्दिरं गतः प्राप्तः आर्त्विजीनैः—ऋत्विजमर्हन्तीति तथोक्तैः—तैः ऋत्विक्कर्मार्हैरित्यर्थः—तपांसि कृच्छ्रचान्द्रायणादीन्येव मूर्तयः शरीराणि येषां तैः—तपोमूर्तिभिः (आर्त्विजीनैः) पुराणविद्भिः पुराणं विदन्तीति तथोक्ताः—तैः द्विजैः पुण्याहं स्वस्तिवाचनम् आवाच्य वाचयित्वा कारयित्वा कृतोपवासः जजागार जागरितवान्—जागर्तेर्लिट् ॥ ४-२५ ॥

(प्रद्यो-४-२६) **आकर्ण्येति।** धात्री उपमाता—तस्याः पुत्री धात्रेयिका—अयोध्यायाम् अध्ययोध्यम् तूर्यध्वनिम् नृत्तगीतादिध्वनिम् आकर्ण्य सहसा शीघ्रम् सौधाधिरूढा राजसदनं समधिरूढा केकयराजपुत्रीं कैकेयीम् अभिपत्य प्राप्य अनर्थसूत्रम् अनर्थानाम् अशुभानां सूचकं किंचिद् वचः ऊचे उवाच। ब्रुवेः द्विकर्मकत्वम् ॥ ५-२६ ॥

(प्रद्यो-४-२७) **उत्तिष्ठेति।** हे कैकेयि उत्तिष्ठ—अत्र प्रासादे किं शेषे निद्रासि। अद्य विशेषेण त्वया भयं प्राप्तम् लब्धम्—इतः त्वत्तः भाग्यं भागधेयम्—दैवं दिष्टं भागधेयं भाग्यमित्यमरः—सौभाग्यं प्रियवाल्लभ्यम् च अन्यगामि अन्यं गच्छति इति तथोक्तम्—त्वं वृथा व्यर्थमेव सुभगंभविष्णुः—सुभगा भवतीत्यर्थे सुभगंभविष्णुरिति खिष्णुच्प्रत्ययान्तं पदम्—कर्तरि भुवः (३-२-५७) इति सूत्रेण प्रत्ययः—अरुर्द्विषदित्यादिना मुमागमः—(तादृशी त्वम्) असि हि असि खलु ॥ ४-२७ ॥

(प्रद्यो-४-२८) **नाज्ञायीति।** हे राज्ञि हे देवि—रघुराजधान्याम् प्रधाननगर्याम्—प्रधाननगरी राज्ञां राजधानीति कथ्यते—इति प्रतापमार्ताण्डः—रामाभिषेके एष संभ्रमः—संवेगः (संभ्रमस्तु भयेऽपि स्यात् संवेगादरयोरपि इति विश्वः) नाज्ञायि

किम् न ज्ञातः किम्—त्वयेति शेषः—जानातेः कर्मणि लुङ्—पङ्क्तिरथस्य दशरथस्य भरतादयः अन्ये सुताः राज्याद् भ्रष्टाः—राज्यमप्राप्ताः इत्यर्थः—विनष्टाः विनाशं गताश्च कष्टम्—कष्टमिति निर्वेदोक्तिः—स्यात् कष्टम् कृच्छ्रमाभीलमित्यमरः ।। ४-२८ ।।

(प्रद्यो-४-२९) **दुर्धीरिति ।** दुर्धीः दुर्बुद्धिः जरठः वृद्धः दशरथः—राज्यं चतुर्धा विभज्य चतुरो भागान् कृत्वा चतुर्भ्यः सुतेभ्यः न दत्ते न ददाति—मनुना विभक्तां महीं नवखण्डनाथाः (मनोः सुताः इक्ष्वाकुप्रभृतयः भरतखण्डादिनवखण्डनाथाः) विभिन्नाः (पृथक् स्थिताः सन्तः) किम् नाधितस्थुः किं नाधिष्ठितवन्तः—कि तु अधिष्ठितवन्त एवेत्यर्थः । अधितस्थुरिति तिष्ठतेर्लिटि रूपम् ।। ४-२९ ।।

(प्रद्यो-४-३०) **निशम्येति ।** सा कैकेयी तद् वचः निशम्य श्रुत्वा कुपिता क्रुद्धा सती अभिरामः रामः दाशरथिः भरतात् मे प्रियः इष्टः इति जगाद—राज्येऽभिषिक्तं तम् रघुवंशनाथम् त्रयः कुमाराः भरतादयः उपासितारः उपासिष्यन्ते—उपपूर्वाद् आसधातोर्लुट् ।। ४-३० ।।

(प्रद्यो४-३१) **एकाग्रतेति ।** यतः यस्मात् कारणात् राज्यश्रियः राज्यलक्ष्म्याः योगिधियः—योगिनां सनकादीनां धियः बुद्ध्याश्च (एवम्) सूच्याश्चैव—(सीवनद्रव्यस्य) सूक्ष्मायाः शलाकायाः—सूची तु सीवनद्रव्ये इति विश्वः—लक्ष्यगुणोपयोगे—लक्ष्ये परराष्ट्रादौ गुणोपयोगे सन्धिविग्रहादिविनियोगे—योगिपक्षे आत्मनि गुणोपयोगे यमनियमाद्युपयोगे—सूचीपक्षे गुणोपयोगे सूत्रसीवने एकाग्रता—एकम् अग्रम् येषां ते एकाग्राः—तेषां भावः एकाग्रता—भवतीति शेषः । अतः अस्मात् कारणात् स राजा दशरथः अग्रभवं ज्येष्ठम् भरताग्रजं कुमारम् रामम् राज्ये अभिषिच्य—राज्यम् एकमुखं करोति ।। ४-३१ ।।

(प्रद्यो-४-३२) **अयीति ।** अयि हे सखि मन्थरे इमं प्रियोदन्तं प्रियवार्तां वदन्ती कथयन्ती त्वं मे भूषाः भूषणानि गृहाण स्वीकुरु—अद्य वत्सस्य रामस्य महाभिषेकं पट्टाभिषेकं कुर्वे करिष्ये—वर्तमानसामीप्ये वर्तमानवदिति भविष्यदर्थे लट्—सर्वे सकलाः पौराः पुरजनाः समेत्य मिलित्वा प्रहृष्यन्तु संतुष्यन्तु—हृष्यतेर्लोट् ।। ४-३२ ।।

(प्रद्यो-४-३३) **तथेति ।** चेटी दासी तथा तादृशं वदन्तीं तरलायताक्षीम् तरले चञ्चले आयते विशाले अक्षिणी नेत्रे यस्यास्ताम् कैकेयीम् आक्षिप्य प्रतिषिध्य पुनर्भूयोऽपि अवादीत् अवोचत्—आः इति कोपे—आस्तु स्यात् कोपपीडयोः इत्यमरः—हे कैकेयि—केकयस्यापत्यं स्त्री कैकेयी—जनपदशब्दादिति अञ् प्रत्ययः—टिड्ढेत्यादिना

ङीप्—केकयमित्रयु-इत्यादिना इयादेशः—हे कैकेयि इयं भ्रान्तिः अविवेकः ते तव कुतः—कथमागतः—राजा रामः क्व—दीनो भरतः क्व—रामे राज्ञि भरतस्य जीवितं दुर्लभमिति भावः ।। ४-३३ ।।

(प्रद्यो-४-३४) **कथमिति ।** हे मानि मानवति राजपत्नी सती सपत्नीसुतदत्त-पिण्डा—समानः पतिर्यस्याः सा—तस्याः सुतेन दत्तः पिण्डो यस्याः सा तथोक्ता त्वम् कथं नु वा जीवसि कथं जीविष्यसि—वर्तमानसामीप्ये वर्तमानवद् वा इति लट्—रामे रामचन्द्रे अभिषिक्ते भरते च रिक्ते निर्गतार्थे सति क्षमा क्षान्तिः वृथा व्यर्थमेव । मा दरिद्रीः दरिद्रा मा भूः—दरिद्रा दुर्गतौ इत्यस्मात् लुङ् ।। ४-३४ ।।

(प्रद्यो-४-३५) **वरद्वयमिति ।** हे कैकेयि प्राक्—पूर्वं वसुधाधिपेन राज्ञा दत्तं तस्योपरि तवास्ति—तद् वरद्वयं वृणीष्व स्वीकुरु—किं तद् वरद्वयम्—रामो वनाय वनं गन्तुम् पुर्याः नगर्याः निर्यातु निर्गच्छतु चतुर्दशाब्दान्—कालाध्वनोरत्यन्तसंयोगे इति द्वितीया—भरतः राजा अस्तु भवतु ।। ४-३५ ।।

(प्रद्यो-४-३६) **रामे इति ।** रामे वनम् अरण्यं याति गच्छति सति सीता रामकलत्रम्—सीता रामकलत्रे स्यात् तथा लाङ्गलपद्धतौ इति विश्वः—सहैव रामेणेति गम्यते—याता गमिष्यति यातेर्लुट्—अथ अनन्तरम् सौमित्रिः लक्ष्मणः अनुयाता अनुयास्यति—हे मातः अम्ब—ते तव सुतः भरतः मातामहावासतः मातामहगृहात् एत्य आगत्य पृथ्वी त्राता पालयिष्यति—त्रैङ् पालने इत्यस्मात् लुट् ।। ४-३६ ।।

(प्रद्यो-४-३७) **कौसल्ययेति ।** हे [8]कैकेयि राज्ञो रामस्य मात्रा कौसल्यया दासीकृताम्—अभूततद्भावे च्विः—त्वां कथम् आश्रयामः—श्रिञ् सेवायाम् इत्यस्मात् लट्—सपत्न्याः कौसल्यायाः चरणौ स्थण्डिले अनाश्रितभूमौ संनिविष्टा सम्यगुप-विष्टा त्वं कथं नु वा संवाहयेथाः पादसंपीडनं कुर्याः इत्यर्थः—सम्पूर्वाद् वहतेर्णि-जन्तात् लिङ् ।। ४-३७ ।।

(प्रद्यो-४-३८) **क्षिप्त्वेति ।** हस्तगतां करतलप्राप्तां श्रियं लक्ष्मीम् पोटेव नपुं-सकलक्षणेव—पोटा स्त्रीपुंसलक्षणा इत्यमरः—पदेन पादेन क्षिप्त्वा अधिक्षिप्य सपत्न्याः कौसल्यायाः लक्ष्मी राजलक्ष्मी सहसे मृष्यसि—षह मर्षणे इत्यस्मात् लट्—यद् यस्माद् अधुना अद्य वार्ता कठोरवार्तां वदन्त्यै मह्यमपि आभरणानि दत्से ददासि—ददातेर्लट् ।। ४-३८ ।।

(प्रद्यो-४-३९) **राम इति ।** प्रौढः प्रतिभासंपन्नः—प्रतिभासहितः प्रौढ इति प्रतापमार्तण्डः—इदं राज्यं गृहीत्वा स्वीकृत्य रूढमूलः सन् चिरं बहुकालं प्रतिष्ठास्यति

—स्थिरो भविष्यति—तिष्ठतेर्लृट्—कृपणो दरिद्रः—दरिद्रः कृपणः क्षुद्रः किंपचान-मितंपचाः—इत्यमरः—ते तव सुतः युधाजितः केकयराजस्य सद्मनि वेश्मनि अन्नमश्नन् भुञ्जानः बन्धून् क्लिश्नाति पीडयति—क्लिशू—विबाधने इत्यस्मात् लट् ॥ ४-३९ ॥

(प्रद्यो-४-४०) **न बालिशे इति ।** हे बालिशे हे मूढे—अज्ञे मूढयथाजातमूर्ख-वैधेयबालिशाः इत्यमरः—किंचन किंचित्कार्यं न वेत्सि न जानासि—विद ज्ञाने इत्यस्मात् लट्—निर्धारयितुं योग्यं निर्धार्यम्—आत्मनो हितम् आत्महितमपि न विन्त्से न विचारयसि—विद विचारणे इत्यस्मात् लट्—अद्य शीघ्रं कमप्युपायं युक्तिं कलय विचारय—कलयतेर्लोट्—तथा हि कबन्धे उदके—कबन्धमुदकं पाथः इत्यमरः—गते सति सेतुबन्धो न हि कर्तव्यः ॥ ४-४० ॥

(प्रद्यो-४-४१) **त्वमास्स्वेति ।** हे राज्ञि त्वं तूष्णीम् आस्स्व तिष्ठ—अहमेव राज्ञे दशरथाय विज्ञाप्य विज्ञापनं कृत्वा सर्वं कृत्स्नं विदधामि करिष्यामि—मितया परिमितया—अल्पयेत्यर्थः—वाचा वचनेन रामं त्यज विसर्जय—भरतं भज स्वीकुरु इति द्वौ वरौ याचामि—याचतेर्लट् ॥ ४-४१ ॥

(प्रद्यो-४-४२) **इद्धेति ।** इति एवं प्रकारैः इद्धाः समिद्धाः अभिशापाः मिथ्या-भिशंसनानि येषां तैः तथोक्तैः—अथ मिथ्याभिशंसनमभिशापः इत्यमरः—उद्धूतापैः—उद्धूताः उद्धृताः तापाः सन्तापाः येषां तैः तथोक्तैः—विप्रलापैः विरोधोक्तिभिः करणैः मन्थरया कर्त्र्या तस्याः कैकेय्या स्वतः स्वभावत एव निर्मलं शुद्धम्—उदारं महत्—उदारो दातृमहतोः इत्यमरः—धीरं गम्भीरं मनः मानसं ममन्थे मथितम्—कलुषितमित्यर्थः—मथि विलोडने इत्यस्मात् (कर्मणि लिट्) ॥ ४-४२ ॥

(प्रद्यो-४-४३) **क्रोधेनेति ।** अथ अनन्तरं कुब्जा वातादिना उरसि पृष्ठभागे वा गडुला—स्यादेडे बधिरः कुब्जे गडुलः इत्यमरः—न्युब्जा रोगेण भुग्ना—न्युब्जो भुग्ने रुजा इत्यमरः—क्रोधेन राज्ञीम् कैकेयीम् सौधादवरोप्य अवतार्य नृपतिं दशरथम् निनाय प्रापयामास—नयतेर्द्विकर्मकात् लिट्—अन्तिके समीपे गूढविषाम् गूढं प्रच्छन्नं विषं यस्याः सा तथोक्ता ताम्—नागीमिव सर्पस्त्रीमिव—जातेरस्त्रीविषयादिति ङीष्—निश्वसन्तीम् आश्वसन्तीम्—धात्रीनिरोधादिति भावः—निषण्णाम् उपविष्टाम् तां कैकेयीं सः नृपः अब्रूत अवोचत्—ब्रुवो लङ् ॥ ४-४३ ॥

(प्रद्यो-४-४४) राजोक्तिमेव श्लोकद्वयेनाह—**खिन्नेवेति ।** हे केकयि[9] खिन्नेव दीनेव इह मद्विषये वाक्यं किं नेरयसि नोच्चारयसि मां पुरेव पूर्वमिव किं नेक्षसे—किं न पश्यसि—अनङ्गरागम् अविद्यमानाङ्गरागम् अनङ्गस्य कामस्य रागम् उद्दीपकम्

(च) अङ्गं शरीरम् मुक्तादिरत्नाभरणैः मुक्ता मुक्ताफलम् आदिर्येषां तानि तथोक्तानि —तानि च तानि रत्नानि—तथोक्तानि तानि येषु तैः किं वा न शृङ्गारयसि—शृङ्गारं न करोषि—नालंकारयसीत्यर्थः ।। ४-४४ ।।

(प्रद्यो-४-४५) **राम इति ।** हे रमणि हे रामे—सुन्दरी रमणी रामेत्यमरः—भरताग्रजन्मा—अग्रे जन्म यस्य सः अग्रजन्मा—भरतस्याग्रजन्मा रामः ते तव सुतः पुत्रः—रामस्य त्वमेव माता जननी—हे शुभाङ्गि हे शोभनगात्रि उत्सुका संतुष्टा त्वम् अस्य रामस्य अभिषेकोत्सवम्—अभिषेक एव उत्सवः तम्—सर्वम् आत्मकृत्यम् शुभय (शुभं मङ्गलं कुरु) ।। ४-४५ ।।

(प्रद्यो-४-४६) **भर्तुरिति ।** सा कैकेयी गुरोः पूज्यस्य भर्तुर्वाचम् वाक्यमपि अवधार्य ज्ञात्वा तथा सारान् श्रेष्ठान् रामगुणांश्च विचार्य त्रपया व्रीडया—मन्दाक्षं ह्रीस्त्रपा व्रीडेत्यमरः—स्वयं किंचिद् अल्पमपि न वदन्ती मन्थरायाः मुखं मन्दं शनैः प्रैक्षत अपश्यत्—प्रपूर्वाद् ईक्षतेर्लङ् ।। ४-४६ ।।

(प्रद्यो-४-४७) **दत्तमिति ।** जठरा कर्कशा—जठरः कठिने इति विश्वः—(जरठा वा) सा मन्थरा पुरा पूर्वं देवासुरयुद्धे पङ्क्तिरथेन दशरथेन तस्यै कैकेय्यै दत्तं वरद्वयं ययाचे—याचतेर्लिट्—किं तद् वरद्वयम्—तदाह—एकेन वरेण रामस्य वनप्रयाणम् वनयात्राम् अन्येन वरेण भरतस्याभिषेकं वव्रे—वृञ् वरणे इत्यस्मात् लिट् ।। ४-४७ ।।

(प्रद्यो-४-४८) **राम इति ।** रामः चतुर्दशाब्दान्—अत्यन्तसंयोगे द्वितीया—वनस्थः स्यात्—अस्तेर्लिङ्—भरतः पुरस्थः नगरस्थः स्यात्—रामः जटी जटावान् स्यात्—भरतः किरीटी किरीटवान् स्यात्-रामः चीरी वल्कलवान् अस्तु—भरतः चेली वसनवान् अस्तु—चेलं वसनमंशुकम् इत्यमरः—इति एवं सा मन्थरा अभ्यधत्त अवदत्—अभिपूर्वाद् दधातेर्लङ् ।। ४-४८ ।।

(प्रद्यो-४-४९) **जीनोऽसीति ।** हे पार्थिवेन्द्र दशरथ जीनोऽसि जीर्णोऽसि—जीनो जीर्णो जरन्नपीत्यमरः—आत्मनीनम् आत्मने हितम्—तस्मिन् हिते—आत्मन्विश्वजनेत्यादिना खः प्रत्ययः—वरप्रदाने दीनः दरिद्रः न भव—अन्ते अवसाने सत्यं यथार्थवचनं वद ब्रूहि—इक्ष्वाकवः इक्ष्वाकुवंश्याः प्राणेषु नश्यत्स्वपि असत्यम् अनृतं न वदन्ति हि ।। ४-४९ ।।

(प्रद्यो-४-५०) **राजेति ।** भवत्कुलोत्थः युष्मद्वंश्यः हरिश्चन्द्र इति राजा सत्याय इष्टभार्यां प्रियपत्नीम् व्यक्रेष्ट विक्रीतवान्—विपूर्वात् क्रीणातेर्लुङ्—भुवं पृथ्वीम् दिवं

स्वर्गम् कीर्तिभिर्यशोभिः अश्नुवानः व्याप्नुवानः—अश्नोतेः शानच्—दिवाकीर्तिषु चण्डालेषु—चण्डालप्लवमातङ्गदिवाकीर्तिजनंगमाः इत्यमरः—सत्याय वीरबाहुं श्मशानपालकं भेजे सिषेवे ।। ४-५० ।।

(प्रद्यो-४-५१) **सत्येनेति।** जगत्यां रत्नगर्भायाम्—जगती रत्नगर्भा चेत्यमरः—सत्येन यथार्थभाषणेन कीर्तिम् जिहते प्राप्नुवन्ति—ओ हाङ गतौ इत्यस्मात् लट्—सत्येन अखिलान् लोकान् जयन्ति—वशीकुर्वन्तीत्यर्थः—हे राजन् तत् तस्मात् जातु कदाचित् सत्यं न जहीहि न त्यज—इयं कैकेयी लज्जावती व्रीडावती वक्तुं न वेत्ति हि न जानाति हि ।। ४-५१ ।।

(प्रद्यो-४-५२) **मदुक्तमिति।** मदुक्तं मयोक्तम् एतदुक्तमेव कैकेय्या उक्तमेव आकलय जानीहि—वरद्वयं कैकेयी त्वां याचति प्रार्थयते—स्वरितेत्त्वाद् उभयपदित्वम्—दुहियाचीति पाठात् द्विकर्मकाद् याचेः लट्—रामः फलानि तिन्दुकादीनि मूलानि कन्दादीनि चरन् भक्षयन् वनस्थः अस्तु—वनं संचरत्वित्यर्थः—भरतः राज्यं प्रशास्तु पालयतु—शास्तेर्लोट् ।। ४-५२ ।।

(प्रद्यो-४-५३) उक्त्वेति । कुब्जा मन्थरा इति एवंरूपं विधुरं वाक्यम् उक्त्वा व्यरंसीत् उपरतवती—विपूर्वात् रमतेः लुङ—व्याङपरिभ्यो रमः इति परस्मैपदम्—भुवि मूर्छितस्य राज्ञो दशरथस्य चेष्टा च व्यापारश्च व्यरंसीत्—सान्द्राः घनाः अश्रुपूराः अश्रुप्रवाहाः येषां ते तथोक्ताः—पूरो जलप्रवाहः स्यात् इति विश्वः—सहवासिनोऽपि अनुजीविनश्च नरेन्द्रं परितः नरेन्द्रमभितः—अभितः परितः इत्यादिना द्वितीया—हा हेति ब्रुवाणाः—हा विषादशुगार्तिषु इत्यमरः—अपप्तन् पतितवन्तः—पत्लृ गतावित्यस्मात् लुङ—लृदित्वादङ—पतः पुम् इति पकारागमः ।। ४-५३ ।।

(प्रद्यो-४-५४) **वस्त्रान्तेति।** अङ्के उत्सङ्गे राज्ञः शिरः विनिधाय निधाय यमस्य मृत्योः साक्षात् प्रत्यक्षम्—साक्षात् प्रत्यक्षतुल्ययोरित्यमरः—वैजयन्तीव पताकेव—वैजयन्ती पताकायामिति विश्वः—पताका वैजयन्ती स्यादित्यमरः—वस्त्रान्तवातेन चेलाञ्चलवायुना वीजयन्ती चालयन्ती कैकेयी अलीकम् असत्यम्—अलीकं त्वप्रियेऽनृते इत्यमरः—शोकं दुःखं दधतीव बिभ्रतीव तस्थौ स्थितवती ।। ४-५४ ।।

(प्रद्यो-४-५५) **रक्षोविघातायेति।** रक्षोविघाताय राक्षसविनाशाय—रघूद्वहम्—उद्वहतीत्युद्वहः—रघूणामुद्वहो रघूद्वहः रघुनन्दनः—अपत्यं च प्रसवोद्वहनन्दनाः इति प्रतापमार्ताण्डः—तम् निर्यापयन्ती निर्गमयन्ती आकारवती मूर्तिमती पुरदेवतेव आशु

शीघ्रं रामम् अर्चितुं पूजयितुम्—अर्चेः भौवादिकात् तुमुन्—आकारयन्ती आह्वयन्ती —हृतिराकारणाह्वानम् इत्यमरः—वनदेवतेव तस्थौ इति पूर्वेणान्वयः ।। ४-५५ ।।

(प्रद्यो-४-५६) **रामस्तदेति** । तदा तस्मिन् काले असौ रामः निशान्ते सदने—निशान्तवस्त्यसदनेत्यादिरमरः—पुष्पमयी शय्या पुष्पशय्या—तस्याम् अधिपुष्पशय्यम् —विभक्त्यर्थेऽव्ययीभावः—निजाग्रस्थितमैथिलीकः—निजस्य स्वस्य अग्रे पुरतः स्थिता मैथिली सीता यस्य स तथोक्तः जाग्रत् जागरूकः सन्—नाभ्यस्तात् शतुः इति नुमभावः—पुरुषेषूत्तमः पुरुषोत्तमः—न निर्धारणे इति षष्ठीसमासनिषेधः—कर्मधारयपक्षेऽपि सन्महदित्यादिना (उत्तमशब्दस्य) पूर्वनिपातः स्यात् । (तस्मात् सप्तमीति योगविभागात् सप्तमीसमासः) । तस्य पुण्यं पवित्रं चरित्रं कथां शृण्वन् तां रात्रिम् अनयत् नीतवान् । नयतेर्लङ् ।। ४-५६ ।।

(प्रद्यो-४-५७) **श्रुत्वेति** । सुमन्त्र । महीन्द्रसूनोः राजपुत्रस्य महाभिषेकस्य अन्तरायम् विघ्नम्—विघ्नोऽन्तरायेत्यादिरमरः—जनतः पुरजनात् श्रुत्वा निशान्ते प्रगे अवसरं वेलां प्रतीक्षितुं शीलमस्येति अवसरप्रतीक्षी—सुप्यजातावितिणिनिः—अन्तः प्रविष्टः अन्तःपुरं प्रविष्टः सन् निश्चेष्टं निर्व्यापारं नृपं भूपम् ऐक्षिष्ट अद्राक्षीत् —ईक्षतेर्लुङ् ।। ४-५७ ।।

(प्रद्यो-४-५८) **मन्त्रेति** । स सुमन्त्रः मन्त्रौषधीरुद्धमिव—मन्त्रः वेदप्रभेदः—मन्त्रो वेदप्रभेदे स्यादिति विश्वः—मन्त्रौषधीभ्यां रुद्धं प्रतिबद्धं नागेन्द्रमिव[10]—उर्व्या श्वसन्तम् उच्छ्वसन्तं नरेन्द्रं भूपम् आलोक्य [11]अपासरत् अपसृतवान्—निकटस्थित्यनौचित्यात् किंचिदपसृत्य स्थित इत्यर्थः—सृ गतावित्यस्मात् लङ्—(सा) राज्ञी कैकेयी राजाज्ञया दशरथाज्ञया दशरथादेशेन राममिहानयेति तं सुमन्त्रं जगाद उवाच ।। ४-५८ ।।

(प्रद्यो-४-५९) **तथेति**[12] । तथेत्यङ्गीकृत्य निर्गत्य—अन्तःपुरादिति शेषः—स सूतः सुमन्त्रः रथ्यासु प्रतोलीषु—रथ्या प्रतोलीत्यादिरमरः—मिथ्यामुदितः मुदित इव रथेन गच्छन्—प्रीत्या कृतप्रणामं कृतनमस्कारं पौरं नागरिकं जनं किंचित् न अलोकत नालोकितवान्—नाभ्यधत्त किंचिद् वचनमपि नावदच्च ।। ४-५९ ।।

(प्रद्यो-४-६०) **दृष्ट्वेति** । पौरवृन्दं नागरिकसंघः [13]रथेषाग्रनिविष्टदृष्टिम्—रथस्य ईषा रथावयवो दण्डविशेषः—तस्याः अग्रे निविष्टा दत्ता दृष्टिःयेन तं तथोक्तम् सुमन्त्रं दृष्ट्वा अवृष्टिशुष्कम् अवर्षणेन शुष्यत् शरदि शरत्काले सस्यमिव विलक्षं विगतलक्षणम् जातम्—आलक्ष्यत अदृश्यत ।। ४-६० ।।

(प्रद्यो-४-६१) **कृत्वेति ।** औपसम् उषःसंबन्धि प्रातःकालीनं कर्म कृत्वा कुथे आस्तरणे उपविष्टम्—प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः इत्यमरः—जायासखम् जायायाः सखा मित्रम् तथोक्तः (जायासखः) तम्—राजाहःसखिभ्य इति टच् प्रत्ययः समासान्तः—जागरणारुणाक्षम्—जागरणेन अरुणे ताम्रे अक्षिणी यस्य तं तथोक्तम्—बहुव्रीहौ सक्थ्यक्ष्णोः इति षच् प्रत्ययः—तम् रामम् उपेत्य भक्तः पिता दशरथः त्वां दिदृक्षते द्रष्टुम् इच्छति—द्रष्टुमाकाङ्क्षतीत्यर्थः—इति उवाच—दृशेः सन्नन्तात् लट् (दिदृक्षते इत्यत्र) ज्ञाश्रुस्मृदृशां सनः इति आत्मनेपदम् ॥ ४-६१ ॥

(प्रद्यो-४-६२) **तथेतीति ।** तथेत्यङ्गीकृत्य रामः सुमन्त्रसूतेन—सुमन्त्र एव सूतः तेन—सूतः क्षत्ता च सारथिरित्यमरः—रथेन राजालयम् राजमन्दिरम् आजगाम प्राप—सीतापि—अपिशब्दो भिन्नक्रमः—श्वश्रूजनं पतिप्रसूजनम्—भर्तृमातृवर्गमित्यर्थः—पतिपत्न्योः प्रसूः श्वश्रूरित्यमरः—वन्दितुं नमस्कर्तुम् आन्दोलिकामधिरुह्य आजगाम प्राप ॥ ४-६२ ॥

(प्रद्यो-४-६३) **महानिति ।** पौरवर्गः पुरजनसमूहः मन्थरायाः वाक्यैः कर्तृभिः महाननर्थोऽजनि जनितः—जनेः कर्मणि लुङ्—इति व्याहृत व्याजहार—व्याङ्-पूर्वात् हरतेर्लुङ्—स्वरितेत्यादिना आत्मनेपदम्—उश्च (१-२-१२) इति सिचः कित्त्वम्—ह्रस्वादङ्गात् (८-२-२७) इति सिचो लोपः—पङ्क्तिरथस्य राज्ञः अन्तः-पुरं किमेतदिति व्याकुलताम् आकुलत्वम् अयासीत्—यातेर्लुङ् ॥ ४-६३ ॥

(प्रद्यो-४-६४) **अथो इति ।** अथो अनन्तरम् नृपद्वारि राजद्वारि रथादवरूढः अवतीर्णः ऐन्दुमतेयसूनुः—इन्दुमत्याः अपत्यं पुमान्—ऐन्दुमतेयः दशरथः—(इन्दुमती-शब्दात्) स्त्रीभ्यो ढक् (इति ढक् प्रत्ययः)—तस्य सूनुः रामेन्दुरपि रामचन्द्रश्च जनाना चक्षूंष्येव चकोरान्—तान् मदयन् हर्षयन् मदेर्घटादित्वात् मिता ह्रस्व इति ह्रस्वः—पितरं दिदृक्षुः द्रष्टुमिच्छुः अन्तःपुरं जगाहे विवेश—गाहतेः लिट् ॥ ४-६४ ॥

(प्रद्यो-४-६५) **पूर्वेति ।** सः रामः पूर्वागतान् प्रथमम् आगतान् मन्त्रिपुरोहितान् अमात्यपुरोधसः अश्रुपूर्ण मुखं यस्य तत् तथोक्तम् स्त्रीमण्डलं च पश्यन् अग्रे पुरतः निषण्णस्य उपविष्टस्य विषण्णा मूर्तिस्तनुर्यस्य तस्य अरुन्धतीभर्तुः वसिष्ठस्य अङ्घ्री चरणौ अवन्दत ववन्दे ॥ ४-६५ ॥

(प्रद्यो-४-६६) **हा रामेति ।** स रामः हा राम रामेति—हेति विषादे—हा विषादशुगार्तिषु इत्यमरः—उच्चैः तारं रुदन्तं मुहुः मूर्छन्तम् उर्व्यां मुहुर्लुठन्तम् परिवर्ता-

मानम्—अदृष्टपूर्वम्—पूर्व दृष्टः दृष्टपूर्वः—सुप् सुपेति समासः—न दृष्टपूर्वः—तम् अदृष्टपूर्वम् ईदृगवस्थयेति भावः—पितरं दृष्ट्वा महत् अधिकम् निजं स्वकीयम् आगः अपराधम् मनसि अशङ्किष्ट—शङ्कितवान्—शङ्कतेर्लुङ् ॥ ४-६६ ॥

(प्रद्यो-४-६७) **तत इति ।** ततः अनन्तरम् दाशरथिः रामः अङ्के उत्सङ्गे पितुः शिरः आदधानाम् मूर्छया आकुलं व्याप्तं तं दशरथम् मुहुः पुनः पुनः आह्वयन्तीम् आकारयन्तीम् मूर्ध्नि शिरसि उपविष्टां मृत्युदूतीमिव स्थितां तां केकयीम्—केकयान् आचष्टे इति णिच्—सा[14] हि ईदृशास्तादृशाः केकयाः इति स्वजन्मभूमिं कथयति—तदन्ताद् अचः इः (५७८) इति औणादिकः इकारप्रत्ययः—णिलोपः—कृदिकारादक्तिनः इति ङीप् प्रत्ययः—इत्थम् केकयी इत्येकं रूपम्—तथा केकयस्यापत्यमित्यर्थे जनपदशब्दात् (४-१-१६८) इति अञ् प्रत्यये केकयेत्यादिसूत्रेण (७-३-२) इयादेशे टिड्ढेत्यादिना ङीपि कैकेयी इत्यपरं रूपम्—कैकयी इति तृतीयं रूपं न प्रतीमः—तां केकयीम् ददर्श दृष्टवान् ॥ ४-६७ ॥

(प्रद्यो-४-६८) **आयोध्यकानामिति ।** आयोध्यकानाम् अयोध्यापुरवासिनाम् अनुमोदहत्यै हर्षविनाशाय कालप्रयुक्ताम् कालेन दैवेन प्रेषिताम् कालरात्रीम् संहाररात्रीमिव स्थिताम् अकाण्डे असमये जगतां भुवनानाम् भयं साध्वसम्—साध्वसं भयमित्यमरः—प्रदातुं भर्गप्रदिष्टाम्—भर्गेण ईश्वरेण प्रदिष्टाम् विसृष्टाम् भद्रकालीमिव स्थिताम् तां केकयीं ददर्श इति पूर्वेणान्वयः—जगतामित्यत्र संबन्धसामान्ये षष्ठी—अतः कर्मणा यमभिप्रैति स संप्रदानम् (१-४-३२) इति संप्रदानसंज्ञा न भवति—स्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनरूपदानस्य अभावात्—न हि स्वीयं भयम् अन्यस्मै दीयते—परस्मिन् भयोत्पादनमात्रेण भयदानव्यपदेशः—नन्वेवमपि रजकस्य वस्त्रं ददाति—घ्नतः पृष्ठं ददाति इत्यत्रापि (संप्रदानसंज्ञा) प्राप्नोति इति चोद्यम् उद्भाव्य [15]न्यासकारेणोक्तम्—नैतदस्ति—दानं हि नाम पूजानुग्रहकाम्यया स्वकीयद्रव्यपरित्यागः परस्वत्वापादनं च—तच्च इह नास्तीति (न्यासकारेणोक्तम्)—(अनया न्यासकारमतरीत्या जगतां भयं प्रदातुम् इत्यत्र संप्रदानसंज्ञा न संभवतीति—ज्ञेयम् ।) ननु भाष्यकारमते चतुर्थ्या भाव्यम् (इति चेत्—एवमेव कैयटाद्यैः प्रतिपादितम्—तत् प्रतिपादनं चेत्थम्)—[16]कैश्चिद् अन्वर्थसंज्ञाविज्ञानाद् ददातिविषये एव संप्रदानसंज्ञा इत्यभ्युपगतम्—दानं च स्वत्वनिवृत्तिः परस्वत्वापत्तिपर्यन्ता इति प्रत्यज्ञायि—तद् उभयमपि (वृत्तिकारन्यासकारयोः मतम्) अयुक्तम्—अन्यत्रापि भाष्यकारेण संज्ञायाः अभ्युपगमात्—तथा च क्रियाग्रहणस्य गत्यर्थकर्मणीति सूत्रस्य च प्रत्याख्यानं कृतम्—तथा स्वत्वनिवृत्त्यभावेऽपि ददातेः प्रयोगो दृश्यते न शूद्राय मतिं दद्याद् इति

(मनुस्मृतौ-४-८०) खण्डिकोपाध्यायः शिष्याय चपेटां ददाति इति च—इति कैयटेन[17] सप्रपञ्चमुपपादितम् ।। ४-६८ ।।

(प्रद्यो-४-६९) **प्रणम्येति** रामः शुचा शोकेन अतितान्तम् अतिक्लान्तम् तं पितरम् तां केकयी च प्रणम्य हे तात पितः—तातोऽनुकम्प्ये जनके इति विश्वः—कि खिन्त्से किं दीनोऽसि—खिद दैन्ये इत्यस्मात् लट्—किम् आगः कम् अपराधम् अकार्षम् अतानिषम्—कृञो लुङ—इति एवम् उक्त्वा अस्य राज्ञः किं जातम् इति मध्यमाम्बाम् केकयीम् बद्धाञ्जलि यथा तथा जगाद ।। ४-६९ ।।

(प्रद्यो-४-७०) **सा नाविदमिति ।** सा केकयी किञ्चन किञ्चिदपि नाविदम् नाज्ञासिषम्—न जानामीत्यर्थः—विदृ लाभे इत्यस्मात् लुङ—मन्थरायाः वाक्यैः अयं राजा विह्वलति इत्युवाच—ततः अनन्तरम् वदतां वाग्मिना वरिष्ठः श्रेष्ठः वसिष्ठः स्त्रीसाहसं वीक्ष्य हसन् बभाषे ।। ४-७० ।।

(द्रद्यो-४-७१) **न केकयीति ।** हे कुमार इदं केकयीकृत्यं न तया केकय्या प्रेषिता प्रहिता मन्थरैव जल्पति भणति—जल्पतेः (भूतसामीप्ये वर्तमानसामीप्ये वर्तमानवद् वा (३-३-१३१) इति लट्—हरिणा[18](?)—प्रवृत्तोपरतश्चैव वृत्ताविरत एव च । नित्यप्रवृत्तः सामीप्ये वर्तमानश्चतुर्विधः ।। इति सा मन्थरा वा अस्तु—इयं केकयी वा अस्तु—कुलनाशिनीभ्यां वंशोच्छेदिकाभ्याम् आभ्याम् समस्तं सर्व साम्राज्यम् अस्तम् निरस्तम् ।। ४-७१ ।।

(प्रद्यो-४-७२) **पुरा किलेति ।** हे तात रामभद्र—आजिः अजस्यापत्यं पुमान्—अत इञ्—तव तातः पिता अयं राजा—पुरा किल—पुण्यजनाभियोक्तुः पुण्यजनाः राक्षसाः—विपरीतलक्षणया—यातुधानः पुण्यजनः इत्यमरः—तान् अभियोक्ता अभियोद्धा—कर्तरि च इति कर्त्रर्थतृचा षष्ठीसमासनिषेधाद् द्वितीयासमासः—तस्य पूतक्रतोः देवेन्द्रस्य साहाय्यमिच्छन् अनया कैकेय्या सह रयिणा वेगवता रथेन आजिं युद्धम् अगात् प्राप्तवान्—समित्याजिसमिद्युधः इत्यमरः—अगादिति इणः लुङि रूपम् —इणो गा लुङि इति गादेशः ।। ४-७२ ।।

(प्रद्यो-४-७३) **रथाश्वेति ।** रथानां च अश्वानां च संघे समूहे रणसीम्नि युद्धप्रदेशे भुग्ने आविद्धे सति—ओदितश्चेति निष्ठानत्वम्—रथस्य अक्षे चक्रप्रान्ताङ्गे भग्ने सति भुजं हस्तम् अक्षयित्वा अक्षं कृत्वा धीरा धैर्यवती जाया कैकेयी पतिं भर्तारं जापयति स्म अस्य जयं कारयति स्म—जि जये इत्यस्मात् ण्यन्तात् लट्—तदा अमुना राज्ञा अस्यै कैकेय्यै द्वौ वरौ दत्तौ ।। ४-७३ ।।

(प्रद्यो-४-७४) **ताविति ।** इयं कैकेयी अद्य धात्रीतनयामुखेन मन्थरामुखेन धात्रीपतिं दशरथं तौ वरौ याचति—(तौ च इत्थम्) (एकः) त्वं चतुर्दशाब्दान् अटवीं चर—(द्वितीयश्च अयम्)—इदानी भरतः अभिषेकं भजतु इति ।। ४-७४ ।।

(प्रद्यो-४-७५) **जायासख** इति । हे राम जायासखः जायायाः सखा-टच् समासान्तः—जटिलः—जटाः अस्य सन्तीति—लोमादिपामादिपिच्छादिभ्यः (५-२-१००) इति सूत्रेण (जटाशब्दस्य पिच्छादित्वात्) इलच् प्रत्ययः—वल्कं वसानः चीरम् आच्छादयन्—धन्वी धन्व अस्यास्तीति—अत इनिऽनौ (५-२-११५) इति इनिः—निषङ्ग इषुधिः अस्यास्तीति निषङ्गी—धन्व कार्मुकम् इति—तूणोपासङ्गतूणीरनिषङ्गाः इषुधिरिति चामरः—कवचः जगरः अस्यास्तीति कवची—जगरः कवचोऽस्त्रियामित्यमरः—एवं खड्गी खड्गवान्—खड्गाः गण्डकमृगाः—गण्डके खड्गखड्गिनावित्यमरः—इभाः गजाः सिंहः मृगेन्द्रः—ते आदयः येषां ते—ते च ते मृगाश्च—तान् तथोक्तान् विनेष्यन्—वनान्ते वनमध्ये लक्ष्मणेन सह वस ।। ४-७५ ।।

(प्रद्यो-४-७६) **दिशेति ।** अनसूयः असूयारहितः सन्—त्वं भरतस्य राज्यं दिश देहि—वने भवं वन्यं फलानि मूलानि कन्दाश्च एषां समाहारः फलमूलकन्दम् अशान भक्षय—अश भोजने इत्यस्मात् लोट्—अनरण्यान्वयभूः—अनरण्यो नाम कश्चन सूर्यवंशजः—तस्यान्वये वंशे भवतीति ..भूः अन्येभ्योऽपि दृश्यते इति क्विप्—अरण्यं वनं विश प्रविश—हे राघव राम तव—त्वया—कृत्यानां कर्तरि वा इति षष्ठी—दशाननाद्याः रावणप्रभृतयः वध्याः वधार्हाः ।। ४-७६ ।।

(प्रद्यो-४-७७) **श्रुत्वेति ।** इति इदं वचनं श्रुत्वा—श्रुतवान् शास्त्रश्रवणवान्—अधीती—वेदेष्विति शेषः—अधीतवेद इत्यर्थः—इष्टादिभ्यश्च (५-२-८८) इति कर्तरि इनिः—अत एव धीतीर्णसंसारसमुद्रपारः—धिया बुद्ध्या तीर्ण निस्तीर्ण संसार एव समुद्रस्तस्य पारम् येन स तथोक्तः रामः (इति एवम् वसिष्ठवचनं श्रुत्वा) अत एव प्रसन्नवक्त्रः पितरौ प्रणम्य मातापितरौ नमस्कृत्य बद्धाञ्जलिः मुकुलिताञ्जलिः मुकुलितकरयुगलः सन् इदं (वक्ष्यमाणं) वाक्यं बभाषे उक्तवान् ।। ४-७७ ।।

(प्रद्यो-४-७८) **महान् प्रसाद इति ।** मध्यमाम्बा कैकेयी यद् अध्वासात् (यं निश्चयम् अकरोत्) अयं महान् प्रसादः—षो अन्तकर्मणि इति धातोः अध्यवपूर्वात् लुङि अध्यवासात् इति रूपम्—विभाषा घ्राधेट्—शाच्छासः (२-४-७८) इति सूत्रेण सिचः वैकल्पिकलुक्पक्षे षोधातोः असात् इति रूपम्—अयं महान् प्रसादः—किं च मदनुग्रहः ममानुकूल्यकरणम्—कृतः पित्रा—इह अस्मिन् मयि भारोऽपि राज्यभारोऽपि

——नार्पितः——रुह् धातोः ण्यन्तात् कर्मणि लुङि आरोपि इति रूपम्——रुहः पोऽन्यतरस्याम् इति पकारादेशः ।। ४-७८ ।।

(प्रद्यो-४-७९) **दत्त्वेति** । हे महीश वरौ दत्त्वा अद्य इदानीम् विलशित्वा खलु क्लेशो न कर्तव्यः इत्यर्थः——अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा इति क्त्वाप्रत्ययः——सत्यात् सत्यवचनात् किंचिदपि न हीयस्व अभ्रष्टो भव-दयार्द्रया दृशा दृष्ट्या अस्मान् वीक्ष्य वनाय वनं गन्तुं दिश विसर्जय——वनाय इत्यत्र क्रियार्थोपपदस्येति चतुर्थी——मा विषदः मा विषीद——षद्लृ धातोः लुङि लृदित्वाद् अङि असदत् इति रूपम्——न माङ्योगे इति अडागमनिषेधः——त्वं प्रसीद प्रसन्नो भव ।। ४-७९ ।।

(प्रद्यो-४-८०) **जीवातुनेति** । सः दशरथः जीवातुना जीवनौषधेन——जीवातुर्जीवनौषधमित्यमरः——रामवचोऽमृतेन रामस्य वच एवामृतम्——तेन मूर्छाम् मोहम्——मूर्छा तु कश्मलं मोहः इत्यमरः——मुक्त्वा त्यक्त्वा——संज्ञा चेतनाम् उपलभ्य——संज्ञा नामनि गायत्र्यां चेतनाया रविस्त्रियामिति विश्वः——संज्ञा स्याच्चेतना नामेत्यमरश्च——ताम् उपलभ्य प्राप्य पुत्रम् आहूय पुरतो बाहू प्रसार्य परिष्वज्य आलिङ्ग्य चिरं बहुकालं व्यलापीत् विललाप——विपूर्वात् लपतेर्लुङ् ।। ४-८० ।।

(प्रद्यो-४-८१) **हा रामेति** । हा राम हा राघव हा कुमार हा वत्स हा वत्सल——वत्सांसाभ्यां कामबले इति लच् प्रत्ययः——मत्समीपं मम समीपं हित्वा त्यक्त्वा काननान्तं कथं यास्यसि——गमिष्यसि——जरती वृद्धा ते तव प्रसूः माता——जनयित्री प्रसूर्मातेत्यमरः——कथं पुरा आस्ते आसिष्यते——यावत्पुरानिपातयोर्लट् इति भविष्यदर्थे लट् ।। ४-८१ ।।

(प्रद्यो-४-८२) **वृद्धाविति** । गृहस्थैः गृहिभिः वृद्धौ पितरौ मातापितरौ——साध्वी पतिव्रता——सती साध्वी पतिव्रतेत्यमरः——भार्या जाया शिशुः अपत्यम् तनयोऽपि——एते अकार्यम् अकरणीयं कृत्वापि स्वयमुपोष्यापि पोष्याः भरणीयाः इति महीयान् महत्तरः मनुः[19] प्राह——ब्रुवो लट् ।। ४-८२ ।।

(प्रद्यो-४-८३) हे राम अग्रतः पूर्वम् -सार्वविभक्तिकस्तसिः——मे मम परलोकयात्रां परलोकगमनं दृष्ट्वा पश्चात् अरण्ययात्राम् अरण्यगमनं कुरु चिरस्य चिरकालेन——विभक्तिप्रतिरूपकमव्ययम्——चिरकाले जाते——त्वयि याते सति मम शिरसि अलातम् उल्मुकम्——अलातकमिदं ज्ञेयमुल्मुकं च नपुंसकमिति प्रतापमार्तण्डः——को नु को वा दद्यात् क्षिपेत्——ददातेर्लिङ् ।। ४-८३ ।।

(प्रद्यो-४-८४) **त्वत्त इति ।** मृतोऽपि त्वत्तः निवापं पितृदानम्—पितृदानं निवापः स्यादित्यमरः—न अवापम्—आप्नोतेर्लुङ्—लृदित्वादङ्—पापं पापित्वम् परलोके तापं संतापम् प्राप्स्यामि—कुतः—आत्मजेन पुत्रेण त्र्यञ्जलम् त्रयः अञ्जलयः समाहृताः त्र्यञ्जलम्—अञ्जलित्रयपरिमितमित्यर्थः—द्वित्रिभ्यामञ्जलेः (५-४-१०२) इति समासान्तः टच्—जलं प्रेतस्य तापप्रशमनं तापशान्ति करोति ।। ४-८४ ।।

(प्रद्यो-४-८५) **प्रसीदेति ।** हे कैकेयि प्रसीद प्रसन्ना भव—दुष्टः आग्रहः यस्याः सा दुराग्रहा असि—शिशुना रामेण ते तव किमपराद्धम्—कः अपराधः कृतः—अपराद्धम् इति भावे क्तः—स्वमातरि कौसल्यायाम् त्वय्यपि निर्विशेषे निर्गतो विशेषो यस्मात् तथोक्ते भक्ते भक्तिमति इयत् पापं कथं करोषि—यत्तदेतेभ्यः परिमाणे वतुप्—किमिम्भ्यां वो घः (५-२-४०) इति वतुप्—वकारस्य च घः—आयनेत्यादिसूत्रेण इयादेशः (७-१-२) ।। ४-८५ ।।

(प्रद्यो-४-८६) **प्रिया इति ।** हे कैकेयि प्रियाः के के नरेन्द्राः प्रियाभ्यः पत्नीभ्यः वरान् न वितरन्ति न ददति—सर्वेऽपि वितरन्तीत्यर्थः—त्वदर्थं भवदर्थम् अहमिव मद्वत् निष्करुणं निर्दयं यथा भवति तथा को वा निष्कारणं कारणं विनैव कुमारं निष्कासयेत् प्रवासयेत् ।। ४-८६ ।।

(प्रद्यो-४-८७) **वशीकृतमिति ।** वामे सुन्दरे अक्षिणी यस्याः सा वामाक्षी तस्याः संबुद्धिः—हे वामाक्षि—वामं स्यात् सुन्दरे सव्ये इति केशवः—वामाः वनिताः—प्रतीपदर्शिनी वामा वनिता महिला तथेत्यमरः—वशीकृतं वल्लभं प्राणनाथम्—जीवितेशः प्राणनाथः कान्तो रमणवल्लभौ इति प्रतापमार्ताण्डः—इष्टान् अभीष्टान् वरान् अर्थयेरन्—अर्थ याञ्चायामित्यस्मात् लिङ्—(त्वं तु) त्वदुत्सङ्गे अङ्के सुखेन उपलाल्यम् उपलालनार्हं वत्सं पुत्रकं वल्कलिनं वल्कलवन्तं सुतं वने वस्तुं [20]वृणीषे याचसे ।। ४-८७ ।।

(द्रद्यो-४-८८) **चिरादिति ।** भुवनं चिरात् बहुकालम्—विभक्तिप्रतिरूपकमव्ययम्—अभौक्षम् अरक्षम्—भुजोऽनवने (१-३-६६) इति सूत्रात् पालनार्थे परस्मैपदम्—(इष्टान् भोगान् अभुक्षि उपभुक्तवान् च) वृद्धः (अहम्) तपः' न तितप्से—तप्तुं नेच्छामि—तपतेः सन्नन्तात् लट्—युवजानिः युवतिर्जाया यस्य स तथोक्तः एषोऽयं वत्सः वल्कं वसानः वल्कलवासाः वनं कथं वा अभ्युपेयात्—प्राप्नुयात्—अभिपूर्वाद् इणः लिङ् ।। ४-८८ ।।

(प्रद्यो-४-८९) **रामे इति।** राज्ययोग्ये राज्यार्हे रामे पुरः प्रोषुषि प्रोषितवति सति—प्रपूर्वात् वस निवासे इत्यस्मात् लिटः क्वसुः आदेशः—वसोः संप्रसारणम्—वस्वेकाजाद्घसाम् (७-२-६७) इति इडागमे ऊषिवान् इति रूपं प्रथमायाम्—प्रोषुषि इति सप्तम्यन्तम्—मन्दभाग्ये अल्पपुण्ये मयि क्षिप्रं शीघ्रं प्रेयुषि मृते सति एका त्वम् कैकेयी लोकैः जनैः अभिशप्ता आक्रुष्टा (निन्दिता) भवसि—भुवि एका राममाता कौसल्या शोकेन दुःखेन तप्ता भवति ॥ ४-८९ ॥

(द्यो-४-९०) **इक्ष्वाकुवंशेति।** इदानीं वसिष्ठं (मन्त्रिणश्च) प्राह—इक्ष्वाकुवंशेत्यादिना—इक्ष्वाकुवंशस्य एकगुरो हे वसिष्ठ सुमन्त्र धृष्टे हे धर्मपाल शृणु—इमाम् अयोध्यापुरनाशवार्ताम् अयोध्यानाशवृत्तान्तम्—सन्देशहराः—सन्दिश्यते इति सन्देशः वक्तव्यार्थः—तं हरन्ति नयन्ति इति सन्देशहराः दूताः—स्यात् सन्देशहरो दूतः इत्यमरः—समन्तात् सर्वतः नयन्तु प्रापयन्तु ॥ ४-९० ॥

(प्रद्यो-४-९१) **उभाविति।** उभौ सुतौ भरतशत्रुघ्नौ मातुलस्य मातुः भ्रातुः—मातुर्भ्राता मातुलः स्यादित्यमरः—सद्म यातौ गतौ—अन्यौ रामलक्ष्मणौ अजिनोत्तरीयौ अजिनं चर्मैव उत्तरीयं ययोस्तौ तथोक्तौ—वन्याम् वनसमूहम्—वन्या वनसमूहे स्यादित्यमरः—यातौ—शोकः दुःखम्—स एव उपरागः ग्रहः (यस्य सः) नृपतिः परागात् मृतः—परापूर्वात् इणः लुङ्—इति एवम् जनकाय लेखान् पत्रिकाः आदिशध्वम् प्रेषयध्वम् ॥ ४-९१ ॥

(प्रद्यो-४-९२) **स इति।** ब्रह्म ब्रह्मस्वरूपम्—ब्रह्म इति च्छेदः—विद्वान् (ब्रह्मज्ञानी इत्यर्थः) स जनकः दुहितॄः कन्याः प्रदाय दत्त्वा रघूणां कुले संबन्धम् आसज्य संपाद्य संसारसौख्यं बहु मन्यमानः बहु मन्वानः जामातृषु दुहितृपतिषु—जामाता दुहितुः पतिः इत्यमरः—परम् उत्कृष्टं प्रेम स्नेहम्—प्रेम स्नेहः इत्यमरः—विधत्ते करोति—विपूर्वाद् दधातेर्लट् ॥ ४-९२ ॥

(प्रद्यो-४-९३) **ज्योत्स्नेवेति।** सोमम् इन्दुम् ज्योत्स्नेव कौमुदीव रामं बाला सीता च न जहाति न त्यजति—किं तु वनमेव याता यास्यति—यातेर्लुट्—पुण्यस्य पुण्यात्मनः जनकस्य राज्ञः पुत्र्याः दुहितुः बधूट्याः वध्वाः—स्नुषा जाया वधूटी स्याद् वधूरथ सुवासिनी इति प्रतापमार्तण्डः—अहं पापः पापी—पापपुण्यशब्दौ द्रव्यपरत्वात् पुंलिङ्गौ—त्रिषु द्रव्ये पापपुण्यसुखानि चेत्यमरः—श्वशुरः (अहम्) अस्मि ॥ ४-९३ ॥

(प्रद्यो-४-९४) **दिव इति ।** दिवः स्वर्गस्य अवनेः भूमेश्च अवनाय रक्षणाय जातः—अवनायेत्यनेन वनादन्यच्च गम्यते—रामः विधिवैशसेन दैवप्रातिकूल्येन वनाय यातः गतः सन् अद्यापि इदानीमपि अयं बालः मे आत्मजः मुनीनाम् उपभोगार्हम् मूलं फलं वा कथम् अद्यात् भक्षयेत् अत्तेर्लिङ् ॥ ४-९४ ॥

(प्रद्यो-४-९५) **विनीतमिति ।** विनीतं विनयसंपन्नम् अग्रतः स्थितम् पुरतः स्थितम् एनं शिशुम् अपराधं विना विपिनम् अरण्यं व्रजेति ब्रुवे यदि भणामि चेत् आर्याः कुलीनाः—आर्यः कौलेयको जात्यः कुलीनः इति प्रतापमार्ताण्डः—कर्मणा चण्डालम् अनार्यं तुच्छं मां भ्रूणहणम्—भ्रूणः अर्भकः—तं हन्तीति तथोक्तम्—ब्रह्मभ्रूणवृत्रेषु क्विप् इति क्विप्—हन्तेरत्पूर्वस्य (८-४-२२) इति णत्वम्—मां वदेयुः ॥ ४-९५ ॥

(प्रद्यो-४-९६) **जननीति ।** हे जननि मातः अयोध्ये हे कुलराजधानि कुलस्य प्रधाननगरि—प्रधाननगरी राज्ञां राजधानीति कथ्यते इति शब्दार्णवे—कुमारे गते सति—वनमिति शेषः—मयि सुप्रमारे सुतरां मृते सति—मारो मृतौ वृषेऽनङ्गे इति विश्वः—त्वां भवतीम् उपलाल्य कः पालयेत् को रक्षेत्—कष्टम् इति दैन्ये—नष्टासि—अनाथासि—ते तव पतिः कुतः—नास्तीत्यर्थः ॥ ४-९६ ॥

(प्रद्यो-४-९७) **कैकेयीति ।** इदानी कैकेयी प्राह—कैकेयीति । हे कैकेयि इतः अस्मात्—इदमिति वा पाठः—इदं वैधव्यं विगतभर्तृकत्वम् प्रियमिष्टं चेत् एनम् इमम् अनर्थं किमिति व्यवासाः—षो अन्तकर्मणि इत्यस्मात् लुङि रूपम् असाः इति—(४-७८ पद्यमपि दृश्यताम्) (निश्चितवती)—भक्ते ओदने—भिस्सा स्त्री भक्तमन्धोऽन्नम् इत्यमरः—विषं वा गरलं भवने मन्दिरे अनलमग्निं वा दत्त्वा पतिघ्नी—पतिं भर्तारं हन्तीति तथोक्ता—पतिघ्नी सती विधवा किं न स्याः—अस्तेर्लिङ् ॥ ४-९७ ॥

(प्रद्यो-४-९८) **इन्दीवरेति ।** इन्दीवरवत् कुवलयवत्—इन्दीवरं कुवलयम् इति विश्वः—श्यामलं नीलं तथोक्तम्—इन्दुवक्त्रं चन्द्रवदनम्—इन्दिन्दिरः षट्पदः—इन्दिन्दिरः षट्चरणो भ्रमरः पुष्पलोलुपः इति हलायुधः—प्रतापमार्ताण्डश्च—तद्वद् आनीलाः कलाप इव केशाः यस्य स तथोक्तः—तम्—इन्द्रारीणां दैत्यानां हन्तारम्—कर्तरि चेति तृचा सह समासनिषेधात् तृना सह समासः—इमं कुमारं जटाचीराणां धरं कथं वा ईक्षे कथं पश्येयमित्यर्थः—ईक्षतेर्लट् ॥ ४-९८ ॥

(प्रद्यो-४-९९) **वसिष्ठवाक्येनेति ।** वसिष्ठवाक्येन राज्याभिषेकाय वधूसमेतं कृतोपवासं रघुप्रवीरं रघुश्रेष्ठं निशि रात्रौ जागरित्वा जागरणं कृत्वा वनाय—गच्छेति कथं नु वक्ष्ये वदामि ॥ ४-९९ ॥

(प्रद्यो-४-१००) **वल्कमिति।** वल्कं गृहाण—स्वीकुरु इति वनं विश प्रविशेति—जटाः बधानेति—जपन् जपं कुर्वन् वसेति—मूलान्यशान भक्षयेति—मुनिर्भवेति शिशुं ब्रुवाणः वदन् शतधा न दीर्ये—न विदीर्ये—न विशीर्ये—अहो मे काठिन्यमिति भावः—दृविदारणे इत्यस्मात् कर्मणि लिङ ॥ ४-१०० ॥

(प्रद्यो-४-१०१) **धर्ममिति।** लघुः आशयः मनोरथः यस्य स तथोक्तः—तम् आशयः स्यादभिप्राये मानसाधारयोरपि इति विश्वः—अत एव स्त्रीजितम्—धर्म धर्माख्यं पुरुषार्थ च परित्यजन्तम्—कामं सुखमेव प्रकामम् अत्यन्तं पुरुषार्थयन्तं पुरुषार्थ कुर्वाणं माम् इन्द्रलोके रघ्वादयः रघुः आदिर्येषां ते तथोक्ताः न विलोकितारः न द्रक्ष्यन्ति—लोकृ दर्शने इत्यस्मात् लुट् ॥ ४-१०१ ॥

(प्रद्यो-४-१०२) **प्रसादयामीति।** हे कैकेयि अधुना इदानीम् अञ्जलिना अञ्ज. लिबन्धेन त्वां प्रसादयामि प्रसन्नां करोमि—प्रसीद प्रसन्ना भव—मूर्ध्ना शिरसा त्वा—नतोऽस्मि प्रणतोऽस्मि—हे वराकि जगतः लोकस्य विरुद्धं वत्सस्य शिशोः वनप्रयाणाय वरं जहीहि त्यज—ओ हाक् त्यागे इत्यस्मात् लोट् ॥ ४-१०२ ॥

(प्रद्यो-४-१०३) **वत्सप्रवासादिति।** हे वनजाक्षि जलजाक्षि वत्सस्य प्रवासात् वनप्रयाणात् इतरान् वरान् शतं वा वृणीष्व स्वीकुरु—दद्याम् प्रयच्छेयम्—ददातेर्लिङ—हे वामशीले वक्रस्वभावे—वामस्तु वक्रे रम्ये स्यात् सव्ये वामस्थितावपि इति शब्दार्णवे—अथवा कम्प्रं कम्पमानं मे मम शिरः मूर्धानं वा वृण—त्वया तुभ्यमित्यर्थः—अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया इति तृतीया—संप्रयच्छे दास्यामि—दाणश्च सा चेत् चतुर्थ्यर्थे (१-३-५५) इत्येनेन आत्मनेपदम्—दाण् दाने इत्यस्मात् लट् ॥ ४-१०३ ॥

(प्रद्यो-४-१०४) **रामश्चेति।** सौमित्रियुतः लक्ष्मणसहितः रामश्च तथा अहं च भरतस्य पोष्याः पोषणीयाः—प्रेष्याः किकराः—भवामः—नियोज्यकिंकरप्रेष्यभुजिष्यपरिचारकाः इत्यमरः—हे कल्याणि मङ्गलस्वरूपे अल्पपल्ल्याम् अल्पग्रामे वत्सेन शिशुना रामेण सह वत्स्यामि स्थास्यामि—वसतेर्लृट्—तनयेन भरतेन पृथ्वी पाल्या पालनीया भवेत् ॥ ४-१०४ ॥

(प्रद्यो-४-१०५) इदानी लक्ष्मणं प्राह **हताधिकारमिति।** हे लक्ष्मण हताधिकारं हतः नष्टः अधिकारः यस्य तथोक्तं तम् माम् अनया वध्वा सह कैकेय्या सह क्वचन कस्मिंश्चित् अधिकारं कारागृहे—कारायाम् अधिकारम् इति विभक्त्यर्थे अव्ययीभावः—कारा स्याद् बन्धनालयः इत्यमरः—निगलैः निरुद्ध्य शृङ्खलादिभिः

निरुद्धं कृत्वा——अथ शृङ्खले अन्दको निगलोऽस्त्री इत्यमरः——मौलैः वंशपरम्परायातैः अमात्यैः सह त्वं रामं राज्यपीठे नृपासने प्रतिष्ठापय——वीरोऽसि शूरोऽसि ।। ४-१०५ ।।

(प्रद्यो-४-१०६) राममाह——**तवाभिषेकमिति** । हे रामचन्द्र मम राज्ये तवाभिषेकं पट्टाभिषेकम् इमाम् एकां युधाजिद्भगिनीं कैकेयीं विना केऽपि न प्रतिकूलयन्ति तत्र प्रतिकूलं नाचरन्ति——एतया कैकेय्या किम्——न किमपि इत्यर्थः——बलात् बलात्कारेण अयोध्याम् अध्यास्व अयोध्यायां तिष्ठ——अधिशीङस्थासां कर्म इति कर्मसंज्ञा ——ततो द्वितीया ।। ४-१०६ ।।

(प्रद्यो-४-१०७) **स्त्रिया इति** । स्त्रियाः नार्याः प्रियार्थं रहसि एकान्ते किंचिद् वस्तु प्रदाय तद् वस्तु न ददानः तद् अददत् इत्यर्थः——असत्यम् अतथ्यम् इयाम् प्राप्नुयाम् ——इणो लिङ——जगत्समक्षं जगत्संनिधौ राज्यं प्रतिश्रुत्य दास्यामि इति प्रतिज्ञाय वनं वनवासं ददत् ददानः——ददातेर्लटः शतृप्रत्ययः——दातृत्वेन वदन् कथयन् कथं सत्यः भवामि ।। ४-१०७ ।।

(प्रद्यो-४-१०८) **सत्सन्ततिमिति** । आर्याः कुलीनाः [21]सत्सन्ततिं सत्पुत्रम्—— सन्ततिः पुत्रवंशयोः इति विश्वः——इह भूलोके स्वर्गम् आहुः——काले कालान्तरे नरकः रौरवादिलोकः अनुभाव्यः अनुभवयोग्यः——प्रत्यक्षतः प्रत्यक्षं——सार्वविभक्तिकस्तसिः ——स्वर्गसुखं विहाय त्यक्त्वा परोक्षतः अप्रत्यक्षात् नरकाद् किम् बिभीयाम् किं त्रस्येयम् ——ञि भी भये इत्यस्मात् लिङ ।। ४-१०८ ।।

(प्रद्यो-४-१०९) **अद्य प्रभृतीति** । हे पापे कैकेयि अहम् अद्य प्रभृति इदमारभ्य आमरणं मरणपर्यन्तं तव मुखं न निरीक्षे न पश्यामि——भरतः तव आनुकूल्यम् अनुकूलत्वम् इच्छेद् यदि (तर्हि) मृतोऽपि (अहम्) अतः अस्माद् भरतात् निवापं पितृदानं नेच्छेयम्——इषु इच्छायामित्यस्मात् लिङ ।। ४-१०९ ।।

(प्रद्यो-४-११०) **इत्येवमिति** । इत्येवम् उक्त्वा मुक्तविकीर्णकेशः मुक्ता मुक्तबन्धाः विकीर्णाः विशीर्णाः केशाः यस्य स तथोक्तः एकवासाः एकवसनः सन् उन्मत्तवत् भ्रान्तवत् धरण्यां भुवि लुठन् परिवर्तनं कुर्वन् हा पुत्र राम इति अनीचैः उच्चैः वदन् विधात्रा ब्रह्मणा मुषितः वञ्चितः राजा मुमूर्छ मूर्छां प्राप——मुर्छा मोहसमुच्छ्राययोः इत्यस्मात् लिट् ।। ४-११० ।।

(प्रद्यो-४-१११) **तमीक्षमाण इति** । इत्थम् एवं तदवस्थम्——सा अवस्था यस्य स तथोक्तः तम्——नृपं दशरथम्——ईक्षमाणः पश्यन्——उदश्रुः उद्गतबाष्पः रामचन्द्रः

रामभद्रः हे तात हे पितः मा खिन्थाः—खिद दैन्ये इति धातोः लुङ्—न माङ्योगे इति अडागमाभावः—झलो झलि इति सलोपः—कराभ्यां बाहुभ्याम् उत्थाप्य मूर्ध्ना प्रणतः सन् मूर्छितं मोहं प्राप्तम् आलिलिङ्ग परिषस्वजे ।। ४-१११ ।।

(प्रद्यो-४-११२) **तदङ्गेति ।** तदङ्गसंगेन रामभद्राङ्गसंस्पर्शेन मूर्छां विहाय त्यक्त्वा रामेति तातेति मा न त्यजेति हा वत्स हा पुत्रक मा गाः न गच्छ इति इत्येतावदेव व्यलपत् विललाप—लपतेर्लङ् ।। ४-११२ ।।

(प्रद्यो-४-११३) **नष्ट इति ।** नष्टोऽस्मि नाशं गतोऽस्मि—दग्धोऽस्मि दाहं गतोऽस्मि—हतोऽस्मि दृष्टिश्च नष्टा—अहहेति खेदे—अहहेत्यद्भुते खेदे इत्यमरः—रामं च नेक्षे न पश्यामि—हा वत्स क्वासि क्व गतोऽसि—इति भूमौ विलुण्ठ्य परिवृत्य हस्तौ पाणी प्रसार्य विस्तीर्य आत्मजं पुत्रम् अन्वियेष अन्वितवान्—अनुपूर्वाद् इच्छतेर्लिट् ।। ४-११३ ।।

(प्रद्यो-४-११४) **तं तादृशमिति ।** ततो दयालुः तं तथाविधं नृपं वीक्ष्य हे तात हे पितः अयमस्मि संनिहितोऽस्मि इति पदोः पादयोः पतित्वा निर्गन्तुं कामो यस्य स तथोक्तः—तुम् काममनसोरपि इति तुमुनः मकारस्य लोपः—उदश्रुः उद्गताश्रुः (-उदश्रूः इति वा पाठः) सप्त शतानि मातृ. सप्तगुणितशतसंख्यासंख्येया जननीः (वक्ष्यमाणप्रकारेण) जगाद ।। ४-११४ ।।

(प्रद्यो-४-११५) **अम्बाः इति ।** हे अम्बाः मातरः मम किंचिदागः अपराधम् स्वल्पापराधं क्षमध्वम्—सहध्वम् क्षमूष् सहने इत्यस्मात् लोट्—वरवर्णिनीभ्यः उत्तमाभ्यः—उत्तमा वरवर्णिनी इत्यमरः—वः भवतीभ्यः नमः नमस्कारं कुर्वे—नमस्स्वस्तीत्यदिना चतुर्थी—स्तन धयति पिबति इति स्तनंधयः—तं तथोक्तं बालं माम् नासिकास्तन्योध्माधेटोः इति खच्—अर्त्तिपदित्यादिना मुम् (तं मां) बहुप्रियैः बहुभिः प्रियाचरणैः उपलालयन्त्यः अवीवृधध्वम् (वर्धितवत्यः)—वृधेः णौ चङि सन्वल्लघुनीत्यादिता सन्वद्भावे सन्यङोः (६-१-९) इति द्विर्भावे उरत् (७-४-६द) इत्यभ्यासस्य अत्वे तस्य उपधायाश्च (७-१-१०१) इति इत्वे दीर्घो लघोः (७-४-९४) इति अभ्यासस्य दीर्घे च—चङो ङित्वाद् गुणाद्यभावे—णिचश्च इति आत्मनेपदे अवीवृधध्वम् इति रूपम् ।। ४-११५ ।।

(प्रद्यो-४-११६) **न मध्यमाम्बेति ।** इयं केकयी यद् यस्माद् भारं धुरं (राज्यभारं मम) निषेधति अतः कारणात् (इयं) मध्यमाम्बा न भवति—किं तु मे उत्तमाम्बा—मे प्रियः भ्राता भरतः राजा अस्तु—पिता अहं च तस्मै भरताय

राज्यम् अदाव दत्तवन्तौ—ददातेः लुङि उत्तमपुरुषे द्विवचने (अदाव इति) रूपम् ॥ ४-११६ ॥

(प्रद्यो-४-११७) **वने इति ।** ससौमित्रिः सलक्ष्मणः लक्ष्मणसहितः अहं वने चरेयम् गच्छेयम्—केकय्याः अपत्यं पुमान् कैकयेयः स च भरतः अवनेः भुवः रक्षणे—वनविरुद्धे नगरे इत्यपि गम्यते—तिष्ठतु तातः पिता मे मम सुसरं सुखेन सर्तुं शक्यं सुगमम्—(सुकरम् इति वा पाठः) ईषद्दुस्सुषु इत्यादिना खल् प्रत्ययः—वनं ददाति प्रयच्छति—सुतरां दुष्करे सुदुष्करे कर्मणि व्यापारे तं भरतं नियुङ्क्ते नियच्छति—युजेर्लट्—आत्मनेपदम् ॥ ४-११७ ॥

(प्रद्यो-४-११८) **आश्वासनीय** इति । हे अम्बाः मातरः—मम जनकः पिता आश्वासनीयः—वृद्धा जननी च संबोधनीया—सम्यग् बोधनीया बेधयितुं योग्या—सपत्नी इति स्पर्धा ईर्ष्या जातु न कार्या—ममाम्बा ज्येष्ठा इति च माननीया पूजनीया ॥ ४-११८ ॥

(प्रद्यो-४-११९) **श्रुत्वा गिर इति ।** ताः समस्ताः योषितः नार्यः इति एवंभूताः ताः गिरः श्रुत्वा युगपत् सकृत् उच्चैः चक्रन्दुः चुक्रुशुः—क्रन्दतेर्लिट्—तत् मन्दिरं तस्य राज्ञः भवनं—मन्दर एव मन्थः मन्थानदण्डः—तेन [22]मान्थन् क्लिश्यन्—क्षुभ्यन्निति यावत्—मान्थ हिंसासंक्लेशनयोः इत्यस्मात् शतृप्रत्ययः—स चासौ अम्भोधिश्च—तस्य गम्भीर इव गम्भीरो रवः नादः यस्मिन् कर्मणि तद् यथा भवति तथा रुराव चुक्रोश ॥ ४-११९ ॥

(प्रद्यो-४-१२०) **तथा रटन्तीष्विति ।** तथा नृपाङ्गनासु राजस्त्रीषु रटन्तीषु क्रोशन्तीषु सतीषु रामो वसिष्ठं नत्वा नमस्कृत्य निरहास्त निर्गतवान्—ओ हाङ गतौ इत्यस्मात् लुङ—तं रामं सरन्तम् आत्मानं स्वभाव इव एको लक्ष्मण एव अन्वगात्—अनुगतवान्—इणो लुङ—इणो गा लुङि इति गादेशः ॥ ४-१२० ॥

(प्रद्यो-४-१२१) **अम्बेति ।** सा अम्बा क्व कुत्र आस्ते—विदेहपुत्री सीता कुत्र आस्ते—कनीयसी अम्बा सुमित्रापि क्व इत्येवं ब्रुवन् मातृगृहानुवर्ती मातृगृहानुसारी रामः सौमित्रिं लक्ष्मणम् अवलम्ब्य अवष्टभ्य जगाम गतवान् ॥ ४-१२१ ॥

(प्रद्यो-४-१२२) **आदेशादिति ।** अवनिपतेः भूपतेः आदेशात् शासनात् वनाय वनं गन्तुम्—गहने अधिगहनम्—विभक्त्यर्थे अव्ययीभावः—गहनं काननं वनमित्यमरः—क्रव्यं मांसम् अदन्ति भक्षयन्ति इति क्रव्यादः असुराः तान्—बलात् निहन्तुम्—वैदेह्याः सीतायाः सह वनगमनम् अनुमन्तुम् अङ्गीकर्तुम्—तां कौसल्यां च नन्तुम्

नमस्कर्तुम् स रामः—सताम् इति एकं पदं वा—(तदा सतां नन्तुम् इति सत्पुरुषान् नन्तुमित्यर्थे स्यादिति भाति।) (स रामः) कौसल्याभवनम् अगात् प्रापत्—इणो लुङि रूपम् (अगादिति)—[23]प्रहर्षिणी वृत्तम् ।। ४-१२२ ।।

श्रीमन्मायिमहासुधीतनुभुवः श्री-चौण्डिसूरेः कृता-
वज्ञानां हृदयान्धकारदलनात् प्रद्योतनीनामनि ।
भूमौ भास्वदुदारराघवमहाकाव्यस्य नित्योल्लसद्-
व्याख्याने विदुषां मनोहरतमः [24]सर्गश्चतुर्थोऽगमत् ।।

इति उदारराघवे महाकाव्ये चतुर्थसर्गस्य टीका प्रद्योतनी समाप्ता ।।

(मातृकायां (मैसूर–नगरात् लब्धायाम्) मातृकालेखकेन लिखिताः काश्चन पङ्क्तयः दृश्यन्ते—

ताश्च इत्थम्—

*प्रमोदाब्दे चैत्रमासे कृष्णपक्षे च पुस्तकम् ।
रङ्गसूर्यभिधानेन श्रीनिवासतनूभुवा ।।
लिखितं सर्वसन्तुष्ट्यै सर्वेषामुपकारकम् ।
समाप्तिमगमच्चैतद् आषाढे कृष्णपक्षके ।।
अष्टम्याम् इन्दुवारे तु सिंहलग्ने विशेषतः ।।)

इति शम ।

---

* This manuscript was copied for the pleasure of all, as it is useful for all, by (one) Rrṅgasūri, son of Śrīnivāsa, (copying having been begun) during the dark fortnight in the month of *Caitra* (April?) of the year *Pramoda*. And it reached its completion (up to this extent) in *Siṃha-lagna* on Monday, the eighth *tithi* in dark fortnight in the month of Āṣāḍha. (This corresponds to July 16, 1750)

NOTES TO PRADYOTANĪ—Canto IV

[1] Only Bombay edn. reads: *sabhyaiḥ*. MS. 7 and the Commentaries read: *sadbhiḥ*.

[2] Only the *Pradyotanī* reads: *kalaśān* (in the masculine gendre) and the adjectives as: *tīrthāmbupūrṇān, saratnān, kṛtaprayatnān*. Bombay edn. MS. 1 and the *Saṃjīvinī* read the feminine expressions as: *kalaśīḥ, tīrthāmbupūrṇāḥ saratnāḥ*, and *kṛtaprayatnāḥ*. I have retained the feminine expressions.

[3] The root *matri* is included in the Group to which the *Gaṇa-sūtra: ākusmād ātmanepadinaḥ* is applicable. Accordingly, in the *Ṇijanta* usage *ātmanepada* is compulsory (like *mantrayate* and not *mantrayati*). Our author Śākalyamalla too notes in his *Ākhyātacandrikā* only *mantrayate*. Therefore in the Aorist the form should be: *abhyamamantrata*. The MSS. read: *abhyamantrat*: in the *Parasmaipada*. Probably the reading intended was *abhyamantrataitya* (and not *abhyamantrad eyta*).

[4] Only the *Pradyotanī* reads: *satkārayāmāsa*. Others read: *tāṃ, kārayāmāsa*. The expression *raṅgavallī*, in this context, became as *ramgolī* in the modern languages of North India. In Telugu it is known as "*muggu*", and in Tamil as "*Kolam*". The custom of drawing auspicious and decorative patterns with rice flour (in front of the Residence and other places) is preserved even now in (South) India. The description shows that it was prevalent in the days of our author too.

[5] This is the reading in the *Saṃjīvinī*. See also Note on V. 116.

[6] See also the *Carakasaṃhitā* (NSP) on p. 235. The Commentator *Cakrapāṇidatta* thereon says: *madhvājye milite mārake bhavataḥ*.

[7] See the *Padamañjarī* on 2. 4. 66, and the *Siddhāntakaunudī* thereon.

[8] Kaikeyī and Kekayī—only these two forms are noted to be correct. See the *Prauḍhamanoramā* and the *Śabdakaustubha* on *Puṃyogād ākhyāyām* (4. 1. 48).

[9] See Note 8.

[10] In the *Pradyotanī*, after the word: *nāgendramiva* there are some lines which seem to deal with the expression "iva" and quote the *Vārttika* as: *ivena saha nityasamāsaḥ* etc. with a discussion on the compounding with "*iva*". These lines are illegible. The expression *nityasamāsa* (with *nitya*) is clear. This *Vārttika* (with the word *nitya*) appears in the quotation given by Mammaṭa

in his *Kāvya-prakāśa* (Chapter X), though the word *nitya* is not found in the line given in the *Mahābhāṣya* (See *ibid.* on 2. 1. 4 and 2. 2. 18). Bhaṭṭoji does not read *nitya*—Nāgeśa clearly says that the word *nitya* in the rule in this context is wrong. See his *Uddyota* on the *Kāvyaprakāśa*: *nityapadaprakṣepaḥ aprāmāṇikaḥ* (page 443, *Ānandāśrama edn.*). *Māṇikyacandra*, the Commentator on the K.P. (p.222) does not take the compounding with "*iva*" to be a *nityasamāsa*. CauṇḍiPaṇḍita is perhaps quoting the *Vārttika* on the basis of the K. P. and he is not familar with Bhaṭṭoji's *Śabdakaustubha* (See *ibid* on 2. 1. 4; pp. 160 and 161.)

[11] Bombay edn. reads: *nopācarat*. MS. 1 reads: *upāsarat*. MS. 7 and the *Pradyotanī* read: *so'pāsarat* (i.e. *saḥ apāsarat*) which is perhaps correct.

[12] The verse: *tatheti nirgatya* etc. which is 59th and should come after the verse: *mantrauṣadhīḥ* etc., is found only in the Bombay edn. as the 58th verse, and thus appears before the verse: *mantrauṣadhīḥ* etc. I think it was due to some oversight.

[13] Bombay edn. reads: *rathe sāgraniviṣṭadṛṣṭim* MS. 7 and the *Pradyotanī* read: *ratheṣāgraniviṣṭadṛṣṭim* (i.e *ratha + īṣāgra*—etc.).

[14] See th *Jayamaṅgala* on Bhaṭṭi I. 14. The lines of the *Pradyotanī* seem to be reminiscent of the lines of the *Jayamaṅgalā*: *kekayān ācaṣṭe svajanmabhūmitveneti kekayī. tad ācaṣṭe iti nijantād auṇādike striyām ikārapratyaye ṭilope ṇilope ca kṛd-ikārād iti ṅīṣ.*

[15] See the *Nyāsa* I. 4. 32.

[16] This is a reference to the *Vṛttikāra*. See the *Kāśikā* on I.4. 32.

[17] The portion from: *kaiścit* etc. in the *Pradyotanī* is a quotation from Kaiyaṭa. See the *Pradīpa* on I. 4. 32 (page 257; NSP edn.).

[18] MS. 7 reads· *harinā*, obviously implying that the following *kārikā* about the fourfold divison of the *Vartamānakāla*. This is however not found in the *Vākyapadīya*. This *kārikā* is quoted in the *Nyāyakośa* too (under *Vartamāna*). I am unable to trace the source.

[19] See *Manusmṛti* after XI. 10 (given within brackets in the Chowkhamba edn.).

[20] This seems to be a case of the usage of a *bhinnakartṛka-tumun*.

[21] Only Bombay edn. reads: *satsangatim*. MS. 1, MS. 7 and the *Pradyotanī* read: *satsantatim*.

[22] Our author notes in his *Ākhyātacandrikā thus:*

kunthati punthati lunthati manthati mānthaty amī pañca,
hiṃsā-saṃkleśanayoḥ . . . . . (3. 3. 11)

Sāyaṇācārya also notes *māntha* as a separate root. Bhaṭṭoji does not note it. About the differences in the recording of this root etc. see Sāyaṇācārya's *Dhātuvṛtti* under the root *māntha*.

[23] *Mnau jrau gas tridaśayatiḥ praharṣiṇīyam* is the definition in the *Vṛtta-ratnākara*.

[24] See the colophon verse at the end of the 1st and 2nd Cantos.

उदारराघवे महाकाव्ये पञ्चमसर्गस्य व्याख्या प्रद्योतनी चौण्डिपण्डितेन कृता

(प्रद्यो-५-१) **तस्मिन्निति।** तस्मिन्ननेहसि वनगमनसमये—कालो दिष्टोऽप्यनेहापि इत्यमरः—तत्र कौसल्यासदने तौर्यत्रिकं नृत्तादित्रयम्—तौर्यत्रिकं नृत्तगीतवाद्यमित्यमरः—मन्द्रं गम्भीरं यथा भवति तथा—ध्वनौ स्यादथ गम्भीरे मन्द्रमन्दौ समावुभाविति प्रतापमार्तण्डः—तारयति स्वरं स्थानेभ्यः—अत्युन्नतत्वं प्रापयतीति —तारः—तारोऽत्युच्चैरित्यमरः—तारतारम् (तारसदृशम्)—प्रकारे गुणवचनस्य (८-१-१२) इति (द्वित्वम्।) तदाश्रयणे (कर्मधारयवदुत्तरेषु—८-१-११—इत्यनेन) कर्मधारय (वद्भावे) न सुपो लुकि रूपम्। उक्तं दत्तिलेन—नृणामुरसि मन्द्रस्तु द्वाविंशतिविधो ध्वनिः। स एव कण्ठमध्ये स्यात् तारः शिरसि गीयते इति ॥ निनाद रराण। कल्पान्ते (युगान्ते) धाराधराः संवर्तकादयः—तेषामिव धीरो गम्भीरो नादो येषा ते तथोक्ताः—दुन्दुभयः भेर्यः—भेरी स्त्री दुन्दुभिः पुमानित्यमरः—मन्देतरम् उच्चैः निनेदुः रेणुः। निपूर्वात् नदतेर्लिट्। (अस्मिन् सर्गे प्रायेण उपजातिः।) इन्द्रवज्रा वृत्तम् ॥ ५-१ ॥

(प्रद्यो-५-२) **वीणा विरेणुरिति।** वाराङ्गनानां वेश्यानाम्—वारस्त्री गणिका वेश्या इत्यमरः—मङ्गलं गीतं शुभगानम्—कल्याणं मङ्गलं शुभम्—इति—गीतं गानमिमे समे इति चामरः—तेन मिश्राः—मृदुवेणुनादैः मनोहरवंशरवैः सह वीणाः वल्लक्यः—वीणा तु वल्लकीत्यमरः—विरेणुः विनेदुः—विपूर्वात् रण शब्दे इत्यस्मात् लिट्—कम्बूंश्च शङ्खांश्च (जनाः) दध्मुः—शङ्खः स्यात् कम्बुरस्त्रियामित्यमरः—(दध्मुरित्यत्र) ध्मा शब्दाग्निसंयोगयोरित्यस्मात् लिट्—पटहांश्च आनकांश्च जघ्नुः ताडनेन अध्वनयन्—हन हिंसागत्योः इत्यस्मात् लिट्—प्रघणेषु अलिन्देषु बहिर्द्वारप्रकोष्ठकेषु—प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके इत्यमरः—अगारैकदेशे प्रघणः प्रघाणश्च (३-३-७६) इति निपातनात् साधुः—उच्चैरधिकं घण्टाः बबन्धुः आबध्नन् ॥ ५-२ ॥

(प्रद्यो-५-३) **कोणाहतानामिति।** कोणैः वीणादण्डैः—कोणो वीणादिवादनम् —वीणादण्डः प्रवालः स्यादित्यमरः—तैः आहतानां ताडितानाम् जयघण्टिकानां

विजयघण्टानाम् प्रभूताः अधिकाः क्वाणाः स्वनाः—क्वाणः क्वणः क्वणनमित्यपि वीणायाः क्वणिते इत्यमरः—क्वणो वीणायां च (३-३-६५) इत्यनेन विकल्पात् घञ् —समश्राविषत । तत्र शृणोतेः सम्पूर्वात् कर्मणि लुङ्—चिण्वद्भावः इट् वृद्धिश्च —सर्वत्र वेदघोषाः वेदध्वनयः—पुरोहितानां पुण्याहघोषाश्च अश्रोषत श्रुताः—शृणोतेः कर्मणि लुङि चिण्वदिडभावपक्षे सार्वधातुकगुणः ।। ५-३ ।।

(प्रद्यो-५-४) **विचित्रेति** । सुव्यक्ताः सुस्पष्टाः मुक्ताफलाना रङ्गवल्ल्यः रचनाः यस्यां सा तथोक्ता राज्ञीगृहमण्डनश्रीः राज्ञ्याः कौसल्यायाः गृहमण्डनश्रीः प्रसाधन-लक्ष्मीः विचित्रवर्णैः नानाविधवर्णैः मणीनां भित्तय. कुड्यानि तासां भागैः एकदेशैः—भागो रूपार्धके प्रोक्तो भागधेयैकदेशयोः इति विश्वः—कुसुम्भं महारजनपुष्पं मुख्यं प्रधानं येषां तैः तथोक्तैः—स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपि इत्यमरः—कुसुमानाम् उपहारैः पूजोपदाभिः रराज शुशुभे ।। ५-४ ।।

(प्रद्यो-५-५) **ललाटिकेति** । ललाटिका ललाटालंकारः—कर्णललाटात् कन् अलंकारे (४-३-६५) इति कन् प्रत्ययः—ताभिः [1]रक्तानि लोहितानि लसन्ति ललाटानि यासां ताः तथोक्ताः—पाटलाः श्वेतरक्ताः गण्डभागाः गण्डप्रदेशाः यासां तास्तथोक्ताः—श्वेतरक्तस्तु पाटलः इत्यमरः—आरक्तेन आ समन्तादरुणेन ताम्बूलरसेन अरुणानि आस्यानि वदनानि यासां तास्तथोक्ताः—ललितः अङ्गहारः अङ्गविक्षेपः यासां तास्तथोक्ताः—लाटाङ्गनाः लाटदेशीयवनिताः लास्यानि नृत्तानि चक्रुः—अङ्गहारोऽङ्गविक्षेपः इति लास्यं नृत्तं च नर्तनमिति चामरः ।। ५-५ ।।

(प्रद्यो-५-६) **अरुन्धतीमुख्येति** । अरुन्धतीमुख्याः अरुन्धतीप्रभृतयः जरत्यो वृद्धाः चिरण्ट्यः सुवासिन्य तासां पूजाविधौ व्यग्रः त्वरावान् पुरन्ध्रिवर्गः यस्मिन् तत्—गृहाश्चापत्ययुक्तास्तु पुरन्ध्री च सुवासिनी इति प्रतापमार्तण्डः—कृदिकारादक्तिनः (गणसूत्रम्) इति विकल्पाद् ङीषः अभावः—मनोहरं मातुः कौसल्यायाः गृहं भवनं वीक्ष्य दृष्ट्वा तनुजः पुत्रः रामः अन्तः अन्तःपुरं प्रवेष्टुं ललज्जे लज्जितवान्—लज्जतेः लिट् ।। ५-६ ।।

(प्रद्यो-५-७) **पुत्राभिषेकेति** । वृद्धा राज्ञी कौसल्या पुत्रस्य अभिषेक एव उत्सवः—तेन पूर्णः कामः अभिलाषः यस्याः सा—क्षौमेन दुकूलेन अभिरामा—क्षौमं दुकूलं स्यादित्यमरः—मणिविकारः काञ्चिदाम गुणो यस्याः सा तथोक्ता—संघातविकार-षष्ठ्याश्च बहुव्रीहिरुत्तरपदलोपश्च (वार्त्तिकम्) इति वक्तव्याद् बहुव्रीहिः—डाबुभाभ्यामन्यतरस्याम् (४-१-१३) इति विकल्पात् नकारान्तम्—अनकारान्तं वा—

स्त्रीकट्यां मेखला काञ्ची इत्यमरः—कृदिकारादिति विकल्पाद् अनीकारः (ङीष्भावः इत्यर्थः)—समृद्धाम् उज्ज्वलां श्रियं शोभाम् आदधाना (समन्ताद् दधाना) रत्नानाम् आसने तिष्ठतीति रत्नासनस्था रराज बभौ ।। ५-७ ।।

(प्रद्यो-५-८) **धूतेति** । सुमित्रायाः करस्थितेन चामरेण धृता वीजिता—सीतायाः करेण आवर्तितं भ्रामितं तालवृन्तं व्यजनं यस्याः सा—व्यजनं तालवृन्तं स्यादित्यमरः—सा कौसल्या शुद्धान्ते अन्तःपुरे वृत्तान्तं वार्ताम् अजानती अजानाना कदा समयः अभिषिककालः इति विप्रान् विदुषः पप्रच्छ अपृच्छत्—कालो दिष्टोऽप्यनेहापि समयोऽपि इत्यमरः—पप्रच्छेति पृच्छतेर्लिट् ।। ५-८ ।।

(प्रद्यो-५-९) **आगादिति** । इदं परिमाणम् अस्य तस्मिन् उयति—अन्तरे प्रश्नावसरे एवेत्यर्थः—रागाद् अनुरागाद् रामः आगाद् आगतः—इणो गा लुङि इति गादेशः—आगामिनोः दुःखव्यसनयोः दुःखापदोः अनभिज्ञाम्—इगुपधज्ञाप्रीकिरः कः इति (जानातेः कप्रत्ययः—) ता तथोक्ता कौसल्याम् प्रणम्य प्रेमभरेण प्रेमातिशयेन पश्यन् अङ्के उत्सङ्गे निश्शङ्कं निषसाद उपविष्टवान्—सीदतेः लिट् ।। ५-९ ।।

(प्रद्यो-५-१०) **दरोद्गतेति** । अम्बा माता (कौसल्या) दरम् ईषद् उद्गतानि श्मश्रूणि मुखरोमाणि यस्य तत् तथोक्तम्—दरः साध्वसगर्तयोः—कन्दरे तु दरीभाहरीषदर्थे दराव्ययम् इति विश्वः—तस्येद तदीयम् अत एव नीलायितं नीलं भवत्—लोहितादिक्यषन्तात् कर्तरि क्तः—गण्डतल गण्डस्थलं निनिमे चुचुम्ब—णिमि चुम्बने इत्यस्मात् लिट्—धम्मिल्लः सयता कचाः इत्यमरः—तव माल्याग्रे मिलन्मरन्दो यस्मिन् तस्मिन् तथोक्ते—मिलन्मिलिन्दे इति पाठे मिलद्भृङ्गे इत्यर्थः—मूर्ध्नि मूर्धनि उपाघ्रात् अजिघ्रत्—घ्रा गन्धोपादाने इत्यस्मात् लुङ्—विभाषा घ्राधेट्—इत्यादिना (२-४-७८) सिचो लुक्—बाष्पम् आनन्दबाष्प च मुमुचे त्यक्तवती ।। ५-१० ।।

(प्रद्यो-५-११) **आकारितस्येति** । अभिषेकहेतोः अभिषेकार्थम् आकारितस्य आहूतस्यापि—हूतिराकारणाह्वानम् इत्यमरः—निष्कामितस्यापि प्रवासितस्यापि निर्विकारं [2]विकाररहितम् प्रसन्नं विमलं सुतस्य मुखम् आलोक्य किमपि किंचिदपि अबुद्ध्वा अज्ञात्वा जननी कौसल्या जगाद उवाच ।। ५-११ ।।

(प्रद्यो-५-१२) **वत्साद्येति** । हे वत्स पुत्रक अद्य—इदानीम् तव राज्यं भावि भविष्यति—शत्रून् उत्साद्य उच्छिद्य अप्रमत्तः प्रमादरहितः सन् क्षितिं भूमिं रक्ष पालय—भक्तिं भजनीयां बुद्धिं भजन्तीति भक्तिभाजः (भक्तियुतान्) त्रीन् तव—

भ्रातॄन् अवरजान् इमाः सर्वाः मातॄः मामिव पश्य अवलोकय—दृशेः लोट्—पाघ्रेत्यादिना पश्यादेशः ।। ५-१२ ।।

(प्रद्यो-५-१३) **मान्यानिति ।** सत्यसन्धः सत्यप्रतिज्ञः (त्वम्—तादृशः) ते तव मान्यान् पूज्यान् इमान् मन्त्रिणः अमात्यान् मानय पूजय—बन्धूंश्च (बान्धवांश्च) बालवृद्धान् बालांश्च वृद्धांश्च संभावय—पुण्यवाचः पवित्रवचसः पुरोहितान् पूजय अर्चय—भृत्यान् दासानपि पुषाण पालय—पुषाणेति पुष पुष्टौ इत्यस्मात् लोटि रूपम् ।। ५-१३ ।।

(प्रद्यो-५-१४) **प्रजानुरागेणेति ।** प्रजानामनुरागेण प्रजानुरञ्जनेन—अन्यथा दोषस्मरणादिति भावः—धनं चिनुष्व अर्जय—धनेन धर्मं सुकृतं परिपालयस्व—धर्मेण कीर्तिं यशः संपादय—हे राम कीर्त्या ख्यात्या च अखिलान् लोकान् पुनीथाः पुनीहि—सर्वत्र लिङ् विध्यर्थे ।। ५-१४ ।।

(प्रद्यो-५-१५) **विशिण्ढि** इति । राज्ये जनानां विभवं विशिण्ढि विशेषय—शिष्लृ विशेषणे इत्यस्मात् लोट्—सेर्हिरादेशे अल्लोपे हेः धिरादेशे धेः ष्टुत्वे झलां झश् झशीति षकारस्य जश्त्वेन डकारे झरो झरि सवर्णे इति डकारलोपे नकारस्य अनुस्वारे परसवर्णादेशे च कृते शिण्ढीति रूपम्—निजैः स्वकीयैः चरित्रैः सद्वृत्तैः पापानि दुरितानि निष्पिण्ढि विनाशय—पिष्लृ संचूर्णने इत्यस्मात् लोट्—अत्रापि पूर्ववत् प्रक्रिया—इह इदानीम् सिंहासनस्थे स्वर्णपीठस्थे—सिंहासनं नरेन्द्राणां तदेव स्वर्णनिर्मितम् इति प्रातापमार्तण्डः—त्वयि महीतलं भुवनं शासति सति नेत्रे नयने शीतलयामि शीतलीकरोमि—शीतलशब्दात् तत् करोतिण्यन्तात् लट् ।। ५-१५ ।।

(प्रद्यो-५-१६) **श्रुत्वेति ।** रामः इति एवं श्रुत्वा शुद्धान्तचरेषु अन्तःपुरवर्तिषु जनेषु शृण्वत्सु सत्सु वृद्धां जरती कौसल्यामम्बां प्रहसन् बभाषे—किमिति—हे मुग्धे मूढे—मुग्धः सौम्ये नवे मूढे इति वैजयन्ती—अम्ब किमपि न वेत्सि त्वं किंचिदपि न जानासि—विद ज्ञाने इत्यस्मात् लट्—क्षुधा क्षुधया (जठराग्निना) कुक्षौ उदरे दग्धे सति को जनः अक्षिण नयने अञ्जनं कज्जलं दद्यात् प्रक्षिपेत्—ददातेर्लिङ् ।। ५-१६ ।।

(प्रद्यो-५-१७) **वनोपदेशमिति ।** पिता जनको मे मम वनोपदेशं कुरुते—त्वं भूम्याम् भूमिविषये अवनोपदेशं रक्षणोपदेशं वक्षि ब्रूषे—वचेः लट्—इह इदानीम् अहं पितुर्वाक्यम् आचरेयम् अनुतिष्ठेयम्—चरतेः लिङ्—भरतः त्वद्वाक्यकारी राजा अस्तु ।। ५-१७ ।।

(प्रद्यो-५-१८) **ममेति** । मध्यमाम्बा अद्य इदानीम् ममाभिषेकोद्यतम् मदभिषेकार्थमुद्युक्तं तातं पितरं वरद्वयं याचति प्रार्थयते--सामीप्ये लट्--कि तद् द्वयम्--एकेन वरेण वनं यास्यामि गमिष्यामि--यातेः लृट्--अपरेण वरेण भरतः राजा भावी भविष्यति ।। ५-१८ ।।

(प्रद्यो-५-१९) **पद्भ्यामिति** । जटाचीराणां धरः तपस्वी तापसः चतुर्दशाब्दान् वने पद्भ्यां पादाभ्यां चरिष्यामि--चरतेः लृट्--किरीटं मुकुटं दधत् दधानः मनस्वी धीरः भरतः हस्त्यश्वेन यातुं शीलमस्यास्तीति हस्त्यश्वयायी तथोक्तः धरणी भुवं प्रशास्ता प्रशासिष्यति--शास्तेः लुट् ।। ५-१९ ।।

(प्रद्यो-५-२०) **श्रुत्वेति** । इति एवं श्रुत्वा तन्वी देवी कौसल्या अकाण्डे अनवसरे --अकस्मात् अशनिना वज्रेण ताडिता अत एव विच्छिन्नकाण्डा लूनस्कन्धा--काण्डो नाले तरुस्कन्धे बाणेऽवसरनीरयोः इति विश्वः--कदलीव रम्भेव विधात्रा दैवेन मुषिता वञ्चिता हा वत्स रामेति विलपन्ती भूमौ निपत्य पतित्वा मुमूर्छ मुमोह ।। ५-२० ।।

(प्रद्यो-५-२१) **स्वमातृमूर्च्छेति** । लक्ष्मणः अग्रे पुरतः स्वमातुः मूर्छया आकुलं व्याकुलं चित्तं चेतो यस्य त तथोक्तं तं रामं निष्ठुरम्--निष्ठुरं परुषमित्यमरः--आबभाषे--किमिति--(तत्राह) हे आर्य पूज्य वृथैव व्यर्थमेव--व्यर्थके तु वृथा मुधेत्यमरः--राज्यं किं नाशयसि विनाशयसि--खिन्ना[3] दीनचित्ता सती इयम् अम्बा म्रियते प्राणत्यागं करोति--[4]बतेति खेदे--खेदानुकम्पासंतोषविस्मयामन्त्रणे बत इत्यमरः ।। ५-२१ ।।

(प्रद्यो-५-२२) **माता प्रमीतेति** । हे आर्य स्वामिन् अद्य इदानीम् त्वयि भवति वनं प्रयाते गमिष्यति सति माता जननी प्रमीता मृता (भविष्यति)--पिता प्रमेता प्रमेष्यते--अन्तःपुरमातृवर्गः अन्तःपुरसपत्नीजननीगणः प्रमेष्यते मरिष्यति--अबला दुर्बला सीता भीता सती काम् अवस्था दशा यास्यति प्राप्स्यति--यातेः लृट् ।।५-२२।।

(प्रद्यो-५-२३) **मुधैवेति** । मूढबुद्धेः मुग्धबुद्धेः जरतः वृद्धस्य जाल्मस्य असमीक्ष्यकारिणः--जाल्मोऽसमीक्ष्यकारीत्यमरः--राज्ञः प्रलापैः अनर्थालापैः मुधैव व्यर्थमेव मुह्यसि मोहं गच्छसि--स च राजापि स्त्रिया नार्या विप्रलापैः विरोधोक्तिभिः विप्रलब्धो वञ्चितः सन् इह--अस्यां--राजनीतौ न मूलबुद्धिः मूलपरिज्ञानः न भवति ।।५-२३।।

(प्रद्यो-५-२४) **नाहमिति** । हे नाथ वृद्धप्रलापेन जगद्विरुद्धं लोकविरुद्धं वनप्रयाणं न सहे सोढुं न समर्थः--तथा हि--नयमार्गभाजां नीतिमार्गानुवर्तिनां--स्त्रीबालवृद्धाः ग्राह्यवाचो न भवन्ति--कि तु पोषणीयाः ।। ५-२४ ।।

(प्रद्यो-५-२५) **वृद्धाविति** । वश्यो वशं गतः समस्तलोको यस्य स तथोक्तः मौलैः वंशपरम्परागतैः प्रधानैः अमात्यैः अनुमतः संमतः मनस्वी धीरः अहं वृद्धौ स्थविरौ असंबद्धगिरौ असंगतवचनौ तौ दम्पती कैकेयीदशरथौ निरुद्ध्य निग्राह्य ते तव अभिषेक एव उत्सवः तम् आचरेयं कुर्याम्—चरतेः लिङ् ।। ५-२५ ।।

(प्रद्यो-५-२६) **कश्चिद्यदीति** । बलेन अभियोद्धुं शीलमस्यास्तीति बलाभियोधी तथोक्तः—भरतानुरोधी भरतानुवर्ती—उभयत्रापि सुप्यजातौ णिनिस्ताच्छील्ये (३-२-७८) इति णिनिः—इह तवाभिषेकविषये—यः नः[5] अस्माकं विरोधी कश्चिद् स्याद् यदि (तर्हि) तं समूलघातम् अहं हन्याम् हिंस्याम्—समूलं हत्वा समूलघातम् —समूलाकृतजीवेषु (३-४-३६) इत्यनेन णमुल्—अत उपधायाः इति वृद्धिः—हनस्तोऽचिरणलोः (७-३-३२) इति नकारस्य तकारः—हो हन्तेः (७-३-५४) इति हकारस्य घकारः—कषादिषु यथाविध्यनुप्रयोगः इति विधानात् यस्मात् धातोः णमुल् विहितः स एव धातुरनुप्रयुज्यते—हन्याम् इत्यत्र हन्तेर्लिङ्—अथवा बलानुपातम् बलं सत्त्वम् अनुपात्य—अभीक्ष्णं बलमाश्रित्येत्यर्थः—विशिपतीत्यादिना (३-४-५६) णमुल्—बहिरीरयामि बहिर्निष्कासयामि—ईर गताविति धातोः लट् ।। ५-२६ ।।

(प्रद्यो-५-२७) **वसिष्ठेति** । हे आर्य स्वामिन् इह अभिषेकविषये वशिनः जितेन्द्रयान् वसिष्ठमुख्यान् वृद्धान् महर्षीन् वृष्णि[6]मुख्यान् अमात्यान् मन्त्रिणोऽपि संमन्त्र्य तैः सह विचार्य संभाव्य सत्कृत्य एतत् समस्तं कार्यम् पट्टाभिषेकरूपं समञ्जसं यथा तथा सम्यक् कुर्याम् आचरेयम्—करोतेः लिङ्—(धृष्टिमुख्याश्च मन्त्रिणः इत्थमुक्ताः—

धृष्टिर्जयन्तो विजयो सुराष्ट्रो राष्ट्रवर्धनः ।
आशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् ।। (वा-रामायणे-१-७-३)

।। ५-२७ ।।

(प्रद्यो-५-२८) **करस्थितमिति** । इह नगरे करस्थितं हस्तप्राप्तं राज्यम् अपहाय त्यक्त्वा दरिद्रः सन् काननं किं गाहितासे किमर्थं प्रवेक्ष्यसि—गाहतेः लुट्—कः क्षत्रियः भूपः वनान्ते वनमध्ये वस्ता स्थाता-वसन्—वसतेः निवासार्थात् तृच्—वल्कलं वल्कलवसनं च वसिता आच्छादयिता च सन्—श्रोत्रियतां छान्दसत्वम् उपेयात् प्राप्नुयात् —वस निवासे इत्यस्यैव अनिट्सु ग्रहणम्—वस आच्छादने इत्ययं तु सेट्—उपेयादित्यत्र इणो लुङ् ।। ५-२८ ।।

(प्रद्यो-५-२९) **राज्येनेति** । राज्येन महान्तम् अधिकम् अर्थं चिन्वन्ति—सम्पादयन्ति—अर्थेन धर्मकामौ तन्वन्ति विस्तारयन्ति—धर्मार्थकामेषु सुसंभृतेषु संपादितेषु

सत्सु मुक्तिभाजां मुमुक्षूणां मुक्तिः मोक्षः स्वयं सेत्स्यति संभविष्यति--षिध संराद्धौ इत्यस्मात् (दैवादिकात्) लृट् ।। ५-२९ ।।

(प्रद्यो-५-३०) **तद् राज्येति** । हे रामभद्र राज्यं मूलं यस्य तद् राज्यमूलं तत् सकलं धर्मादिचतुष्कं विहाय त्यक्त्वा वृथा व्यर्थमेव दरिद्रास्यसि--दरिद्रो भविष्यसि--दरिद्रा दुर्गतौ इत्यस्माद् धातोः लृट्--वृद्धाः महान्तः बाहुजानां क्षत्रियाणां--बाहुजः क्षत्रियो विराट् इत्यमरः--बाहाबलेनैव दोर्बलेनैव--शाखा बाहाथ ना दोपः--इति प्रतापमार्ताण्डः--संजीवनं[7] साधु वदन्ति ब्रुवते ।। ५-३० ।।

(प्रद्यो-५-३१) **पिनष्मीति** । शत्रून् रिपून् पिनष्मि हिनस्मि इत्यर्थः--अत्र पिनष्टेः हिंसार्थत्वेऽपि जासिनिप्रहणनाटक्राथपिषा--हिंसायाम् (२-३-५६) इत्यनेन षष्ठी न भवति शेषत्वेन विवक्षाभावात्--शौर्य विशिनष्मि विशेषयामि--विष्लृ विशेषणे इत्यस्मात् लट्--शैलांश्च अद्रीन् क्षुणद्मि क्षुण्णान् करोमि--क्षुदि संपेषणे इत्यस्मात् लट्--वेलाः मर्यादाः--अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि इत्यमरः--वेलाः भिनद्मि विदारयामि--भिदिर् विदारणे इत्यस्मात् लट्--तव फाले ललाटे--अलिकं स्यात् स्त्रियां गोधिः ललाटं फालमप्यथ इति प्रतापमार्ताण्डः--राज्यपट्टं बध्नामि--भन्त्स्यामि इत्यर्थः--बन्ध बन्धने इत्यस्मात् लट्--सर्वत्र सामीप्ये लट्प्रयोगः--त्वम् उत्साहम् उत्साहशक्तिम् उत्सृज्य त्यक्त्वा भीलुको भयशीलो न स्याः--भीरुभीरुकः भीलुकाः इत्यमरः--भियः क्रुक्लुकनौ (३-२-१७४) क्रुकन् अपि वाच्य इति क्रुकन् प्रत्ययः ।। ५-३१ ।।

(प्रद्यो-५-३२) **उत्साहहीने** इति । उत्साहहीने उत्साहशक्तिरहिते धृतिः धैर्यम् (तस्माद्) अपैति--अपगच्छति--धृतौ गतायाम् अपगतायाम् सत्यां श्रीः लक्ष्मीः नोपयाति न प्राप्नोति--उपपूर्वाद् यातेर्लट्--जनौघः जनसंघः अश्रीकम् अलक्ष्मीकं नाश्रयते न सेवते--श्रिञ् सेवायान् इत्यस्मात् लट्--जनेन उज्झितः त्यक्तः कस्य कदा कस्मिन् काले उपयोग्यः उपजीव्यो भवति न कस्यापीत्यर्थः ।। ५-३२ ।।

(प्रद्यो-५-३३) **न सन्दिहीतेति** । आप्तजनस्य हितजनस्य वाक्ये न सन्दिहीत न संशयीत--सम्-पूर्वात् दिहतेः लिङ्--धीरो मनीषी--धीरो मनीषी ज्ञः प्राज्ञः इत्यमरः--निशम्य आप्तवाक्यं श्रुत्वा जातु कदाचिदपि नभिन्दीत भेदं न कुर्यात्--न विलम्बेतेत्यर्थः--भिदेः लिङ्--खिन्दीत इति पाठे खिदि दैन्ये इत्यस्मात् लिङ्--कार्यजातं प्रयोजनजातम् खलेन--नीचेन सह--क्रूरे नीचेऽधमे खलः इति विश्वः--पिशुनो दुर्जनः खलः इत्यमरश्च--न विन्दीत न विचारयेत्--विद विचारणे इत्यस्मात्

लिङ्—स मन्त्रकल्पः गूढमन्त्रः क्षणेन क्षणमात्रेण भिन्दीत—भिन्द्यात्—कार्यमित्यर्थः—स मन्त्रमल्पः इति पाठे सः अल्पः तुच्छः—नीच इत्यर्थः—वेदभेदे गुप्तवादे मन्त्रः इत्यमरः—भिन्दीतेत्यत्र भिद विदारणे इत्यस्मात् लिङ् ।। ५-३३ ।।

(प्रद्यो-५-३४) **तदेहीति ।** तत् तस्मात् एहि आगच्छ—इणो लोट्—हे आर्य स्वामिन् मुनीनां मन्त्रैः वेदभेदैः पूतैः शुद्धैः वार्भिः अद्भिः—आपः स्त्री भूम्नि वार्वारी इत्यमरः—अभिषिच्यस्व अभिषिक्तो भव—सिञ्चतेः कर्मणि लोट्—मुनीनां मन्त्रिणां च साक्ष्यात् साक्षिभावात् पित्रा दशरथेनैव दत्तं राज्यं भजस्व भजतेर्लोट्—अत्रैव अयोध्यायाम् आसमुद्रं समुद्रानभिव्याप्य क्षितिं भुङ्क्ष्व शाधि—भुनक्तेः लोट्—भुजोऽनवने (१-३-६६) इति रक्षणभिन्नार्थे आत्मनेपदविधानात् (अत्र रक्षणार्थे) परस्मैपदम् ।। ५-३४ ।।

(प्रद्यो-५-३५) **श्रुत्वेति वाचः** इति । श्रुतं अवधृतं धर्मतत्त्वं धर्मरहस्यं येन स तथोक्तः—श्रुतं शास्त्रावधृतयोरिति विश्वः—रामः सत्त्वाधिकस्य सत्त्वेन बलेन अधिकस्य—सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः इति विश्वः—अवरजस्य अनुजस्य—यवीयोऽवरजानुजाः इत्यमरः—इति एवंविधाः वाचः श्रुत्वा विहस्य हसित्वा करेण हस्तेन—चिबुकं अधराधः प्रदेशम्—ओष्ठाधरौ दन्तवासः क्लीबे स्यादस्य चाप्यधः चिबुकं स्यात् इति प्रतापमार्तण्डः—धृत्वा गृहीत्वा सान्त्वं मधुरं वाक्यम्—सान्त्वं स्यान्मधुरं वाक्यमिति वैजयन्ती—तत् पूर्वं प्रधानं यथा भवति तथा सौमित्रि लक्ष्मणम् आभाषत अवदत्—भाषतेः लङ् ।। ५-३५ ।।

(प्रद्यो-५-३६) **तातेति ।** हे तात हे अनुकम्प्य (भ्रातः) मम त्वम् आप्तः हितोऽसि—भक्तः भक्तिमानसि—जगन्ति भुवनानि विपर्यासयितुम् विपर्यस्तानि विपरीतानि कर्तुं शक्तः समर्थः—मद्वाक्यकारी मदाज्ञाकारी मदेकजीवः अहमेव एको जीवः मुख्यः आत्मा यस्य स तथोक्तः त्वदग्रजन्मा भरतश्च भवादृक् भवानिव दृश्यते त्वत्तुल्य इत्यर्थः ।। ५-३६ ।।

(प्रद्यो-५-३७) **तातस्येति ।** वृद्धस्य जरतः तातस्य पितुः—तातस्तु जनकः पितेत्यमरः—गिरं वाक्यं निरस्य तिरस्कृत्य भ्रातुः भरतस्य च राज्यं हृत्वा इह राज्ये तं पितरम् बन्धेन निगलबन्धेन—बन्धस्त्वाधौ च बन्धने इति विश्वः—रुन्धीमहि यदि रुन्धीमहि चेत्—रुधेः लिङ्—तत् तर्हि अस्य पितुः पुत्रकामेष्टेः फलं किम्—न किमपीत्यर्थः—पितुः बन्धनमोक्षाय पुत्रोत्पत्तेः न तु बन्धनायेति भावः ।। ५-३७ ।।

(प्रद्यो-५-३८) **चिरायेति।** चिराय चिरकालात्—विभक्तिप्रतिरूपकम् अव्ययम् —पुत्रान् उपलभ्य प्राप्य तेभ्यः पुत्रेभ्यः जरायां वार्धके पङ्क्तिरथः दशरथः—पङ्क्तिर्विशतीतिसूत्रेण निपातितः—आपदं प्राप इत्येताम् अकीर्तिं कथम् उद्वहाम—अर्कवंश्याः सूर्यवंश्याः वयं पित्रे ताताय कथं द्रुह्याम द्रोहमाचरेम—द्रुहेः लोट् ।। ५-३८ ।।

(प्रद्यो-५-३९) **पितैवेति।** पितैव दैवम् देवता—अतः पितरं भजस्व सेवस्व —पित्रैव स्वजनकेनैव पोष्यस्व पुष्टो भव—(पोषयतेः कर्मणि लोट्)—पित्रे न च ईर्ष्य—क्रुधद्रुहेत्यादिना संप्रदानत्वम्—ईर्ष्या मा कुरु—ईर्ष्यतेः लोट्—पितुः जनकाद् बिभीया भीरुर्भवेः—भीत्रार्थानामिति पितुरपादानत्वम्—ञि भी भये इत्यस्मात् लिङ —पितुः भक्तिमान् एधि भव—अस्तेर्लोट्—हेर्धिः घ्वसोरेद्धाविति सकारस्य एकारः —श्नसोरल्लोपः इति अकारलोपः—पितरि अभीष्टे संतुष्टे सति पितरः पितृदेवताश्च अभीष्टाः संतुष्टाः स्युः—पितरि प्रीतिमापन्ने प्रीताः स्युः सर्वदेवताः इति स्मृतिः —श्लोके अस्मिन् सप्त विभक्तयः सन्तीति चमत्कृतिर्द्रष्टव्या ।। ५-३९ ।।

(प्रद्यो-५-४०) **पितुः स्त्रियः** इति। सर्वाः पितुः स्त्रियः पितृपरिगृहीताः स्त्रियो मातर एव—सर्वे द्वयोः मात्रोरपत्यानि पुमांसः द्वैमातुराः—द्विमातृजाः—मातुरुत्संख्यासम्भद्रपूर्वाया. (८-१-११५) इति उकारः ऋकारस्यादेशः—रपरत्वम् (तस्यापत्यम् इति अण्—वृद्धिश्च) (सर्वे द्वैमातुराः) भ्रातरः एव—तत् तस्मात् केकयी स्वयं साक्षात् मे मातैव—भ्राता भरतो युवाभ्यां भवच्छत्रुघ्नाभ्याम् विशिष्टः अतिशयितः ।। ५-४० ।।

(प्रद्यो-५-४१) **तन्मातरमिति।** तत् तस्मात् मातरं केकयीम् भ्रातरं भरतं च आद्रियस्व संमानय—दृङ आदरे इत्यस्मात् लोट्—स्थिराज्ञस्य दृढाज्ञस्य राज्ञः नृपतेः वाक्यं विधेहि कुरु—चतुर्दशाब्दा इति मानुषसंवत्सराः इति—देवमाने देवतामाने चतुर्दशाहानि चतुर्दश दिनानि—मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवत इत्यमरः—(तानि चतुर्दशाहानि) कि परिमाणमस्येति कियान् अनेहाः कालः—ऋदुशनस्पुरुदंसोऽनेहसां च (७-१-९४) इति अनङादेशः—(उपधादीर्घः—सुलोपो नलोपश्च) ।। ५-४१ ।।

(प्रद्यो-५-४२) **तीर्णप्रतिज्ञे** इति। तीर्णा निस्तीर्णा प्रतिज्ञा येन तस्मिन् तथोक्ते अत एव पूर्णः कामः अभिलाषः यस्य तस्मिन् तथोक्ते मयि वनान्निवृत्ते आगते वसुधाम् उर्वीम् निधत्तम् अर्पयतम्—वसुधोर्वी वसुन्धरेत्यमरः—निपूर्वात् दधातेः लोट्—तावत् तावत्पर्यन्तं गुणाढ्यः भरतः राजा अस्तु—त्वं वीरभोज्यं शूरैः भोक्तव्यम् यौवराज्यं युवराजत्वं भज प्राप्नुहि ।। ५-४२ ।।

(प्रद्यो-५-४३) **मदाज्ञयेति ।** हे लक्ष्मण मदाज्ञया मदादेशात् ज्येष्ठं केकयेयं भरतं तातराज्ये पितृराज्ये प्रतिष्ठापय--स्थापय--तिष्ठतेः ण्यन्तात् लोट्--आर्तं दीनं वृद्धं तातं समाश्वासय--श्वस प्राणने इत्यस्मात् ण्यन्तात् लोट्--भग्नपक्षाम् भग्नः पक्षः स्वजसः यस्यास्तां तथोक्ताम् अम्बां कौसल्यां च संबोधय--बुध अवगमने इत्यस्मात् ण्यन्तात् लोट् ।। ५-४३ ।।

(प्रद्यो-५-४४) **श्वश्रूषु इति ।** इयं मैथिली सीता श्वश्रूषु भर्तृमातृषु सक्ता अनुरक्ता श्वशुरस्य पत्युः पितुः भक्ता भक्तिमती शुश्रूषुः परिचर्यापरा सती--वरिवस्या तु शुश्रूषा परिचर्याप्युपासना इत्यमरः--(शृणोतेः सन्नन्तात् सनाशंस भिक्ष उः इति उप्रत्यय):--इह अयोध्यायाम् आस्ताम् तिष्ठतु--आस उपवेशने इत्यस्मात् लोट् --बालाम् अनाथाम्--प्रोषितभर्तृकाम् मदपायात् मम वियोगात् भीतां सीतां सुमित्रां च समे तुल्ये मनुष्व अवगच्छ--मनोतेः लोट् ।। ५-४४ ।।

(प्रद्यो-५-४५) **श्रुत्वेति ।** सीता इति एवंप्रकारां वाचं श्रुत्वा रोषेण स्फुरितः कम्पितः अधरोष्ठः यस्याः सा तथोक्ता--ओष्ठाधरौ तु रदनच्छदौ दशनवाससी इत्यमरः--नासिकोदरोष्ठेत्यादिना वा ङीष्--पादतलेन पादाधःप्रदेशेन भुवः तलं भूतलम्--अधः स्वरूपयोरस्त्री तलम् इत्यमरः--हत्वा ताडयित्वा--साश्रुः सबाष्पा --सकम्पा रुदती रोदनं कुर्वती--हसन्ती स्मयमाना--सगद्गदं गद्गदसहितं यथा भवति तथा रामम् उवाच ।। ५--४५ ।।

(प्रद्यो-५-४६) **मैवमिति ।** हे राम गुणी गुणवान् श्रुतः प्रख्यातः--त्वम् एवं मा भणीः मा वोचः--भण शब्दे इत्यस्मात् लुङ्--माङ--न माङ्योगे इत्यडभावः-- अतो हलादेर्लघोरिति विकल्पाद् वृद्ध्यभावः--फणी सर्प इव मुखेन वक्त्रेण--विषं गरलं मा मुञ्च--मा त्यज--मां लक्ष्मणं च तिष्ठतम् आसाताम्--तिष्ठतेः लोट् द्विवचनम्-- इति वक्तुम् ते तव जिह्वा रसना--रसज्ञा रसना जिह्वेत्यमरः--कथं वा न जिह्रेति न लज्जते--ह्री लज्जायाम् इत्यस्मात् लट्--अहो आश्चर्यम् ।। ५-४६ ।।

(प्रद्यो-५-४७) **तुभ्यमिति ।** सीरकेतुः सीरध्वजः जनकः भवचापभङ्क्त्रे हरचापभञ्जकाय तुभ्यं मां ददत् ददानः--नाभ्यस्ताच्छतुरिति नुमभावः--बालाम् अनाथाम् सीतां देव्रे देवराय--स्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ इत्यमरः-- समर्प्य दत्त्वा जटी जटावांश्च वनं व्रजेति आभाषत किम् अवोचत किम्--भाषतेः लुङ् ।। ५-४७ ।।

(प्रद्यो-५-४८) **रामायणानीति।** इह लोके पुरातनानि रामायणानि पुरातनेभ्यः चिरंतनेभ्यः बहुभिर्विधाभिः बहुधा—संख्याया विधार्थे धाल्—श्रुतानि—क्वापि कुत्रापि रामः वैदेहसुतया विना विहीनः वनं गतः इति मे मम न—श्रुतम्—मया न श्रुतमित्यर्थः —संबन्धसामान्यविवक्षायां षष्ठी ।। ५-४८ ।।

(प्रद्यो-५-४९) **राम इति।** रामः लक्ष्मणं विना—पृथग्विनेत्यादिना द्वितीया —एक एव वनं चचारेति वचोऽपि दूरे—वचनमपि नास्तीत्यर्थः—अत्र अयोध्यायाम् मां सौमित्रिं लक्ष्मणं च उभौ जिहासन् हातुमिच्छन्—जहातेः सन्नन्तात् लटः शत्रादेशः —एकः असहायः शून्यं निर्जनम् अरण्यम् जिहाससे जिगमिषसि—ओ हाङ गतावित्यस्मात् सन्नन्तात् लट्—(अयमात्मनेपदी—पूर्वस्तु परस्मैपदी) ।। ५-४९ ।।

(प्रद्यो-५-५०) **अहं चेति।** स्नेह एव बन्धो स्नेहबन्धः—स्नेहबन्धेन सह वर्तेते इति सस्नेहबन्धौ—तेन सहेति तुल्ययोगे इति बहुव्रीहिः—त्वदाप्तौ तव आप्तौ—मूर्तिमन्तौ शरीरवन्तौ विद्याविवेकाविव स्थितौ—अहं च सौमित्रिरपि पूर्णचन्द्रं प्रभाप्रसादाविव कान्तिप्रसन्नताविव—प्रसादस्तु प्रसन्नतेत्यमरः—त्वां भवन्तं न हि जहिवः नैव त्यजावः ।। ५-५० ।।

(प्रद्यो-५-५१) **मामिति।** हे राघव वनाय गन्तु वनं गन्तुम्—गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ (२-३-१२) इति चतुर्थी—मां नानुजानासि—नानुमन्यसे—एष जीवः जीवात्मा नाथं पतिं त्वाम् अन्वेष्यति अनुगमिष्यति—इणो लृट्—तथा हि विषेण यद्वा विषप्राशनेन वा अनशनेन यद्वा प्रायोपवेशेन वा अथ रज्ज्वा वा गलबन्धनेन वा वर्ष्म देहम्—वर्ष्म देहप्रमाणयोः इत्यमरः—जह्याम् त्यजेयम्—जहातेः लिङ ।। ५-५१ ।।

(प्रद्यो-५-५२) **याते इति।** इतः अयोध्यायाः त्वयि याते सति वनं गते सति —श्वशुरः दशरथः म्रियेत मरणमियात्—म्रियतेर्लिङ—अद्य श्वश्रूः कौसल्या मृता मृतेव—इयमहं मुमूर्षुः मर्तुमिच्छुः—मरिष्याम्येवेत्यर्थः—लक्ष्मणः अयोध्यायाम् अध्ययोध्यम्—विभक्त्यर्थे अव्ययीभावः—न स्थास्यति—तिष्ठतेः लृट्—कैकयेयः भरतः—स्त्रीभ्यो ढक्—क्वचित् क्वापि वनं यास्यति गमिष्यति—यातेः लृट् ।। ५-५२ ।।

(प्रद्यो-५-५३) **इत्थमिति।** इत्थम् उक्तप्रकारेण कुले नश्यति विनश्यति सति—पश्यतः अवेक्षमाणस्य ते तव अन्तःकरणे मनसि का प्रीतिः भवित्री—न कापीत्यर्थः—जनने कुले—सन्ततिर्गोत्रजननकुलानीत्यमरः—विच्छिन्नतन्तौ विच्छिन्नपारम्पर्ये सति त्वमेव रघूणां पिण्डोदकदायकः पिण्डोदक[8] विच्छेदकः स्याः—अस्तेर्लिङ ।। ५-५३ ।।

(प्रद्यो-५-५४) **अहं कलत्रमिति।** अहं ते सुखदुःखयोः मित्रं सुहृत् कलत्रम्—भार्या—कलत्रं श्रोणिभार्ययोरित्यमरः—लक्ष्मणः आपदि विपदि संरक्षकः रक्षिता—आवामुभौ मां च लक्ष्मणं च—त्यदादीनामित्येकशेषः—अटवीम् अरण्यम् नयेथाश्चेत् प्रापयेत् यदि—नयतेर्लिङ् (तर्हि) नः त्रयाणाम् इदं सर्वं कार्यं समञ्जसं—साधु भवेत् ।। ५-५४ ।।

(प्रद्यो-५-५५) **उभाविति।** हे राघव युवानौ तरुणौ—वयस्यस्तरुणो युवेत्यमरः—दिव्यास्त्रधरौ दिव्यास्त्रधारिणौ रक्षांसि हतः इति रक्षोहणौ—उभौ युवां मां रक्षतं पालयतम्—रक्षतेर्लोट् द्विवचनम्—आजौ समिति—समित्याजिसमिद्युद्धमित्यमरः—मारीचमुख्यान् मारीचप्रभृतीन् अवधिष्टम्—हन्तेः लुङि द्विवचनम्—अरण्ये हिंस्राः हिंसकाः मृगाः तेभ्यः मारीचादिभ्योऽपि तीव्राः क्रूराः किम्—न तीव्रा इत्यर्थः ।। ५-५५ ।।

(प्रद्यो-५-५६) हे रामभद्र भवन्तं विना मम शृङ्गारशय्यापि अङ्गारशय्या स्यात्—त्वया सह चेत् अङ्गारशय्यापि कुसुमास्तृता पुष्पैर्विरचिता शृङ्गारशय्या स्यात् ।। ५-५६ ।।

(प्रद्यो-५-५७) **मूलमिति।** मम मे मूलं फलं वा दिव्यमन्नम्—अमृतान्नम्—भूमिः शिला वा दृषद् वा मृदुतूलशय्या[9]—सुकुमारकार्पासशयनम्—(धाराः कार्पासतूलाः स्युः इति वैजयन्ती) वृक्षस्य मूलम् (अपि) मणिसौधस्य शाला—उपरिभागः—शाला गृहे तरुस्कन्धे शाखागारैकदेशयोः इति विश्वः—विभाषा सेनासुरेत्यादिना नपुंसकता—तव साह्यं सहभावः मे मम स्वर्गसुखात् सुखं सुखकरम्—सुखहेतौ सुखे सुखमिति शब्दार्णवे—रम्यम् अरम्यं वा यत् ते प्रियं तदेव मे प्रियतमम् इत्यर्थः ।। ५-५७ ।।

(प्रद्यो-५-५८) **तद्रामेति।** हे राम तत् तस्मात् भद्रासनवाञ्छया नृपासनस्थितिवाञ्छया अलम्—तत्साध्याभावाद् आशा न कर्तव्येत्यर्थः—गम्यमानक्रियापेक्षया करणत्वात् तृतीया—निर्याहि निर्गच्छ—तावत् निजसद्म स्वगृहं याम—गच्छामः—तत्र गृहे स्थितं समस्तम् अखिलं वस्तु धनं च रत्नांशुकादि धनं च पात्रे सत्पात्रे—अधिकरणत्वविवक्षया सप्तमी—प्रदाय स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनपर्यन्तं दत्त्वा दावं वनं प्रविशाम—वने च वनवह्नौ च दवो दाव इवेष्यते—इति शाश्वतः—प्रविशाम इति विशतेर्लोट् ।। ५-५८ ।।

(प्रद्यो-५-५९) **बालेति** । बाला अप्रगल्भा उपचारवाचः चाटूक्तीः न जानामि —ते तव पुरतः यथार्थं सत्यमेव अभणिषम् अवादिषम्—भण शब्दे इत्यस्मात् लुङ— अतो हलादेर्लघोः (७-२-७) इति विकल्पाद् वृद्ध्यभावः—ते तुभ्यं यद् रोचते प्रियं भवति तद् विचार्य आलोच्य कुरु—तावत् (आदौ) तावकीनाम् त्वत्संबन्धिनीम् प्रसूं मातरं बोधय आश्वसय ।। ५-५९ ।।

(प्रद्यो-५-६०) **श्रुत्वेति** । स रामः इति एवं श्रुत्वा—मन्दं विहस्य—सीतागिरं वैदेहीवाक्यम् तथेति ओमकारार्थात् अङ्गीचकार—करोतेः लुङ—(ओमित्यव्ययमङ्गीकारार्थे)—मूर्छागताम् मोहं प्राप्ताम्—द्वितीया श्रितेत्यादिना द्वितीयासमासः—अम्बां साश्रुः सबाष्पः—गद्गदेन हीनस्वरेण रुद्धः कण्ठः कण्ठस्वरो यस्य स तथोक्तः सन् संबोधयन् सन् अवोचत् अवदत् ।। ५-६० ।।

(प्रद्यो-५-६१) **समाश्वसिहीति** । हे अम्ब मातः—अम्बार्थनद्योः इति ह्रस्वः— समाश्वसिहि उच्छ्वसिहि—श्वसतेः लोट्—दश चतस्रोऽपि—चतुर्दश इत्यर्थः—समाः शरदः—संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः इत्यमरः—मां तनूजं पुत्रं न जानीहि नावगच्छ—अनुजेन अवरजेन लक्ष्मणेन सह अहं कान्तारतः वनात्—पञ्चम्यास्तसिल्—कान्तारमुपसर्गादौ वने दुर्गमवर्त्मनि—इति विश्वः—प्राप्य—अयोध्यमिति शेषः—कान्तायां सीताया रतः अनुरक्तः राज्यं करवाणि ।। ५-६१ ।।

(प्रद्यो-५-६२) **तावदिति** । हे अम्ब हे मातः सुमित्रया सहिता सती त्वम् तावत् तावत्पर्यन्तं कथंचित कथमपि वृद्धम् आर्तं दीनं तातं पितरं समाश्वासय उपलालय —हे अम्ब मत्तः मत्—पञ्चम्यास्तसिल्—असौ भरतः तव अतिभक्तः अत्यन्तं भक्तिमान्—श्रिया राज्यलक्ष्म्या मत्तः गर्वितः त्वां नावमनिष्यते न तिरस्करिष्यति— अवपूर्वात् मनुतेः लृट् ।। ५-६२ ।।

(प्रद्यो-५-६३) **साकर्ण्येति** । सा कौसल्या आत्मजस्य सूनोः कर्णयोरमृतं कर्णामृत वाक्यं सरोमाञ्चं सरोमोद्गमम् आकर्ण्य श्रुत्वा—अपास्तमूर्छा तिरस्कृतमूर्छामोहा— उन्मीलिताक्षी उन्मिषन्नेत्रा—षिद्गौरादिभ्यश्च इति ङीष्—जागरणारुणाक्षं निद्राभावेन ताम्राक्षं पुत्रं परिरभ्य आलिङ्ग्य जगाद उवाच ।। ५-६३ ।।

(प्रद्यो-५-६४) **हा वत्सेति** । हा वत्स पुत्रक मां त्यक्ष्यसि त्यजसि—त्यजतेः लृट्—ते तव नोचितम् न युक्तम्—हा राम विषादः शोकः हृदयं भिन्ते भिनत्ति— भिन्तेः लट् आत्मनेपदी—वृद्धस्य तव पितुः जनकस्य अन्ये त्रयः पुत्राः सन्ति—विद्यन्ते

—मम (तु) त्वदृते त्वां विना—अन्यारादिति पञ्चमी—अन्यः को वा—न कश्चिदस्तीत्यर्थः ।। ५-६४ ।।

(प्रद्यो-५-६५) **आराध्येति ।** वैभाण्डकिम् विभाण्डकपुत्रम्—अत इञ् इति इञ् प्रत्ययः—ऋश्यशृङ्गम् आराध्य संपूज्य—पुरुषोत्तमः पुरुषश्रेष्ठः—तस्य संबुद्धिः हे पुरुषोत्तम—तत्र सप्तमीसमासः—न निर्धारणे इति षष्ठीसमासनिषेधात्—कर्मधारये तु सन्महदिति सूत्रेण उत्तमपुरुष इति स्यात्—त्वां पुत्रं प्रासोषि प्रसूतास्मि—सूतेः लुङ—स्वरतीत्यादिना विकल्पाद् इडभावः—त्वयि वनं प्रयाते गतवति सति वृद्धयोर्नो आवयोः दुःखेनाप्यते इति दुरापस्तम् निवापं पितृदानम्—पितृदानं निवापः स्यादित्यमरः—को वा कुरुते—न कोऽपीत्यर्थः ।। ५-६५ ।।

(प्रद्यो-५-६६) **हा रामेति ।** हा राम हा वत्स इति कं पुत्रम् आह्वयेयम् आकारयेयम्—ह्वयतेः लिङ—कः सुतः मां हे अम्ब इति आह्वास्यति आकारयिष्यति—ह्वयतेः लृट्—हे तातेत्यनुकम्प्य—तातेत्यनुकम्प्ये जनके च इति विश्वः—त्वयि गेहात् निर्याति गतवति सति मे मम देहात् शरीरात् असवः प्राणाः—पुंसि भूम्न्यसवः प्राणाः इत्यमरः—पुरा निर्यान्ति निर्यास्यन्ति—यावत्पुरानिपातयोः इति पुराशब्दयोगे भविष्यदर्थे लट् ।। ५-६६ ।।

(प्रद्यो-५-६७) **नाजायथा इति ।** क्वापि कुत्रापि नरेन्द्रगेहे राजभवने न अजायथाः न जातोऽसि—अन्यथा—यदि जातः स्याः—तर्हि राजा यथा राजवत् स्वगेहे स्वभवने एव वसेः तिष्ठेः—वसतेः लिङ—अथवा केकयी नरनाथजाया राजभार्या न चेत् तर्हि वृद्धौ पितरौ आशु शीघ्रं न जह्याः न त्यजेः—जहातेः लिङ ।। ५-६७ ।।

(प्रद्यो-५-६८) **मूलमिति ।** तरुजं वृक्षोत्पन्नम्—सप्तम्यां जनेर्डः इति डप्रत्ययः—मूलं फलं वा तव भवतः अन्धः अन्नम्—भिस्सा स्त्री भक्तम् अन्धोऽन्नम् इत्यमरः—पानाय नानाविधं गिरिनिर्झराणाम् अम्भः जलम्—प्रवाहो निर्झरो झरः इत्यमरः—दूर्वाशबला दूर्वाकर्बुरा भूर्वा भूमिरेव शयनं शय्या—हे राम ममोदरं जठरं कथं न दग्धम्—दग्धं कथं न भवति ।। ५-६८ ।।

(प्रद्यो-५-६९) **चीनाम्बरमिति ।** हे वत्स पुत्रक चीनाम्बरम् पट्टांशुकविशेषं—चीनो मृगान्तरे व्रीहिदेशांशुकान्तरे इति विश्वः—चित्रपटान् चित्रवस्त्राणि च हित्वा त्यक्त्वा चीराम्बरं वल्कलवसनं कथं वसीथाः—(स्वःकुसुमप्रमोदैः श्रेष्ठकुसुमगन्धैः) सुगन्धिना सुरभिणा—गन्धस्येदित्यादिना इकारादेशः समासान्तः—यद्यपि नैसर्गिकगन्धविषये एवायम् विहितः—तथापि निरङ्कुशाः[10] कवयः—यथा माघकाव्ये वक्रुरयुक्-

छदगन्धसुगन्धयः (६-५०) इति—नैषधे च स्वादुः सुगन्धिः स्वदते तुषारा (३-९३) इति—न कर्मधारयात् मत्वर्थीय इति निषेधात् न इनिप्रत्ययः शक्यः—हे मुग्ध रम्य—मुग्धः सुन्दरमूढयोः इति विश्वः—सुरभिणा मूर्ध्ना तव शिरसा जटाः कथं दधीथाः दध्याः ॥ ५-६९ ॥

(प्रद्यो-५-७०) **त्वं तालेति ।** हे तात तालवृन्तस्य व्यजनस्य अनिलस्य वायोः वीजनार्हः वीजनयोग्यः—व्यजनं तालवृन्तकम् इत्यमरः—त्वं हिन्तालानां तालविशेषाणां वनानाम् अन्तरेषु अवकाशेषु—अन्तरमवकाशावधीत्यादिरमरः—शीतासु शीतलासु शिलासु झञ्झानिलेन सवृष्टिकवायुना—झञ्झावायुः सवृष्टिकः इति प्रतापमार्तण्डः—वीज्यमानः सीतया सहितः कथं शयीथाः—शीङो लिङ् ॥ ५-७० ॥

(प्रद्यो-५-७१) **वृद्धा इति ।** वृद्धाः स्थविराः यूनः तरुणान्—वयस्यस्तरुणो युवेत्यमरः—स्वसूनून् स्वपुत्रान् राज्ये अभिषिच्य वनम् आश्रयन्ते—हे राघव जराविहीनः युवा सन् जरता वृद्धानां रघूणां पथा मार्गेण कथं संचरेथाः (तत्र) कथं संचरेः—समस्तृतीयायुक्तात् इत्यात्मनेपदम् ॥ ५-७१ ॥

(प्रद्यो-५-७२) **भवदिति ।** हे कुमार बालक—कुमारो बालके स्कन्धे युवराजे इति विश्वः—भवद्वियोगं त्वद्विश्लेषं न सहे (सोढुं न शक्नोमि)—न मृष्ये—यानि अरण्यानि त्वं (स्वसंचारेण) पुनासि तानि पुण्यानि पवित्राणि—तत्रैव तान्यरण्यानि मां नेतुं प्रापयितुम् अर्हसि—हे वत्स त्वत्सनिधौ भवत्समीपे मम वास्तु निवासः अस्तु—वेश्म भूर्वास्तुरस्त्रियामित्यमरः—अस्तेर्लोट् ॥ ५-८२ ॥

(प्रद्यो-५-७३) **वात्सल्यत इति ।** हे वत्स पुत्रक वात्सल्यतः वात्सल्यात् इत्थम् एवं वदेयं ब्रूयाम्—वदतेर्लिङ्—राजावरोधस्य राजान्तःपुरयोषित.—अवरोधशब्दः अवरोधाङ्गनास्वपि वर्तते—यथाह कालिदासः—यस्यावरोधस्तनचन्दनानाम् (६-४८ रघुवंशे) इति—राज्ञि दशरथे स्थिरा. दृढाः असवः प्राणाः यस्य तस्मिन् तथोक्ते—जीवतीत्यर्थः—यदि वा परागताः असवः यस्य तस्मिन् तथोक्ते—मृतेऽपीत्यर्थः—अन्यत्र यानं स्वगृहादन्यत्र गमनं तदसंनिधानं स्वगृहे तस्य भर्तुः समीपे अनवस्थानं च न संभवेताम् न युज्येयाताम् इत्यर्थः—भवतेः लिङि द्विवचनम् ॥ ५-७३ ॥

(प्रद्यो-५-७४) **तद् याहीति ।** तत् तस्मात् दावं वनम्—दवदावौ वनारण्यवह्नी इत्यमरः—याहि गच्छ—तरुणी युवतिः हृद्या हृदयस्य प्रिया—हृदयस्य प्रियः (४-४-९५) इति यत्प्रत्ययः—सपत्नी सा कैकेयी राज्ञा दशरथेनापि अविलङ्घिताज्ञा

अनतिक्रान्तशासना हि—हे राम कार्यहीने राजनि भूपे कामातुरे स्त्रिया सक्ते सति धर्मार्थयोः का गतिरस्ति—न कापीत्यर्थः ।। ५-७४ ।।

(प्रद्यो-५-७५) **अद्राविति ।** अद्रौ पर्वते—वनद्रौ वनवृक्षे यथा प्रमादः न भवति तथा अप्रमत्तौ अवहितौ युवां तिष्ठतम् तिष्ठेताम्—तिष्ठतेः लोटि द्विवचनम्—हे वत्स वने अरण्ये उत्सुका उत्कण्ठावती सीता भवत्समीपं त्वदन्तिकम् उत्सृज्य इतरत्र मा वात्सीत्—वस निवासे इत्यस्मात् लुङि रूपम्—न माङ्योगे इति अडभावः ।। ५-७५ ।।

(प्रद्यो-५-७६) **सौमित्रिरिति ।** सधनुः धन्वी सौमित्रिः अग्रे पुरतः प्रयातु गच्छतु—वां भवतोः मध्ये—युष्मदस्मदित्यादिना युवयोरित्यस्य वाम् इत्यादेशः विकल्पेन —मैथिलराजपुत्री सीता प्रयातु—धन्वी धनुष्मान् भवान् पुरतः अग्रे पृथ्वीतनूजां निधाय पृष्ठतः पश्चात् भवन् तौ सीतालक्ष्मणौ अवतु रक्षतु ।। ५-७६ ।।

(प्रद्यो-५-७७) **त्वमेवेति ।** हे राघव त्वमेव राजपुत्री सीतां शय्यासनभोजनाद्यैः —आदिशब्देन वाहनादिकम्—अन्तिके समीपे रक्ष पालय—असौ लक्ष्मणः अधिज्य-धन्वा अधिज्यं धनुः यस्य स तथोक्तः अनतिदूरवर्ती आसन्नवर्ती सन् युवां सीतारामौ उभौ रक्षतु ।। ५-७७ ।।

(प्रद्यो-५-७८) हे वत्सौ पुत्रकौ उत्साम्बु प्रस्रवणाम्बु—उत्सः प्रस्रवणं वारि इत्यमरः—भूयः भूरितरं न पिबतं न पिबेताम्—पिबतेः लोटि द्विवचनम्—अपक्वं कन्दफलादि—आदिशब्देन पर्णादिः गृह्यते—न खादतं न भक्षयतम्—गुल्मानि तृणस्तम्बान् वल्मीकवपाश्च वल्मीकरन्ध्राणि च—वामलूरुश्च नाकुश्च वल्मीकं पुंनपुंसकम् इति—रन्ध्रं श्वभ्रं वपा शुषिः इति चामरः—हित्वा परिहृत्य अद्रौ गिरौ पर्णशय्यायाम् अधिपर्णशय्यम्—विभक्त्यर्थे अव्ययीभावः—निद्रातम् स्वपितम्—(निपूर्वाद् द्रातेः) लोटि द्विवचनम् ।। ५-७८ ।।

(प्रद्यो-५-७९) शार्दूलसंघैः व्याघ्रगणैः शरभैः अष्टपदमृगैश्च सिंहैः मृगेन्द्रैः—लुलायाः महिषाः—लुलायो महिष इत्यमरः—भल्लूकाः ऋक्षाश्च—ते एव मुखम् आदिः येषां ते तथोक्तैः—पुंस्यादिराद्यः पौरस्त्यमुखप्रथमादिमाः इति प्रतापमार्ताण्डः —मृगौघैः मृगसंघैः—भारुण्डाः मृगविशेषाः—भेरुण्डाः पक्षिविशेषाः—भेरुण्डा देवताभेदे पक्षिभेदे च भीषणे इति विश्वः—सगण्डकान् खड्गमृगसहितान्—गण्डके खड्गखड्गिनावित्यमरः—भीमान् भयंकरान् दण्डकभूमिभागान् दण्डकारण्यप्रदेशान् हित्वा निद्रातमिति पूर्वेणान्वयः ।। ५-७९ ।।

(प्रद्यो-५-८०) **सरंसह इति ।** हे राघव सरंहसः सवेगान् सिंहसंघान् भल्लेषुणा स्नुहीपत्राकारेण इषुणा—स्नुहीदलफलो भल्लः इति यादवः—संहर जहि—भल्लूकम् ऋक्षम् उल्लुनीहि छिन्धि—लुलायबृन्दानि महिषसंघान् बाणैः शरैः लुनीष्व—दूनानपि दुःखितानपि दुष्टसत्त्वान् दुष्टजन्तून् धुनीष्व निराकुरुष्व ।। ५-८० ।।

(प्रद्यो-५-८१) **मा संचर इति ।** अहार्याणां पर्वतानाम्—अहार्यधरपर्वताः इत्यमरः—स्नुषु मानुषु—स्नुः प्रस्थः सानुरस्त्रियामित्यमरः—वस्नोः भीरोः—अधीरे कातरवस्नुभीरुकभीलुकाः इत्यमरः—नः अस्माकं स्नुषायाः वध्वाः—समा स्नुषा-जनीवध्वः इत्यमरः—संचरः संचारः मा भूत्—वासः निवासस्थानमपि मास्तु—हे वत्स स्थिरायुः दीर्घायुः भूयाः—आशीर्लिङ्—भुवनं लोकं प्रशाधि पाहि—प्रयाहि गच्छ—इति एवं तं रामम् (उक्त्वा) उत्ससर्ज विसृष्टवती ।। ५-८१ ।।

(प्रद्यो-५-८२) **तथोपदिष्ट** इति । रामस्तया मात्रा कौसल्यया तथा उपदिष्टः विसृष्टश्च सीताभमेतः लक्ष्मणेन सह मनोरथेनेव स्थितेन रथेन स्वधाम निजभवनं द्रुतं शीघ्रम् आजगाम प्राप ।। ५-८२ ।।

(प्रद्यो-५-८३) **तत्रापीति ।** तत्रापि गेहेऽपि सौमित्रिसीतयोः सखा सौमित्रि सीतासखः—राजाहःसखिभ्यष्टच् इति टच् प्रत्ययः—राघवो रामः राशीकृतं संघीकृतं सकलं समस्तं रायम् अर्थम्—अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इत्यमरः—धेनवश्च अनड्वाहश्च धेन्वनडुहम्—अचतुरविचतुरेत्यादिना (५-४-७७) निपातितः—दासीः चेटीः—तथा अजाविकम् जीवधनं च द्विजमात् द्विजाधीनम्—देये त्रा च (५-४-५५) इति चकारात् मातिप्रत्ययः—विधाय कृत्वा—अर्थिभ्यः याचकेभ्यः इष्टं वस्तु अनति-क्रम्य यथेष्टवस्तु अस्तोकम् अधिकं वितरन् ददन् विस्मयमानया गतया जनतया जन-बृन्देन—ग्रामजनेत्यादिना समूहार्थे तल्—(सः रामः) त्यागी इति अस्तूयत—स्तौतेः कर्मणि लङ्—शार्दूलविक्रीडितं वृत्तम्—सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलवि-क्रीडितम् इति लक्षणात् ।। ५-८३ ।।

(प्रद्यो-५-८४) **आरुन्धतेयमिति ।** आरुन्धतेयम् अरुन्धतीपुत्रम् वसिष्ठसूनुं वसिष्ठापत्यं सुयज्ञ सुयज्ञनामानम् ऋषिम् अभ्यर्च्य—संपूज्य सत्कृत्येत्यर्थः—हेमासनैः कनकपीठैः हेममयैः स्वर्णमयैः मञ्चैः शयनैः—शयनं मञ्चपर्यङ्केत्यादिरमरः—पात्रैः जलादिभाजनैः—पात्रामत्रं च भाजनम् इत्यमरः—अमत्रैः भोजनपात्रैश्च घटैः कलशैः कटाहैः तैलादिपाकभाजनैः—कटाहो घृततैलादिपात्रे च खर्परे इति विश्वः—एतैः सहिताः स्वभूषाः स्वभूषणानि ददौ दत्तवान् ।। ५-८४ ।।

(प्रद्यो-५-८५) **उद्घाट्येति ।** प्रमदेन हर्षेण विकस्वरे विकसिते आयते दीर्घे अक्षिणी यस्याः सा प्रमदविकस्वरायताक्षी वैदेही सीता जनकगृहाद् आनीताः आहृताः अनर्घ्यरत्नाः अनर्घ्याणि अमूल्यानि रत्नानि यासु ताः तथोक्ताः रत्नपेटीः रत्नमञ्जूषाः स्वयं स्वयमेव उपनीय आनीय उद्घाट्य व्यादाय स्वाकल्पान् स्वभूषणानि सुयज्ञधर्मपत्न्यै अदित दत्तवती—प्रहर्षिणी वृत्तम्—(म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् इति लक्षणम्)—अदितेत्यत्र ददातेर्लुङ् ॥ ५-८५ ॥

(प्रद्यो-५-८६) **चूडारत्नमिति ।** मैथिली वैदेही मङ्गलार्थम् सौभाग्यार्थम्—मण्डनार्थमिति पाठे अलंकारार्थमिति ज्ञेयम्—शिरसि चूडारत्नं चूडामणिम्—चूडामणिश्शिरोरत्नमित्यमरः—दधती दधाना सर्वाङ्गानि व्याप्नुवन्ति सर्वाङ्गीणानि आभरणानि वसनानि वस्त्राणि च यस्याः सा तथोक्ता पुनः वस्त्रयुग्मं गृहीत्वा मधुभिदः श्रीपुरुषोत्तमस्य—संनिधौ साक्षात् प्रत्यक्षम्—साक्षात् प्रत्यक्षतुल्ययोरित्यमरः—लक्ष्मीरिव तस्य रामस्य संनिधौ तिष्ठन्ती स्थिता वल्गु मनोज्ञं वाक्यं यस्याः सा वल्गुवाक्या—मनोज्ञे तु वल्गु इति विश्वः—वल्लभं प्राणनाथम्—जीवेशः प्राणनाथश्च कान्तो रमणवल्लभौ इति प्रतापमार्तण्डः—द्रुतं शीघ्रम् उत्तिष्ठेति अभिदधे बभाषे—अभिपूर्वात् दधातेः लिट्—मन्दाक्रान्ता वृत्तम्—मन्दक्रान्ता जलधिषडगैर्म्भौनताद् गुरू चेत् इति लक्षणम् ॥ ५-८६ ॥

(प्रद्यो-५-८७) **निरदिक्षदिति ।** जननाथनन्दनः रामः कुलागतान् कतिचित् कतिपयान् कञ्चुकिनः सौविदल्लान्—सौविदल्लाः कञ्चुकिनः इत्यमरः—अगाररक्षिणः गृहपालकान् निरदिक्षत् निर्दिष्टवान्—गृहरक्षणे नियुक्तवानित्यर्थः—दिशतेः लुङ्—शल इगुपधादित्यादिना क्सः प्रत्ययः—जरतीः वृद्धाः चेटिकाः दासीश्च गृहसंस्कारकरीः मन्दिरसंमार्जनादिकर्मकर्त्रीः निरदिक्षत् निर्दिष्टवान्—नियुक्तवानित्यर्थः—वैतालीयं वृत्तम् ॥ ५-८७ ॥

(प्रद्यो-५-८८) **इयदन्तर एवेति ।** इयदन्तरे एव एतस्मिन्नवसरे एव साग्रहा अभिनिवेशवती केकयी प्रतिघेन क्रोधेन—कोपक्रोधामर्षरोषप्रतिघा रूट्क्रुधौ इत्यमरः—तरुवल्कलधरं वल्कलवसनधारिणम् रघूद्वहं रामं त्वरितं जवेन निर्गमय—निष्कासय इति मन्थरां प्रजिघाय प्रहितवती—हिनोतेः लिट्—वैतालीयं वृत्तम् ॥ ५-८८ ॥

(प्रद्यो-५-८९) **केकयीति ।** केकय्या कैकेय्या प्रहिते प्रेषिते चीवराम्बरे यस्य स तथोक्तः रघुराजनन्दनः रामः लक्ष्मणं वल्कले चीवरे परिधाप्य आच्छाद्य हसन् आयुधानि असिप्रभृतीनि उपनय आनयेति आदिदेश आदिष्टवान्—रथोद्धता वृत्तम्—(रान्नराविह रथोद्धता लगौ इति लक्षणम्) ॥ ५-८९ ॥

(प्रद्यो-५-९०) **लक्ष्मणोऽपीति।** सिंहस्य विक्रम इव विक्रमः पराक्रमो यस्य स तथोक्तः लक्ष्मणोऽपि कोशेन पिधानेन गुप्तं छन्नम् असियुग्मं खड्गयुग्मम् धन्वनी धनुषी —धनुश्चापो धन्वेत्यमरः—शरधी शराः बाणाः अनयोर्धीयन्ते इति शरधी इषुधी—चर्मणी फलके—फलकोऽस्त्री फलं चर्मेत्यमरः—रत्नानि भर्माणि तपनीयानि च भृतानि याभ्यां ते भृतरत्नभर्मणी वर्मणी दंशने च—तनुत्रं वर्म दंशनम् इत्यमरः—लघु शीघ्रम् —लघु क्षिप्रमरं द्रुतमित्यमरः—आनयत् आहरत्—नयतेर्लङ्—रथोद्धता वृत्तम् ॥ ५-९० ॥

(प्रद्यो-५-९१) **पद्भ्यामिति।** पुरः पुर्याः पद्भ्यां पादाभ्यां निर्जिगमिषता निर्गन्तुमिच्छतां त्रयाणां सीतारामलक्ष्मणानाम् आभागीरथि भागीरथीपर्यन्तम् रथसारथिर्भवेति नरपतिना दशरथेन आदिष्टः आज्ञप्तः रथाधिरोही रथाधिरोहकः सुमन्त्रः वैदेहीरमणं सीतावल्लभम् अतत्वरत् त्वरयामास—त्वरतेः ण्यन्तात् लुङ्—प्रहर्षिणी वृत्तम ॥ ५-९१ ॥

(प्रद्यो-५-९२) **राम प्रयाणेति।** रामप्रयाणसमये रघुपतिप्रस्थानकाले रघुराजधान्याम् अयोध्यायाम् जनौघः जनसंघः प्राणानां पञ्चवायूनां प्रयाणं निर्गमः—तस्य समयः मरणकालः—तस्य अभिमुखः सन् रामेति राजतनयेति रघूद्वहेति मुहुर्मुहुः क्रोशन् रुदन् अमन्दशोकः—असह्यशोकः इति पाठे असहनीयशोक इत्यर्थः—तादृशः सन् अमुह्यत् मुमोह—मुह्यतेः लङ्—वसन्ततिलका वृत्तम् (उक्ता वसन्ततिलका तभजा जगौ गः इति लक्षणम्) ॥ ५-९२ ॥

(प्रद्यो-५-९३) **लक्ष्मीनारायणाभ्यामिति।** लक्ष्मीनारायणाभ्याम् रमापुरुषोत्तमाभ्याम् नमः नमस्कारः इति वदति—नमस्स्वस्तीत्यादिना चतुर्थी—शिरसि न्यस्त हस्तारविन्दे हस्तपद्मे येन तस्मिन्—इन्दुमौलेः चन्द्रमौलेः ईश्वरस्य वन्दारौ अभिवादके—वन्दारुरभिवादके इत्यमरः—शृवन्द्योरारुः (३-२-१५३) इति आरुप्रत्ययः—दशरथचरणयोः ध्यानेन शुद्धान्तरङ्गः शुद्धचित्तः—तस्मिन् रामे रघुनाथे वामेतरांघ्रिं दक्षिणपादं निदधति न्यस्यति सति सशोकः दुःखसहितः राजलोकः आलोकं दृष्टिम्—आलोको दर्शनोद्योतौ इत्यमरः—न अलभत न प्राप—जीवलोकः प्राणिलोकोऽपि आलोकं नालभत—देवलोकः केवलं देवलोक एव देवतासंघ एव मुमुदे जहर्ष—स्रग्धरा वृत्तम् (म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् इति लक्षणम्) ॥५-९३॥

(प्रद्यो-५-९४) **बाष्पेति।** नरलोके मर्त्यलोके बाष्पवर्षम् अश्रुवृष्टिः अपतत्—पततेः लङ्—सुरलोके स्वर्गे पुष्पवर्षम् अगलत्—गलतेः लङ्—शोके दुःखे सति

बन्धुभिः मुखं वक्त्रम् अताड्यत अहन्यत—तड आघाते इत्यस्मात् (चौरादिकात्) कर्मणि लङ् ।। नाके स्वर्गे दुन्दुभिः भेरी मुहुः अताड्यत । कर्मणिलङ । स्वागता वृत्तम् —(स्वागतेति रनभाद् गुरुयुग्मम् इति लक्षणम्) ।। ५-९४ ।।

(प्रद्यो-५-९५) **पौर इति ।** रामेण विरहः अस्यास्तीति रामविरही तथोक्तः पौरो जानपदश्च नागरिको जनपदभवश्च जनः लोकः समन्तात् खिन्तात्—खिन्नो भवतु —दीनो भवतु—खिद दैन्ये इत्यस्मात् रौधादिकात् लोट्—किं तु रामः रावणेन दत्तः कृतः दारविरहः यस्य स तथोक्तः सन् क्रोधेन अमर्षेण संगंस्यते संगतो भविष्यति —समो गमीत्यादिना आत्मेनेपदम् लृट्—ततः क्रुद्धः धन्वशरधिभ्यां सहितः सधन्वशरधिः दाशरथिः रामः रणे युद्धे रावणं हन्ता हनिष्यति—हन्तेः लुट्—तत्कारागृहमुक्तदारमिलिताः तस्य रावणस्य कारागृहं बन्धनालयः—तस्मान्मुक्तैः दारैः भार्याभिः मिलिताः संगताः वयं सुराः स्यामेति अहृष्यन्—हृष दुष्टा वित्यस्मात् दैवादिकात् लङ—शार्दूलविक्रीडितं वृत्तम् ।। ५-९५ ।।

(प्रद्यो-५-९६) **प्रागारुह्येति ।** प्राक् पूर्वम् सुमन्त्र एव सचिवः मन्त्री रथमारुह्य तं रामम् आरोहयत् आरोपयत्—अथ करावलम्बनं करोतीति करावलम्बनकृत्—तेन रामेणापि—करावलम्बनकृतेति सीताविशेषणं वा—तदा वा आहिताग्न्यादिष्विति निष्ठायाः परनिपातः—सीता च अन्तिकं समीपं नीता प्रापिता—अथ सौमित्रिः यन्तुः नियन्तुः सारथेः अग्रे पुरतः उपविश्य कुतुकी कुतूहलवान् वल्गाधरः रश्मिधरः—वल्गा प्रग्रहरश्मी चेति प्रतापमार्ताण्डः—वल्गतः वल्गनं कुर्वतः तुरगान् प्रगृह्य—नियम्य करे प्रतोदं कशां बिभ्रत् निरगात्—गृहादिति शेषः—इणो गा लुङि इति गादेशः—शार्दूलविक्रीडितं वृत्तम् ।। ५-९६ ।।

(प्रद्यो-५-९७) **राघव इति ।** अथ निर्गमनानन्तरं जनतया जनबृन्देन राघवः ववन्दे नमस्कृतः—वदेः कर्मणि लिट्—राघवेण च जनता अभिनन्दे अभिनन्दिता बभूव—जानकी सीता जनबृन्दे जनसमूहे दृशम् दृष्टिम् अदात्—जनसमूहं ददर्शेत्यर्थः —स्वागता वृत्तम् ।। ५-९७ ।।

(प्रद्यो-५-९८) **कनकेति ।** कनकस्य रथं कनकरथम्—तम् आरूढः बाढप्रसादः अधिकप्रसन्नतावान्—गाढबाढदृढानि च इति प्रसादस्तु प्रसन्नता इति च अमरः—तेन परिष्कृतः भूषितः—नवजलधरः नूतनमेघः तद्वत् श्यामः नीलवर्णः रामो दाशरथिः पितुः तातस्य गृहान् आलयान् ननाम ववन्दे—आनमन्ती प्रणमन्ती जनता जनसमूहः रघुनन्दनं शरदि शरत्काले सवितुः सूर्यस्य बिम्बस्य मध्ये मध्येबिम्बम्—चकासतं

प्रकाशमानं साक्षात् प्रत्यक्षम् नारायणं पुराणपुरुषम्—अमत अमनिष्ट—मनोतेस्तानादिकात् लुङ्—हरीणी वृत्तम्—(रसयुगहयैः न्सौम्रौ स्लौ गो यदा हरिणी तदा इति लक्षणम्) ॥ ५-९८ ॥

(प्रद्यो-५-९९) **श्वश्रूभिरिति।** अश्रूणि बाष्पाणि विमुञ्चतीभिः श्वश्रूभिः आरुढरथा सीता इति अश्रूयत श्रुता—वाक्यार्थः कर्म—राजा दशरथः रामं च रथिनं रथारुढम् शुश्राव श्रुतवान्—अस्रम् अश्रूणि सुस्राव- राजेति शेषः देव्यश्च पत्न्यः रुरुदुः ॥ ५-९९ ॥

(प्रद्यो-५-१००) **योषिताभिति।** योषितां स्त्रीणाम्—स्त्री योषिदबला नारी इत्यमरः—रुदितघोषः रोदनध्वनिः उद्गतः उत्पन्नः मन्दरेण मन्दरनामकगिरिणा साधनेन सुरासुरैः देवैः असुरैश्च कर्तृभिः मथ्यमानः विलोड्यमानः दुग्धसागरः क्षीराब्धिरिव दिङ्मुखानि दिक्प्रान्तानि मुखरीचकार अमुखराणि मुखराणि शब्दवन्ति चकार—अभूततद्भावे च्विः लिट—रथोद्धता वृत्तम्—रान्नराविह रथोद्धता लगाविति लक्षणात् ॥ ५-१०० ॥

(प्रद्यो-५-१०१) **हा रामेति।** हा राम क्व गतोऽसि—हे वत्स कतरत् कान्तारं किं वा वनम आगाहसे प्रविशसि—गाहतेर्लेट् अबला तव कान्ता सीता कान्तारस्य अन्तरम् अवकाशम् गाहते इति कान्तारान्तरगाहिनी कथं वत्स्यति—स्थास्यति—वस निवासे इत्यस्मात् लृट्—कान्तार उपसर्गादौ वने दुर्गमवर्त्मनि इति प्रतापमार्तण्डः—हे सौमित्रे शुभगात्र लक्ष्मण महाबाहो ऊर्मिलां विहाय त्यक्त्वा क्व अरण्ये विचरिष्यसीति मुहुः विलपन् परिदेवमानः राजा दशरथः व्यामुहत् अमुह्यत्—मुह्यतेर्लङ्—शार्दूलविक्रीडितं वृत्तम् ॥ ५-१०१ ॥

(प्रद्यो-५-१०२) **रमणीजन इति।** रमणीजनः रामाजनः—सुन्दरी रमणी रामेत्यमरः—रामजनन्याः कौसल्यायाः तपनीयसौधम् शातकुम्भराजसदनम्—नरेन्द्रं दशरथं झटिति शीघ्रम् उपनीय प्रापय्य व्यजनानिलैः तालवृन्तवायुभिः जलशीकरसेकैः जलबिन्दुसेचनैश्च उदजीवयत् उज्जीवयामास—प्रियवचनैः चाटुवाक्यवचनैः असमान्त्वत् सान्त्वयामास—सान्त्वयतेः लुङ्—मन्दाक्रान्ता वृत्तम् ॥ ५-१०२ ॥

(प्रद्यो-५-१०३) **हा रामेति।** हा राम राघव—उद्वहतीति उद्वहः—रघूणामुद्वहः रघूद्वहः—तस्य संबुद्धिः—हे रघूद्वह—पचाद्यच्—रामभद्र—राज्ञाम् इन्द्रः श्रेष्ठः—तस्य संबुद्धिः—हे पुत्र कुमार—रजनीकर सौम्यवक्त्र प्रसन्नचन्द्र—चन्दयति आह्लादयतीति चन्द्रः—चदि धातोरौणादिकः रप्रत्ययः—रामः चन्द्र इव रामचन्द्रः—आर्तो

आपन्नौ पीडितौ पितरौ न जहीहि न त्यज—जहातेः लोट्—अनाथां प्रोषितभर्तृकां नगरीम् अयोध्यां कस्मै ददासि—भरतोऽपि न राज्यकामः राज्याभिलाषवान् न भवति—वसन्ततिलका वृत्तम् (उक्ता वसन्ततिलका तभजा जगौ गः इति लक्षणम्) ।। ५-१०३ ।।

(प्रद्यो-५-१०४) **शिशव इति ।** हे पापे क्रूरे कृतौ जागरोपवासौ यैस्ते कृत-जागरोपवासाः शिशवः अर्भकाः पारणया भोजनेन विना निरगुः निर्गताः—इणो गा लुङि इति गादेशः—हे कैकेयि तव कठिनं कठोरं हृदयं कथं न दीर्णम् न भिन्नम्—अन्नं कथं नु कथं वा रुच्यं रोचते—राजसूयेत्यादिना कर्तरि क्यप्—औपच्छन्दसिकं वृत्तम् ।। ५-१०४ ।।

(प्रद्यो-५-१०५) **वैकल्ये इति ।** हे कौसल्ये हे जननि—शोक एव शल्यं शूलम्—तेन सह वर्तते इति तथोक्तम्—तस्मिन् हृदये—विकलस्य भावः वैकल्यम्—तस्मिन् सति ते तव जिजीविषा जीवितुमिच्छा कथम्—जीवतेः सन्नन्ताद् अप्रत्यये टाप्—हे सुमित्रे लक्ष्मणं क्व नु द्रष्टासि—दृशेः लुट्—वद ब्रूहि—हे ऊर्मिले त्वं भर्त्रा लक्ष्मणेन कदा कस्मिन् काले मिलेथाः संगच्छेथाः—मिल संगमे इत्यस्मात् लिङ्—प्रहर्षिणी वृत्तम् ।। ५-१०५ ।।

(प्रद्यो-५-१०६) **जाल्माविति ।** हे वसिष्ठवामदेवौ पुरोहितौ जाल्मौ असमीक्ष्यकारिणौ स्थः भवतः—जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः—अस्तेः लटि द्विवचनम्—हे अशोकधर्मपालौ युवां धर्मं मा त्यजतम्—हे सुमन्त्र हे यन्तः सारथे रामं विपिनम् अरण्यं मा नय न प्रापय—इत्येवं पौराः नागरिकाः विपणौ पण्यवीथिकायाम्—विपणिः पण्यवीथिका इत्यमरः—विलुठ्य परिवर्तनं कृत्वा व्याक्रुक्षन् क्रोशमकुर्वन्—क्रोशतेः लुङ्—शल इगुपधादिति क्सः—प्रहर्षिणी वृत्तम् ।। ५-१०६ ।।

(प्रद्यो-५-१०७) **रामे इति ।** जगदभिरामे लोकसुन्दरे विमतविरामे शत्रुनाशके रामे रघुपतौ विनिर्यति निर्गच्छति सति—द्रुहिणमदृक्षाः धातृसदृशाः—धाताब्जयोनिद्रुहिणो विरिञ्चिरित्यमरः—गृहिणो गृहस्थाः द्विजवर्याः विप्राः स्वयमपि सपुत्रमित्रकलत्राः सुतसुहृद्भार्यासहिताः निरगुः निर्गताः—आर्या गीतिः—आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् । इतरत् तद्वन्निखिलं यदीयमुदितैवमार्यागीतिः ।। इति (लक्षणं वृत्तरत्नाकरे) ।। ५-१०७ ।।

(प्रद्यो-५-१०८) **अश्वीयेति ।** अश्वानां समूहः अश्वीयम्—बृन्दे त्वश्वीयम् आश्ववत् इत्यमरः—केशाश्वाभ्यामिति (४-२-४८) छप्रत्ययः—रथानां समूहो

रथ्या—रथाद् यत् इति यत् प्रत्ययः—गजानां समूहो गजता—गजाच्चेति वक्तव्यम् इति तल् प्रत्ययः—ताभिः अश्वीयरथ्यागजताभिः विहीना वियुक्ता—रथ्यासु प्रतोलीषु लुठन्तः परिवर्तमानाः—ते च ते पौरनागराश्च—तैः कृतः आर्तो दीनो नादः यस्यां सा तथोक्ता अयोध्या शोकाम्बुधौ दुःखसागरे अचन्द्रतारा इन्दुनक्षत्रविहीना निशा रात्रिरिव अन्धकारे तमसि ममज्ज मग्ना ।। ५-१०८ ।।

(प्रद्यो-५-१०९) **वृद्धानिति ।** शुद्धान्तरङ्गः शुद्धमनाः सरामः रामासहितः स रामः रघुपतिः बद्धाञ्जलिः सन् वृद्धान् पूज्यान् प्रणम्य निवर्तध्वम् प्रतिगच्छत—तिष्ठत तिष्ठत इति—चापले द्वे भवतः इति वार्त्तिकाद् द्विवचनम्—संभ्रमेण प्रवृत्तिश्चापलम् —प्रियाणि प्रियवचांसि प्रवदन् ब्रुवाणः नागर्याः निरगात् निर्गतवान् ।। ५-१०९ ।।

(प्रद्यो-५-११०) **आध्वमाध्वमिति ।** हे बन्धवः आध्वम् आध्वम् तिष्ठत तिष्ठत —आस उपवेशने इत्यस्मात लोट्—मध्यमपुरुषबहुवचनम्—यात गच्छत—मा तमत मा तमत ग्लानि मा यात—पूर्ववद् द्विर्भावः—इत्येवं प्राञ्जलिः बद्धाञ्जलिः सन् बन्धून् मुहुर्मुहुरभाषत अवदत्—भाषतेः लङ् ।। ५-११० ।।

(प्रद्यो-५-१११) **प्रसह्येति ।** कुमारो रामः प्रसह्य अनुयातः—जनौघैरिति भावः—जनौघान् निषेद्धुं वारयितुम् अशक्तः असमर्थः—सदारः विषण्णः—अभूदिति शेषः—सूतः सुमन्त्रोऽपि स्वयमनुरक्तान् बन्धून् अनिषिध्य अनिवार्य कथंचित् कथमपि रथं चोदयामास तान् अतिलङ्घयेत्यर्थः—भुजङ्गप्रयातं वृत्तम् ।। ५-१११ ।।

(प्रद्यो-५-११२) **वृद्धेति ।** ततः नमनानन्तरम् वृद्धबालवनिताजनान्वितः रघुनन्दनः चिरन्तनौ वृद्धौ पितरौ च चिन्तयन् स्यन्दनेन रथेन स्यन्दिका नाम निम्नगाम् नदीम् अभिजगाम प्राप—रथोद्धता वृत्तम् ।। ५-११२ ।।

(प्रद्यो-५-११३) **अत्रान्तरे इति ।** अत्रान्तरे अस्मिन्नवसरे दिवसः परिणतः परिपक्वः—तदानीम् पर्यस्तलोहितसमस्तगभस्तिजालः व्याप्तरक्ताखिलघृणिसंघः—गभस्तिघृणिघृष्टयः इत्यमरः—मयूखमाली सूर्यः अस्ताद्रिमस्तकम् अस्ताचलशिखरम् —अस्तस्तु चरमक्ष्माभृत् इत्यमरः—अहास्त प्राप्तवान्—ओहाङ् गतौ इत्यस्मात् लुङ्—अपरोर्मिमाली पश्चिमाब्धिः लाक्षारसस्य—लाक्षा राक्षा जतु क्लीबे इत्यमरः—द्युतिरिव द्युतिर्यस्य स तथोक्तः अभूत्—वसन्ततिलका वृत्तम् ।। ५-११३ ।।

(प्रद्यो-५-११४) **अजनीति ।** दिनात्यये सायं काले जनतायाः जनसमूहस्य चेतसः अनुरागः प्रेम अजनि जातः—जनेः लुङ्—दीपजनेत्यादिना कर्तरि चिण्—सन्ध्यारागः समेत्य आगत्य मुहूर्तम् अल्पकालं विसृत्वरः विसृमरः अखिलः व्यगलत्

गतः—विसृत्वरो विसृमर इत्यमरः—सान्द्रं निबिडं तिमिरपटलम् अन्धकारबृन्दं तिर्यक् तिरश्चीनम् दिक्तटान् दिक्प्रान्तान् तिरोऽधित तिरोहितानकरोत्—सर्वतः समन्तात् गगनकुहरे आकाशान्तराले ताराराजिः नक्षत्रपङ्क्तिः व्यराजत व्यरोचत—हरिणी वृत्तम् ।। ५-११४ ।।

(प्रद्यो-५-११५) **स्यन्दिकेति ।** स्यन्दिकापयसि स्यन्दिकाख्यनदीजले वन्दिता सन्ध्या येन स तथोक्तः—सानुजः सलक्ष्मणः सदयितः सीतासहितः रघुनाथः रामः अद्भिरेव कृता पारणा येन स तथोक्तः आसीत्—अस्तेर्लङ्—भुवि भूमौ भूयः बहु तत् अद्भुतम् आश्चर्यम् अभवत्—स्वागता वृत्तम् ।। ५-११५ ।।

(प्रद्यो-५-११६) **ना गरा इति ।** उद्वलितः उद्वेल्लितः दुःखसागरो येषां ते भुवि भूमौ निपत्य पतित्वा जागरामासुः स्वापरहिता आसन्—जागर्तेः लिट्—उषविदजागृभ्योऽन्यतरस्याम् (३-१-३८) इति आम् प्रत्ययः—अखिलाः सकलाः तारकायाः निशामुखनक्षत्रस्य अत्ययः नभोमध्यातिक्रमः—अर्धरात्रः इत्यर्थः—तस्मिन् निमीलितेक्षणाः मुकुलितनयनाः सन्तः—[11]यातनात्यय इति पाठश्चिन्त्यः—अत्र अत्यन्तसंतापेन निमीलितेक्षणाः निद्रया परिबभूविरे—एकत्र निद्रया परिभूता—अन्यत्र मूर्छां गता—रथोद्धता वृत्तम् ।। ५-११६ ।।

(प्रद्यो-५-११७) **अद्रिजापतिरिति ।** अद्रिजापतिः पार्वतीपतिः हिमाद्रौ हिमालये अशेत उवास—अद्रिजापतिरसौ च दरिद्रः इति पाठे असौ अद्रिजापतिः दरिद्रो बभूव—भिक्षाटनादिति भावः—श्रीपतिः हरिश्च अप्सु निदद्रौ सुष्वाप—राघवः त्वचं चर्म अवस्त पर्यधत्त—कः दैवं लङ्घयेत् अतिक्रामेत्—इति एवं जनौघः जनसमूहः जगाद—स्वागता वृत्तम् ।। ५-११७ ।।

(प्रद्यो-५-११८) **अश्वेति ।** सः लक्ष्मणः अश्वपार्श्वे शयितस्य शयानस्य—शेतेः कर्तरि क्तः—सारथेः यन्तुः सुमन्त्रस्य अग्रतः अग्रे समवसत् अतिष्ठत्—तौ दम्पती सीतारामौ च वल्कलेन कृतम् अवगुण्ठनं शिरःप्रावरणं ययोस्तौ तथोक्तौ रथे अधिरथम्—विभक्त्यर्थे अव्ययीभावः—निदद्रतुः सुषुपतुः—निपूर्वात् द्रातेर्लिट्—रथोद्धता वृत्तम् ।। ५-११८ ।।

(प्रद्यो-५-११९) **स्वप्नज इति ।** राघवः स्वप्नजः शयालोः—स्वप्नक् शयालुर्निद्रालुः इत्यमरः—पुरजनस्य समूहे पौरबृन्दे महतीं धृति सन्तोषम् ऊहे उवाह—वहतेः लिट्—सुमन्त्रो जाग्रदेव निषसाद स्थितवान्—सीदतेः लिट्—तथा हि स सुमन्त्रः

स्वामिनीतौ स्वामिकार्ये निहितः (अवहितः) सन्नेव सुमन्त्रः सुमन्त्र इत्याख्यातः खलु इत्यर्थः——स्वागता वृत्तम् ।। ५-११९ ।।

प्रद्यो-५-१२०) **सीतयेति ।** रघुतिलके सीतया सह गहनं वनं काननं गतवति सति——विधिना दुष्टदैवेन दशरथजनकयोः कुले वंशे हते सति——हा हन्त——(विषादद्योतकम् अव्ययम् हा इति) हा विषादशुगार्तिषु इत्यमरः——इति सारथौ यन्तरि रुदिते रुदितवति सति——कर्तरि क्तः——सकलजने जनौघे च विलपति सति——सा निशा सा रात्रिः मुखराः सशब्दाः दिशः यस्याः सा तथोक्ता——विधुरा विह्वला दशा अवस्था यस्याः सा तथोक्ता——समजनि जाता जनेर्लुङ——दीपजनेत्यादिना कर्तरि चिण् प्रत्ययः (व्याख्यातुः टीकान्त्यश्लोकः स्वीयः अत्र न दृश्यते ।) ।। ५-१२० ।।

इति उदारराघवे महाकाव्ये पञ्चमसर्गस्य टीका प्रद्योतनी समाप्ता ।

———

NOTES TO PRADYOTANĪ—Canto V

[1] Only Bombay edn. reads:—*ratna*—Others read:—*rakta*—

[2] We are reminded of the following beautiful verse (which is cited by Dhanika):

āhūtasyābhiṣekāya visṛṣṭasya vanāya vā,
na mayā lakṣitas tasmin svalpo'py ākāraviplavaḥ.

See the *Daśarūpāvaloka* (my edn.). This verse mav have been from the *Udāttarāghava* of Māyurāja. This is only my guess. I have no printed reference.

[3] MS. 3 (*Saṃjīvinī*) reads: *bhinnāśayā.* Others read: *khinnā satī.*

[4] Bombay edn. reads: *tavāmbā.* Others read: *batāmbā.*

[5] The *Saṃjīvinī* (Commentary) and the Bombay edn. read: *nau* (in dual), whereas the *Pradyotanī* reads: *no* (i.e. *naḥ*—in plural).

[6] Bombay edn., MS. 1, and the *Pradyotanī* read: *vṛṣṇi* (for Dhṛṣṭi). The *Saṃjīvinī* has Dhṛṣṭi. The *VālmīkiRāmāyana* has Dhṛṣṭi; from the V. R. the verse is quoted by me in the text (given within brackets). Only the *Pradyotanī* has the verse with the names of the eight Ministers of Daśaratha thus:

vṛṣṇir jayanto etc.
akrūro dharmapālākhyaḥ sumantraś cāṣṭa mantriṇaḥ.

[7] MS. 1, MS. 7 the *Pradyotanī* and the Bombay edn. read: *saṃjīvanam.* Only the *Saṃjīvinī* Commentary reads: *yad jīvanam* and supplies "*tat*".

[8] The *Pradyotanī* reads: *dāyaka* and explains it as: *vicchedakaḥ.* This is obviously from the root: *do=avakhaṇḍane.* Bombay edn., MS. 1, and the *Saṃjīvinī* read: *nodakaḥ* in the sense of *prerakaḥ* (i.e. *pradāyakaḥ* from the root: *ṇuda preraṇe*).

[9] MS. 1, MS. 7, the *Pradyotanī* and the Bombay edn. read: *mṛdutūlaśayyā.* The *Saṃjīvinī* reads: *mṛdupuṣpaśayyā.*

[10] The entire comments are similar to those of Mallinātha. See the *Saṃjīvinī* on the *Raghuvaṃśa* IV. 45. See Note on III. 27.

[11] MS. 1, MS. 7, and the *Pradyotanī* read: *tārakātyaya.* Bombay edn. reads:*yātanātyaya,* which is also the reading in the *Saṃjīvinī* (the Commentary on the *Udārarāgahava*). Perhaps the *Pradyotanī* has in mind the reading of the *Saṃjīvinī.* If it be so, it would mean that the *Saṃjīvinī* was earlier. See also the *Pradyotanī* on IV. 10, and the Note thereon.

उदारराघवे महाकाव्ये षष्ठसर्गस्य व्याख्या प्रद्योतनी चौण्डिपण्डितेन कृता

(प्रद्यो-६-१) **अर्धरात्रेति ।** अथ अनन्तरं स रामः अत्र वने स्थिता जनता जनसमूहः दुर्धरा धर्तुमशक्येति अर्धरात्रसमये विनिद्रः सन् वञ्चिताखिलजनः वञ्चित-समस्तजनः सन् वनराजीः वनपङ्क्तीः आडुढौकिषुः गन्तुमिच्छुः—ढौक्र गतौ इत्यस्मात् सन् प्रत्यये सनाशंसेत्यादिना उः—दुरध्वं दुर्गममार्गम् अगाढ विवेश—गाहतेर्लुङि रूपम् —झलो झलि (८-२-२६) इति सकारलोपः—हो ढ इति ढत्वम्—ष्टुत्वम् ढो ढे लोपः ।। ६-१ ।।

(प्रद्यो-६-२) **प्रववृते इति ।** रघूद्वहः रघुश्रेष्ठः स रामः वनाय प्रववृते वनाय प्रययौ—महाजनः अयोध्यापुरनिवासिजनः भवनाय निववृते गृहाय निवृत्तः—रथगतः (स रामः) रुचा कान्त्या—रविरिव रविवत् रुरुचे दिदीपे—रुच दीप्तावित्य-स्मात् लिट्—महाजनस्तु पुरगतः सन अयोध्यां गतः सन्—प्राप्तः सन्नित्यर्थः—स्वगृहे स्वकीयवेश्मनि शुचा शोकेन जगृहे स्वीकृतः—शोकाविष्टोऽभूदित्यर्थः ।। ६-२ ।।

(प्रद्यो-६-३) **आरण्यकानीति ।** आरण्यकानि अरण्यसंबन्धीनि—अरण्यान्म-नुष्ये (४-२-१२९) इति वुञ् प्रत्ययः—युवोरनाकौ इति अकादेशः—मृगपक्षिरुतानि मृगाणां पक्षिणां च रुतानि शृण्वन् प्राभातिकेन प्रातःकालसंबन्धिना पवनेन मन्द-मारुतेन निषेव्यमाणः सेव्यमानः रामः शीघ्रं सरस्सु कासारेषु—कासारः सरसी सरः इत्यमरः—जलजानि पद्मानि जिघ्रन् महत्तरश्चासौ मरुच्च—तस्य वेगो यस्य तेन तथोक्तेन रथेन जगाम प्राप्तः—अरण्यमिति शेषः ।। ६-३ ।।

(प्रद्यो-६-४) **अस्तावलम्बिनीति ।** सिताः शुभ्राः त्विषः कान्तयो यस्य तस्मिन् सितत्विषि शीतभानौ चन्द्रे अस्तावलम्बिनि सति भानूदये सूर्योदये च सति भगवतीं षड्गुणोपेताम् उषसम् प्रातःसन्ध्याम् ववन्दे ननाम—स रामः त्र्यञ्जलम्—द्वित्रिभ्या-मञ्जलेः (५-४-१०२) इति समासान्तः टच् प्रत्ययः—(अञ्जलित्रयपरिमितम) जलम् अर्हपतये सूर्याय अर्पयित्वा दत्त्वा—अर्घ्यं दत्त्वा इत्यर्थः—पश्चात् तदनन्तरम्—अनारतगतिः अविच्छिन्नगमनः सन् गहनं जगाम वनं विवेश ।। ६-४ ।।

(प्रद्यो-६-५) **अह्न इति।** अह्नः दिवसस्य अवसानसमये सायंकाले जगदघक्षयहेतुभूताम् जगतां भुवनानाम् अघक्षये पापनाशे हेतुभूतां कारणभूतां जह्नो सुतां जाह्नवीं भागीरथीम् दूरे ददर्श—तत्तीरसीमनि तस्याः भागीरथ्याः तटप्रदेशे किरातपतेः किराताधिपस्य गुहस्य तुङ्गध्वजम् उन्नतपताकं शृङ्गबेरं नगरम् ऐक्षत ददर्श ।। ६-५ ।।

(प्रद्यो-६-६) **शृङ्गबेरेति।** शृङ्गबेरनगराधिनायकः गुहः—शृङ्गानां काहलानां च निनादेन ध्वनिना संभ्रमी संभ्रमवान् अभीष्टदर्शनः प्रियदर्शनः रामलक्ष्मणयोर्दर्शने समुत्सुक इत्यर्थः—दशरथात्मजौ दशरथपुत्रौ राघवौ रामलक्ष्मणौ द्रष्टुम् आगमत् आययौ—गमेर्लुङि रूपम् ।। ६-६ ।।

(प्रद्यो-६-७) **दूरत इति।** दूरतः दूरादेव अश्वम् [1]अवरुह्य अवतीर्य पदातिः सन् गुहः पञ्चषैः—बहुव्रीहौ संख्येये इत्यादिना डच् प्रत्ययः—शबरनायकमुख्यैः भिल्लनायकश्रेष्ठैः सह वन्यं वने भवं वस्तु कन्दमूलफलादीनि उपदाय उपायनं कृत्वा विनीतः नम्रः नाम नामधेय जाति कुलं च अभिधाय उक्त्वा ननाम ववन्दे ।। ६-७ ।।

(प्रद्यो-६-८) **स्वीकृत्येति।** गङ्गातटसीम्नि भागीरथीतटप्रदेशे तं गुहं स्वीकृत्य आत्मीयं कृत्वा पदातिना किरातराजेन किराताधीश्वरेण गुहेन अन्वितः संगतः सन् स च रामः यन्त्रा सारथिना सुमन्त्रेण वाजिनः अश्वान् विमोच्य मोचयित्वा प्रियया सीतया समं सह पयः जलं पपौ ।। ६-८ ।।

(प्रद्यो-६-९) **गाङ्गमिति।** गन्धर्वान् अश्वान्—वाजिवाहार्वगन्धर्वेत्यादिरमरः—गाङ्गं भागीरथीसंबन्धि सलिलं पयः दापय पायय इति सुमन्त्रम् आदिश्य आज्ञाप्य स रामः स्वरामया सार्धं स्ववनितया सह तापसतरुमूलभुवम्—तापसतरुर्नाम इङ्गुदीवृक्षः—इङ्गुदी तापसतरुः इत्यमरः—तस्य मूलभुवं मूलप्रदेशं प्राप जगाम ।। ६-९ ।।

(प्रद्यो-६-१०) **पल्लवेति।** पल्लवमयासनस्थं पल्लवमये किसलमये आसने आस्तरणे निषण्णं फुल्लमुखं विकसितमुखं पुण्डरीकाक्षं पद्माक्षं रामं वीक्ष्य हल्लोहलम् स्वभाषया स्वस्तिवचनम् जय जयेति आकलयन् दधत् भिल्लो गुहः भल्लीं बाणविशेषम उपायनं चक्रे भल्लास्त्रमुपायनं कृतवानित्यर्थः ।। ६-१० ।।

(प्रद्यो-६-११) **तस्मिन्निति।** अधिवृक्षसूर्ये अधिगताः वृक्षाः येन सः अधिवृक्षः—सः सूर्यः यस्मिन् तस्मिन् तथोक्ते अनेहसि काले—सायंकाले इत्यर्थः—कुमारं रामम् अभ्यर्चयितु पूजयितुं गुहः प्राञ्जलिः सन् अग्रतः तिष्ठतीति अग्रतस्स्थः—पुरस्तात् स्थितः—सूर्योढम् सूर्या नववधूः तां परिणीतवन्तम्—सूर्या नववधूः कन्या नवोढेत्युच्यते

इति हलायुधः—रघुप्रवीरं रघुश्रेष्ठं कुमारं रामम् पुरप्रवेशाय शृङ्गबेरनगरप्रवेशाय आह्वत् आजुहाव—लिगिसिचिह्वश्च (३-१-५३) इति च्लेरङादेशः ।। ६-११ ।।

(प्रद्यो-६-१२) **अभणीदिति** । अथ अनन्तरम्—मानवसार्वभौमसूनुः—मानवाः मनुजाः—मनुजा मानवा नराः इत्यमरः—तेषां सार्वभौमः चक्रवर्ती—चक्रवर्ती सार्वभौमः इत्यमरः—दशरथः सर्वभूमिपृथिवीभ्याम् अणञौ (५-१-४१) इत्यनेन तस्येश्वरः (५-१-४२) इत्यस्मिन्नर्थे अण् प्रत्ययः—अनुशतिकादीनां च (७-३-२०) इत्यनेन उभयपदवृद्धिः—तस्य सूनुः रामः समन्दहासः सस्मितः सन् मधुरं यथा भवति तथा अभणीत् उवाच—भण व्यक्तायां वाचि इत्यस्मात् लुङ—इट ईटि इति सकारलोपः—किमिति अभणीत्—(तत्राह) वयं नगरं शृङ्गबेरपुरं प्रवेष्टुं नार्हाः—दश चतुरश्च अब्दान् चतुर्दशसु वत्सरेषु—कालाध्वनोरत्यन्तसंयोगे इति द्वितीया—अटवीम् अटामः चरामः—अट गतौ इत्यस्मात् लट् ।। ६-१२ ।।

(प्रद्यो-६-१३) **नास्महे इति** । नगरसीम्नि शृङ्गबेरप्रदेशे अयोध्याप्रदेशे वा नास्महे न तिष्ठामः—वस्त्रं न वस्महे नाच्छादयामः—किं तु विहितभस्मविलेपाः कृतभस्मविलेपाः—हे गुह वृद्धयोः मातरपित्रोः कैकेयीदशरथयोः आदरणीयं वचनम् मातिगाम नातिचराम—अतिपूर्वात् इणः लुङि रूपम्—इणो गा लुङि इति गादेशः ।। ६-१३ ।।

(प्रद्यो-६-१४) **भरतायेति** । मे पिता दशरथः—नीतिनिरताय नीतिशास्त्रकुशलाय भरताय धराधिपतित्वम् भूपतित्वम् वितरीतुं दातुम्—वृतो वा (७-२-३८) इति इटो दीर्घः—ऐहत ऐच्छत्—त्वं जटिलः सन् चतुर्दश समाः चतुर्दशवत्सरेषु—अत्रापि कालाध्वनोरिरति द्वितीया—विपिने कानने चरेति अनुजयुक्तं लक्ष्मणसहितं माम् अदिक्षत् प्रजिघाय—दिश अतिसर्जने इत्यस्मात् लुङि रूपम्—शल इगुपधादित्यादिना क्सादेशः ।। ६-१४ ।।

(प्रद्यो-६-१५) **राजेति** । यद् यस्मात् राजा दशरथः सालचिह्नम् सालो वृक्षविशेषः—स चिह्नं यस्य तत् तथोक्तम्—आ जाह्नवि भागीरथीपर्यन्तम् सुमन्त्रसूतम् सुमन्त्रः सारथिः यस्य तं तथोक्तम् रथं मे आदिशत् प्रजिघाय—तस्मात् श्वः विपिनं काननं विविक्षुः प्रवेष्टुमिच्छुः अहं जटाः बद्ध्वा जटाबन्धनं कृत्वा साश्वम् अश्वसमेतं रथं प्रातःकाले प्रहिणोमि प्रेषयामि ।। ६-१५ ।।

(प्रद्यो-६-१६) **भृशमिति** । रयघनश्रमाम्भसः गमनवेगेन अधिकस्वेदोदकाः रथवाजिनः रथाश्वाः भृशम् अत्यन्तम् (अक्षुधन् बुभुक्षिताः) अश्रमन् श्रान्ता अभवन्

—अतः हरितं तृणं बालतृणं च हरिमन्थकानपि चणकानपि—चणको हरिमन्थकः इत्यमरः—त्वरितं शीघ्रं समानय आनय—वयं समागताः समायाताः ।। ६-१६ ।।

(प्रद्यो-६-१७) **इतीति ।** गुहः इति पूर्वोक्तप्रकारेण रामगिराम् रामवचनानाम् अनन्तरम् तृणभारान् तृणसंचयान् चणकान् हरिमन्थकान् अदात् ददौ—रामायेति शेषः—रथसारथिरपि सुमन्त्रोऽपि उष्णकरावपीडितान् सूर्यकिरणपीडितान् तुरगान् असिष्णपत् स्नापयामास—ष्णा शौचे इत्यस्मात् णिचि लुङि रूपम् ।। ६-१७ ।।

(प्रद्यो-६-१८) **अथ पश्चिमेति ।** परिफुल्लानि विकसितानि हल्लकानि कल्हाराणि—सौगन्धिकं तु कल्हारं हल्लकम् इत्यमरः—तेषां दलानीव अरुणच्छविः रक्तकान्तिः रुचां पतिः सूर्यः पश्चिमाद्रिम् अगमत् अस्ताद्रिं प्राप—उदारराघवम् महत्तरं रामचन्द्रम्—उदारो दातृमहतोः इत्यमरः—वरुणाय शंसितुमिव रामो वनाय गच्छति इत्याख्यातुमिव अपरे अपरस्मिन् अम्बुधौ—पश्चिमाम्बुधौ इत्यर्थः—मङ्क्षु शीघ्रम्—द्राङ् मङ्क्षु सपदि द्रुतमित्यमरः—निमिमङ्क्षुः मङ्क्तुमिच्छुश्च अभवत्—अपरे च मङ्क्षिव मिमङ्क्षुरम्बुधौ इति पाठन्तरम्—वरुणो वाराम् अधिपतिरिति एवम् ([2]उत्प्रेक्षा) ।। ६-१८ ।।

(प्रद्यो-६-१९) **पश्चिमेति ।** इति पूर्वोक्तप्रकारेण भगवति षड्गुणोपेते महसां त्विषां भर्तरि पत्यौ—तमसां हर्तरि तमोनाशके—उभयत्र कर्मणि षष्ठी—दशशतकिरणे सहस्रकिरणे सूर्ये पश्चिमवारिराशिपतिते पश्चिमसमुद्रे पतिते सति पक्षिकुले पक्षिसमूहे कुलायनिलयान् निवासस्थानानि अभिपतति सति चन्दनशैलमन्दपवनः मलयपर्वते मन्दवायुः शनैः मन्दं सरिता भागीरथ्या समगत संगतोऽभूत्—समो गमीत्यादिना आत्मनेपदम् (वंशपत्रपतितं वृत्तम्—दिङ्मुनि वंशपत्रपतितं भरनभनलगैः इति लक्षणं वृत्तरत्नाकरे) ।। ६-१९ ।।

(प्रद्यो-६-२०) **सत्वरमिति ।** सत्वरं शीघ्रं यथा भवति तथा उत्थितः सन् रघुपतिः रामः—अनु पश्चात् जनुः जन्म यस्य स तथोक्तः—तेन लक्ष्मणेन समं जनकतनूजया समं सीतया सह जह्नुसुतां धुनीम् भागीरथीं नदीम्—तटिनी ह्लादिनी धुनी इत्यमरः—उपगतः प्राप्तः मन् रवये सूर्याय अर्घ्यंजलं प्रदाय अर्घ्योदकं दत्त्वा शोधितं कण्टकादिरहितं कृतं शीतलम् किसलयशयनं पल्लवतल्पम् इङ्गुदीतरुतले तापसतरुमूले (स्थितं) पुनरपि अगात् इणो लुङि गादेशे रूपम् (अत्रापि पूर्ववत् वंशपत्रपतितं वृत्तम्) ।। ६-२० ।।

(प्रद्यो-६-२१) **कोकव्राते इति ।** विरहिणि विरहवति अत एव विधुरे—(विकले) शोकक्लिष्टे दुःखसंकुले कोकव्राते चक्रवाकसमूहे—कोश्चक्रश्चक्रवाकः

इयमरः—सरिति भागीरथ्यां विरटति विरुदति सति लोकव्याप्ते तमसि च बहले अधिके सति कस्यापि पुरुषस्य दृशोः लोचनयोः प्रियं संतोषः—नो अजनि नोत्पन्नः—जनी प्रादुर्भावे इत्यस्मात् कर्तरि लुङि दीपजनेत्यादिना च्लेः चिणि च रूपम्—विरहिजनदर्शने सति तमोदर्शने च सति चक्षुःप्रीतेरविद्यमानत्वात् ।। ६-२१ ।।

(प्रद्यो-६-२२) **भिल्लमिति ।** अत्यासन्नम् अतिसमीपवर्तिनं भिल्लं वीक्ष्य रघुपतिः रामः हे गुह अस्माकं प्रियम् अतनीः अकार्षीः—तनोतेर्लुङ—इदानीम् अद्य आत्मीयां स्वकीयां नगरीं शृङ्गबेरपुरं याहि गच्छ इत्यादिक्षत् प्रजिघाय—स च गुहश्च नरपत्यादेशं रामाज्ञां प्रत्यादिक्षत् तिरश्चकार—प्रत्यादेशो निराकृतिः इत्यमरः—दिश अतिसर्जने इत्यस्मात् लुङि रूपम् (जलधरमाला वृत्तम् अस्मिन् पद्ये—अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ इति लक्षणम् ।। ६-२२ ।।

(प्रद्यो-६-२३) **न यामीति ।** हे राघव अहं शृङ्गबेरं प्रति न यामि (यतः) यूयं पुनरपि अयोध्यां न याथ—न गच्छथ—लोकोत्तमे लोकोत्कृष्टे त्वयि अटवीं प्रविष्टे सति लोकाधमः अल्पोऽहं पुरं शृङ्गबेरं कथं वा यामि कथं गच्छामि ।। ६-२३ ।।

(प्रद्यो-६-२४) **जरन्निति ।** जरन् वृद्धः ते पिता दशरथः जगदीश्वरोऽपि किं जानति—किम् अवगच्छति—न किमपीत्यर्थः—अज्ञाने जरत्त्वमेव कारणमनुसन्धेयम्—वसिष्ठः किं जरठः किं वृद्धः—वृद्ध एव न भवतीत्यर्थः—किम् क्षेपे—अमात्यमौर्ख्यात् सचिवानां मौर्ख्यात् अधिकारिमौग्ध्यात् अधिकारिणां मूढत्वाच्च आढ्यंभविष्णुः उत्कृष्टो भवन्—कर्तरि भुवः खिष्णुच्खुकञौ इति खिष्णुच् प्रत्ययः—खित्यनव्ययस्येति मुमागमः—त्वम् अरण्यम् आगाः समागतोऽसि ।। ६-२४ ।।

(प्रद्यो-६-२५) **निष्कासनेति ।** निष्कासनस्थस्य—निष्कशब्देन साष्टशतसुवर्णम् उच्यते—साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले—दीनारेऽपि च निष्कोऽस्त्री इत्यमरः—साष्टशतसुवर्णसिंहासनस्थस्य निरागमः अनपराधस्य ते नगर्याः निष्कासनम् अयोध्यापुरतो निरासनं केन पुरुषेण भवेत्—भावितव्यम्—दशरथेन निष्कासनमिति चेत् तत्राह—कामान्धवाक्यैः कामातुरस्य दशरथस्य वचनैः करस्थिताम्—स्वाधीनामित्यर्थः—धरित्रीम् उज्झसि त्यजसि—अत्र एतस्मिन्नर्थे का बुद्धिः ।। ६-२५ ।।

(प्रद्यो-६-२६) वनवासे अनुपपत्तिम् आशङ्कते—**एषोऽनुज इति ।** एषोऽनुजः असौ लक्ष्मणस्तु शिशुः इयं बधूः तव जाया नवोढा नववधूः—उभयोर्वनवासो नोपपद्यते इति भावः—तथापि अमी त्रयः यूयम् अटवीम् अरण्यम् अटथ याथ (इति इदं न युज्यते) भूभारकौ दशरथभरतौ भविष्यतः इति चेत् (-तत्राह-) वृद्धः पिता

यमसमीपगतः यमपुरं गतः—आसन्नमरणः इत्यर्थः—समर्थः शक्तः भरतः परदेशवर्ती —युधाजिद्गृहे निवसन्नित्यर्थः—भुवो भर्ता क्व संरक्षकः कथं भवेत्—कर्मणि षष्ठी ॥ ६-२६ ॥

(प्रद्यो-६-२७) **अत इति ।** अतः अस्मात् कारणात् अयोध्यां स्वां पुरी प्रति निवर्तस्व—आत्मानं शरीरम्—आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि इति वैजयन्ती—किमर्थं किप्रयोजनम् (कस्मै प्रयोजनाय) अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इत्यमरः—आयासयसे श्रमयसे—निरागाः अपराधरहितः सन्—आगोऽपराधो मन्तुश्चेत्यमरः—वधूप्रलापेन कैकेय्याः अनर्थवचनेन—प्रलापोऽनर्थकं वचः इत्यमरः—सजानिः जायासहितः सन्—जायाया निङ इति समासान्तः निङ—सोदरेण लक्ष्मणेन सह वृथा व्यर्थमेव आगाः समागतोऽसि—इणो लुङ ॥ ६-२७ ॥

(प्रद्यो-६-२८) **किरातसैन्यैरिति ।** हे राम बहुभिः अनेकैः मदीयैः किरातसैन्यैः किरातसेनासमूहैः त्वदीयं धाम स्वकीयं स्थानम्—अयोध्यामित्यर्थः—धाम देशे गृहे रश्मौ स्थाने तेजःप्रभावयोः इति विश्वः—रणधाम अयोध्यानिरोधं करवाम—निष्कारणं निर्निमित्तमेव त्वत्प्रतिपक्षबुद्धीन् तान् भरतस्य बन्धून् निष्कासयामः निरासयामः ॥ ६-२८ ॥

(प्रद्यो-६-२९) **तव शिरसीति ।** तव शिरसि जटाना बन्धनं कारयित्वोः पित्वोः मातापित्रोः कैकेयीदशरथयोः चरणनिगलबन्धं पादयोः शृङ्खलाबन्धम्—अथ शृङ्खले अन्दुको निगडोऽस्त्री स्यादित्यमरः—कारयिष्यामि—पुनरयोध्यां प्रविश—अनन्ययोध्याम् अन्यैर्योद्धुमशक्याम् अयोध्यां पालय—दण्डसाध्याः (सामदानभेददण्डेषु) चतुर्थोपायसाध्याः साधनीयाः रणभुवि युद्धभूमौ खण्डशः करणीयाः हन्तव्याः ॥ ६-२९ ॥

(प्रद्यो-६-३०) तत्सामर्थ्यं कथं विद्यते तत्राह—**शतानीति ।** इह अत्र शृङ्गबेरे मे मम नावां तरणीनाम्—स्त्रियां नौस्तरणिस्तरिः इत्यमरः—पञ्च शतानि सन्ति —विद्यन्ते—प्रतिनु एकैकस्यां तरण्याम् अमी पुरोवर्तिनः नाविकाः तरणितारकाः पञ्च शतानि सन्ति—नौद्व्यचष्ठन् (४-४-७) इति ठन् प्रत्ययः—प्रतिनाविकम् एकैकस्य नाविकस्य धनुर्धराः चापधराः समरानिवर्तिनः युद्धे परिवृत्ति न व्रजन्तः सहस्रसंख्याः भटाः सन्ति ॥ ६-३० ॥

(प्रद्यो-६-३१) **कर्बुरेति ।** कर्बुरदोर्बलचण्डाः कर्बुरा निशाचराः—रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः इत्यमरः—तेषामिव दोर्बलं बाहुबलम्—तेन चण्डाः

---प्रचण्डाः---कर्बुरखर्जूरखचितकोदण्डाः कर्बुरम् शातकुम्भम्---गाङ्गेयं भर्म कर्बुरमित्यमरः---खर्जूरं रजतम्---दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि इत्यमरः---ताभ्यां खचितकोदण्डाः प्रत्युप्तचापाः---वनाद्रिसंचाराः वनेषु अद्रिषु च संचरन्तीति तथोक्ताः मे मम भटाः योधाः अर्बुदमपि सन्ति---न्यर्बुदमपि सन्ति ।। ६-३१ ।।

(प्रद्यो-६-३२) **ससारथाविति ।** ससारथौ सुमन्त्रसहिते दाशरथौ त्वयि रथस्थे सति धन्वी धनुष्मान् रथेन सज्जः सन्नद्धः सन् अहम् एकरथोऽस्मि---एको रथो यस्य सः---एकरथिकोऽस्मीत्यर्थः---मम अप्रमेयम् असंख्यं किरातसैन्यम् किरातसेनासमूहश्चास्ति---स्वां पुरीम् अयोध्यां प्रतष्ठिस्व निवर्तस्व---समवप्रविभ्यः स्थः इत्यात्मनेपदम् ।। ६-३२ ।।

(प्रद्यो-६-३३) **श्रुत्वेति ।** इति पूर्वोक्तं शबराधिपस्य गुहस्य वाक्यं श्रुत्वा हृष्टौ गुहस्य वचनात् प्रहृष्टौ तौ अनुजसारथी लक्ष्मणसुमन्त्रौ च दृष्ट्वा मन्दरशैलधीरः मन्दराद्रिवद् गम्भीरः रघुवंशदीपः रघुवंशस्य प्रकाशकः रामः मन्दं यथा भवति तथा हसन् वक्ष्यमाणप्रकारेण बभाषे ।। ६-३३ ।।

(प्रद्यो-६-३४) **भक्तोऽसीति ।** हे निषादाधिप गुह मम भक्तोऽसि---भक्तिमान् असि---शक्तोऽसि सामर्थ्यवान् असि---अनुरक्तोऽसि प्रीतिमान् असि---दासोऽसि अनुचरोऽसि---अत एव राज्यं शाधि पालय---हुझल्भ्यो हेर्धिः इति धिरादेशः---हे गुह वनगोचराणां वनं गोचरः प्रयोजनं येषां ते तथोक्ताः---तेषां वनेचराणां किरातानाम् ---तत्पुरुषे कृति बहुलम् इति अलुक्---एको राजा त्वं नः अस्माकं सहायोऽसि---अत्र गङ्गाप्रतरणरूपं कार्यं हृदि निधाय सहाय इत्युच्यते ।। ६-३४ ।।

(प्रद्यो-६-३५) हे गुह कुलोचितं तव कुलस्यानुरूपम् बलोचितं---शक्त्यनुरूपं च वक्षि ब्रवीषि---[3]गङ्गाप्रतीर्णौ गङ्गाप्रतरणे मम कर्णधारः नाविकः भव---प्रतीर्णिः इत्यत्र तृधातोः क्तिनि रूपम्---ऋल्वादिभ्यः क्तिन् निष्ठावद् वक्तव्यः इत्यनेन निष्ठावद्भावात् तकारस्य नकारः (रदाभ्यां निष्ठातो नः पूर्वस्य च दः (८-२-४२) इत्यनेन)---कर्णधारस्तु नाविकः इत्यामरः---तथा हि सत्यव्रतानां सत्यसन्धानां रघूणां बालेषु वृद्धेषु च असत्यं नास्ति ।। ६-३५ ।।

(प्रद्यो-६-३६) **व्यतिव्रजेतामिति ।** पुष्पवन्तौ सूर्याचन्द्रमसौ---एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ इत्यमरः---व्यतिव्रजेतां यदि व्यत्यासेन गच्छेतां चेत्---पश्चिमे उदयं गत्वा प्राक् अस्तमयं भजेतां चेत् इत्यर्थः---निखिलाश्च ताराः समस्तानि उडूनि खात् आकाशात् निष्पतेयुश्चेत् पतिताश्चेत्---मेरुः चलेद् यदि---अनलः

शीतोऽस्तु शीतलो यदि स्यात् तदा तस्मिन् कालेऽपि रघवः (रघुकुलोत्पन्नाः) मिथ्या न वदन्ति—मिथ्येत्यव्ययम् ।। ६-३६ ।।

(प्रद्यो-६-३७) **दत्त्वेति ।** प्रजानां पतिः दशरथः केकयनन्दनायै कैकेय्यै वरं दत्त्वा अद्य इदानीम् कथं न दद्यात्—सर्वप्रकारेण वरं दद्यादेवेत्यर्थः—वनं व्रजामि वनं प्रति गच्छामि इति (उक्त्वा) निरेत्य निर्गत्य रामोऽहं जनापहास्यः जनानाम् अपहसनीयः सन् कथं निवर्तेय कथं निवृत्तो भवेयम्—निवृत्तो न भवामि ।। ६-३७ ।।

(प्रद्यो-६-३८) **पितराविति ।** यद् यस्मात् गुरू पितरौ कैकेयीदशरथौ ममानुरोध्यौ ममानुवर्तनीयौ तत् तस्मात् तदाज्ञया अयोध्याम् अमुचम् अयोध्याम् अत्यजम्—मुच्लृ मोक्षणे इत्यस्मात् लुङि रूपम्—पुपादीत्यनेन च्लेरङादेशः—तयोराज्ञयैव समचीवरयावहि वल्कलानि आच्छादयाव—नौ आवयोः जटाभरस्तु इह स्वपुर्यां शृङ्गवेरपुर्याम् श्वो भविता भविष्यति ।। ६-३८ ।।

(प्रद्यो-६-३९) **तद् याहीति ।** तत् तस्मात् याहि गच्छ निजालये स्वगृहे निद्राहि निद्रितो भव—श्वः प्रातः त्वं नाविकः सन् नदीं भागीरथीम् अस्मान् तारय—राजसूतः दशरथसारथिः सुमन्त्रः पुरम् अयोध्यां रथं नेष्यति रथं गमयिष्यति—उभयत्र द्विकर्मकत्वम्—त्वमपि शृङ्गवेरपुरम् अधिष्ठास्यसि—अधिशीङित्यादिना (आधारस्य) कर्मत्वम् ।। ६-३९ ।।

(प्रद्यो-६-४०) **इति ब्रुवाणमिति ।** इति अनेन प्रकारेण ब्रुवाणम् उक्तवन्तं रामं प्रणिपत्य उत्थाय धन्वी कार्मुकी कवची निषङ्गी च सन् सन्नाहिना सन्नाहवता सौमित्रिणा लक्ष्मणेन सह वृक्षतले निषण्णः आसीनः सन् जाग्रदेव विनिद्र एव उवास तस्थौ—जाग्रदित्यत्र नाभ्यस्तात् शतुःइति निषेधात् नुमभावः ।। ६-४० ।।

(प्रद्यो-६-४१) **कथाविशेषानिति ।** सौमित्रिः लक्ष्मणश्च गुहाय कथाविशेषान् वृत्तान्तविशेषान् कथयन् (अधिज्यधन्वा—समारोपितकार्मुकः) तस्थौ—सुमन्त्रः रथान्तिके रथसमीपे पल्लवक्लृप्तशय्यः पल्लवैः किसलयैः क्लृप्ता शय्या शयनं यस्य सः तथोक्तः चिन्ताकुलः सन् न्यषदत् उपविशति स्म—सीदतेः लुङ ।। ६-४१ ।।

(प्रद्यो-६-४२) **प्रवालशय्येति ।** रात्रौ वनशाखिमूले प्रवालशय्याम् अधिशय्य तत्र शयित्वा—अधिशीङित्यादिना आधारस्य कर्मत्वम्—वल्कावगुण्ठी वल्कलेन—कृतावगुण्ठनः सन् स रामः इष्वासतूणीरकृतोपबर्हः सन् रामासहितः सीताममेत सुष्वाप निदद्रौ ।। ६-४२ ।।

(प्रद्यो-६-४३) **प्रवालशयनमिति।** तदा निद्रासमये तरुमूले वृक्षमूले प्रवालशयनं पल्लवनिर्मितशयनं रघुपतेः रामस्य फणीन्द्रशयनं (इव) बभौ—तदङ्घ्रिविनिपीडनं तस्य रामस्य पादसंवाहनं विदधती कुर्वती जनकात्मजा सीता (च) लक्ष्मीः (इव) बभूव ॥ ६-४३ ॥

(प्रद्यो-६-४४) **सदारे इति।** सदारे सीतासमेते कुमारे रामे वनद्रौ वनवृक्षमूले शयाने निद्राति सति—सुमन्त्रे [4]विशद्रौ विह्वले—रथाग्रे रथस्य पुरोभागे निषद्रौ—आसीने सति—उभयत्र ताच्छील्ये रु-प्रत्ययः (दाधेट्सिशदसदो रुः (३-२-१५९) इत्यनेन)—निषादाधिनाथे गुहे विषण्णे विह्वले निषण्णे आसीने सति रात्रिः कराला भयंकरा सती कथंचिद् व्यतीयाय व्यत्यगात् (भुजंगप्रयातं वृत्तम्) ॥ ६-४४ ॥

(प्रद्यो-६-४५) **उषसीति।** उषसि प्रभातसमये मरुति वायौ मन्दं यथा भवति तथा वाति सति मन्दारमालाकलकलयुतकाकव्यूहकोलाहलेन—मन्दाराः पारिजातवृक्षाः—मन्दारः पारिजातकः इत्यमरः—तेषां मालासु पङ्क्तिषु कलकलेन युतानां युक्तानां काकानां गृहबलिभुजां व्यूहस्य समूहस्य कोलाहलेन असौ रामः जनकतनूजया सीतया सह जागरामास—मूर्ध्नि शिरसि मुकुलितकरपद्मः मुकुलितकराम्बुजः सन् गङ्गां भागीरथीं ववन्दे प्रणनाम ॥ ६-४५ ॥

(प्रद्यो-६-४६) **उदयेति।** उदयगिरिशृङ्गासङ्गिनि उदयशिखरिणः उदयाचलस्य शृङ्गे शिखरे आसङ्गवति द्वादशात्मनि सूर्ये—द्वादशात्मदिवाकराः इत्यमरः—अरुणकिरणजालैः अरुणवर्णैः किरणसमूहैः सह किंचिद् अभ्युज्जिहाने किंचिद् अभ्युदिते सति सरामः सीतासमेतः सन् सुरसरिति भागीरथ्यां प्रातः प्रातःकाले अस्नात् स्नानं कृतवान्—सपदि तदानीमेव सहसुमन्त्रः सुमन्त्रसमेतः सन् लक्ष्मणश्च उक्तमन्त्रः उच्चारितमन्त्रः सन् अस्नात् ॥ ६-४६ ॥

(प्रद्यो-६-४७) **नैय्यग्रोधमिति।** गङ्गारोधसि भागीरथीतीरे आरात् समीपे कर्णधाराधिपेन गुहेन नैय्यग्रोधं न्यग्रोधसंबन्धि क्षीरम् आनाय्य रामः भृङ्गश्रेण्याः भ्रमरपङ्क्तेः मेचकेन नैल्येन अनीचकान्ति केशपाशं वेणीं कर्तुं जटाः कर्तुं मुमोच ॥ ६-४७ ॥

(प्रद्यो-६-४८) **सरोजनेत्रस्येति।** सरोजनेत्रस्य कमललोचनस्य पुरोजनेः अग्रजस्य रामस्य जटाकलापं जटासमूहं विरचय्य लक्ष्मणः पुरः स्थितः रामस्य पुरस्तात् स्थितः सन् तदानीं भूतपञ्चके पञ्चसु भूतेषु शोचति आक्रोशति सति तादृशं तादृग्विधं जटाकलापं यत्नेन प्रयत्नेन बबन्ध—आत्मनोऽपि जटाबन्धनं चकारेत्यर्थः ॥ ६-४८ ॥

(प्रद्यो-६-४९) **त्रस्तेति ।** सीता त्रस्ता भीता सती—विकृतवेषौ रामलक्ष्मणौ दृष्ट्वेत्यर्थः—शिरस्ताडयति स्म—शिरस्ताडनं चकार—सुमन्त्रः विलपन् भूमौ लुलोठ—गुहः स्वम् आत्मानं स्वकीयशरीरं हन्तुम् उदायुधः (उद्धृतायुतः सन्) बन्धुतया बन्धुसमूहेन बलात् बलात्कारेण न्यषेधि निषिद्धः अभूत् ।। ६-४९ ।।

(प्रद्यो-६-५०) **तटस्थेति ।** तटस्थसिद्धर्षिकुटुम्बिनीनाम् भागीरथीतीरस्थानां सिद्धानाम् ऋषीणां च कुटुम्बिनीना पत्नीनाम्—दाराः स्यात्तु कुटुम्बिनी इत्यमरः—आबालवृद्धम् रुदतां जनानां भिल्लाङ्गनानां च शबरस्त्रीणां च बहुबाष्पपूरैः अधिकाश्रुप्रवाहैः गङ्गाप्रवाहः द्विगुणीबभूव—अनेन एतेषां दुःखातिशयः उक्तः ।। ६-५० ।।

(प्रद्यो-६-५१) **न साश्रव इति ।** शुचा दुःखेन अन्विताः समेताः रथ्यहयाः रथाश्वाः साश्रवः सबाष्पाः सन्तः न जिहेषिरे हेषास्वनं न चक्रुः—नाविकाः कर्णधाराः नौषु तरीषु मिथः अन्योन्यं न बभाषिरे—तटद्रुमस्थाः अण्डजाः पक्षिणश्च विरेटुः चुक्रुशुः—मृगाश्च बाष्पं मुमुचुः—रामवनवासेन तिर्यग्जन्तूनामपि दुःखातिशयोऽभूत्—किं पुनरितरेषामिति भावः ।। ६-५१ ।।

(प्रद्यो-६-५२) **उपारतायामिति ।** भागीरथीरोधसि भागीरथीतीरे नरेन्द्रसूनवोः रामलक्ष्मणयोः जटासु बद्धासु सतीषु रुदतां रोदनं कुर्वतां जनानां बाष्पवृष्टौ उपारतायां शान्तायां सत्यां खात् आकाशात् नन्दनपुष्पवृष्टिः सुरकुसुमवर्षं पपात ।। ६-५२ ।।

(प्रद्यो-६-५३) **तत इति ।** ततः अनन्तरं प्रसन्नधीः निर्मलबुद्धिः मन्त्रकोविदः सः जननाथनन्दनः रामः सुमन्त्रम् आर्य इति समाहूय तन्मुखे बाष्पं करेण हस्तेन परिमृज्य मन्दं यथा भवति तथा हसन् वक्ष्यमाणप्रकारेण जगाद बभाषे ।। ६-५३ ।।

(प्रद्यो-६-५४) **किं रोदिषीति ।** हे सुमन्त्र प्राकृतवत् पृथग्जनवत्—मध्ये आगतजनवच्च—किं रोदिषि किमर्थं रोदनं करोषि—रुदादिभ्यः सार्वधातुके इत्यनेन सार्वधातुकस्य इडागमः—प्रवयाः वृद्धः—प्रवयाः स्थविरो वृद्धः इत्यमरः—मम पिता दशरथः भवद्विया तव बुद्ध्या अयोध्यां प्रशास्ति पालयति—वन्यां वनं प्रति यियास्वोः यातुम् इच्छ्वोः आवयोः बुद्धिं तथा वद यथा वनाद् आवाम् पुनः आजिहीर्वाहि पुनः आगच्छेव ।। ६-५४ ।।

(प्रद्यो-६-५५) **तत् सारथे इति ।** तत् तस्मात् हे सारथे सुमन्त्र संज्जयावहम् (साधुजयावहम्) तं शताङ्गं रथम्—शताङ्गः स्यन्दनो रथः इत्यमरः—शतयोजनातिगैः शतयोजनानि अतीत्य गच्छद्भिः अश्वैः सज्ज्जं कुरु संयोजय—अद्यैव संगवे काले—उदयादारभ्य षड्घटिकापर्यन्तःप्रातःकालः—ततः परं षड्घटिकापर्यन्तः संगवकालः

तस्मिन् साकेतम् उपेहि अयोध्यां प्रति गच्छ—तथा स्थितं दुःखितं तातं दशरथम् उपेत्य सान्त्वय आश्वासय ।। ६-५५ ।।

(प्रद्यो-६-५६) **यथेति ।** मयि प्रोषुषि प्रवासं गते सति पुत्रवत्सलः पिता दशरथः आमदागमम् मदागमनपर्यन्तम् वपुः शरीरं यथा न जह्यात् न त्यजेत् तथा भगवान् षड्गुणोपेतः पुरोहितो वसिष्ठः तिरोहितः वियुक्तः क्षणमपि मा वस्थित क्षणकालमपि न तिष्ठतु—ष्ठा धातोः अवपूर्वस्य लुङि रूपम्—समवप्रविभ्यः स्थः इत्यात्मनेपदम् —स्थाघ्वोरिच्चेति इकारः—ह्रस्वादङ्गादिति सकारलोपः—न माङ्योगे इति अडा-गमनिषेधः ।। ६-५६ ।।

(प्रद्यो-६-५७) **प्राणानिति ।** जरती वृद्धा ममाम्बा मम माता कौसल्या अमुं पुरोवर्तिनं मां यदि क्षणं न पश्येत् तर्हि प्राणान् विमुच्चेत् त्यजेत्—तत् तस्मात् कारणात् आशु शीघ्रं गत्वा सवनं वनसहितं मन्नाम मम नामधेयं जपित्वोः रामो वनाय गत इति वदतोः—सततमिति पाठे निरन्तरमित्यर्थः—जपित्रोः पित्रोः कौसल्यादशरथयोः शुचं दुःखम् उल्लुनीहि नाशय ।। ६-५७ ।।

(प्रद्यो-६-५८) **प्रणिधिभिरिति ।** अविरतम् अनवरतम् सुकलाभिरतम् शोभन-कलासु विद्यासु आसक्तम् सकलाभिमतम् सकलजनानाम् अभिमतम् युधाजिदागारग-तम् युधाजिद्गृहं प्राप्तवन्तं रथवाजिमदेभरतम् रथेषु वाजिषु अश्वेषु मदेभेषु मत्तगजेषु अभिरतम्—नरेभरतमिति पाठे नरेषु मनुष्येषु इभेषु गजेष्विति ज्ञेयम्—भरतं प्रणिधिभिः गूढचारैः झटिति शीघ्रम् आनयत—एतैर्विशेषणैः भरतस्य राजलक्षणा-न्युक्तानि ।। ६-५८ ।।

(प्रद्यो-६-५९) **स चेति ।** स च भरतश्च परमेष्ठिसुतस्य ब्रह्मसुतस्य वसिष्ठ-मुनेः गिरं वचनं सुष्ठु सम्यक् अनुतिष्ठतु अनुसन्दधातु—नयनिष्ठपटिष्ठयविष्ठसखः नयनिष्ठाः नीतिज्ञाः पटिष्ठाः कार्यकुशलाः यविष्ठाः युवानः—तेषां सखा सन् पितुः राज्यपदम् अधितिष्ठतु-अधिशीङित्यादिना कर्मत्वम् ।। ६-५९ ।।

(इतः परं प्रद्योतनी व्याख्या न लभ्यते । आगामिभागस्य उपलभ्यमाना संजीविनी व्याख्या दृश्यताम् ।)

NOTES TO PRADYOTANĪ—Canto VI

[1] See the introduction about the usage: AŚVAM AVARUHYA. for verse 6-7.

[2] See the introduction on the *dhvani* here. for verse 6-18

[3] MS. 1, MS. 7, the *Pradyotanī* and the *Saṃjīvinī* read: *Gaṅgāpratīrṇau bhava karṇadhāraḥ*. Only Bombay edn. reads: *kālocitaṃ vetsi ca karṇadhāraḥ*. It seems to imply that the MSS of the Bombay edn. were entirely different from, and have no relation to, the MSS that are now collated by me.

[4] From the roots: *śadḷ—śātane* and *Ṣadḷ—viśaraṇa-gaty-avasādaneṣu*, the forms: *śadruḥ* and *sadruḥ* are derived, according to the rule: *Dā-dheṭ-si-śada-sado ruh* (III. 2. 59). *śadru* is in the sense of *śīrṇa* shattered, and *sadru* is in the sense of "*sitting* on" (or seated). With the prefix "*ni*", and as a result of the cerebralization we have the form as: *niṣadru* (*niṣadrau*).

(The Commentary *Pradyotanī* is available only up to the verse VI. 59. For the further portion the other Commentary *Saṃjīvinī*, is provided to the extent available.)

उदारराघवस्य महाकाव्यस्य व्याख्या [1]संजीविनी
[2]श्रीराम्-पल्लि-गोपीनाथसूरिविरचिता

(तत्र तृतीयसर्गे द्वादशस्य पद्यस्य द्वितीयपादभागमारभ्यैव इयं व्याख्या उपलभ्यते)

(संजीविनी-३-१२) (वागुरिकैः) लुब्धकैः—(वागुराशब्दात्) चरति (४-४-८) इति सूत्रेण ठक् प्रत्ययः—क्लृप्तानि रचितानि कुटीराणि पर्णच्छादितगृहाणि यस्यां सा—तथोक्ताम् ताम् (अटवीम् अगाहत)—पुनः किंभूताम्—तत्राह—करिपोताः कलभाः—तेषां दन्ताः—किटयः सूकराः—तेषां पोत्राणि—मुखाग्राणि—(दन्ताः पोत्राणि चेति यान्युक्तानि) तान्येव खनित्राणि कुद्दालाः—अतिलूधूसूखनसहचर इत्रः (३-२-१८४) इति सूत्रेण इत्रप्रत्ययः (खनित्रशब्दे खनु अवदारणे इति धातोः)—तैः क्षतेभ्यः वामलूरेभ्यः विदारितवल्मीकेभ्यः धुता समुद्धुता धूमला कृष्णलोहिता (धूम्रधूमलौ कृष्णलोहिते इत्यमरः) धूलिः यस्या सा—तथोक्ताम् ताम् (अटवीम्) अगाहतेति संबन्धः ।। ३-१२ ।।

(संजीविनी-३-१३) **अभितो वनमिति** । दुरन्तमनवधिकं तद् वनम् अभितः तस्य वनस्य समन्तात्—अभितः परितः इत्यादिना षष्ठ्यर्थे द्वितीया—अवलोक्य दृष्ट्वा सकलः समस्तो द्विजलोकः मुनिगणः पथि मार्गे मोद्विजिष्ट मा भैषीत् (इति धिया)—ओ विजी भयचलनयोः इत्यस्मात् लुङि रूपम् । न माङ्योगे (६-४-७६) इति प्रतिषेधादडागमाभावः—सुमनाः सुमनस्कः सः मुनिनाथो विश्वामित्रः धनुषि लाघववन्तौ लघुत्ववन्तौ राघवौ रामलक्ष्मणौ समनाहयत् सज्जयामास । मुनिजनः वनं दृष्ट्वा भयं न प्राप्नुयादिति रामलक्ष्मणौ सज्जयामासेत्यर्थः ।। ३-१३ ।।

(संजीविनी-३-१४) **रघुनन्दनाविति** । गुरोर्विश्वामित्रस्य वन्दनेन नम्रौ रघुनन्दनौ रामलक्ष्मणौ च धनुषी शरासने गुणिनी ज्यासमेते विधाय कृत्वा [3]धृतवन्तौ धारयामासतुः । तौ रामलक्ष्मणौ अध्वनि मार्गे अनुवेलं गुणध्वनिभिः मुनिमण्डलाय मुनिबृन्दाय मुदं विदधाते संतोषं दधतुः । गुणध्वनिं श्रुत्वा मुनिसमूहः संतोषं जगामेत्यर्थः ।। ३-१४ ।।

(संजीविनी-३-१५) **ग्रहमण्डलेष्विति** । गाधितनूजो विश्वामित्रः अटव्यां वने तपोनिधिषु मुनिषु मध्ये—निर्धारणे सप्तमी—अरुचत् दिदीपे । रुच दीप्तावित्ये-

तस्मात् लुङि रूपम् । पुषादीत्यादिना (३-१-५५) च्लेरङादेशः । कथमिव (दिदीपे ——तत्राह)——शरदि शरत्काले ग्रहमण्डलेषु नवग्रहमण्डलमध्ये विवस्वान् सूर्य इव——उडुमण्डलेषु——नक्षत्रमण्डलमध्ये कलानिधिः——इन्दुरिव पुनः कथमिव——मरुतां देवानां गणेषु समूहमध्ये मरीचिः मरीचिर्महर्षिरिव (च दिदीपे) । सूर्योपमानेन तेजोभूयिष्ठत्वमुक्तम् । चन्द्रोपमानेन दर्शनीयत्वमुक्तम् । मरीचिसाम्येन अनुभावाधिक्यमुक्तम् ।। ३-१५ ।।

(संजीविनी-३-१६) **वनराजीति ।** वनराजिभाजि——वनपङ्क्तिगते मुनिराजि विश्वामित्रे अधिकप्रकाशनशीले सति मुनीनां गणः मुनिसमूहः प्रचकाशे दिदीपे । कथमिव——महनीयतेजसि अधिकद्युतौ अर्यमणि सूर्ये मयूखसहस्रैः किरणसहस्रैः सह उदिते उदयं गते सति सूर्यमणीनां सूर्यकान्तशिलानां यथा समूहः तथा (समूह इव) प्रचकाशे ।। ३-१६ ।।

(संजीविनी-३-१७) **वनेति ।** अनिलो वायुः मुनिलोकमुख्यं मुनिश्रेष्ठं विश्वामित्रं निषिषेवे उपतस्थे——(परिनिविभ्यः इत्यादिना स्थादिष्वभ्यासेन चाभ्यासस्य-८-३-७०-८-३-६४-इत्यनेन च) उभयत्रापि मूर्धन्यादेशः——किंभूतो वायुः——तत्राह——वनसिन्ध्विति——वनसिन्धवो वननद्यः——सिन्धुर्ना सरिति स्त्रियाम् इत्यमरः——तासु मग्नाः मदसिन्धुराः मदप्रधानगजाः——वारणो द्विरदः सामोद्भवः सिन्धुरश्च इति हलायुधः——तेषां दानम्——तद्द्रवस्य मदोदकस्य गन्धेन परिमलेन बन्धुरितं मन्थरं गम्भीरं यस्य सः तथोक्तः——अनेन शैत्यमान्द्ये कथिते——पुनः किंभूतो वायुः——घनगन्धसारान् श्रेष्ठचन्दनद्रुमान् घनसारं कर्पूरं च विलङ्घ्य अतिक्रम्य वर्तमानः——मलयादागतः इत्यर्थः——अनेन सौरभमुक्तम् ।। ३-१७ ।।

(संजीविनी-३-१८) **मकरन्देति ।** अलिबृन्दं भ्रमरकदम्बकम् मकरन्दलुब्धं पुष्पसाभिलाषुकं सत् अरविन्दवनानि तामरसवनानि मन्दं यथा तथा व्यतिलङ्घ्य विहाय उपेत्य आगत्य (च) वने वञ्जुलाः अशोकाः——वकुलो वञ्जुलोऽशोकः इत्यमरः——तेषां वीरुध. शाखाः——मञ्जुलाः मनोज्ञाः——ताश्च ता वनवञ्जुलवीरुधश्च तथोक्ताः——तासां मञ्जरीषु नूतनस्तबकेषु कलितपुञ्जं व्याप्तसंघं सत् पथि मार्गे मञ्जु यथा तथा अगुञ्जीत् रुराव——गुञ्ज अव्यक्ते शब्दे इत्यस्मात् लुङि रूपम्——इट ईटीति सिचः सकारस्य लोपः ।। ३-१८ ।।

(संजीविनी-३-१९) **सशिखण्डकाविति ।** सशिखण्डकौ काकपक्षसहितौ——विधृतपिप्पलदण्डौ धृताश्वत्थदण्डौ——बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः इत्यमरः——वरवर्णिनौ ब्रह्मचारिणौ कुवलचम्पकवर्णौ——नीलोत्पलचम्पककुसुमवर्णौ——रामो नीलो-

त्पलवर्णः लक्ष्मणः चम्पककुसुमवर्ण इत्यर्थः—[4]मददृशौ मदप्रधानलोचनौ दशरथतनूजौ रामलक्ष्मणौ मुनिना विश्वामित्रेण समं (सममयं) ददृशाते अलक्ष्येताम्। कालाध्वनोरत्यन्तसंयोगे इति द्वितीया ॥ ३-१९ ॥

(संजीविनी-३-२०) **नवमालिकेति।** पुराणपुरुषस्य अंशौ—तौ च तौ कुमारौ च शिशू—रामलक्ष्मणौ—मधुमाधवाविव चैत्रवैशाखाविव पुरतः विश्वामित्रस्य पुरस्तात् शुशुभाते रेजतुः—विशेषणैरुभयं विशिनष्टि—नवमालिकाकुसुमैः सप्तलाकुसुमैः—सप्तला नवमालिकेत्यमरः—नद्धशिखण्डौ नद्धकाकपक्षौ—मधुमाधवयोरपि नवमालिकाकुसुमानि विकसन्ति—नवकर्णिकारैः नूतनकर्णिकारकुसुमैः कृतकर्णाभरणौ—कर्णिकारकुसुमान्यपि तदा विकसन्ति—(तादृशौ तौ शुशुभाते) ॥ ३-२० ॥

(संजीविनी-३-२१) **नवपल्लवेति।** वनदेवतानां वनाधिदेवतानाम् आलिभिः पङ्क्तिभिः—वीथ्यालिरावलिः पङ्क्तिरित्यमरः—उभौ रामलक्ष्मणौ मुहुः आजुहुवाते पुनः पुनः आहतौ—ह्वेञ् स्पर्धायां शब्दे च इत्यस्मात् (कर्मणि) लिटि रूपम्। केन साधनेन मदभृङ्गविरुतच्छलेन मदप्रधानझंकारमिषेण—किभूताभिः नवपल्लवाङ्गुलिभिः नवाः पल्लवा एवाङ्गुलयो यासां ताः तथोक्ताः—ताभिः—पुनः किभूताभिः—परिमलोल्लसिताभिः परिमलेन आमोदेन उल्लसिताभिः मनोज्ञाभिः—वनदेवताशब्दस्य स्त्रीलिङ्गत्वात् (नायिकाविभ्रमाश्च) उपलक्ष्यन्ते—सा च विदग्धवचनैः प्रियाह्वानं करोति—नूतनपल्लवसदृशाङ्गुलिभिः संज्ञां करोति—विकसत्पङ्कजसदृशनयनविकासान् करोति—विमर्दोत्थगन्धेन उल्लसिता भवति ॥ ३-२१ ॥

(संजीविनी-३-२२) **हरिपुण्डरीकेति।** अण्डजाः पक्षिणः—पतत्पत्रत्वाण्डजाः इत्यमरः—तेषां तुण्डानीव तुण्डानि मुखानि येषां ते तथोक्ताः—तैः इषुभिः बाणैः—हरिपुण्डरीककिरिगण्डकसंघान्—हरयः सिंहाः—पुण्डरीकाः व्याघ्राः—किरयः सूकराः—गण्डका मृगविशेषाः—तेषां संघाः समूहाः—तान्—अत्रखण्डताम् चिच्छिदतुः—खडि खण्डने इत्यस्मात् णौ चङि रूपम्—तदनन्तरम् वनानि परितः वनानां समन्ततः—अभितः परितः इत्यादिना षष्ठ्यर्थे द्वितीया—हरितो दिशश्च ध्वनयन्तौ—गुणध्वनिभिरित्यर्थः—रघुवीरौ रामलक्ष्मणौ मुनेर्विश्वामित्रस्य पुरतः चरतः स्म अगच्छताम् ॥ ३-२२ ॥

(संजीविनी-३-२३) **मधुमाधवाविति।** कुमारौ रामलक्ष्मणौ मधुमाधवौ चैत्रवैशाखौ इति विचिन्त्य ज्ञात्वा कलकण्ठाः कोकिलाः कलनिस्स्वनम् अव्यक्तमधुरस्वनं चकलिरे चक्रुः—रामलक्ष्मणौ मूर्तौ मधुमाधवौ इति मत्वा कोकिलाः पञ्चमस्वरेण चकुजरित्यर्थः—शिखिकण्ठाः मयूराः गुणशब्दं गुणध्वनिम् अब्दरवः मेघस्वन

इति अवयन्तो जानन्तः नगमण्डलेषु वृक्षसमूहेषु ननृतुः नृत्यन्ति स्म—नगावगौ शैलवृक्षौ इत्यमरः ।। ३-२३ ।।

(संजीविनी-३-२४) **मलयानिला इति ।** मलयानिलाः मलयमारुताः वनवल्लीः वनव्रततीः दुधुविरे कम्पयामासुः—वनवल्लयो वनलता अपि कुसुमानि चकरुः चिक्षिपुः —मलयमारुतेन कम्पितलताः कुसुमानि मुमुचुरित्यर्थः—तानि कुसुमान्यपि मधुपालीः भ्रमरपङ्क्तीः अमदयन् मदयन्ति स्म—विकीर्णपुष्पमकरन्दपानेन भ्रमरा मत्ता बभूवुरित्यर्थः—मधुपालयोऽपि भ्रमरपङ्क्तयोऽपि पथि मार्गे मधुरं यथा तथा रेणुः दध्वनुः —मकरन्दानुभवेन कलकण्ठाः सन्तः मधुपाः झंकारं चक्रुरित्यर्थः—धूञ् कम्पने क्र विक्षेपे रण शब्दे इत्येतेभ्यो धातुभ्यः लिटि रूपम् ।। ३-२४ ।।

(संजीविनी-३-२५) **रणदिति ।** वीरौ रामलक्ष्मणौ रणदस्त्रयोः ध्वनत्कोदण्डयोः संहितशरावपि संयोजितबाणावपि दयया अनुकम्पया आर्द्रहृदयौ—अनुकम्पितचित्तावित्यर्थः—तौ भवन्तौ रतिकेल्यां रतिक्रीडायां लोलः आसक्तः—स चासौ हरिणीगणश्च तथोक्तः—तस्य रन्तुः—अनेन दयार्द्रत्वं सूचितम्—नूतनकुरङ्गनियन्तुः क्रीडार्थं समागतकुरङ्गशिक्षकस्य हरिणस्य—कृष्णसारम्—अदयेताम् ररक्षतुः—अधीगर्थेत्यादिना कर्मणि षष्ठी—दय दानगतिरक्षणेष्वित्येतस्मात् लङि रूपम्—आतो ङितः (७-२-८१) इति सूत्रेण (आताम् इत्यत्रत्यस्य) आकारस्य इयादेशः । आद्गुण इति गुणे लोपो व्योर्वलीति यकारलोपः ।। ३-२५ ।।

(संजीविनी-३-२६) **किरिघर्घरेति ।** किरीणां सूकराणां घर्घरध्वनिषु परुषस्वनेषु सत्स्वपि केसरिणां सिंहानां नादे सत्यपि करिणां गजानां घीत्कृतेषु घीत्कारेषु सत्स्वपि खरे निष्ठुरे खड्गनां खड्गमृगानां विरावे ध्वनौ सत्यपि परुषे कठोरे महिषारवे महिषस्वने सत्यपि धनुषि ईश्वरौ निपुणौ पुरुषोद्घौ पुरुषोत्तमौ पुरुषश्रेष्ठौ रामक्ष्लमणौ —संघोद्घौ गणप्रशंसयोः (३-३-८६) इति उद्घशब्दः प्रशंसायां निपातितः—मनसि धाष्ट्र्यम् अधाष्टाम् दधतुः—धृञ् धारणे इत्येतस्मात् लुङि रूपम् । आदेशप्रत्यययोरिति षत्वम् ।। ३-२६ ।।

(संजीविनी-३-२७) **धनुरारवेणेति ।** धनुरारवेण गुणध्वनिना वनराजिम् वनपङ्क्तिम् उभन्तौ पूरयन्तौ—(उभ पूरणे इति तौदादिको धातुः)—तौ रामलक्ष्मणौ कमपि वन्यमिभं वनगजं न निजघ्नतुः न प्रजह्रतुः—नृपतेर्वन्यकरी [5]अवध्यः इति श्रुत्वा वनगजप्रहारणं न चक्रतुरित्यर्थः—अनवधीन् अनेकान् हरिणान् कृष्णसारान् रुरून् न्यङ्कूंश्च अवधिष्टाम् प्रजह्रतुः—हन धातोः लुङि रूपम्—लुङि च (२-४-४६)

इति हन्तेर्वधादेशः—अतो लोपस्य स्थानिवद्भावात् (अतो हलादेरिति) वृद्धेरभावः—शरैर्भीषितान् शरभमृगांश्च—निरभैत्ताम् बिभिदतुः—भिदिर्विदारणे इत्यस्मात् लुङि रूपम्—झलो झलीति सकारलोपः ।। ३-२७ ।।

(संजीविनी-३-२८) **अथ गौतमेति ।** अथानन्तरम् अर्कसमभाः सूर्यसमप्रभो मुनीन्द्रः विश्वामित्रः गौतमायतनम् गौतमाश्रमम् [6]एत्य प्राप्य अमुना गौतमेन समभावि पूजितः—अग्रजमध्ये ऋषिमध्ये चरता भरताग्रजेन रामेण पदरजोभिः पादपांसुभिः करणैः अहल्या गौतमवधूः पुरः (अग्रे) पुपुवे पूता—पूञ् पवने इत्यस्य धातोः रूपम् ।। ३-२८ ।।

(संजीविनी-३-२९) **उपलायमानेति ।** उपलायमानम् उपलवदाचरत्—उपमानादाचारे (३-१-१०) इति क्यङः प्रत्ययः—शरीरमपहाय त्यक्त्वा—गौतमशापेन (वृत्ताम्) उपलात्मिकां तनुं त्यक्त्वेत्यर्थः—अग्रे गौतमस्य पुरस्तात् अबलाकृतिः स्त्रीरूपा चपला यथा सौदामिनीव—तटित् सौदामिनी विद्युत् चञ्चला चपलापि च इत्यमरः—इयम् अहल्या गौतमवधूः तरसा (झटिति) महतां समाजं मुनीनां सभाम् अभिपत्य आगत्य शरिसा प्रणनाम ववन्दे—दण्डप्रणामं चकारेत्यर्थः—किंभूता—(तत्राह) [7]असमाजिररूपा—असमम् असदृशम् अजिरं शरीरम्—तस्य रूपं यस्याः सा तथोक्ता—अजिरं विषये काये इत्यमरः—गौतमशापेन चिरं शिलारूपेणावस्थितापि कान्तिसमेतरूपा इत्यर्थः ।। ३-२९ ।।

(संजीविनी-३-३०) **कुत इति ।** (सहमुनौ) मुनिसहिते सकुमारे रामलक्ष्मणसहिते कुशिकात्मजे विश्वामित्रे इयमहल्या कुत आगता कुतः समागता इति विस्मयमाने आश्चर्य गतवति सति अथ अनन्तरं सा अहल्या वृजिनव्यपायात् दुरितव्यपायात् निमित्तात् विकलङ्कमुखेन्दुः कलङ्कशून्यमुखचन्द्रा सती निजवृत्तं स्वकीयदुरितरूपवृत्तान्तं वक्ष्यमाणप्रकारेण निजगाद—किमिति—तत्राह ।। ३-३० ।।

(संजीविनी-३-३१) [8]**ऋषिवेषेति ।** यद् यस्मात् कारणात् ऋषिवेषदम्भयुजि मुनिवेषरूपकपटयुक्ते—गौतमवेषे इत्यर्थः—जम्भविरोधिनि पुरन्दरे अनुरोधिनी अनुरक्ता अहम् समगच्छे संगतास्मि—समो गम्यृच्छिभ्याम् (१-३-२९) इत्यात्मनेपदम्—(यद् यस्मात् कारणात्) तस्मात् कारणात् उपयन्ता गौतमः अधिमत्[9] मद्विषये—अव्ययं विभक्तीत्यादिना समासः—समन्तुम् सापराधम्—आगोऽपराधो मन्तुश्चेत्यमरः—मघवानम् [10]असहन् असहमानः सन् विफलो भवेति [11]त्रिकशून्यो भवेति अशाप्सीत्

शशाप——फलशब्देन त्रिकमुच्यते——त्रिकशून्यो भवेति शशापेत्यर्थः——शप उपालम्भे इत्यस्मात् लुङि रूपम् ।। ३-३१ ।।

(संजीविनी-३-३२) इदानीम् आत्मीयं शापमाह——**उपलेति** । हे चपले त्वम् उपलात्मिका शिलारूपा सती अत्र एतस्मिन् प्रदेशे असह्यं दुःखं क्लेशं कलयन्ती अनुभवन्ती सती वस तिष्ठ इति मह्यम् अशप्त मां शशाप——[12]श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः (१-४-३४) इति कर्मणि चतुर्थी——शप उपालम्भे इत्यस्मात् लुङि रूपम्——झलो झलीति (८-२-२६) (सिचः) सकारस्य लोपः——उत्तरार्धेन शापावधिमाह——अथ अनन्तरम् रामपदरेणुकणाः रामपादपांसुलेशाः त्वां पुरा पुनते पावयिष्यन्ति——इति——यावत्पुरानिपातयोर्लट् इति लृडर्थे लट्——(पुराशब्दयोगात्) कृपया पुनरप्यवदिष्ट उवाच——वद व्यक्तायां वाचीत्यस्मात् लुङि रूपम् ।। ३-३२ ।।

(संजीविनी-३-३३) **मघवन्निमित्तमिति** । मघवा इन्द्रः निमित्तं निमित्तकारणं यस्य तत् तथोक्तम्——दुष्कृतविषये इन्द्रः निमित्तकारणमित्यर्थः——अतः कारणात् अघवत् दुष्कृतवत् मम देहं मुनिशापेन गौतमशापेन दग्धम्——उपलरूपं गमितमित्यर्थः——अत एव अनिशम् अनवरतम् भृशदुःखं सत् कथमपि कृच्छ्रेण अवास्थित तस्थौ——ष्ठा गतिनिवृत्तावित्यस्मात् लुङि रूपम्——समवप्रविभ्यः स्थः (१-३-२२) इत्यात्मनेपदम्——स्थाध्वोरिच्च (१-२-१७) इति इकारादेशः——ह्रस्वादङ्गात् (८-२-२७) इति (सिचः) सकारस्य लोपः——तदिदं देहम् इदानीं रघुनन्दनस्य रामस्य पदपांसुः अपावीत् पादरेणुः पावनं चकार——पूञ् पवने इत्यस्मात् लुङि रूपम्——इट ईटि (८-२-२८) इति (सिच) सकारस्य लोपः ।। ३-३३ ।।

(संजीविनी-३-३४) **समगंसीति** । मुनिवरेण मुनिश्रेष्ठेन गौतमेन पुरेव पूर्ववत् समगंसि संगताऽस्मि इति यत् तेन——प्रकृते समागमजनितेन पुण्यकर्मणा कुमारो रामः अचिरेण शीघ्रं मैथिलसुतां सीतां परिणेता परिणेष्यति——रामः सुचिरं सुखानि अनुभविष्यति——(समगंमि इत्यत्र) गम्लृ धातोः लुङि रूपम्——समो गमीत्यादिना आत्मनेपदम् ।। ३-३४ ।।

(संजीविनी-३-३५) **समरे** इति । अयमर्भकः शिशुरयं रामः समदान् मदयुक्तान् असुरौघान् राक्षससंघान् समरे विजित्य यदा यस्मिन् काले तव अध्वरं यज्ञम् आवीत् ररक्ष——अव रक्षणे इत्यस्मात् लुङि रूपम्——तदैव तस्मिन् काले एव निमयः जनकादयः (सीतारघुवीरयोः परिणयं निरत्रेषत) सीतायाः राममेव पतिं निश्चितवन्तः इत्यर्थः ।। ३-३५ ।।

(संजीविनी-३-३६) **विदित** इति । अयं रामः ऐशं शांकरं यद् धनुर्विद्यते तद् धनुः अधिज्यम् अधिरोपितगुणं विदधीत कुर्यात्—गुरुबुद्धेः जनकस्य पुरोधाः पुरोहिता मम तनयः पुत्रः—शतानन्दः इत्यर्थः—विदेहनगरे मिथिलायाम् विदितोऽस्ति विख्यातः सन् प्रतिष्ठितः—स शतानन्दः अस्य रामस्य विवाहं शीघ्रं घटयिष्यति—विवाहं संघटयिष्यति ।। ३-३६ ।।

(संजीविनी-३-३७) **धनुष इति** । इदानीं चापस्यासाधारणतामाह—धनुष इति । पुरा पूर्वम् आजौ युद्धे धराधिपमयस्य धनुषः पिनाकस्य फणिराजः शेष एव गुणः सन् विरराज दिदीपे—धन्वी धनुष्मान् स हरिणाङ्ककिरीटः ईश्वरः अमुना धनुषा साधनेन हरिणा विष्णुरूपेण शरेण साधनेन च पुरत्रयम् अभित्त त्रिपुराणि व्यजेष्टेत्यर्थः —भिदिर् विदारणे इत्यस्मात् लुङि रूपम्—झलो झलीति सकारलोपः ।। ३-३७ ।।

(संजीविनी-३-३८) **नयेति** । हे कौशिक विश्वामित्र सुकुमारमूर्तिं कोमलतनुम् अपनीतमदार्तिम् अपहृतमद्दुःखम् नरेन्द्रकुमारं रामं तत्र मिथिलायां नय मिथिलां प्रापयेत्यर्थः—रामे गिरिधन्वधन्वनि शंकरचापे बाह्वोः बलं वितन्वति प्रकटयति सति अत्र बाहुबलप्रकटनविषये चित्रम् आश्चर्यमिति लोको वक्ष्यति—जनो वदिष्यति—असाधारणं कर्म रामः कृतवानिति जनो वदिष्यतीत्यर्थः ।। ३-३८ ।।

(संजीविनी-३-३९) **इति वादिनीमिति** । ते महान्तो मुनयः इति वादिनीम् इत्युक्तप्रकारेण वदन्तीम् ऋषेः कलत्रं पत्नीम् अहल्याम् अनघा पापरहिता इति समवदन्त उपसान्त्वयन्ति स्म—भासनोपसंभाषेत्यादिना (१-३-४७) आत्मनेपदम्—उपसंभाषा उपसान्त्वनम्—गौतमोऽपि मुनिगिरा मुनिवाचा स्वगृहे स्वां गृहिणीम् स्वकीयां पत्नीम् अनुकम्पया कृपया अनुजगृहे अनुगृहीतवान् ।। ३-३९ ।।

(संजीविनी-३-४०) **पुरभिदिति** । पुरभिद्धनुषः पिनाकस्य महिमनि माहात्म्ये प्रथमाने (प्रख्याते भवति सति) अयं रामः तद् धनुः कथम् आनमेत् कथं [13]नमयेत् इति व्यथमानं खिन्दानं मुनिमण्डलं मुनिबृन्दं समशयिष्ट संशयं प्राप—सम्-पूर्वात् शीङ् स्वप्ने इत्यस्मात् लुङि रूपम्—कठोरम् ईश्वरचापं रामः कथं नमयेदिति संशयं प्रापेत्यर्थः—रामभुजविक्रमस्य रामभुजपराक्रमस्य साक्षी साक्षिभूतः मुनीन्द्रो विश्वामित्रः निरचेष्ट निश्चिकाय—निस्-पूर्वात् चिञ् चयने इत्येतस्मात् लुङि रूपम्—दुर्जयसुबाहुमारीचादि—राक्षसनाशकरो रामः धनुर्नमनं करिष्यतीति (निस्सन्देहं) निश्चयमकरोदित्यर्थः ।। ३-४० ।।

(संजीवि-३-४१) **अथेति ।** अथ अनन्तरम् गाधिराजतनयो विश्वामित्रः शिष्यैः सह—शिष्यसहित इत्यर्थः—जनकाधिराजस्य जनकस्य मखदर्शनकाङ्क्षी यज्ञसमीक्षणापेक्षः सन् चिरविप्रकृष्टगृहिणीस्पृहयित्वा चिरकालवियुक्तगृहिण्याः स्पृहां कुर्वता गौतमेन सह मिथिलायाः अभिमुखः अभूत्—विश्वामित्रो गौतमेन शिष्यैश्च समेतः यज्ञसमीक्षणाय मिथिलां प्रति जगामेत्यर्थः ।। ३-४१ ।।

(संजीविनी-३-४२) **नगरेति ।** मुनीन्द्रे विश्वामित्रे नगरोपकण्ठं मिथिलासमीपम् उपयाति सति गच्छति सति—तदैव तस्मिन् काले एव पौराः पुरजनाः [14]समदाः सहर्षाः सन्तः समशृण्वत शुश्रुवुः—(अतिश्रु—इत्यादिवार्त्तिकाद्) आत्मनेपदम्—यदा मिथिलासमीपं गतो विश्वामित्रः तदैव पौराः सहर्षाः तस्यागमनं श्रुतवन्त इत्यर्थः—स जनकेन्द्रः मणिमयदण्डकेतुभिः—मणिमयाः दण्डाः येषां ते तथोक्ताः—ते च ते केतवश्च तैः साधनैः नगरं मिथिलानगरं समचस्करत् अलंकारयामास—डु कृञ् करणे इत्यस्मात् ण्यन्तात् लुङि चङि रूपम्—सम्परिभ्यां करोतौ भूषणे इति सुडागमः—किंभूतैः केतुभिः अहस्करदीप्रैः सूर्येण प्रकाशमानैः—नमिकम्पीत्यादिना र-प्रत्ययः—ध्वजानां रत्नकलितत्वात् सूर्यकिरणसंपर्कात् प्रकाशमानैरित्यर्थः ।। ३-४२ ।।

(संजीविनी-३-४३) **सह नृत्तेति ।** सपुरोधसा पुरोहितसहितेन मन्त्रिगणेन च सह सचिवसमूहेन च सह हृदयालुना सुहृदयेन स्पृहयालुना प्रीतिमता तेन जनकेन नृत्तगीतबहुवाद्यविशेषैः सह दयालुः दयावान् [15]अनुग्रहयालुः अनुग्रहस्वभावः—सर्वत्र स्पृहिगृहीत्यादिना आलुच् प्रत्ययः—मुनिः विश्वामित्रः [16]अभ्यगामि प्रत्युद्गतः—कर्मणि लुङ् । ३-४३ ।।

(संजीविनी-३-४४) **स्वपुरोधसेति ।** स जनकः स्वपुरोधसा तेन अहल्यातनयेन शतानन्देन यद् अतिथिकृत्यम् उपदिष्टम् उक्तम् तत् सर्वमतिथिकृत्यम् व्यधित कृतवान्—डु धाञ् धारणपोषणयोः इत्यस्मात् लुङि रूपम्—स्थाघ्वोरिच्च (१-२-१७) इति इकारादेशः—ह्रस्वादङ्गात् (८-२-२७) इति सकारस्य लोपः—ऋषि विश्वामित्रं शिष्यैः सह पुरं मिथिलाम् अवीविशत् प्रवेशयामास—विश प्रवेशने इत्यस्मात् णौ चङि रूपम्—शिष्यसमेतं विश्वामित्रं पुरप्रवेशं कारयामास इत्यर्थः—इतरान् मुनींश्च नितराम् अत्यधिकं बहु मेने बहु चकार ।। ३-४४ ।।

(संजीविनी-३-४५) **स मुनिरिति ।** ग्रहाः सूर्यादिनवग्रहाः प्रतिमा उपमा येषां ते तथोक्ताः—ते च ते शिष्याश्च—तैः सहितः समेतः भास्करतेजाः सूर्यसमप्रभः स मुनिर्विश्वामित्रः अभिरामरूपाभ्यां मनोरमस्वरूपाभ्यां (जितकामगुहाभ्याम्) जितम-

न्मथस्कन्दाभ्याम् दशरथस्य सुताभ्यां समं रामलक्ष्मणाभ्यां सह प्रविशन् मिथिलाम् उपास्कुरुत अलंचकार—(उपास्कुरुत इति पदे) उपात् प्रतियत्नेत्यादिसूत्रेण (६-१-१३९) सुट् आगमः—(प्रतियत्नो नाम) सतो [17]गुणान्तराधानमाधिक्याय—(तस्मिन् प्रतियत्ने द्योत्ये करोतेः अत्र सुडागमः) पूर्वं शोभमाना मिथिला विश्वामित्रागमनेन अत्यर्थं रराजेत्यर्थः ।। ३-४५ ।।

(संजीविनी-३-४६) **तरसेति** । पुरगोपुराणि पुरद्वाराणि च सौधान् हर्म्याणि च वरणं प्राकारम् अट्टं क्षौमम् हस्तिनखं पूर्द्वारिकूटं च देवगृहालीः देवालयपङ्क्तीश्च तरसा अधिरुह्य शीघ्रमारुह्य मिथिलाजनोऽपि मिथिलापुरनिवासिजनश्च शिथिलापरकृत्यः शिथिलीकृतापरकार्यः सन् नयनानि लोचनानि कृतकृत्यभावम् कृतकृत्यत्वम् अनयत् निनाय—नयतिर्द्विकर्मकः—मिथिलाजनः रामलक्ष्मणौ दृष्ट्वा नयनसद्भावस्य एतादेव फलमिति सस्मारेत्यर्थः—पुरद्वारं तु गोपुरम् (इति) प्राकारो वरणः सालः (इति) कूटं पूर्द्वारि . . हस्तिनखः इति चामरः ।। ३-४६ ।।

(संजीविनी-३-४७) **रघुनन्दनाविति** । असितायतकेश्यः—असिताः मेचकाः आयाताः दीर्घाः केशाः यासां ताः तथोक्ताः पुरयोषितः मिथिलानगरवासिन्यः स्त्रियः रघुनन्दनौ रामलक्ष्मणौ अवलुलोकिषमाणाः अवलोकितुमिच्छन्त्यः—लोकृ दर्शने इत्यस्मात् इच्छार्थे सन् प्रत्ययः—अत एव विकृतभूषणवेषाः विकृताभारणनेपथ्याः सत्यः—अत एव सखीभिः हसिताः अपहसिताः सत्यः—विपणिषु पण्यवीथिकासु प्रसरन्त्यः विरराजिरे दिदीपिरे ।। ३-४७ ।।

(संजीविनी-३-४८) **अधिरुह्येति** । सौधशिखराणि सौधाग्राणि अधिरुह्य वनिताः मिथिलानगरनिवासिन्यः स्त्रियः [18]गवाक्षविवराहितनेत्राः गवाक्षविवरनिहितलोचनाः सत्यः अतिदूरात् निमित्तात् रघुनन्दनं रामं कुशिकनन्दनं विश्वामित्रम् ऊचुः—कुशिकात्मजं विश्वामित्रं दशरथात्मजम् रामम् ऊचुः ।। ३-४८ ।।

(संजीविनी-३-४९) **पदपद्मयोरिति** । काचिद् वनिता पदपद्मयोः चरणकमलयोः मृगमदं मृगनाभि विदधाना विन्यस्यन्ती कुचकुम्भयोः कुचकलशयोश्च नवयावकपङ्कं नूतनालक्तकरसं निदधाना कपोलफलके गण्डस्थले च तिलकं दधना दधती सती रामभद्रः क्व नु कुत्र तिष्ठतीति अमार्गीत् अन्विष्यति स्म—मार्ग अन्वेषणे इत्यस्मात् लुङि रूपम् । इट ईटि इति (सिचः) सकारस्य लोपः ।। ३-४९ ।।

(संजीविनी-३-५०) **अपहायेति** । मत्तगजमन्थरयाना मत्तगजस्येव मन्थरं यानं यस्याः सा तथोक्ता—मत्तगजगमनेत्यर्थः—काचन वनिता रत्नमयं रत्नकलितम्

अञ्जनपात्रम् अञ्जनाधारपात्रम् अपहाय त्यक्त्वा करसंगतां करस्थितां शलाकामपि निरस्य त्यक्त्वा मसृणेन मर्दितेन—चिक्कणं मसृणं स्निग्धम् इत्यमरः—घुसृणेन कुङ्कुमेन —कुङ्कुमं घुसृणं वर्ण्यम् इति यादवः—विलोचनं नयनम् आञ्जीत् अलंचकार—अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु इत्यस्मात् लुङि रूपम्। इट ईटि इति सकारलोपः ॥३-५०॥

(संजीविनी-३-५१) **अविलम्बमिति।** हे अम्ब मातः अविलम्बं शीघ्रं पुनरभ्यनजानि पश्चादभ्यङ्गं करवाणि—अञ्जू धातोः लोडुत्तमपुरुषैकवचनम्—रुधादित्वात् श्नम् प्रत्ययः—(श्नान्नलोपः इति) नकारलोपः—इति मातरम् अभिधाय उक्त्वा तैलं च अपाम्य त्यक्त्वा गमनत्वरया प्रस्थानजवेन गलितकेशकलापा स्रस्तकचभारा सती कापि वनिता जघनस्य गरिमाणं गुरुत्वम् अगर्हीत् निनिन्द—गर्ह कुत्सायाम् इत्यस्मात् लुङि रूपम्। इट ईटीति सलोपः ॥ ३-५१ ॥

(संजीविनी-३-५२) **जनदृष्टमिति।** करिकुम्भकुचा करिकुम्भाविव कुचौ यस्याः सा तथोक्ता अन्या वनिता सख्या सह सखीसमेता कुतुकेन कुतूहलेन संभ्रमवती संभ्रमयुक्ता सती घननितम्बनिरस्तं घनकटिप्रदेशेन क्षिप्तं सत् स्रस्तम् अम्बरं वसनं कथमपि अवस्त छादयति स्म—वस आच्छादने इत्यस्मात् लङि रूपम् ॥ ३-५२ ॥

(संजीविनी-३-५३) **करयोरिति।** मणिनूपुरयुग्मं मणिमयमञ्जीरयुगलं करयोर्निधाय हस्तयोर्विन्यस्य हस्तवलयं कङ्कणं च चरणे कलयन्त्या पादे विन्यस्यन्त्या गलनद्धकाञ्चिलतया ग्रीवानद्धमेखलया कृतयानत्वरया कृता यानार्थं त्वरा यया सा तथोक्ता—तया रामः समागत इति श्रुत्वा गमनार्थं त्वरां कृतवत्या इत्यर्थः—कयाचित् वनितया निशान्ताद् भवनात् निरयायि निर्गतम्—या प्रापणे इत्येतस्माद् भावे लुङि रूपम् ॥ ३-५३ ॥

(संजीविनी-३-५४) **शिरसा प्रणम्येति।** शिरसा मूर्ध्ना प्रणम्य नत्वा सुकचा मनोज्ञकचभारा काचन वनिता (विकचानि) विकसितानि कुसुमानि कराभ्यां विचकार विकिरति स्म—सः प्रसिद्धः मकरन्दनन्ददलिबृन्दनिनादः मकरन्दपानेन हृष्टस्य भ्रमरकदम्बस्य ध्वनिश्च राजनन्दनं रामम् उच्चैरनन्दयत् अत्यर्थं मोदयति स्म—कुसुमाना मकरन्दास्वादेन हृष्टानां भ्रमराणां झंकारं श्रुत्वा रामः सन्तोषं प्रापेत्यर्थः ॥ ३-५४ ॥

(संजीविनी-३-५५) **अवशेनेति।** अवशेन अतिमात्रेण हसितेन रामम् अवलोक्य दृष्ट्वा विवशा परवशीभूता सती मृगशाबकनेत्रा हरिणीलोचना अन्या काचन वनिता सरसा प्रीतियुक्ता सती अथ अनन्तरम् असितोत्पलनीलम् असितोत्पलवन्नीलं रामं करसंज्ञया आह्वयत् आकारयति स्म ॥ ३-५५ ॥

(संजीविनी-३-५६) **इति पौरयौवतेति ।** इति पूर्वोक्तान् पौरयौवतविलास-विकारान् पौरयौवतस्य पुरयुवतीसमूहस्य—तस्य समूहः (४-२-३७) इति समूहार्थे अण् प्रत्ययः—विलासविकारान् अवलोकयन् पश्यन् मनुजेन्द्रसूनुः रामः मुनीन्द्रम् अनु विश्वामित्रेण सह—अनुर्लक्षणे इति कर्मप्रवचनीयसंज्ञा—कर्मप्रवचनीययुक्ते द्वितीया इति द्वितीया—अनुजेन समं लक्ष्मणेन सह तं मखवाटं यज्ञवाटम् अयासीत् प्राप—या प्रापणे इत्यस्मात् लुङि रूपम्—कथमिव स्थितः—(तत्राह) धृतबालिमेव मघवा बालस्य भावो बालिमा—[19]पृथ्वादिभ्यः इमनिज् वा (५-१-१२२) इति इमनिच् प्रत्ययः—धृतो बालिमा येन स तथोक्तः—मघवा पाकशासन इव स्थितः ।। ३-५६ ।।

(संजीविनी-३-५७) **सपदीति ।** सपदि तदानीम् ध्रुवां च उपभृतं च जुहूं च स्रुचमपि स्रुवमपि—[20]जुहूप्रभृतयो यज्ञपात्रविशेषाः—तान् व्यपनीय त्यक्त्वा अथ अनन्तरम् यजनकर्मणि[21] युक्ताः ऋत्विक्कर्मणि संयुक्ताः द्विजपुङ्गवाः मुनिश्रेष्ठाः रघुवरौ रामलक्ष्मणौ अवलोकितुं द्रष्टुम् अभिपेतुः आभिमुख्येन संप्राप्ताः ।। ३-५७ ।।

(संजीविनी-३-५८) **कुशेति ।** संसदि सभायां कुशिकात्मजमुख्यान् विश्वामित्र-मुख्यान् कुशविष्टरेषु दर्भासनेषु उपवेश्य आसीनान् कृत्वा अथ अनन्तरम् मिथिलेश्वरो जनकः यथार्हं वृद्धपुरःसरं यथा तथा [22]आर्हीत् समपूजयत्—अर्ह पूजायामित्यस्मात् लुङि रूपम्—पृथुलवक्षसि पृथुलोरस्के रामे अनिमेषां निमेषशून्यां दृशमपि सुचिरं न्यधत्त निहितवान् ।। ३-५८ ।।

(संजीविनी-३-५९) **कुलमिति ।** एष राजकुमारः कस्य राज्ञः कुलम् अकलङ्कं कलयति निर्दोषं करोति—एष राजकुमारः कस्य राज्ञः सुतः—अस्य राजकुमारस्य किं (नाम) नामधेयम्—किमेष राजकुमारः वनवासिभिः भवद्भिश्च कथं समगच्छत संगतोऽभूत्—इति वद ब्रूहि इति उक्तप्रकारेण (मिथिलेश्वरः) समपृच्छत (पृष्ट-वान्) ।। समगच्छत (समपृच्छत) इत्यत्र समो गम्यृच्छीत्यादिना (विदिप्रच्छीत्या-दिवार्त्तिकेन च) आत्मनेपदम् ।। ३-५९ ।।

(संजीविनी-३-६०) उत्तरमाह—**मनुसन्ततिरित्यादिना ।** एष राजकुमारः मनुसन्ततिः मनुकुलोद्भवः—मनोः सन्ततिः कुलं यस्य स तथोक्तः—अत्र व्यधिकरण-बहुव्रीहिसमासः—दशरथस्य तनूजः दशरथतनयः—रामः रामनामधेयः—मम मखं यज्ञम् अविघ्नं विघ्नरहितम् आवत् ररक्ष—किं च ऐश्वरं शंकरसंबन्धि धनुः पिनाकं विनमय्य नतिं प्रापय्य ते तव सुतां सीतां परिणेष्यति परिणेता इति सः प्रकृतो मुनीन्द्रः विश्वामित्रः बभाण उवाच ।। ३-६० ।।

(संजीविनी-३-६१) **मुनिवाक्यमिति।** भूपो जनकः मुनिवाक्यं विश्वामित्र-वचनम् अवितथं कलयन्नपि यथार्थं जानन्नपि धृतकाकपक्षं धृतशिखण्डकमपि राममवेक्ष्य दृष्ट्वा कमठपृष्ठवत् कूर्मपृष्ठवत् गरिष्ठं गुरुतरं कठिनं धनुश्च अवेक्ष्य दृष्ट्वा मनसा समीक्ष्य विचार्य समधिक्षत सन्दिहानोऽभूत्—सम् पूर्वात् दिह् उपचये इत्यस्मात् लुङि रूपम्—शल इगुपधादनिटः क्सः (३-१-४५) इति (च्चेः) स्सादेशः—घत्व-भष्भावौ —खरि च इति चर्त्वम् ।। ३-६१ ।।

(संजीविनी-३-६२) **प्रथममिति।** सः प्रकृतो हलकेतुः जनकः प्रथमं विश्वसि-तनारदवचनः सन्—रामो धनुर्भङ्गं कृत्वा सीतां परिणेष्यतीति जनकस्य नारदः पूर्वं कथितवान्—तद्वचनं प्रमाणीकृतवान् इत्यर्थः—रामं च परमं पुमांसम् अवगम्य परमं पुरुषं ज्ञात्वा कुशध्वजनाम्ना कुशध्वजसंज्ञकेन अनुजन्मना अनुजेन सह धृताङ्गपुलकः पुलकिताङ्गः मुमुदे तुतोष ।। ३-६२ ।।

(संजीविनी-३-६३) **धनुष इति।** अनुषङ्गिणम् आनुषङ्गिकं धनुषः प्रसङ्गं धनुर्नमनप्रसङ्गम् आलीजनतः सखीजनतो निशम्य श्रुत्वा जनकेन्द्रकुमारी सीता सौधम् उपरि उपरिप्रदेशे अधिरुह्य आरुह्य गवाक्षविवराहितनेत्रा गवाक्षनिहितलोचना सती स्ववरं स्वकीयं वरं रामं व्यलुलोकत् पश्यति स्म—लोकृ दर्शने इत्यस्मात् णिच्—णिश्रीति (३-१-४८) कर्तरि चङ् (च्लेः) ।। ३-६३ ।।

(संजीविनी-३-६४) रामं दृष्ट्वा सीता विदग्धं वचनं (सखीं प्रति) आह—**जलदोदय** इति। जलदोदयः मेघोदयः त्वाम् अनुमोदयति किम् आनन्दयति किम् इति जानकी सीता निजसखीम् समलापीत् बभाषे—लप व्यक्तायां वाचि इत्यस्मात् लुङि रूपम्—इट ईटि इति सकारलोपः—अनेन रामस्य मेघसाम्यमुक्तम्—विदग्धा चतुरा सा सखी हे तरलाक्षि चञ्चललोचने कापि तडित् अत्र मेघसमीपे स्फुरति शोभते इति उत्तरम् अदत्त ददौ—अनेन सीतायाः तडित्साम्यमुक्तम् ।। ३-६४ ।।

(संजीविनी-३-६५) **क्व धनुरिति।** कठोरं कठिनम् औग्रम्—उग्रशब्देन त्रिलो-चन उच्यते—औग्रं त्रिलोचनसंबन्धि—तस्येदम् इति अण् प्रत्ययः—उदग्रम् उत्कृष्टम् इदं धनुः क्व—असमग्रम् असंपूर्णं रघुशिशोः रामस्य दोर्युगं बाहुयुग्मं क्व—अमुना रामेण एतद् धनुः अधिज्यं कथं क्रियते—नारोप्यते एवेत्यर्थः—अत एव अद्य कुपणोद्यतः कुत्सितपणे उद्युक्तः—तातः जनकः कृपणोऽजनि—दीनो बभूव—दीपजनेत्यादिना (३-१-६१) कर्तरि (च्ले): च्विण् ।। ३-६५ ।।

(संजीविनी-३-६६) **धनुष इति ।** क्षितिपो जनकः यदि धनुषश्चापस्य अधिरोपणपणेन—पणशब्देन मूल्यमुच्यते—पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च इत्यमरः—धनुर्नमनरूपेण शुल्केन पणेत पणितव्यवहारं (यदि) कुर्यात् तर्हि इह स्थले विवाहो विघटेत विवाहो न घटेत्—यद् यस्मात् कारणात् अयं जनकः मां रघुवत्सकाय रामाय तूष्णीम् धनुर्नमनव्यवहारमन्तरेण न हि दित्सति दातुं नेच्छति—सनिमीमेत्यादिना (७-४-५४) सनि (अचः) इस्—आदेशः—अत्र लोपोऽभ्यासस्य (७-४-५८) इति अभ्यासलोपः—सः स्यार्धधातुके (७-४-४९) इति सकारस्य तकारः—तत्कारणात् अस्य जनकस्य हृदयं—अदयं कृपाशून्यम् ।। ३-६६ ।।

(संजीविनी-३-६७) **सुरसिद्धेति ।** पूर्वार्धमेकं पदम्—सुरसिद्धाश्च किपुरुषाश्च किनराश्च विद्याधराश्च यक्षाश्च (राक्षसाश्च) नरेन्द्राश्च (ते तथोक्ताः)—तेषां कुलेषु—निर्धारणे सप्तमी—तुलितेशचापमपि नम्रीकृतशंकरकार्मुकमपि अस्माद् रामात् परं न वृणीय न वृणोमि—(एवं मन्निश्चये सति) तातपणेन जनकव्यवहारेण किमु किं प्रयोजनम् ।। ३-६७ ।।

(संजीविनी-३-६८) **वरणेति ।** मिथिलाधिपतिर्जनकः वरणागताय विवाहार्थमागताय (शरणागतरक्षामणये) शरणागतानां शरणं प्राप्ताना—रक्षामणये (संरक्षणचिन्तामणये) अस्मै वराय पणबन्धमपास्य मां यदि ददीत रामाय मां ददाति चेत्—तर्हि विधिः दैवम् आनुकूल्यमयते आनुकूल्यं प्राप्नोति—विधिः मे दयते मामनुकम्पते ।। अधीगर्थदयेशां कर्मणि (२-३-५२) इति कर्मणि षष्ठी ।। ३-६८ ।।

(संजीविनी-३-६९) **इति वाचमिति ।** इति उक्तप्रकारेण आलिषु सखीमध्ये मिथोऽनुलपन्ती अन्योन्यभाषण कुर्वती रघुराजनन्दनस्य रामस्य विलोकने लोला आसक्ता सती सीता अदक्षिणदृशः वामनेत्रस्य स्फुरणात् हृषिता अजनि मुदिता बभूव—दीपजनेत्यादिना कर्तरि चिण्—स्त्रीणां वामनेत्रस्फुरणं शुभसूचकम्—अत एव राम एव पतिर्भविष्यतीति मुदिता बभूव । कथमिव—चपलायाः स्फुरणात्—तटित् सौदामिनी विद्युत् चञ्चला चपलापि च इत्यमरः—प्रचलाकिनीव मयूरीव—[23]प्रचलाकशब्देन बर्हं उच्यते—प्रचलाकः अस्या अस्तीति प्रचलाकिनी—प्रचलाकः शिखण्डश्च कलापो बर्हं उच्यते (इति हलायुधः) तडित् स्फुरणेन जलदोदयो भविष्यतीति (धिया) मयूरी यथा मुदिता भवति तद्वत् (सीतापि मुदिता बभूव इति भावः) ।। ३-६९ ।।

(संजीविनी-३-७०) **अथ गाधीति ।** अथ अनन्तरम् गाधिसूनुगिरं विश्वामित्रवचनम् आद्रियमाणः तत्र आदरं कुर्वाणः—मिथिलाजने (च) सदसि सभायां विस्मयमाने

आश्चर्य गतवति सति सः प्रकृतो जनकः दाशरथिशक्तिपरीक्षी रामभुजबलपरीक्षी सन् धरणीशसमाजं राजसभां धनुरानिनाय प्रापयति स्म—नयतिर्द्विकर्मकः—विस्मयमान इत्यत्र ष्मिङ ईषद्धसने इति धातोः (ङित्वादात्मनेपदे) शानचि रूपम् ।। ३-७० ।।

(संजीविनी-३-७१) **कमठादिति ।** कथंभूतं धनुः (तत्राह) कमठादित्यादिना —कमठात् कूर्मात् उपात्ता स्वीकृता कठिना आकृतिः स्वरूपं येन तत् तथोक्तम्—पुनः किंभूतम् धनुः—शेषादहितः महासर्पाद् गृहीतं स्वीकृतं महितं पूजितम् उन्नतिः औन्नत्यं दैर्घ्यं च येन तत् तथोक्तम्—पुनः किंभूतं धनुः—कुलपर्वताधिकगुरुत्वमहत्त्वम् कुलाचलादपि अधिकम् अतिशयितं गुरुत्वं महत्त्वं च यस्य तत् तथोक्तम्—कथमिव स्थितम् —पृथिवीभृतां राज्ञां भूभृतां भुजसारं भुजबलं हसदिव अपहासं कुर्वदिव स्थितम्—एवंभूतं धनुः धरणीशसमाजम् आनिनाय इति संबन्धः ।। ३-७१ ।।

(संजीविनी-३-७२) **उचितमिति ।** हरस्य उचितं योग्यम् सुरतक्ष्णा विश्वकर्मणा रचितं निर्मितं लस्तकपदे धनुर्मध्यप्रदेशे—लस्तकस्तु धनुर्मध्यमित्यमरः—नवरत्नैः खचितं कीलितं च—तथा तटिद्भिः सौदामिनीभिः निचितं व्याप्तम् ऐन्द्रं धनुरिव इन्द्रचापमिव स्थितं तत् पिनाकाख्यं बहुभिः अनेकैः बलोद्धतभटैः शक्तिसंपन्नैर्भटैः उपनिन्ये रामस्य समीपं प्रापितम् ।। ३-७२ ।।

(संजीविनी-३-७३) **पुरभिदिति ।** अथ अनन्तरं पुरभिद्धनुर्भरणभुग्नगलानाम् । ईश्वरचापधारणेन प्रह्वीभूतग्रीवाणां हलहलारवकोलाहलमिश्रितारभटि—हलहलेत्यनुकरणशब्दोऽयम्—हलहलेत्यारवस्य कोलाहलेन कलकलेन मिश्रिता संगता आरभटी संभ्रमो यस्य तत् तथोक्तम्—बहुलोत्सवं वीरभटानां निकुरुम्बम् बृन्दं वीरभटसमूहः सिंहनादमकरोत् सिंहनादं चकार ।। ३-७३ ।।

(संजीविनी-३-७४) **भुजगेति ।** भुजगेन्द्रभूषणभुजप्रणयि—भुजगेन्द्रभूषणः ईश्वरः—तस्य भुजयोः प्रणयि प्रणयवत्—गिरिराजदण्डम्—गिरिराजो मेरुः—स एव दण्डो यस्य तत् तथोक्तम्—अहिराजदृढज्यम् अहिराजः शेषः—स एव दृढा ज्या यस्य तत् तथोक्तम्—नहुषाजगराभम् नहुषो नाम कश्चन राजा तपोबलेन सुरेन्द्रत्वं प्राप्य (सर्प सर्पेति कथयन्) त्वरयमाणः ऋषिणा (अगस्त्येन) सर्पो भवेति शप्त इति पुराणे प्रसिद्धम्—अजगर इति सर्पविशेषः—तिलित्सः स्यादजगर इत्यमरः—नहुषाजगरस्य आभेव आभा यस्य तत् तथोक्तम् इदं धनुः नलिनाक्षः कमललोचनः एष रामः कथं नु नमयेत् इति जनौघो जगाद उवाच ।। ३-७४ ।।

(संजीविनी-३-७५) **अविमुक्तेति ।** अविमुक्तगौरवम् अविमुक्तदाढर्यम्—अनन्तगुणाढ्यम् पूर्वोक्तगुरुत्वमहत्त्वादिगुणैः प्रसिद्धम् हरकार्मुकम्—ईश्वरचाप नमयसि नम्रं करोषि इति न युक्तं नोपपन्नम्—कि तु यदि शक्तिरस्ति तर्हि इह धनुषि त्वं भुजसत्त्वं प्रथय बाहुबलं प्रख्यातं कुरु इति मिथिलेशो जनकः रामम् अवदत् ।। ३-७५।।

(संजीविनी-३-७६) **धनुष इति ।** हे वत्स अत्र मिथिलाया धनुषः ईश्वरचापस्य करग्रहणपूर्वकं करेण ग्रहणं यस्मिन् कर्मणि तद् यथा भवति तथा इति तत् तथोक्तम्—क्षितिजाकरग्रहणमाचर सीताकरग्रहणं कुरु—इदं धनुर्नमयन् प्रह्वीकुर्वन् राज्ञा संशयं शमय सन्देहं (इति)—इत्थम् निरवग्रहः स्वतन्त्रः—स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः इत्यमरः—मुनिः विश्वामित्रः रहसि एकान्ते [24]अवक् उवाच—वच परिभाषणे इत्येतस्मात् लङि रूपम् । अदिप्रभृतिभ्यः शपः (२-४-७२) इति शपो लुक् । इतश्च (३-४-१००) इति (लङि तिपः) इकारस्य लोपः हल्ङ्यादिलोपः—चोः कुः (८-२-३०) इति कुत्वम्—(संहितायाम् अवग्रहसि इत्यत्र झलां जशोऽन्ते (८-२-३९) जश्त्वेन सन्धिवशाद् रूपम्) ।। ३-७६ ।।

(संजीविनी-३-७७) **स तथेति ।** स रामः तथा इति कौशिकनमस्कृतिपूर्वं विश्वामित्रनमस्कारपूर्वं यथा तथा—विश्वामित्रं नमस्कृत्येत्यर्थः—सहसा शीघ्रम्—उत्तरीयपरिवेष्टितमध्यः उत्तरीयेण उत्तरासंगेन परीतमध्यः सन् कवचाभिगुप्तभवचापसमीपम् कवचेनाभिसंरक्षितैश्वरकार्मुकसमीपम् अगात् इयाय—इणो गा लुङि (२-४-४५) इति इण्-धातोर्लुङि गा-इत्यादेशः । गातिस्थेत्यादिना (सिचः) सकारस्य लोपः—कथमिव जलदपोत इव मेघशिशुरिव—तटिदन्तिकं विद्युत्समीपम्—चापस्य रत्नकलितत्वात् तटित्साम्यमुक्तम्—रामस्य नीलवर्णत्वात् मेघसाम्यमुक्तम् ।। ३-७७ ।।

(संजीविनी-३-७८) **कवचमिति ।** धनुषः अधिरोपणार्थमुद्युक्ताः पुरुषाः पूर्वं चापस्य नमस्कारं कुर्वन्ति—स्वेदादिदोषापनयनार्थं हस्ततलाघातं कुर्वन्ति—अथ अनन्तरं सः प्रकृतो रामः कवचं विकृष्य कङ्कटकमपहृत्य नानारत्नकीलितत्वाद् विचित्रम्—ऐशं धनुः रचिताञ्जलि यथा तथा आननाम ववन्दे—तलघातशब्दितनिकुञ्चितबाहुः हस्ततलघातेन ध्वनितकुञ्चितबाहुः सः अधिलस्तकदेशं धनुर्मध्यप्रदेशे—लस्तकस्तु धनुर्मध्यमित्यमरः—विभक्तीत्यादिना समासः—हस्तं निदधे निहितवान् ।। ३-७८ ।।

(संजीविनी-३-७९) **धनुरिति ।** धरणीन्द्रकुमारो रामः पुलकाङ्किते पुलकचिह्निते पौरजनौघे पुरजनसमूहे नुवति सति स्तोत्रं कुर्वति सति धनुरुद्दधार कार्मुकमुद्धृतवान् । अत्र धनुषि शंकरकराब्जम् ईश्वरपाणिपद्मं कथम् अमासीत् कथम् (परिमितम्)

अभूत्—(यतः मत्पाणिपद्मस्यापि न पर्याप्तम्) इति एवम् ([25]सस्मितं समन्दहासं यथा तथा तद् धनुः (सः रामः) अधिज्यम् अचिकीर्षत् आरोपितमौर्वीकम् कर्तुमेच्छत्) ॥ ३-७९ ॥

(संजीविनी-३-८०) **पृथिवीति ।** अत एव हे पृथिवि स्थिरा भव—हे भुजङ्ग शेष एनां पृथिवीं वह । हे कमठराज कूर्म तदिदं द्वयं दधीथाः भूमिं शेषं च धारय । हे दिगिभाः दिग्गजाः तत् पुर्वोक्तं त्रयमपि भूम्यादिकं धत्त धारयत इति लक्ष्मणः ऊचे बभाषे ॥ ३-८० ॥

(संजीविनी-३-८१) **अधिजान्विति ।** धनुषः अधिरोपणप्रकारमाह—अधिजान्विति । अधिजानुप्रदेशे—अव्ययं विभक्तीत्यादिना समासः—धन्व विनिधाय चापं निक्षिप्य ततज्यं विदधत् अधिज्यं कुर्वन् (रघुनन्दनः रामः) वधूजनदृगुत्पलकीर्णः—दृशः उत्पलानीव दृगुत्पलानि—उपमितं व्याघ्रादिभिरिति समासः—रमणीलोचनैरुत्पलतुल्यैः (विशेषेण) कीर्णः (आसीत्) । (सपदि सद्यः नन्दननन्दत्—सुमनोविसृष्टसुमनोभिः (नन्दनवने क्रीडद्भिः देवैः विसृष्टैः पुष्पैः रामः अकारि कीर्णः बभूव ।) कॄ विक्षेपे इत्यस्मात् कर्मणि लुङ । रामचन्द्रे धनुर्नमनं कृतवति सति मुदिता देवाः पुष्पवृष्टिं मुमुचुरित्यर्थः ॥ ३-८१ ॥

(संजीविनी-३-८२) **जनसंहताविति ।** जनसंहतौ जनसमूहे जय जयेति वदन्त्यां सत्यां सुरेषु दिवि आकाशे साधु साधु इति वदत्सु सत्सु रघुराजकुमारो रामः जनकराजकुमार्याः सीतायाः मनसा समं धनुराचकर्ष । रामे धनुराकर्षति सति सीता तस्मिन् अनुरक्ता आसीदित्यर्थः ॥ ३-८२ ॥

(संजीविनी-३-८३) **दृढवामेति ।** पूर्वार्धे एकं पदम् । दृढया निबिडया वाममुष्ट्या धृतलस्तकम्य रत्नैः मणिभिः छुरितैः लिप्तैः अङ्गुलीयमणिभिः लग्नाः संसक्ताः नखानाम् अंशवो यस्य सः दृढवाममुष्टिधृतलस्तकरत्नच्छुरिताङ्गुलीयमणिलग्ननखांशुः रामः भुजदण्डमण्डलितधूर्जटिध्वन्वा—भुजौ दण्डाविव भुजदण्डौ—उपमितं व्याघ्रादिभिरिति समासः—भुजदण्डाभ्यां मण्डलीकृतधूर्जटिधन्वा मण्डलीकृतेशचापः सन् अभासीत् रराज—कथमिव परिवेविषाण इव भानुः—परिवेषवान् सूर्य इव—परिवेषमध्यगतः सूर्यो यथा (प्रकाशते) तथा धनुर्मध्यगतः सोऽपि रराजेत्यर्थः । अभासीदित्यत्र भा दीप्तावित्यस्मात् लुङि रूपम् । परिवेविषाणः इत्यत्र णिजां त्रयाणां गुणः श्लौ (७-४-७५) इत्यनेन विष्लृ व्याप्तावित्यस्य धातोः द्विर्वचने अभ्यासस्य गुणः । श्लौ (६-१-१०) इति द्विर्वचनम् ॥ ३-८३ ॥

(संजीविनी-३-८४) **अमुनेति** । औपजानुकभुजेन जानुसमीपगतभुजेन—उपजानूपकर्णोपनीवेष्ठक् (४-३-४०) इति (उपजानुशब्दात्) ठक् प्रत्ययः—इसुसुक्तान्तात् कः (७-३-५१) इति (ठस्य) कादेशः—(ठस्येकः इति विहितस्य) इकः अपवादोऽयम् —गुणधाम्ना गुणनिधिना अमुना रामेण औपकर्णिकगुणं कर्णसमीपगतज्यम्—उपजानूपकर्णेत्यादिना ठक्—ठस्येकः (७-३-५०) इति इकादेशः—आकृष्टगुणम् इत्यर्थः—ऐशं शंकरसंबन्धि तत् प्रसिद्धं धनुः बाह्वोरतिमात्रकर्षभरेण हस्तयोरतिमात्रकर्षणभारेण उच्चलच्चटचटध्वनि—चटचटेति अनुकरणशब्दः—समुद्भवच्चटचटध्वनि यथा तथा [26]सहसा शीघ्रम् (आकस्मिके च सहसा तत्काले च निगद्यते इति हलायुधः)—बभञ्जे आर्मर्दितम् ।। ३-८४ ।।

(संजीविनी-३-८५) धनुषि पिनाके राघवभग्ने रामेणामर्दिते सति उद्धतः अधिकः ध्वनिः भुवमानशे भुवं व्याप्नोति स्म । दिवम् इयाय—स्वर्गं प्राप । दिगन्तान् अललङ्घत् —(स्वार्थणिजन्तोऽयम् धातुः—लुङि रूपमिदम्) ललङ्घे—अब्धौ सलिलं विललङ्घे समुद्रजलं लङ्घयामास—फणिलोकम् आवृत पातालम् (आवृतं) विदधे—वृङ संभक्तावित्यस्मात् लुङि (आवृत इति) रूपम् । धुनीः अधुनीत नदीः कम्पयामास—तटिनी ह्रादिनी धुनी इत्यमरः ।। ३-८५ ।।

(संजीविनी-३-८६) **हठेति** । हठभज्यमानहरकार्मुकनादे बलादामर्दितेश्वरचापस्य नादे अजाण्डकुहरं ब्रह्माण्डविवरं बहिरन्तः बहिःप्रदेशं मध्यप्रदेशं च दलयति विदारयति सति भयकम्पमानफणिराजफणालीनिलयेन—भयेन कम्पमानस्य फणिराजस्य शेषस्य फणानाम् आली पङ्क्तिः निलयो यस्य स तथोक्तः—तेन भूमिवलयेन भूमण्डलेन ववल्ले चलितम्—वल्ल चलने इत्यस्मात् भावे लिट् । धनुर्भङ्गजनितध्वनिना त्रस्तस्य शेषस्य फणानां कम्पनेन भूमण्डलमपि चचालेत्यर्थः ।। ३-८६ ।।

(संजीविनी-३-८७) **चकितेति** । चकितस्य धनुर्भङ्गध्वनिभीतस्य गलद्गलरज्जोः (संभ्रमेण) स्रंसत्कण्ठरज्जोः सुरवारणस्य ऐरावतस्य निगलेन शृङ्खलेन जगले स्रस्तम्—गल स्रंसने इत्यस्माद्धातोः भावे लिट्—दानकुपितेन मदक्रुद्धेन तेन ऐरावतेन दिविष्ठाः —दिवि स्वर्गे तिष्ठन्तीति दिविष्ठाः—(सप्तम्याः अलुक्) अट्टाः अट्टालकाः करदन्तकोटिभिः तुण्डस्थदन्तपार्श्वैः [27]अमाथिषत भज्यन्ते स्म । मन्थ विलोडने इत्यस्मात् (कर्मणि) लुङि रूपम् ।। ३-८७ ।।

(संजीविनी-३-८८) **भवेति** । दिगिभेन्द्राः दिग्गजाः भवधन्वभङ्गरवभङ्गुरचित्ताः ईश्वरचापभञ्जनेन यो रवः तेन भङ्गुरचित्ताः उद्भ्रान्तचित्ताः सन्तः भुवं

कथमप्यबिभ्रत कृच्छ्रेण दधुः—चकितोत्पतत्तिमितिमिङ्गिलसंघैः—तिमयो नाम मत्स्य-विशेषाः—तथा चोक्तम्—

अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव ।।

इति । चकितानां भीतानाम् उत्पतताम् उत्पतनं कुर्वतां तिमीनां तिमिङ्गिलानां च संघैः समूहैः निमित्तभूतैः सिन्धुसलिलेन समुद्रोदकेन कलिलेन बभूवे कलुषेण जातम्—भावे लिट् । ईश्वरचापदलनाद् भीतानां तिमितिमिङ्गिलानाम् उत्पतनेन समुद्रजलं कलुषं बभूवेत्यर्थः ।। ३-८८ ।।

(संजीविनी-३-८९) **हरिरिति** । जलधौ समुद्रे कलधौतद्युतिकम्बुराजभरित-प्रतिशब्दे—कलधौतस्येव द्युतिर्यस्य स तथोक्तः—स चासौ कम्बुराजश्च—कम्बुराजः पाञ्चजन्यः—तेन भरितप्रतिस्वने सति हरिरप्यबुद्ध—बुध अवबोधने इत्यस्मात् लुङि रूपम्—(हरिः योगनिद्रापरो नाभवदित्यर्थः)—मुखरैः शब्दायमानैः अहार्यशिखरैः पर्वतशिखरैः—अहार्यधरपर्वताः इत्वमरः—(अनुसस्रे) निपतितम्—पर्वतशिखराणि सशब्दं निपेतुरित्यर्थः—गिरिगह्वरैः पर्वतगुहाभिश्च परितः समन्तात् प्रतिनेदे । उभयत्र भावे लिट् ।। ३-८९ ।।

(संजीविनी-३-९०) **प्रसरदिति** । प्रसरत्प्रतिध्वनिपतन्मृगयूथम्—प्रसरता व्याप्नुवता प्रतिध्वनिना पतन्मृगसंघम्—वलमानशाखिविचलत्प्रचलाकि—वलमानेभ्यः कम्पमानेभ्यः शाखिभ्यः (वृक्षेभ्यः) विचलन्तो धावन्तः प्रचलाकिनो मयूराः यस्मिन् तत् तथोक्तम्—[28]प्रचलाकशब्दः शिखण्डवाचकः—सोऽस्यास्तीति प्रचलाकी—प्रचलाकः शिखण्डस्तु कलापो बर्ह उच्यते (इति हलायुधः)—अद्रिगह्वरम् हिमवत्पर्वत-गुहामुखम् उपह्वरयन्ती एकान्तस्थलं कुर्वती—रहोऽन्तिकमुपह्वरे इत्यमरः—गिरिजा पार्वती भयविह्वला साध्वसाकुला सती पशुपतिं परिरेभे ईश्वरम् आलिलिङ्ग ।। ३-९० ।।

(संजीविनी-३-९१) **करिकुम्भेति** । करिकुम्भतुल्य[29]कुचकुम्भयुगायाः—इभ-कुम्भसदृशस्तनयुगलायाः भवान्याः पार्वत्याः परिरम्भसंभ्रमसुखेन—परिरम्भे आलिङ्ग-नविषये यः संभ्रमः तेन संभूतेन सुखेन गिरिशः चापदलनमपि धनुर्भङ्गमपि बहु मेने बहु अमंस्त—उक्तार्थस्थापनाय युक्तिमाह-(न वस्तु-इत्यादिना) तथा हि कामी कामुकः वस्तुहानिमुद्दिश्य न अनुशोचति न पश्चात्तप्यते ।। ३-९१ ।।

(संजीविनी-३-९२) **धनुषि द्विधेति।** रामविधूते रामेण विसृष्टे धनुषि द्विधा पतति द्विप्रकारेण भवति (सति) नितान्तकराले अतिमात्रभयंकरे निनदे धनुर्भङ्गरवे च शाम्यति विरते सति भयविस्मयप्रमदविप्रतिसारैः—भयेन ईश्वरः किं वा करिष्यतीति भीत्या च—विस्मयेन शिशुरयं रामः (कथमेवं) धनुर्भङ्गं चकार इत्याश्चर्येण च—प्रमदेन सीतायाः राम एव पतिर्भविष्यतीति संतोषेण च—विप्रतिसारेण—स्वगृहे शंकरचापदलननिमित्तेन पश्चात्तापेन च विदेहनरेन्द्रः जनकः भृशमाकुलोऽजनि अत्यर्थं व्याकुलो बभूव—दीपजनेत्यादिना कर्तरि (लुङः च्लेः) चिणि रूपम्—उपसर्गस्य घञि अमनुष्ये बहुलम् (६-३-१२२) इति (बहुलग्रहणात् दीर्घाभावपक्षे विप्रतिसार इति रूपम्—) दीर्घपक्षे विप्रतीसारः इति रूपम्—पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि इत्यमरः ॥ ३-९२ ॥

(संजीविनी-३-९३-९४) वक्ष्यमाणं (विदलय्य सुरमुक्तेति) श्लोकद्वयं कुलकम् **विदलय्येति—सुरमुक्तेति।** रघुनन्दने तन्मुनिवृन्दं विशति (तन्मुनिसमूहमध्ये प्रविशति सति) दिवि स्वर्गे दुन्दुभिध्वनिः भेरीनादः अमन्दम् अत्यधिकम् यथा तथा उदैष्ट उत्पन्नः—किंभूते रामे धूर्जटिधनुः ईश्वरचापं विदलय्य भङ्क्त्वा त्रपमाणे विलज्जमाने—पुनः किंभूते मुनिराजकस्तुति[30]भरस्मयमाने—मुनीनां विश्वामित्रादिमुनीनां राजकस्य राजसमूहस्य—गोत्रोक्षेत्यादिना (४-२-३९) समूहार्थे वुञ् प्रत्ययः—युवोरनाकौ (७-१-१) इति अकादेशः—स्तुतिभरेण स्तुत्यतिशयेन स्मयमाने स्मितं कुर्वाणे—पुनः किंभूते रामे गुरुवन्दनाय विश्वामित्रनमस्काराय त्वरमाणे त्वरां कुर्वाणे—पुनः किंभूते वृद्धं जनकं च अभिवादयमाने नमस्कुर्वाणे—पुनः किंभूते सुरमुक्तदिव्यकुसुमानि देवविसृष्टकल्पद्रुमकुसुमानि दधाने—पुनः किंभूते जनकात्मजाभिलषितं सीतायाः मनोरथं विदधाने कुर्वाणे (ईदृशे रामे विशति सति दिवि दुन्दुभिध्वनिरुदीये इति संबन्धः) ॥ ३-९३-९४ ॥

(संजीविनी-३-९५) **कलमुज्जगे** इति। सदसि सभायां गायकसंघैः गायकानां समूहैः कलम् अव्यक्तमधुरं यथा तथा उज्जगे अगायि—नर्तकनटीसमुदायैः नर्तकानां नृत्तनियुक्तानां पुरुषाणां नटीनां नृत्तनियुक्तानां स्त्रीणां च समुदायैः समूहैः ननृते नर्तितम्—गायन्तीति गायकाः—नृत्यन्तीति नर्तकाः—उभयत्र ण्वुल्—तृचौ इति ण्वुल् प्रत्ययः—वैणविकवेणुनिनादैः वैणविकानां वेणुवादकानां पुरुषाणां वेणुनिनादैः वेणुध्वनिभिः (उदलासि उल्लसितम्)—वैणिककराहतवीणाः वैणिकानां वीणावादकानां करैराहतास्ताडिताः (आस्फालिताः) वीणाः अकलन्त कलकलं दध्वनुः। वेणुषु निपुणाः

वैणविकाः—वीणासु निपुणाः वैणिकाः—उभयत्र शिल्पम् (४-४-५५) इत्यनेन ठक् प्रत्ययः—तस्य इकादेशः ।। ३-९५ ।।

(संजीविनी-३-९६) **अथ मैथिलीति ।** अथ अनन्तरं मैथिली सीता पुरपुरन्ध्रिपरीता पुरस्त्रीभिः परिवृता जननीजनेन कर्तृभूतया मात्रा परिधापितवस्त्रा आच्छादितवसना सदसि स्थितं सविजयं विजयोपेतम् इष्टम् प्रियं वरिष्ठम् उत्कृष्टम् रघुनाथम् रामं स्रजयन्ती स्रजारोपितं कुर्वती—तत् करोति तदाचष्टे इति णिच्—अवरिष्ट वरयामास—वृञ् वरणे इत्येतस्मात् लुङि रूपम् ।। ३-९६ ।।

(संजीविनी-३-९७) **गुणवदिति ।** विविवक्षुः विवाहेच्छुः—विपूर्वाद् वह प्रापणे इत्यस्मात् सन् प्रत्ययः—हो ढः (८-२-३१) इति ढत्वम्—षढोः कः सि (८-२-४१) इति कत्वम्—शिशुरयं रामः गुणवत् ज्यासमेतम् नतम् ऐशं धनुः ईश्वरसंबन्धि कार्मुकमेव अभाङ्क्षीत् बभञ्ज इति यत् तद् उचितम्—यदुक्तं लोके कार्यापेक्षी पुरुषः विनयादिगुणयुक्तं नतमपि पुरुषं भग्नं करोतीति—रामस्यापि विवाहलक्षणकार्यापेक्षित्वात् धनुर्भञ्जनं युक्तम्—जनकशब्देन जनकराजोऽप्युच्यते—पिता च—तातस्तु जनकः पितेत्युक्तत्वात्—एवंरूपां चोक्तिं हृदि निधाय जरन्नपि वृद्धोऽपि जनकः अमुष्य रामस्य श्वशुरोऽभूदिति इदं किमुचितम् इति जनौघः जनसमूहः उपजहास परिजहास ।। ३-९७ ।।

(संजीविनी-३-९८) **मुनय इति ।** अथ अनन्तरं गाधिसुतगौतममुख्याः विश्वामित्रगौतमप्रमुखाः मुनयोऽपि—जनकादयः जनकप्रभृतयस्ते जगतीपतयोऽपि राजानोऽपि —अपिशब्दः समुच्चये—प्रणयात् स्नेहात् स्नेहनिमित्तात् आदृतं यथा तथा (सप्रणयं सादरं चेत्यर्थः) दशरथानयनाय दशरथस्यानयनार्थम् अयोध्यां प्रति प्रणिधीन् दूतान् अतिशीघ्रं प्रजिघ्युः प्रहितवन्तः—हि गतौ वृद्धौ चेति धातोः (लिटि रूपम्—हेरचङि (७-३-५६) इति) कवर्गादेशः ।। ३-९८ ।।

(संजीविनी-३-९९) **विविधानिति ।** विविधान् बहुविधान् विषयान् देशान् विलङ्घ्य तीर्त्वा—नीवृज्जनपदो देशविषयौ तूपवर्तनम् इत्यमरः—धृतलेखाः धृतशुभलेखाः प्रमनसः प्रकृष्टचित्ताः मैथिलदूताः मनुसृष्टां मनुना निर्मितां पुरीम् अयोध्यां विविशुः प्रापुः—सदसि सभायां सवसिष्ठं वसिष्ठसमेतं सचिवावृतं प्रधानैः संवृतं दशरथं ददृशुः ।। ३-९९ ।।

(संजीविनी-३-१००) **विशिखे इति ।** पुरमथनसमये ईश्वरस्य विष्णुः बाणोऽभूत् । धरित्री रथोऽभूत् । शेषः गुणोऽभूत् । ब्रह्मा सारथिरभूत् । एवंरूपम् अर्थमभि-

प्रेत्य विरोधालंकारं सूचयति—विशिखे इत्यादिना। विशिखे धनुर्भजि बाणे धनुर्भङ्गं कृतवति सति—बाणेन धनुर्भञ्जनम् अनुपपन्नम्—तदारवभीत्या तस्य धनुषः निनादाद् भयेन रथे चलिते सति—धनुर्भङ्गनिनादे रथचलनमनुपपन्नम्—रथिनि रथिके धन्विनि धानुष्के शिवे हृष्टे मुदिते सति शयनात्मजौ तल्पतनूजरूपौ गुणसारथी च शिञ्जिनी-सारथिरूपौ शेषब्रह्माणौ शरं बाणरूपं रामम् आनविषाताम् अस्तुवाताम् इति (उक्त्वेत्यर्थः) शुभलेखं ददुः। णु स्तुतौ इति धातोः लुङि रूपम् (आनविषाताम् इति—आङि नुप्रच्छ्योः इति आत्मनेपदम्) सार्वधातुकार्धधातुकयोः इति गुणः (धातोरुकारस्य)। अवादेशश्च ॥ ३-१०० ॥

(संजीविनी-३-१०१) **अधिलेखमिति**। सुमन्त्रः अधिलेखम् लेखायाम् अर्थम् अवगम्य ज्ञात्वा प्रहसन् हसन् अधिसंसत् सभायाम् उदन्तम् वार्ताम् अशंसत् जगाद—वार्ता प्रवृत्तिर्वृत्तान्तः उदन्तः इत्यमरः—किमित्यशंसत् (तत्राह) भरताग्रजो रामः भव-शरासनकर्षी ईश्वरचापभञ्जनं कुर्वन् निमिकन्यया सीतया स्वयम् अवारि वृतः किल इति ॥ ३-१०१ ॥

(संजीविनी-३-१०२) **विशिख इति**। अयं पूर्वोक्तो विशिखोऽपि बाणोऽपि बाणो नाम विष्णुः केशवः ते सुतः तव पुत्रः—राम इत्यर्थः—पूर्वोक्तो रथो नाम धरैव—भूमिरेव—रथी नाम गिरिधन्वा ईश्वरः—शयनात्मजौ तल्पतनूजौ गुणसारथी शिञ्जि-नीसारथी शेषविरिञ्चौ कलय शेषब्रह्माणौ जानीहि इति वसिष्ठो जगाद उवाच ॥ ३-१०२ ॥

(संजीविनी-३-१०३) **अजनन्दन इति**। अजनन्दनोऽपि दशरथश्च कर्णहृदया-मृतधाराम् श्रोत्रहृदययोरमृतधारारूपाम् निजनन्दनवार्ताम् निजनन्दनस्य रामस्य विवाहलक्षणवार्ताम् उपकर्ण्य श्रुत्वा सपौरजनः पौरजनसमेतः दारसमेतः पत्नीसमेतः सन् पुरि अयोध्यायां विहितोत्सवः सन् अमृतोदमग्न इव अमृतसिन्धौ मग्न इवाभूत्। उदकस्योदः संज्ञायाम् (६-३-५७) इति उदकशब्दस्य उदादेशः ॥ ३-१०३ ॥

(संजीविनी-३-१०४) **महतेति**। महता बलेन (अधिकेन चतुरङ्गबलेन) भरतेन सह सुमित्रातनयेन शत्रुघ्नेन च सह बन्धुसहितः बन्धुसमेतः सन् दारैः पत्नीभिः सह महेन्द्रविभवः पुरन्दरविभवः स दशरथः निमिबान्धवाय जनकेन सह बन्धुत्वं कर्तुम्—क्रियार्थोपपदस्योति चतुर्थी—नितराम् अत्यधिकं स्पृहयालुः स्पृहां कुर्वन् निजपुर्याः अयोध्यायाः निरगात् निर्ययौ। इण् गतावित्यस्मात् लुङ्। इणो गा लुङि इति गादेशः। गातिस्थेत्यादिना सिचो लुक् ॥ ३-१०४ ॥

(संजीविनी-३-१०५) **मणिमदिति ।** मणिमद्रथाङ्गम्—मणिमन्ति रत्नवन्ति रथाङ्गानि चक्राणि यस्य स तथोक्तः—तं शताङ्गम् रथम् अधिरुह्य—शताङ्गः स्यन्दनो रथः इत्यमरः—दशरथेन स वसिष्ठः पुरोदधे पुरस्कृतः—रथस्य पुरोभागं वसिष्ठं दशरथः आरोहयामासेत्यर्थः—रघुवंशकुलवृद्धचिरण्टी रघुवंशे संभूतानां राज्ञां कुलस्य समूहस्य वृद्धचिरण्टी सुवासिनी—चिरण्टी तु सुवासिनी इत्यमरः—सहचरी सहधर्मचारिणी अरुन्धती च तं वसिष्ठम् अनुभेजे अनुजगाम ।। ३-१०५ ।।

(संजीविनी-३-१०६) **कुचकुम्भेति ।** कुचकुम्भकान्तिजितकुञ्जरकुम्भाः—कुचकलशकान्त्या तिरस्कृतमहेभकुम्भाः मणिशातकुम्भमयपञ्जरगुप्ताः रत्नमयैः सुवर्णमयैश्च पञ्जरैर्गुप्ताः संरक्षिताः बधिरबर्बरकुब्जैरन्विताः वधिरैर्बर्बरैर्विकृतवेषिभिः कुब्जैश्च अनुयाताः [31]अब्जलपनाः पद्ममुखाः नृपनार्यः दशरथस्य पत्न्यः शिबिकाभिः चतुरन्तयानैः साधनैः ययुः जग्मुः । शिबिका याप्ययानं स्यादित्यमरः ।। ३-१०६ ।।

(संजीविनी-३-१०७) मदिरेति । [32]मदिरामदेन वारुणीमदेन विवशाः परवशाः नवशाट्यः नूतनवसनाः नगरवारवधूट्यः अयोध्यावारयोषितः तुरगैः साधनभूतैः अगुः ययुः घनसारपूरितहिरण्मयपेट्यः घनसारेण कर्पूरेण पूरितसुवर्णमय (पेटिकाः) चेट्यः दास्यः (वारयोषिताम्)—अमूः वारयोषितः सहसा अनुवव्रजुः शीघ्रम् अनुययुः । अथ कर्पूरमस्त्रियाम् घनसारः इत्यामरः ।। ३-१०७ ।।

(संजीविनी-३-१०८) **रथिभिरिति ।** परितः समन्तात् रथिभिः रथिकैश्च मतङ्गजतुरङ्गमवाहैः गजारोहैरश्वारोहैश्च पदातिकुलसंकुलसैन्यः पदातिकुलेन भृत्यवर्गेण च संकुलं संबाधं सैन्यं यस्य स तथोक्तः बलरेणुपङ्किलपयोधिः सेनागमनसंभूतेन पांसुना पङ्किलः पङ्कवान् पयोधिर्यस्य स तथोक्तः—लोमादीतिसूत्रेण पिच्छादित्वात् तदस्यास्त्यस्मिन्नित्यर्थे इलच् प्रत्ययः—स दशरथः दशभिर्दिनैः तां मिथिलाम् अयासीत् प्राप । या प्रापणे इत्यस्मात् लुङि रूपम् ।। ३-१०८ ।।

(संजीविनी-३-१०९) **महिषीति ।** हलकेतुना जनकेन अर्ककुलकेतुः दशरथः अभीये अभ्यगामि । किंभूतेन जनकेन—महिषीयुतेन पत्नीसमेतेन—किंभूतः सः (दशरथः) महिषीशतयुक्तः कौसल्यादिभिः अनेकाभिः समेतः—पुनः किंभूतेन (जनकेन) सपुरोहितेन शतानन्दसहितेन—किंभूतो दशरथः—सपुरोहितवर्गः वसिष्ठादिभिः समेतः—पुनः किंभूतेन बलिना हस्त्यश्वादिसेनावता—पुनः किंभूतः सः—बली हस्त्यश्वादिसेनावान् विभविना प्रभुशक्तिमता विभवाढ्यः प्रभुशक्तिसंपन्नः ।। ३-१०९ ।।

(संजीविनी-३-११०) **द्विरदेति।** मिथिलान्तिके मिथिलासमीपे बलवार्धी सेनासमुद्रौ मिमिलतुः। संयुक्तसेनासमुद्रयोः विशेषणैः साम्यमाह—द्विरदाचलाग्रविचलद्ध्वजवीची—द्विरदाः गजाः—ते एव अचलाः—तेषाम् अग्रभागे विशेषेण चलन्तः—ते च ते ध्वजाश्च—ते एव वीचयः ययोस्तौ तथोक्तौ—समुद्रे तु पर्वताग्रे वीचयश्चलन्ति—पुनः किंभूतौ—रमणीधृताभरणरत्नमरीची—रमणीभिः योषिद्भिः धृतानि आभरणानि—तेषु कीलितानि रत्नानि—तेषां मरीचयो ययोस्तौ तथोक्तौ—समुद्रे तु रत्नमरीचयो विद्यन्ते—पुनः किंभूतौ—तुरगग्रहौ तुरगा एव ग्रहा ययोस्तौ—समुद्रे तु जलग्रहा विद्यन्ते—पुनः किंभूतौ—तुमुलदुन्दुभिघोषौ संकीर्णभेरीस्वनौ—समुद्रे तु महाघोषा विद्यन्ते ।। ३-११० ।।

(संजीविनी-३-१११) **नगरमिति।** नगरं मिथिलापुरीं प्रविश्य विनयोपलक्षितो मिथिलेशो जनकः विनीतं दशरथं समपूजयत् सत्कृतवान्—अथ अनन्तरम् चतुरो विदग्धो युगपत्ककेतुः जनकः चतुरः कुमारान् रामादीन् युगपद् वीक्ष्य जहर्ष तुतोष ।। ३-१११ ।।

(संजीविनी-३-११२) **भयेति।** भयनम्रमौलिभिः साध्वमेन नम्रकिरीटैः उपायनहस्तैः उपहारहस्तैः नृपवरैः राजश्रेष्ठैः सदसि स्थितो (स्थित एव) दशरथः उपतस्थे (मिलितः)—उपाद्देवपूजेत्यादिवार्त्तिकेन संगतिकरणार्थे उपपूर्वात् स्था धातोरात्मनेपदम्—राजसमाजे राजसमूहे औडवीं द्युतिम् उडुसंबन्धिनी कान्ति भजति सति ऐन्दुमतेयः दशरथः ऐन्दवीम् इन्दुसंबन्धिनीं रुचम् अभजत् प्राप । इन्दुमतीशब्दात् स्त्रीभ्यो ढक् इति ढक् प्रत्ययः—आयनादिसूत्रेण एयादेशः ।। ३-११२ ।।

(संजीविनी-३-११३) इदानीं रामादीनां विवाहप्रकारमाह—**प्रथममिति।** प्रथमं पूर्वं रघूद्वहो रामः सीतामुपायत उपयेमे—यम उपरमे इत्यस्मात् लुङि रूपम्—च्लेः सिच्—विभाषोपयमने (१-२-१६) इति विभाषा सिचः किद्वद्भावः—(कित्त्वपक्षे) अनुदात्तेत्यादिना अनुनासिकलोपः—ह्रस्वादङ्गादिति सकारलोपः—अथ अनन्तरं शुभरतः शुभकार्येषु रतो भरतोऽपि माण्डवीम् उपायत—अमौ भरतानुजो लक्ष्मणश्च ऊर्मिलया अमिलत् संगतोऽभूत्—तदनुजः तस्य लक्ष्मणस्य अनुजः शत्रुघ्नः श्रुतकीर्ति परिणीतवान् उपयेमे ।। ३-११३ ।।

(संजीविनी-३-११४) **षष्ठे इति।** अथ अनन्तरं नृपतिर्दशरथः षष्ठे अहनि षष्ठे दिवसे वसिष्ठवाक्यात् निमीन्द्रकन्याः निजशिविरं स्वकीयसेनानिवेशं प्रति आनिन्ये आनिनाय—जामातॄन् दुहितृपतीन् दुहितॄः पुत्रिकाश्च प्रपूज्य सत्कृत्य वैदेहो[33] राजा जनकः अनन्तमर्थं दुहितॄणां हरणं यौतकम् अदात् स्त्रीधनं ददौ । यौतकादि तु यद्

देयं मुदायो हरणं च तत् इत्यमरः—(अदात् इति) डु दाञ् दाने इत्यस्मात् लुङि रूपम् । गातिस्थेति सिचो लुक् ॥ ३-११४ ॥

(संजीविनी-३-११५) **रत्नानीति** । कुशध्वजोऽपि रत्नानि द्विपहयधेन्वजाविचेटीः—द्विपान् गजान्—हयान् वाजिनः—धेनूः सुरभीः—अजावीः छागीः—बस्ताश्च—चेटीश्च दासीश्च आन्दोलीशकटपटीरवस्त्रपेटीः—आन्दोलिकाश्च शकटांश्च पटीरं चन्दनं च वस्त्रपेटीश्च कस्तूरीघनघनसारवस्तुजातम्—कस्तूरी मृगनाभिम् घनघनसारवस्तुजातम् उत्कृष्टकर्पूरादिसमस्तवस्तुजातं पुत्रीभ्यः पृथग् ददौ दत्तवान् । कुशध्वजोऽपि पूर्वोक्तं समस्तवस्तुजातं पुत्रीभ्यः हरणं दत्तवान् इत्यर्थः ॥ ३-११५ ॥

(संजीविनी-३-११६) **आमन्त्रयेति** । प्रियसखं प्रियसुहृदं निमीन्द्रं निमिकुलस्याधीशं जनकम् आदराद् आमन्त्र्य चतसृभिः सूर्याभिः नवोढाभिः सह—सूर्या नववधूः कन्या नवोढेत्युच्यते बुधैः इति [34]हलायुधः—चतुर्भिः आत्मजैः पुत्रैः सह कोविदारकेतुं रथमारूढः सन् काकुत्स्थो दशरथः अथ अनन्तरं निजनगरीम् अयोध्यां प्रति प्रतस्थे । समवप्रविभ्यः स्थः इति आत्मनेपदम् ॥ ३-११६ ॥

(संजीविनी-३-११७) **पथीति** । पथि मार्गे पङ्क्तिरथं दशरथं रुरुत्सगानः रोद्धुमिच्छन्—रुधिर् आवरणे इत्यस्मात् सन् प्रत्ययः—हलन्ताच्च (१-२-१०) इति सनः कित्त्वात् गुणाभावः भयदैन्यद्रुतसैन्यदत्तमार्गः भयनिमित्तेन दैन्येन द्रुतसैन्यदत्तमार्गः धावता सैन्येन प्रदत्तमार्गः सन् परशुं तीक्ष्णं परशुं दधत्—नाभ्यस्ताच्छतुः (७-१-७८) इति प्रतिषेधात् नुमागमाभावः—दृगन्तज्वलदग्निः आपाङ्गदेशे ज्वलत्कृशानुः जमदग्निसूनुः परशुरामः आगात् (आजगाम) । (आङ्पूर्वात्) इण् गतावित्यस्मात् लुङि रूपम् । इणो गा लुङि इति गादेशः । गातिस्थेत्यादिना सिचो लुक् ॥ ३-११७ ॥

(संजीविनी-३-११८) **क्वन्विति** । [35]भद्गुरुकार्मुकस्य भद्गुरोरीश्वरस्य चापस्य भङ्क्ता भञ्जकः क्व नु कुत्र वर्तते—मम परशुः परश्वथः तस्य कण्ठरक्तं पास्यति—क्षितिभृद्वंशदवाग्निः—क्षितिभृतो राजानः—ते एव वंशाः—तेषां दवानलः एष रैणुकेयः परशुरामः—स्त्रीभ्यो ढक् इति ढक् प्रत्ययः—आयनादिसूत्रेण एयादेशः—विस्मृतः किमु इत्यवादीत् । वद व्यक्तायां वाचि इत्येतस्मात् लुङि रूपम् । इट ईटि इति सिचो लुक् ॥ ३-११८ ॥

(संजीविनी-३-११९) **तदिति** । सकलत्रः कौसल्यादिभिः समेतो दशरथः त्रसन् भीतः सन् तत्समागमसमुत्सुकम्—तेन परशुरामेण समागमे समुत्सुकम् अग्रे स्थितं पुत्रं

रामम् अवादीत् । किमिति—हे वत्स श्रीराम गुरुवत्सल गुरुभक्त तत्समीपम् तस्य परशुरामस्य समीपं मागाः न गच्छेः—इति (अवादीत्) । (अवादीत् इति वद धातोः लुङि रूपम्—मा गाः इत्यत्र इण् गतावित्यस्मात् लुङि इणो गा लुङि इति गादेशः । गातिस्थेति सिचो लुक् । न माङ्योगे इति अडागमाभावः) ।। ३-११९ ।।

(संजीविनी-३-१२०) **भृगुनन्दनमिति ।** सपुलकः स रामः सभ्यसंमतः सभार्हणामिष्टतमः रघुनन्दनो रामः कृताञ्जलिः कृताञ्जलिबन्धः सन् आत्मनो मृगयितारम् अन्वेषमाणम् भृगुनन्दन परशुरामम् अभ्यवादयत प्रणनाम । यदि कार्यमस्ति तर्हि वदत ब्रूत—पूजार्थे बहुवचनम्—इति अब्रवीच्च । ब्रुवः ईट् (७-३-९३) इति ईडागमः ।। ३-१२० ।।

(संजीविनी-३-१२१) **प्रह्वमिति ।** पुरः पुरस्तात् प्रह्वं नम्रं पङ्क्तिस्थ दशरथं संनाहिनः संनद्धान् अन्यान् दाशरथीन् भरतादीश्च तथा हस्त्यादिसैन्यं च निरीक्ष्य दृष्ट्वा हसन् सः प्रसिद्धः (परशु) रामः विनयेन अभिरामं रामं रामचन्द्रं वक्ष्यमाणप्रकारेण बभाषे ।। ३-१२१ ।।

(संजीविनी-३-१२२) किमिति तमाह—**अव्राक्षमिति ।** नृपवृक्षकान्—नृपा एव वृक्षकाः बालवृक्षाः—अल्पार्थे कप्रत्ययः—तान् अव्राक्षं परशुना परशवथेन अच्छिनदम् । प्रतापानलैः तान् अधाक्षम् (अदहम्) । शस्त्रीहलैः शस्त्रीरूपैः सीरैः भटरक्तपङ्कल भटाना रक्तेन कर्दमितम् अरिक्षेत्रम् अक्राक्षम् त्रिलिखामि स्म—अभितः सर्वतः घनकीर्तिबीजं कीर्तिरूपबीजम् आवाप्यम् बीजावापं करोमि स्म—"[6]तत्रेधितान् तृणकल्पान् वः युष्मान् छिनदानि—युष्माकम् उच्छेदं करोमि । अथ अनन्तरं मे कीर्तिः दिगन्तानपि गन्ता प्रयास्यति । (वक्ष्यमाणोऽप्यर्थः गम्यते)—लोके कृषीवलः वृक्षान् छिनत्ति । तदनन्तरं शुष्कान् तान् दहति । तदनन्तरं वृष्ट्या सिक्तं क्षेत्रं कर्षति । तदनन्तरं बीजावापं करोति । तदनन्तरं तृणमुच्छिनत्ति । तदनन्तरं तस्य कृषीवलस्य फलप्राप्तिर्भवति—इत्ययमर्थोऽपि (अत्र) गम्यते । व्रश्चू च्छेदने—दह भस्मीकारेणे—कृष विलेखने—डु वप् बीजसंताने इत्येतेभ्यो लुङि रूपाणि । अव्राक्षम् इत्यत्र व्रश्चेत्यादिना षत्वम् । षढोः कः सि इति कत्वम् । अक्राक्षम् इत्यत्र अनुदात्तस्य च (६-१-५९) इति सूत्रेण अमागमः । यणादेशः । षढोः कः सि इति कत्वम् । वद व्रजेत्यादिना वृद्धिः ।। ३-१२२ ।।

(संजीविनी-३-१२३) **तिष्ठतीति ।** शत्रुविरामे शत्रूणामवमानरूपे परशुरामे मयि तिष्ठति सति रामेत्याख्या राम इत्याभिधानं तवायं मन्तुः एकोऽपराधः—किं तु किं च

—अपराधान्तरमस्तीत्यर्थः—कन्याकाङ्क्षी सन् ऐशं कार्मुकम् ईश्वरसंबन्धि शरासनम् अभाङ्क्षीः इति यत् अयम् अन्यो मन्तुः (अपराधः) आगोऽपराधो मन्तुश्च इत्यमरः—अभाङ्क्षीदिति भञ्जो आमर्दने इत्यस्मात् लुङि रूपम्—चोः कुः इति कुत्वम्—खरि च इति चर्त्वम्—अनुस्वारपरसवर्णौ—तौ अपराधौ सोढाहे सहिष्ये । मे वैष्णवं धनुः आकर्ष ।। ३-१२३ ।।

(संजीविनी-३-१२४) **श्रुत्वेति** । वचनानि श्रुत्वा सस्मितं यथा तथा नारायणीयं (नारायणसंबन्धि) धन्व कार्मुकम् अमुष्य परशुरामस्य कराद् गृहीत्वा स्वीकृत्य अवकृष्य अधिरोप्य च रामचन्द्रः अप्रतिहतेन अनर्गलेन शरेण विप्रं तं हन्तुं नैहिष्ट नैच्छत्—ब्रह्मणस्यावध्यत्वात् । किं तु तस्य परशुरामस्य अमरलोकपथं स्वर्गमार्ग न्यरौत्सीत् रुरोध । ईह चेष्टायाम्—रुधिर् आवरणे इति धात्वोः लुङि रूपे । सुरलोकपथमित्यत्र ऋक्पूरित्यादिना अकारः समासान्तः ।। ३-१२४ ।।

(संजीविनी-३-१२५) **तच्चापमिति** । [37]ताटकारौ रामे तच्चापं तस्य परशुरामस्य कार्मुकम् आकर्ण कर्णपर्यन्तम् आकर्षति सति आकर्णविशालणेत्रा आकार्णान्तविशाललोचना सती विदेहकन्या सीता असौ रामः अन्यां कन्यां परिणेष्यति किम् किं वा वोढेति सासूयं यथा तथा रामम् ऐक्षिष्ट अपश्यत् । ईक्ष दर्शने इत्यस्मात् लुङि रूपम् । ईश्वरचापमाकृष्य मां व्यवोढ । परशुरामचापमाकृष्य किमन्यां कन्यां परिणेष्यति इति सासूयम् अपश्यदित्यर्थः ।। ३-१२५ ।।

(संजीविनी-३-१२६) **शमवति** इति । रामचन्द्रं परिरभ्य आलिङ्ग्य शमवति शान्तिमति राममुनौ परशुरामे तपोवनाय गतवति सति वयं कथमपि कृच्छ्रेण यमवक्त्रात् निर्गताः स्मः मृत्युवक्त्रात् निर्याताः स्मः इति (वदन्) भूपतिः दशरथः पुत्रान् आलिलिङ्ग (आशिश्लेष) ।। ३-१२६ ।।

(संजीविनी-३-१२७) **भृगुपतीति** । नृपो दशरथः भृगुपतिभयविह्वलैः परशुरामाद् भयेन खिन्नैः पुनः पश्चात् जन्मसमागतैरिव स्थितैः अनेकैः वहुभिः अनीकैः सेनाभिः सह क्वचिदपि क्वचित् स्थलेऽपि अहतनयैः अप्रतिहतनीतिशास्त्रैः चतुर्भिः तनयैः रामादिभिः सह अयोध्यां पुरीम् अविशत् विवेश ।। ३-१२७ ।।

इति श्रीराम्-पल्लि-गोपीनाथसूरिविरचितायाम्
उदारराघवव्याख्यायां तृतीयः सर्गः

NOTES TO SAṂJĪVINĪ—Canto III

[1] The expression: *Saṃjīvinī* as the name of the Commentary occurs in the Colophon at the end of the seventh Canto.

[2] With the part: Rām-Palli, the author's name Gopīnātha-sūri occurs in the Colophon at the end of the third Canto. *Palli* (with short "i") is a regionalised form of the Sanskrit *Pallī* (i.e. village), and *Rām-Palli* is of *Rāma-Pallī*. In other places, the expression Gopīnātha-sūri alone occurs as the name. Rām-Palli may refer to the village or the family name.

[3] Bombay edn. reads: *dhanuṣī vidadhāte* and *pradadāte* at the end. MS. 1, MS. 7 read: *dhanuṣī dhṛtavantau* and *vidadhāte* at the end, and these the *Saṃjīvinī* too has.

[4] See the *Pradyotanī* for the different readings here.

[5] See the *Raghuvaṃśa* 9. 74: *nṛpateḥ pratiṣiddham eva tat kṛtavān paṅktiratho vilaṅghya yat* etc. See also: *tam āpatantaṃ nṛpater avadhyo vanyaḥ karīti śrutavān kumāraḥ* (ibid. V. 50) on which Mallinātha says thus: *atra cākṣuṣaḥ: lakṣmīkāmo yuddhād anyatra karivadhaṃ na kuryāt; iyaṃ hi śrīr ye kariṇaḥ*. See also Note to the *Pradyotanī* (III. 27).

[6] The usage in *etya* seems to be a case of *bhinnakartṛka*. This is similar to: *matprasūtim anārādhya* (*na bhaviṣyati te*) *prajeti tvāṃ śaśāpa sā* (I. 77) of the *Raghuvaṃśa*. To get over the grammatical difficulty in the verse some Commentators suggested supplying the word *sthitasya* (*te*)—(See Bombay edn. Footnote)—which is also mentioned in the *Durghaṭavṛtti* (on III. 4. 21).

[7] Bombay edn. reads: *asmājararūpā*, so also the *Pradyotanī* seems to do. But the explanation in the *Pradyotanī* probably means: *divyarūpā*, as *ajara* is a synonym of *deva*. The *Saṃjīvinī* reads: clearly *asamājirarūpā*.

[8] MS. 1 reads: *muniveṣa*—Bombay edn. MS. 7 and the Commentaries read: ṛṣiveṣa—etc.

[9] The usage of *adhimat* in a verse by Śākalyamalla was cited in the *Sāhityakaṇṭakoddhāra* page 20 (See my edn.; Delhi 1980; Motilal Banarasidass)—*adhimat priye sumukhi bhāṣitena kim*?—which I could not trace while editing that work. At that time I did not have access to the Commentaries and to the Bombay edn. of the *Udārarāghava*. At that time I simply guessed and took the expression: *adhimat* to be in the sense of "about me", "towards

me" etc. I am glad to see now that the Commentaries explain it in the same way as I had guessed. In fact it was the quotations from the *Udārarāghava* in the *Sāhitvakaṇṭakoddhāra* and the inaccessibility to such a work as the *Udārarāghava* in print, that was responsible to some extent for my undertaking to bring out a suitable edition of the work with available Commentaries. Māgha has: *adhitvat* in the following:—

*madhusurabhimukhābjagandhalabdhe*r

adhikam adhatvad anena ma vipāti (VII. 41), where Mallinātha explains *adhitvat* to be in the sense of "*tvam*". The comments in the Footnote given by the editor of the Māgha (NSP) do not seem to be correct in the light of these Commentaries here too. Incidentally, the Bombay edition of the *Udārarāghava* reads: *adhamat* here, which is not correct. *adhimat* is the correct form.

[10] Though the root: *saha -marṣane* is generally used in the *Ātmanepada*, *Parasmaipada* uses are also met with. Bhaṭṭoji quotes (in his S. K.): *sa evāyaṃ. rāgaḥ sahati kalabhebhyaḥ paribhavam*, and Bhūṣaṇabhaṭṭa uses in the *Kādambarī* as: *duḥkhāny api sahanti* (p. 532; NSP). See also the S. K. U. (p. 42) where there is some discussion. Therefore *asahan* is also deemed correct. Our author notes in his *Ākhyātacandrikā* the form *sahati* also as a correct one.

[11] The meaning of the word *trika* is made clear a bit later in the Commentary. Liṅgayasūri in his Commentary on the Amara, explaining the meaning of *trika*, says thus: *sāṇḍadvaya-śiśnayor vā* (*trikam iti nāma*)—See Adyar edn., page 410, Vol. I. This commentator seems to follow him.

[12] The root *śap* is used in two senses: One is *upālambha*, i.e. cursing, and the other is *śapatha-karaṇa*, i.e. scolding or using a profane or obscene oath to express anger etc. (The word *śapatha*—not the verbal form—is sometimes seen, particularly in the regional languages in the sense of general swearing.) The second sense is rendered further as, *svābhiprāyabodhānukūla-śapatha-karaṇa* (See *Mañjuṣā* on *Gopī smarāt kṛ snāya Śapate*; page 1271; Chowkhamba edn). According to Nāgeśa and other Grammarians it is in this second sense that the Dative Case (*Caturthī-vibhakti* is prescribed by the rule: *ślāgha-hnu* - etc. (I. 4. 34). In the sense of "cursing" the *Caturthī* is not applicable, and only the *dvitīyā* is seen in usage. Kālidāsa has: *tvāṃ śaśāpa sā* (*Raghu*. I. 77), *bhūmipatiṃ śaśāpa* (IX.78), *aśapat tām* (VIII. 80). In the usage here, *vasa duḥkhaṃ kalayantī asahyam iti mahyam aśapta* (III. 32), the meaning intended is "cursing", and so the *Caturthī* by the rule I. 4. 34 cannot be explained. For this reason Caunḍi-sūri tries to justify the usage by having recourse to the *Vārttika*: *kriyāgrahanaṃ kartavyam*. Gopīnātha, the author of the *Saṃjīvinī*, simply explains the *Caturthī* by the rule. I. 4. 34. It seems to indicate that he was probably earlier than Caunḍi-Paṇḍita who perhaps has in mind the comments of the *Saṃjīvinī*, when he rejects the application of the rule I. 4. 34 and says

na tu ślāghetyādinā; tasyopālambhanārthaviṣayatvāt. It might also be that both were contemporary and neither could have had access to the writing of the other. It is also possible that Caṇḍi was following the interpretation of the rule by the Grammarians, and that Gopinātha was not. It appears that in the opinion of Śākalyamalla, who uses (both the types) as: *viphalo bhaveti maghavānam aśāpsīt* (with *dvitīyā*—in III. 31) and *mahyam aśapta* (with *Caturthī*— in III. 32) that either *dvitīyā* or the *Caturthī* can be used even in the sense of "cursing" according to the *vivakṣā* of the speaker. Gopīnātha too was probably having the same opinion.

[13] See the *Pradyotanī* in the context and the Note for different interpretations and the usage.

[14] Only the *Saṃjīvinī* reads: *samadāḥ*. Others read: *samudaḥ*.

[15] See Note 23 to the *Pradyotanī*.

[16] See Notes 24. 25 and 26 to the *Pradyotanī*.

[17] This is a reference to the explanation of *pratiyatna* given in the *Kāśikā*. See the *Kāśikā* on VI. 1. 139, and the *Nyāsa* and the *Padamañjarī* thereon.

[18] The *Saṃjīvinī* reads *gavākṣavivarāhitanetrāḥ*. Others read: *gavākṣa-nihitāyata-netrāḥ*.

[19] The word *bāla* is included in the *Pṛthvādi-gaṇa*.

[20] Regarding *juhū* and other utensils etc. see the *Yajñatattvaprakāśa*, page 34 (Madras Law Journal Press, 1953) where some details are provided. See also the *Pradyotanī*.

[21] Only the *Saṃjīvinī* reads: *yajanakarmaṇi yuktāḥ*. Bombay edn., MS. 1, MS. 7 and the *Pradyotanī* read: *yajanakarma-niyuktāḥ*.

[22] The *Pradyotanī* seems to refer to the *Saṃjīvinī* indirectly. See the *Pradyotanī* in the context.

[23] See the verse III. 90 and the *Saṃjīvinī* thereon.

[24] Bombay edn, the *Saṃjīvinī* and the MS. 1 read: *avak rahasi uttham* (—*avagrahasittham*). MS. 7 clearly reads: *rahasi ramam avocat*.

[25] The portion within brackets—from *sasmitam* to *aicchat* are supplied by the Editor, as the relevant comments are missing in the MS. of the *Saṃjīvinī*.

[26] Bombay edn., MS. 1 and MS. 7 read: *rabhasoccalat* etc. The *Saṃjīvinī* reads: *sahasā* (*uccalat* etc.).

[27] The *Saṃjīvinī* reads: *amāthiṣata*. Bombay edn. MS. 1, Ms. 7 and the *Pradyotanī* read clearly *amoṭiṣata*, and the *Pradyotanī* explains it from the root *muṭa* (*saṃghūrṇane*).

[28] See the verse III. 69 and the *Saṃjīvinī* thereon.

[29] Bombay edn. reads: *karikumbhatuṅga*—etc. The *Saṃjīvinī* reads: *karikumbhatulya*—etc. MS. 1, Ms. 7 and the *Pradyotanī* read: *ibhakumbhatulya-etc.*

[30] Bombay edn. reads: *stutibhir asmayamāne.* Ms. 1, Ms. 7, the *Saṃjīvinī* and the *Pradyotanī* read: *stutibharasmayamāne.*

[31] Bombay edn. and MS. 1 read: *abjanayanāḥ.* MS. 7, the *Pradyotanī* and the *Saṃjīvinī* read: *abjalapanāḥ.*

[32] Bombay edn. reads: *madirāvaśena.* MS. 7, the *Pradyotanī* and the *Saṃjīvinī* read: *madirāmadena.* First foot of the verse is missing in MS. 1.

[33] Only Bombay edn. reads: *vaidehīharaṇam.* MS. 1 and the *Saṃjīvinī* read: *vaideho (rājā) haraṇam adāt.*

[34] This is not found in the printed edn. of the *Halāyudha.*

[35] Bombay edn. reads: *sadgurukārmukasya.* MS. 1 and the *Saṃjīvinī* read: *madguru*—etc.

[36] Bombay edn. reads: *tatraidhitān.* Ms. 1 reads: *tatrotthitān*

[37] This verse: *Taccāpam* etc. is also included in the *Hanumannāṭaka* compiled by Dāmodaramiśra. According to the MSS. of the U. R., and the Commentary *Saṃjīvinī* it seems to be originally from the U. R. of Śākalya-Maila. This may suggest a date later than the middle of the 14th Century. for Dāmodara-Miśra. See *Hanumannāṭaka* I. 50.

———

उदारराघवे महाकाव्ये चतुर्थसर्गस्य व्याख्या संजीविनी
श्री-राम्-पल्लि-गोपीनाथसूरिविरचिता

(संजीविनी-४-१) **तत इति ।** ततः अनन्तरं मनीषी विद्वान् जगतां हितैषी हितापेक्षी राजा दशरथः कदाचित् कस्मिंश्चिद् दिवसे तरुणं युवानं गुणार्णवं गुणनिधिं रामम् अवेक्ष्य दृष्ट्वा पौरप्रधानानुमतः पुरजनैः प्रधानैश्च अङ्गीकृतः सन् रामम् अभिषेक्तुम् ऐषीत् इयेष—इष इच्छायामित्यस्मात् लुङि रूपम्—इट ईटि इति सिचो लुक् ।। ४-१ ।।

(संजीविनी-४-२) **आनायिता इति ।** नृपेण दशरथेन रामाभिषेकोत्सवदर्शनाय रामस्य अभिषेकोत्सवसमीक्षणाय समन्तात् सर्वतः जानपदाः जनपदवासिनः—सोऽस्य निवासः इत्यण् प्रत्ययः—आनायिताः आगमिताः—राजर्षिगणः राजर्षीणां समूहश्च आह्वायि आहूतः—महर्षिलोकः महर्षीणां समूहश्च आनायि आगमितः—राजानश्च ते ऋषयश्च राजर्षयः तेषां गण इति (विग्रहः) ।। ४-२ ।।

(संजीविनी-४-३) **भूमानमिति ।** दशरथः अस्य रामस्य भूमानम् माहात्म्यम् अविमृशन् अविचारयन्—पृथ्वादिभ्यः इमनिच् वा (५-१-१२२) इति इमनिचि बहोर्लोपो भूच बहोः (६-४-१५८) इति बहुशब्दात् परस्य लोपः बहोः भूरादेशश्च (भूमानमिति रूपे)—एनं रामम् इह एतस्मिन् भूमात्रराज्येऽपि धरित्रीमात्रराज्ये एव अभिषेक्ष्यतीति अभिषेकं करिष्यतीति सहर्षयोगाः सप्रमोदाः सन्तः गाधितनूजमुख्याः विश्वामित्रप्रमुखाः महर्षयः नरेन्द्रं दशरथं जहसुः—हर्षयोगेन सह वर्तन्ते इति सहर्षयोगाः (इति विग्रहः)—दशरथः सकलजगद्रक्षकस्य रामस्य माहात्म्यम् अविचारयन् (तं) भूमात्रराज्ये एव अभिषेक्ष्यतीति दशरथं परिहसितवन्त इत्यर्थः ।। ४-३ ।।

(संजीविनी-४-४) **राज्ञा नियुक्ता इति ।** रघुवंशकेतोः रघुवंशप्रकाशकस्य रामस्य अभिषेकहेतोः अभिषेकाय-षष्ठी हेतुप्रयोगे (२-३-२६) इत्यनेन चतुर्थ्यर्थे षष्ठी—राज्ञा दशरथेन नियुक्ताः पुरुषाः नीराकरेभ्यः समुद्रेभ्यः निखिलापगाभ्यश्च सकलनदीभ्यः सरोवरेभ्यः उत्कृष्टसरोभ्यश्च सकलह्रदेभ्यश्च अम्भांसि आजह्रुः[1]—जलान्यानीतवन्तः ।। ४-४ ।।

(संजीविनी-८-५) **तीर्थेति** । कलशीः तीर्थाम्बुपूर्णाः पूर्वोक्ततीर्थजलेन संपूर्णाः सरत्नाः मुक्तादिमणिसमेताः विधिवत् शास्त्रोक्तप्रकारेण कृतप्रयत्नाः कृतेन्द्राद्यावाहनाः विधाय गृहिणां वरिष्ठः गृहस्थानां श्रेष्ठः गुरुर्वसिष्ठः सद्भिर्द्विजैः द्विजश्रेष्ठैः सह एत्य समागत्य अभ्यममन्त्रत्—कलशाभिमन्त्रणं कृतवान्—मन्त्रि गुप्तभाषणे इत्यस्मात् णौ चङि रूपम् ॥ ८-५ ॥

(संजीविनी-८-६) **काश्मीरेति** । नरेन्द्रो दशरथः तां पुरीम् अयोध्यां काश्मीरगन्धोत्कर्षिक्तवीथी कुङ्कुमप्रधानगन्धोदकेन उक्षिता (वीथयो यस्यां सा तथोक्ता ताम्)—आमुक्तमुक्ताफलरङ्गवल्लीम् आमुक्ता रचिताः मुक्ताफलानां रङ्गवल्ल्यः रञ्जकाः यस्यां सा तथोक्ता—ताम्—तत्तत्प्रतोलीमणितोरणाङ्का तत्तद्राजवीथीषु मणिमयतोरणाः अङ्कानि चिह्नानि यस्यां सा तथोक्ता—ताम् अयोध्याम् एवं कारयामास ॥ ८-६ ॥

(संजीविनी-८-७) **वस्त्राणीति** । वणिग्भिः वैश्यैः गृहाङ्गणेषु गृहाणाम् अजिरप्रदेशेषु चित्राणि वस्त्राणि चित्रपटानि उच्चैर्वंशैः (उन्नत)ध्वजस्तम्भैः अनह्यन्त आयुज्यन्त—येषां ध्वजपटानां छायया तीव्रांशुमरीचिजालम् सूर्यरश्मिकदम्बकं नीव्राणि वलीकानि किंचित् नैव अगाहत नैव प्रविशति स्म—अनेन ध्वजपटानां छायाबाहुल्यमुक्तम् ॥ ८-७ ॥

(संजीविनी-८-८) **आध्मासिषुरिति** । वैणविकाः वेणुवादकाः वेणून् आध्मासिषुः पूरयामासुः—ध्मा शब्दाग्निसंयोगयोरित्यस्मात् लुङि रूपम्—काहलानां च शङ्खानां च नादः खं व्यानशे आकाशं व्याप्नोति स्म—ढक्काहुडुक्कानकदुन्दुभीनां ढक्काहुडुक्काझर्झरपटहदुन्दुभयो भेरीभेदाः—तेषां निनादेन मोदेन पुरजनप्रमोदेन च पूः पुपूरे अयोध्या पूरिता—उदोष्ठ्यपूर्वस्य (७ १-१०२) इत्यनेन पृधातोः ऋकारस्य उत्त्वम् ॥ ८-८ ॥

(संजीविनी-८-९) **पौरैरिति** । पौरैः पुरजनैश्च तदा गृहाणि संचस्करिरे अलंचक्रिरे—समुपरिभ्याम् (उपाच्च) इत्यादिना भूषणार्थे सुडागमः—वाराङ्गनाभिश्च वारवनिताभिश्च वपुर्बभूषे वपुरलंकृतम्—सर्वकषाः सर्वव्यापकाः सर्जरसादिधूपाः अभ्रंकषान् आकाशस्पृशः सौधान् आरुरुहुः सौधारोहणं चक्रुः—सर्वकषाः अभ्रंकषान् इत्यत्र सर्वकूलाभ्रकरीषेषु कषः (३-२-४२) (इत्यनेन) खच् प्रत्ययः—अरुर्द्विषद् (६-३-६७) इत्यनेन मुमागमः ॥ ८-९ ॥

(संजीविनी-४-१०) **आबालमिति।** निरस्तलोभः निर्गतलोभः समस्तलोकः समस्तजनश्च आबालं बालप्रभृति—आङ् अत्र अभिविधौ—आनञ्ज अभ्यङ्गं कृतवान्—अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु इत्यस्मात् लिटि रूपम्—(गन्धैः वपुः लिलेप—माल्यानि भूषाश्च बभार—नवानि नानावसनानि च अवस्त आच्छादयत्) ॥ ४-१० ॥

(संजीविनी-४-११) **तत इति।** ततः अनन्तरं नरेन्द्रप्रहितः दशरथेन नियुक्तः सन् सुमन्त्रः गुणाभिरामम् गुणैरभिरामं रामम् उपेत्य गत्वा तेन रामेण अभ्युद्गतः अभियातः सन् सुपूजितः सम्यक् पूजितश्च सन् सभायां प्रमोदवार्ताम् उवाच ॥ ४-११ ॥

(संजीविनी-४-१२) **राज्ये तवेति।** हे राम तव राज्ये अभिषेकः श्वो भविता श्वो भविष्यति—अद्य रामासहितः सीतासहितः सन् अभ्यज्य अभ्यङ्गं कृत्वा विभूषितश्च अलंकृतश्च सन् उपोषितः (कृतोपवासः) आर्यावृतः आर्यैरावृतः तूर्यनादैः सह रजन्यां जागृहि जागरणं कुरु—(पद) विभागः राम अद्य रामासहितः (इति) ॥ ४-१२ ॥

(संजीविनी-४-१३) **पुण्याहमिति।** हे रघुवंशरत्न रघुकुलश्रेष्ठ राम पुण्याहम् आवच्य कारयित्वा दक्षिण्यं दक्षिणार्हम्—कडंकर दक्षिणात् छ च (५-१-९९) इत्यनेन यात् प्रत्ययः—पुरोहितौघं पुरोहितवर्गं दक्षिणाभिः आराधय पूजय—तव तातः ते पिता राज्याभिषेके राज्याभिषेकविषये सर्वयत्नं करोति ॥ ४-१३ ॥

(संजीविनी-४-१४) **कुलक्रमागामीति।** हे राम कुलक्रमागामि कुलक्रमागतं प्राज्यश्रियः अधिकसंपदः पङ्क्तिरथस्य राज्ञः दशरथस्य राज्यम् आसाद्य प्राप्य भद्रासनस्थः सिंहासनस्थः सन् आ समुद्रं शासत् चतुःसमुद्रपर्यन्तं पालयन्—(शासत् इत्यत्र) नाभ्यस्तात् शतुः इति निषेधात् नुमागमाभावः—उर्व्याः भारं भुभारं भर वह ॥ ४-१४ ॥

(संजीविनी-४-१५) **सत्सन्ततिमिति।** हे वत्स विदेहपुत्र्यां सीतायां सत्सन्ततिम् उत्पाद्य सत्सन्ततिं जनयित्वा सत्पात्रसमर्पितार्थः सत्पात्रप्रदत्तधनः सन् अयोध्यापुरवासिनः अस्मान् रक्षन् रक्षांसि हत्वा राक्षसान् हत्वा हे रघुनाथ रामचन्द्र जीयाः सर्वोत्कृष्टो भव—एतानि सुमन्त्रवचनानि ॥ ४-१५ ॥

(संजीविनी-४-१६) **श्रुत्वेति।** रामो रामचन्द्रः श्रवसोः श्रवणयोः असह्यम् इति पूर्वोक्तं प्रधानवाक्यं सुमन्त्रवचनं श्रुत्वा प्रहसन् बभाषे उवाच—किमिति हे आर्य—पूज्य

इह सभायां प्रमोदवार्तेति वदन् प्रमादवार्ता प्रकटीकरोषि--राज्यस्थस्य पुंसः सर्वदा प्रमादस्य विद्यमानत्वात् ।। ४-१६ ।।

(संजीविनी-४-१७ **सुखायेति ।** एतत् तातवाक्यं (पितुः) दशरथस्य वचनं मम सुखाय न भवति--कथमिव--वैद्यस्य भिषजः सर्पिर्मधुनोः ऐक्यमिव--आज्यमधुनोः संमिश्रणमिव--किंच पथ्यमपि न भवति--कथमिव ज्वरातुरस्य पय इव ज्वरपीडितस्य क्षीरमिव--अत एव वृद्धाः स्खलन्तीति स्थविराः संप्रमाद्यन्ति इति एतद्वचनं तथ्यम् सत्यम् ।। ४-१७ ।।

(संजीविनी-४-१८) **इक्ष्वाकुभिरिति।** । उद्ढसत्त्वैः प्राप्तशक्तिभिः इक्ष्वाकुभिः इक्ष्वाकुपौत्रप्रभृतिभिः--तद्राजस्य बहुष्वित्यादिना अण्प्रत्ययस्य लोपः--व्यूढं महान्तम् अत्यधिकं भारं राज्यभारं रघवो वहन्ते रघुपौत्रादयो दधति--अत्रापि तद्राजस्येत्यादिना अणो लुक्--अत एव शिशुरहं क्व--एष भारः अयं राज्यभारः क्व--तथा हि गजस्य पल्याणं कुञ्जरस्य पल्याणम्--अजस्य मेषस्य कथं वा योग्यम्--योग्यं न भवतीत्यर्थः ।। ४-१८ ।।

(संजीविनी-४-१९) **अविरिति ।** अविः बस्तश्च मेषश्च अनसि शकटविषये वीर्यहेतोः शक्तये न--न भवति--षष्ठी हेतुप्रयोगे इति षष्ठी--मीनकेतोः धन्व कामस्य शरासनम् (इक्षु) न स्थूणायते स्तम्भ इव न भवति--(उपमानादाचारे इत्यनुवर्त्य) कर्तुः क्यङ् सलोपश्च (३-१-११) इति क्यङ् प्रत्ययः--किंच अन्यमृगः सिंहालयं सिंहाधिष्ठितगुहायां न अधिशेते न तिष्ठति--अधिशीङित्यादिना आधारस्य कर्मत्वम् --अत एव रामः रघूणां धुरं रघुपौत्राणां राज्यभारं न धरेत न वहेत्--रघुशब्दे तद्राजस्येत्यादिना अणो लोपः ।। ४-१९ ।।

(संजीविनी-४-२०) **दिलीपदत्तामिति ।** रघुः दिलीपेन दत्तां तां शाकम्भरां भूमिम्--संज्ञायां भृतृ--इत्यादिना खच् प्रत्ययः--खित्यनव्ययस्येति मुमागमः--भूमिम् अन्वशात् शासितवान्--शासु अनुशिष्टौ इत्यस्मात् लङि रूपम्--अदादित्वात् शपो लुक्--स्कोरित्यादिना सकारलोपः--पितामहौजाः ब्रह्मण इव ओजो यस्य स तथोक्तः मम पितामहः अजश्च तां भूमिम् अन्वशात्--ततः अनन्तरं तातपादाः दशरथश्च क्रमप्राप्तां तां तनयैः साकं पुत्रैः सार्धं शासतु पालयन्तु--अदभ्यस्तात् इत्येनेन झस्य अदादेशः--तातपादाः इति पूजार्थे बहुवचनम्--पूज्ये पादा इति नामान्ते देवो भट्टारको वापि इति (हलायुधः)--(पद) विभागः पितामहः अजश्च पितामहौजाः (इति) ।। ४-२० ।।

(संजीविनी-४-२१) **सुमन्त्रेति ।** हे सुमन्त्र कस्य संबन्धी एष कुमन्त्रपाकः —कुविचारः—तमर्थमेवोपपादयति-अयं पूर्वोक्तविचारः पाके शिशौ—पोतः पाकोऽर्भको डिम्भः इत्यादिरमरः—मयि दुर्विपाकः दुष्टपरिपाकत्वात् विचारपरिणामता —राज्ञि राजश्रेष्ठे दशरथे राज्यं चिरं शासति सति अहम् अनुजैः सह खेलन् भरतादिभिः सह विहरन् राजवत् सुखी स्याम् सुखी भवेयम्—(न तु राजा भवामि इत्यर्थः) ॥ ४-२१ ॥

(संजीविनी-४-२२) **पुत्रो हीति ।** तातस्य वनेन वनवासेन वार्धके मुनिवृत्तीनामित्युक्तत्वात्—मम राज्यं च—मदीयेन वयसा तातस्य जरां च विनिमातुम् ईहे इच्छामि—पूर्वं यथा ययातेः पुत्रः पूरुः पितुः जरां स्ववयसा यौवनेन—विन्यमिनोत् विनिमयम् (अनैषीत्) तद्वत्—पुरा किल ययातिर्नाम कश्चन राजा आसीत्—तस्य चत्वारः पुत्रा आसन्—जराविनिमयं कुर्वन्त्विति तेन ययातिना प्रार्थिताः त्रयः पुत्राः नाङ्गीकृतवन्तः—चतुर्थपुत्रेण पूरुणा पितृप्रियार्थं जराविनिमयः अङ्गीकृतः—इति पुराणे प्रसिद्धम् (महाभारते पद्मपुरणे च भिन्नः कथाभागः दृश्यते इति ज्ञायते—संपादकस्य) —पूरुनिदर्शनेन (पितृप्रीतिमाचरन्) अहमपि वर्तिष्ये इत्यर्थः ॥ ४-२२ ॥

(संजीविनी-४-२३) **आयात्विति ।** मातामहमन्दिरस्थः माताहनिकेतनस्थः—सुपि स्थः इति कप्रत्ययः—मम भक्तः अनुजन्मा अनु पश्चात् जन्म यस्य स तथोक्तः —अनुजः असौ भरतः आयातु आगच्छतु—अहं तेन भरतेन संमन्त्र्य विभाव्य अथो अनन्तरम् तातेन यदुक्तं यद्वचनमुक्तं तद् वचनं कुर्वीय करवाणि—इटोत् (३-४-१०६) इति (उत्तमपुरुषैकवचनस्य) इटः अदादेशः—तथैव युक्तम् तथैवोपपन्नम्—अनुजविचारमन्तरेण राज्यस्वीकारो नोपपद्यते इत्यर्थः ॥ ४-२३ ॥

(संजीविनी-४-२४) **श्रुत्वेति वाक्यानीति ।** इति पूर्वोक्तानि वाक्यानि श्रुत्वा अभिनन्द्य प्रहृष्य मन्त्री सुमन्त्रः बन्धुभिः पौरैश्च सह संबोध्य प्रज्ञाप्य भेरीभांकारम् उद्घोष्य कथंचित् कृच्छ्रेण रामम् पट्टाभिषेके ओङ्कारयति स्म अङ्गीकारयामास—भाङ्कार इत्यनुकरणशब्दः ॥ ४-२४ ॥

(संजीविनी-४-२५) **तत इति ।** ततः अनन्तरं रामो निजागारगतः निजगृहं प्राप्तः सन् रामासमेतः सीतासमेतः कृतोपवासः उपवासं कृत्वा जजागार जागरणं कृतवान् —किं कृत्वा—पुराणविद्भिः पुराणज्ञैः तपोमूर्तिभिरार्त्विजीनैः (ऋत्विक्कर्महिः) द्विजैः ब्राह्मणोत्तमैः पुण्याहम् आवाच्य पुण्याहं वाचयित्वा—कारयित्वोत्यर्थः—आर्त्विजीनपदे

यज्ञर्त्विग्भ्यां घखञौ (५-१-७१) इति सूत्रेण ऋत्विक्कर्म अर्हतीत्यर्थे ऋत्विक्शब्दात् खञ् प्रत्ययः—आयनादिसूत्रेण (७-१-२) तस्य ईन् आदेशः ॥ ४-२५ ॥

(संजीविनी-४-२६) **आकर्ण्येति।** अध्ययोध्यम् अयोध्यायां तूर्यध्वनिम् मङ्गल-तूर्यस्वनम् आकर्ण्य श्रुत्वा सहसा अभिपत्य शीघ्रमागत्य धात्रेयिका मन्थरा (नाम) सौधाधिरूढा प्रासादमधिरूढा सती केकयराजपुत्रीम् अनर्थसूचकम् किंचिद् वचः ऊचे वक्ष्यमाणप्रकारेण उवाच ॥ ४-२६ ॥

(संजीविनी-४-२७) **उत्तिष्ठेति।** हे कैकेयि अत्र सौधे किं शेषे किमर्थं स्वपिषि —त्वया विशेषेण भयं प्राप्तम् अतिमात्रेण साध्वसं प्राप्तम्—त्वं महाभये प्रविष्टासि इत्यर्थः—सुभगंभविष्णुः रूपसंपन्ना—कर्तरि भुव इत्येनेन खिष्णुच् प्रत्ययः—अर्हद्वि-षदिति सुभागमः—त्वम् इदानीम् वृथा असि व्यर्था असि—तमर्थमेवोपपादयति—भाग्यं भागधेयम्—दैवं दिष्टं भागधेयं भाग्यम् इत्यमरः—सौभाग्यं च सुभगत्वं च इतः परम् अन्यगामि अन्यविषयं भवति ॥ ४-२७ ॥

(संजीविनी-४-२८) **नाज्ञायीति।** हे राज्ञि कैकेयि रघुराजधान्याम् अयोध्यायां रामाभिषेके रामचन्द्रस्य पट्टाभिषेकविषये एष प्रसिद्धः संभ्रमः त्वया नाज्ञायि न ज्ञातः किम्—ज्ञा धातोः कर्मणि लुङि रूपम्—पङ्क्तिरथस्य दशरथस्य भरतादयः अन्ये सुताः राज्यभ्रष्टाः राज्यात् च्युताः सन्तः विनष्टाः विनाशं गताः—कष्टम् हा कष्टम् —(इति खेदे) ॥ ४-२८ ॥

(संजीविनी-४-२९) **दुर्धीरिति।** दुर्धीः दुष्टबुद्धिः जरठः स दशरथः चतुर्धा विभज्य विभागं कृत्वा चतुर्भ्यः सुतेभ्यः रामादिभ्यः न दत्ते न ददाति—अयं प्रकारो लोके न दृश्यते इत्याह—महीमित्यादिना विभिन्नाः (पृथक् स्थिताः) सुताः मनुना (नवधा) विभक्तां महीम् नवखण्डनाथाः भारतादिनवखण्डाधीश्वराः सन्तः किं नाधितस्थुः किं नाधिष्ठितवन्तः—(अधिष्ठितवन्त एवेत्यर्थः)—किम्शब्दः प्रश्नार्थे —अधिशीङित्यादिना आधारस्य कर्मत्वम् ॥ ४-२९ ॥

(संजीविनी-४-३०) **निशम्येति।** तद् वचनं निशम्य श्रुत्वा कैकेयी जगाद आह —किमिति—अभिरामः संपन्नो रामः मे भरतादपि प्रियः—मम भरतादपि इष्टतरः—अत एव त्रयः भरतादयः कुमारा राज्ये अभिषिक्तं प्रसिद्धं रघुवंशनाथम् रामम् उपा-सितारः सेविष्यन्ते ॥ ४-३० ॥

(संजीविनी-४-३१) चतुर्धा न विभज्य राज्यं दत्ते सुतेभ्योः जरठश्चतुर्भ्यः इति वचनं हृदि निधाय आह—**एकाग्रतेति।** यतः कारणात् राज्यश्रियः योगिधियः सूच्याश्च

एकाग्रता लक्ष्यगुणोपयोगा[1]—(गुणेषु उपयोगः गुणोपयोगः—लक्ष्यस्य गुणोपयोगः यस्याः सा लक्ष्यगुणोपयोगा एकाग्रता इति विग्रहं व्याख्याकार एव अन्ते दर्शयिष्यति —संपादकस्य) अतः कारणात् स राजा अग्रभवं कुमारम् अभिषेच्य राज्यम् एकमुखं करोतीत्यन्वयः—अक्षरार्थस्तु इत्थम्—राज्यश्रियः राज्यलक्ष्म्याः एकाग्रता एकमुखता लक्ष्यगुणोपयोगा भवति—लक्ष्यस्य (प्रजापालनस्य अपेक्षितेषु) गुणेषु ग्राह्येषु (विषये) उपयोगः यस्याः सा—योगिधियः योगिबुद्धेश्च एकाग्रता लक्ष्यगुणोपयोगा भवति—एकाग्रता नाम विषयान्तरव्यावृत्तिः—सा लक्ष्यगुणोपयोगा भवति—अत्र लक्ष्यशब्देन मन उच्यते—गुणशब्देन परिपाकादय उच्यन्ते—लक्ष्यस्य (प्रग्राह्यस्य) मनसः गुणेषु परिपाकादिषु उपयोगः यस्याः सा तथोक्ता एकाग्रता—सूच्याश्च एकाग्रता लक्ष्यगुणोपयोगा भवति—अत्र लक्ष्यशब्देन पट उच्यते—गुणशब्देन तन्तवः—लक्ष्यस्य पटस्य (संबन्धिषु) गुणेषु तन्तुषु उपयोगः यस्या सा तथोक्ता—अतः कारणात् स राजा दशरथः अग्रभवं ज्येष्ठं रामम् अभिषेच्य राज्यम् एकमुखं करोति—लक्ष्यस्य गुणोपयोगो यस्याः सेति व्यधिकरणबहुव्रीहिः ।। ४-३१ ।।

(संजीविनी-४-३२) **अयीति ।** अयि हे सखि मन्थरे प्रियोदन्तं प्रियवार्ताम्—वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः इत्यमरः—वदन्ती त्वम् मे भूषाः आभरणानि गृहाण स्वीकुरु—अद्य वत्सस्य रामस्य महाभिषेकं कुर्वे करिष्यामि—सर्वे पौराः समेत्य प्रहृष्यन्तु सन्तोषं भजन्तु—(कुर्वे इत्यत्र वर्तमानसामीप्ये) वर्तमानवद् वा इति लट् ।। ४-३२ ।।

(संजीविनी-४-३३) **तथा वदन्तीमिति ।** तथा—उक्तप्रकारेण वदन्तीं तरलायताक्षीं चञ्चलविशालनयनां कैकेयीम् आक्षिप्य उपालम्भ्य चेटी मन्थरा पुनरपि अवादीत् उवाच—किमिति—हे केकयि ते इयं भ्रान्तिः कुतः समागता—रामः क्व राजा—भरतश्च क्व दीनः—आः इति कोपपीडासूचकम्—आस्तु स्यात् कोपपीडयोः इत्यमरः ।। ४-३३ ।।

(संजीविनी-४-३४) **कथं नु वेति ।** राजपत्नी दशरथस्य प्रियनायिका त्वं सपत्नीसुतदत्तपिण्डा कौसल्यातनयेन दत्तोपहारा सती कथं नु वा जीवसि केन प्रकारेण जीविष्यसि—वर्तमानसामीप्ये वर्तमानवद् वा इति लट्—रामे अभिषिक्ते पट्टाभिषिक्ते सति भरते च रिक्ते अर्थशून्ये सति—क्षमा वृथा—अत एव हे मानिनि मा दरिद्रीः दुर्गता मा भूः—दरिद्रा दुर्गताविति धातोः लुङि रूपम्—न माङिति प्रतिषेधात् अडागमाभावः ।। ४-३४ ।।

(संजीविनी-४-३५) भरतस्य राज्यप्राप्तेरुपायमाह—**वरद्वयमिति** । प्राक् पूर्वं वसुधेशदत्तम् दशरथेन दत्तं वरद्वयं तव तस्योपरि अस्ति—(अगृहीतम् अद्यापि विद्यते) —तद् वरद्वयं वृणु—किमिति—रामश्चतुर्दशाब्दान् चतुर्दशसु वत्सरेषु—कालाध्वनोरत्यन्तसंयोगे इति द्वितीया—वनाय वनं गन्तुम्—क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति चतुर्थी—पुर्याः अयोध्यायाः निर्यातु निर्गच्छतु—भरतः राजा अस्तु भवतु—एकेन वरेण रामस्य वनवासम् अन्येन भरतस्य राज्याभिषेचनं च (वृणु) इत्युक्तम् भवति ॥ ४-३५ ॥

(संजीविनी-४-३६) **रामे वनमिति** । हे मातः कैकेयि रामे वनं याति वनाय गच्छति सति सीता रामेण सहैव याता यास्यति—अथ अनन्तरं सौमित्रिः लक्ष्मणश्च अनुयाता राममनुयास्यति—तदनन्तरं मातामहावासतः एत्य मातामहगृहादागत्य ते सुतः भरतः पृथ्वीं त्राता भूमिं पालयिष्यति—याता अनुयाता त्राता इतीमानि लुटि रूपाणि ॥ ४-३६ ॥

(संजीविनी-४-३७) **कौसल्ययेति** । हे कैकेयि राजमात्रा रामजनन्या कौसल्यया दासीकृतां त्वां कथम् आश्रयामः कथं सेविष्यामहे—वर्तमानसामीप्ये लट्—किं च स्थण्डिलसंनिविष्टा भूमौ उपविष्टा सती सपत्न्याः चरणौ कथं नु वा संवाहयेथाः कौसल्यायाः पादसंवाहनं कथं नु वा कुर्याः ॥ ४-३७ ॥

(संजीविनी-४-३८) **क्षिप्त्वेति** । हे कैकेयि हस्तगतां श्रियं राज्यश्रियं पदेन चरणेन क्षिप्त्वा न्यक्कृत्य [2]पोटा इव स्त्रीपुंसलक्षणा वनितेव—पोटा स्त्रीपुंसलक्षणा इत्यमरः—सा च भाग्यशून्या तद्वत् स्थिता सती सपत्न्याः लक्ष्मीं सहसे कौसल्यायाः राज्यश्रियं कथं सहिष्यसे—अधुना इदानीम् असह्यवार्तां वदन्त्यै मह्यम् आभरणानि अपि यद् दत्से येन कारणेन ददासि ॥ ४-३८ ॥

(संजीविनी-४-३९) **रामश्चिरमिति** । रामः इदं राज्यं गृहीत्वा स्वीकृत्य प्रौढः सन् रूढमूलश्च सन् प्रतिष्ठास्यति सुप्रतिष्ठितो भविष्यति—ते सुतश्च तव सुतो भरतस्तु —चशब्दस्त्वर्थे—दीनः सन् युधाजितः सद्मनि अन्नमश्नन् क्लिश्नाति बन्धून् क्लेशं गमयिष्यति—वर्तमानसामीप्ये लट् ॥ ४-३९ ॥

(संजीविनी-४-४०) **न बालिशे इति** । हे बालिशे मूढे—यथाजातमूर्खवैधेयबालिशाः इत्यमरः—निर्धार्यं किंचन न वेत्सि निर्णेतव्यं कार्यं किंचिन्मात्रमपि न जानासि—किंच आत्महितमपि न वित्से न विचारयसि—अद्य इदानीमेव कमप्युपायं शीघ्रं कलय चिन्तय—तथा हि कबन्धे उदके गते सति—कबन्धमुदकं पाथः इत्यमरः—

[3]सेतुबन्धो न हि न भवति किल——राज्यापगमात् पूर्वमेव कश्चिदुपायो विचार्य इत्यर्थः ॥ ४-४० ॥

(संजीविनी-४-४१) **त्वमास्स्वेति**। हे राज्ञि कैकेयि त्वं तूष्णीम् आस्स्व तिष्ठ——अहमेव राज्ञे विज्ञाप्य दशरथाय विज्ञाप्य सर्वं कार्यं विदधामि करिष्यामि मितया वाचा द्वौ वरौ याचामि—किमिति—रामं त्यज रामं वनाय विसर्जय—भरतं भज भरतं स्वीकुरु इति ॥ ४-४१ ॥

(संजीविनी-४-४२) **इद्धाभिशापैरिति**। मन्थरया इति एवमादिभिः इद्धैः दीप्तैः अभिशापैः मिथ्याभिशंसनैः——अथ मिथ्याभिशंसनम् अभिशापः इत्यमरः—उदूढतापैः तापकृद्भिः उपगूढपापैः प्रच्छन्नपापैः विप्रलापैः विरोधोक्तिभिः स्वतो निर्मलं स्वतो निष्पापम् अत एव उदारम् उत्कृष्टम् गम्भीरमपि तस्याः कैकेय्याः मनः हृदयं ममन्थे कलुषितम् ॥ ४-४२ ॥

(संजीविनी-४-४३) **क्रोधेनेति**। क्रोधेन कोपेन सौधाद् राज्ञीं कैकेयीम् अवरोप्य अवतार्य अथ अनन्तरम् न्युब्जा भुग्ना——न्युब्जो भुग्ने इत्यमरः——कुब्जा मन्थरा तां नृपतिं दशरथं निनाय——नयतिर्द्विकर्मकः——अन्तिके दशरथस्य समीपे निषण्णां तथा गूढविषाम् अत एव निश्वसन्तीम् निश्वासयुक्तां नागीं भुजगीमिव स्थितां कैकेयीं स दशरथः वक्ष्यमाणप्रकारेण अब्रूत अवदत् ॥ ४-४३ ॥

(संजीविनी-४-४४) किमित्याह इत्थम्—**खिन्नेति**। हे कैकेयि इह दशरथसमक्षम् खिन्नेव स्थिता सती वावयं किं न ईरयसि न ब्रवीषि—मां पुरेव पूर्ववत् किं नेक्षसे किमर्थं न पश्यसि——किं च अनङ्गरागम् अङ्गरागशून्यम् अङ्गं मुक्तादिरत्नाभरणैः किं वा न शृङ्गारयसि ॥ ४-४४ ॥

(संजीविनी-४-४५) **रामः सुत इति**। हे रमणि भरताग्रजन्मा भरतस्य अग्रजन्मा रामः ते सुतः तव पुत्रः——रामस्य माता त्वमेव—हे शुभाङ्गि हे सुन्दराङ्गि त्वम् उत्सुका सती आत्मकृत्यं सर्वं समस्तम् अस्य अभिषेकोत्सवम् अस्य रामस्य अभिषेकाय उत्सवः——तम् शुभय शुभं कुरु मङ्गलं कुरु ॥ ४-४५ ॥

(संजीविनी-४-४६) **भर्तुरिति**। भर्तुर्दशरथस्य गुरोर्वसिष्ठस्यापि वाचम् अवधार्य——पतित्वाद् गुरुत्वाच्च उभयोर्वचनमादरणीयमिति निश्चित्येत्यर्थः——सारान् उत्कृष्टान् रामगुणांश्च विचार्य सा कैकेयी स्वयं त्रपया लज्जया किंचिदपि वचनं न वदन्ती मन्थरायाः मुखं मन्दं यथा तथा प्रैक्षत अपश्यत्——(पद)विभागः——सारान् च सा रामगुणान् (इति) ॥ ४-४६ ॥

(संजीविनी-४-४७) **दत्तमिति ।** जरठा वृद्धा सा मन्थरा पुरा पूर्वं पङ्क्तिरथेन दशरथेन तस्यै कैकेय्यै दत्तं वरद्वयं ययाचे--एकेन वरेण रामस्य वनप्रयाणं वनवासं च अन्येन वरेण भरतस्य अभिषेकं च वव्रे--वृञो लिटि रूपम् ।। ४-४७ ।।

(संजीविनी-४-४८) **रामो वनस्थ इति ।** चतुर्दशाब्दान् चतुर्दशसंवत्सरेषु--कालाध्वनोरत्यन्तसंयोगे इति द्वितीया--रामो वनस्थो वनवासी स्यात्--भरतः पुरस्थः अयोध्यापुरस्थः स्यात्--रामो जटी स्यात् जटिलो भवेत्--भरतः किरीटी स्यात् मुकुटी भवतु--रामः चीरी वल्कलवासाः अस्तु--भरतः चेली दिव्याम्बरवान् अस्तु इत्यनेन प्रकारेण सा अभ्यधत्त उवाच ।। ४-४८ ।।

(संजीविनी-४-४९) **जीनोऽसीति ।** हे पार्थिवेन्द्र दशरथ जीनोऽसि त्वं जरठोऽसि --आत्मनीनः आत्महितः--आत्मन् विश्जनेत्यादिना (५-१-९) खप्रत्ययः तस्मै हितमित्यर्थे--तस्मिन् तादृशे वरप्रदाने वरप्रदानविषये दीनो न भव--यो वरं दास्यामीत्युक्त्वा वरं न ददाति तस्य परलोको नास्ति--सत्यसन्धस्य तु परलोकस्य दीप्यमानत्वात् वरप्रदानं यथा सफलं स्यात् तथा वर्तस्व--अन्ते नाशसमये सत्यं वद--तथा हि इक्ष्वाकवः इक्ष्वाकुगोत्रजाः--तद्राजस्येत्यादिना गोत्रार्थे विहितस्य अणो लुक्--प्राणेषु नश्यन्स्वपि असत्यं नैव वदन्ति ।। ४-४९ ।।

(संजीविनी-४-५०) इक्ष्वाकवो नैव वदन्त्यसत्यमिति पूर्वोक्तत्वात् तेषामन्वये सत्यसन्धः को विद्यते इत्यत्राह--**राजेत्यादिना ।** भवत्कुलोत्थः भवत्कुले उत्पन्नः हरिश्चन्द्र इति राजा हरिश्चन्द्रसंज्ञको राजा सत्याय सत्यव्रताय इष्टभार्यां व्यक्रेष्ट विक्रीतवान्--क्रीञ् धातोः लुङि रूपम्--किं च कीर्तिभिः भुवं भूलोकं दिवं स्वर्गं च अश्नुवानः व्याप्नुवन् दिवाकीर्तिषु--दिवाकीर्तयश्चण्डालाः तेषु मध्ये वीरबाहुम् तन्नामानं भेजे भिषेवे--इक्ष्वाकुवंशजो हरिश्चन्द्रो नाम राजा आसीत्--विश्वामित्रः यज्ञसमये तस्य सत्यसन्धतां परीक्षितुम् यज्ञदक्षिणार्थं बहुमूल्यं ययाचे--तस्य सर्वं वस्तुजातं दत्त्वा सोऽप्यकिंचनः सन् सत्याय इष्टभार्यां विक्रीतवान्--चण्डालं वीरबाहुं नाम सेवितवान् इति पौराणिकी कथा ।। ४-५० ।।

(संजीविनी-४-५१) **सत्येनेति ।** यत् यस्मात् कारणात् महान्तः सत्येन जगत्यां कीर्तिं जिहते यान्ति--ओ हाङ् गतावित्ति धातोः लटि रूपम्--अदभ्यस्तात् इत्यनेन झस्य अदादेशः--सत्येन अखिलान् लोकान् जयन्ति--तत् तस्मात् कारणात् हे राजन् त्वम् जातु कदाचिदपि सत्यं न जहीहि न त्यज--लज्जावती इयं कैकेयी वक्तुं न वेत्ति न जानाति हि ।। ४-५१ ।।

(संजीविनी-४-५२) **मदुक्तमिति ।** तस्मात् मदुक्तं मद्वचनमेव एतदुक्तम् एतया कैकेय्या उक्तम् आकलय अस्याः केकैय्याः वचनं जानीहि—नपुंसके भावे क्तः इति क्तप्रत्ययः—कैकेयी वरद्वयं याचति—किमिति—रामः फलानि मूलानि च कन्दमूल-फलानि चरन् भक्षयन् वनस्थः अस्तु वनवासी भवतु—भरतः राज्यं प्रशास्तु भरतः राज्यं पालयतु ।। ४-५२ ।।

(संजीविनी-४-५३) **उक्त्वेति ।** कुब्जा मन्थरा इति उक्तप्रकारेण विधुरं कलुषं यथा तथा उक्त्वा व्यरंसीत् विरराम—तूष्णीम् आसीदित्यर्थः—रमतेः लुङि रूपम्—व्याङ्परिभ्यो रमः (१-३-८३) इत्यनेन परस्मैपदम्—भुवि मूर्छितस्य राज्ञो दशरथस्य चेष्टा च व्यरंसीत्—इन्द्रियव्यापारशून्यः सोऽभूदित्यर्थः—सान्द्राश्रुपूराः सान्द्राश्रुप्रवाहाः सहवासिनोऽपि सहचराश्च नरेन्द्रं परितः दशरथम् अभितः—अभितः परितः समयेत्यादिना द्वितीया—हा हा इति क्रन्दन्तः अपप्तन् पेतुः—पत्लृ गतावित्यस्मात् लुङि रूपम्—पुषादित्वाद् अङ्—पतः पुम् इति पकारागमः ।। ४-५३ ।।

(संजीविनी-४-५४) **वस्त्रान्तेति ।** राज्ञः शिरः अङ्के विनिधाय दशरथस्य मूर्धानं स्वकीये उत्सङ्गे निक्षिप्य वस्त्रान्तवातेन चेलाञ्चलवायुना वीजयन्ती तदा यमस्य साक्षाद् वैजयन्तीव कृतान्तस्य प्रत्यक्षपताकेव—अनेन भावि मरणं सूचितम्—एवंविशिष्टा कैकेयी अलीकं शोकं दधतीव तस्थौ—अयथार्थ शोकं दधतीव तस्थौ—कैकेय्याः शोकः अस्त्येव—तथापि इष्टवरप्रार्थनया हेतोः इयम् अयथार्थ शोकं दधतीवेति परिदृश्यमाना तस्थावित्यर्थः ।। ४-५४ ।।

(संजीविनी-४-५५) **रक्षोविघातायेति ।** रक्षोविघाताय रावणवधार्थं तं प्रसिद्धं रघूद्वहं रामम् निर्यापयन्ती प्रस्थापयन्ती पुरदेवतेव पुराधिदेवतेव स्थिता—अनेन रावणवधादिकं भावि सूचितम्—पुनः कथमिव स्थिता—आशु शीघ्रं रामम् अर्चितुम् पूजयितुम् आकारयन्ती आह्वानं कुर्वती आकारवती मूर्ता वनदेवतेव स्थिता—अनेन रामस्य वनवासः सूचितः—एवंविधा तस्थौ इति पूर्वेणान्वयः ।। ४-५५ ।।

(संजीविनी-४-५६) इदानीं प्रकृतमनुसरति—**राम इति ।** तदा तस्मिन् काले निशान्ते भवने—निशान्तवस्त्यसदनभवनागारमन्दिरम् इत्यमरः—अधिपुष्पशय्यं पुष्पशय्यायाम् निजाग्रस्थितमैथिलीकः असौ रामः जाग्रत् जागरणं कुर्वन् पुरुषोत्तमस्य पुण्यं चरित्रं शृण्वन् तां निशाम् अनयत् निनाय ।। ४-५६ ।।

(संजीविनी-४-५७) **श्रुत्वा निशान्ते इति ।** निशान्ते प्रातः काले महीन्द्रसूनोः रामस्य महाभिषेकस्य अन्तरायं विघ्नम्—विघ्नोऽन्तरायः प्रत्यूहः इत्यमरः—जनतः

श्रुत्वा जनेभ्यः आकर्ण्य सुमन्त्रः अवसरप्रतीक्षी दशरथस्य अवसरनिरीक्षणं कुर्वन् अन्तः प्रविष्टः अन्तःपुरं प्रविष्टः सन् निश्चेष्टं चेष्टाशून्यं नृपं दशरथम् ऐक्षिष्ट अपश्यत्—ईक्ष दर्शने इत्यस्मात् लुङि रूपम् ।। ४-५७ ।।

(संजीविनी-४-५८) **मन्त्रोषधीरुद्धमिवेति** । मन्त्रौषधीरुद्धं मणिमन्त्रौषध्यादिभिर्निरुद्धम् अत एव उर्व्यां विनिश्वसन्तं नागेन्द्रमिव महासर्पमिव स्थितं नरेन्द्रम् दशरथम् आलोक्य सः सुमन्त्रः अपासरत् किंचिदपसृत्य स्थितवान्—तं सुमन्त्रं च राजाज्ञया दशरथाज्ञया रामम् इहानयेति राज्ञी कैकेयी जगाद उवाच ।। ४-५८ ।।

(संजीविनी-४-५९) **तथेति निर्गत्येति** । तथेति अङ्गीकृत्य निर्गत्य सभामण्टपात् निर्गत्य रथेन गच्छन् रथ्यासु राजमार्गेषु मिथ्यामुदितः मृषामुदितः सन् सुमन्त्रः प्रीत्या कृतप्रणामं पौरजनं वात्सल्येन कृतनमस्कारं पुरजनं न आलोकत न ऐक्षिष्ट—किंचित् नाभ्यधत्त किंचिद् वचनमपि नावदत् ।। ४-५९ ।।

(संजीविनी-४-६०) **दृष्ट्वेति** । रथेषाग्रनिविष्टदृष्टिं रथस्य ईषायाः (रथावयवो दण्डः ईषा यदन्ते युगबन्धनं भवति) तस्याः अग्रभागे निहितदृष्टिं तं सुमन्त्रं दृष्ट्वा कमप्यनर्थं कमप्यपायम् आशङ्क्य पौरबृन्दं पुरजनकदम्बकं शरदि अवृष्टिशुष्कम् अवर्षणेन शुष्कं सस्यमिव विलक्षं विलक्षं जातम् आलक्ष्यत अदृश्यत ।। ४-६० ।।

(संजीविनी-४-६१) **कृत्वौषसं कर्मेति** । औषसम् उषःकालसंबन्धि कर्म कृत्वा अनुष्ठेयं कर्म कृत्वा कुथोपविष्टं चित्रकम्बले आसीनं जायासखं जायासमेतम्—राजाहःसखिभ्यः इति टच् प्रत्ययः (जायासखपदे)—जागरणारुणाक्षम् जागरणेन रक्तलोचनं तं रामम् उपेत्य मन्त्री सुमन्त्रः भवतः पिता त्वत्पिता दशरथः त्वां दिदृक्षते द्रष्टुमिच्छति इत्युवाच ।। ४-६१ ।।

(संजीविनी-४-६२) **तथेतीति** । तथेत्यङ्गीकृत्य रामः सुमन्त्रसूतेन रथेन सुमन्त्रः सूतः सारथिर्यस्य सः तथोक्तः—तेन रथेन साधनभूतेन राजालयं राजगृहं दशरथगृहं प्रत्याजगाम आययौ—सीतापि आन्दोलिकाम् अधिरुह्य श्वश्रूजनं वन्दितुं श्वश्रूजनेभ्यः नमस्कारं कर्तुम् आजगाम आययौ ।। ४-६२ ।।

(संजीविनी-४-६३) **महानिति** । पौरवर्गः पुरजनसमूहः मन्थरायाः वाक्यैः महान् अनर्थः अजनि अजायत—दीपजनेत्यादिना कर्तरि लुङि चिणि रूपम्—इति व्याहृत उवाच—विपूर्वात् हरतेर्लुङि रूपम् (आत्मनेपदे)—पङ्क्तिरथस्य राज्ञः अन्तःपुरं किमेतदिति आकुलताम् अयासीत् पर्याकुलत्वं प्राप—या धातोर्लङि रूपम् (अयासीदिति) ।। ४-६३ ।।

(संजीविनी-४-६४) **अथो नृपद्वारीति ।** अथो अनन्तरं नृपद्वारि राजद्वारे रथावरूढः सन् ऐन्दुमतेयसूनुः ऐन्दुमतेयो दशरथः—इन्दुमतीशब्दात् स्त्रीभ्यो ढक् इति ढक् प्रत्यये रूपम्—तस्य दशरथस्य सूनुः रामेन्दुरपि रामचन्द्रोऽपि जनानां चक्षूंष्येव चकोराः तान् मदयन् हर्षयन् पितरं दिदृक्षुः पितरं द्रष्टुमिच्छुः अन्तर्जगाहे अन्तःपुरं विवेश ॥ ४-६४ ॥

(संजीविनी-४-६५) **पूर्वागतानिति ।** स रामः पूर्वागतान् पूर्वं समागतान् मन्त्रिपुरोहितांश्च अमात्यान् पुरोहितांश्च अश्रुमुखम् अश्रूणि मुखे यस्य तत् तथोक्तम्—स्त्रीमण्डलं स्त्रीकदम्बकं च पश्यन् अग्रे निषण्णस्य अग्रभागे उपविष्टस्य विषण्णमूर्तेः विषण्णा मूर्तिर्यस्य स तथोक्तः—तस्य अरुन्धतीभर्तुः वसिष्ठस्य अङ्घ्री चरणौ अवन्दत प्रणनाम ॥ ४-६५ ॥

(संजीविनी-४-६६) **हा राम रामेति ।** हा राम रामेति उच्चैः रुदन्तं विलपन्तं मूर्छन्तं मूर्छां गतम् उर्व्यां लुठन्तम् अदृष्टपूर्वम् एवमाकारेण पूर्वं कदाप्यदृष्टम् पितरं दशरथं दृष्ट्वा स रामः महत् निजागः स्वकीयं महापराधं (कमपि वृत्तम्) मनसि अशङ्किष्ट चित्ते शङ्कितवान्—शकि शङ्कायामित्यस्मात् लुङि रूपम्—(अदृष्टपूर्वम् इत्यत्र भूतपूर्ववत् सुप्सुपेति समासः—ततो नञ् तत्पुरुषः) ॥ ४-६६ ॥

(संजीविनी-४-६७) **ततः शिरोऽङ्के** इति । ततः अनन्तरं दाशरथिः रामः पितुः शिरः अङ्के दशरथस्य मूर्धानम् अङ्के दधानाम् मूर्छाकुलं मूर्छया व्याकुलं तं दशरथं मुहुराह्वयन्ती पुनः पुनः आह्वानं कुर्वती तथा मूर्धोपविष्टाम् मस्तकाधिष्ठितप्रदेशे आसीनां मृत्युदूतीं यमस्य दूतिकामिव स्थितां तां कैकयीं कैकेयीं ददर्श—यमसमीपागमनाह्वानं कुर्वती मृयुदूतीव सा कैकेयी स्थितेत्यर्थः ॥ ४-६७ ॥

(संजीविनी-४-६८) सा च पुनः कथमिव स्थिता—तत्राह—**आयोध्यकानामिति ।** आयोध्यकानामिति अयोध्यानिवासिनाम्—धन्वयोपधादिति वुञ् प्रत्यये युवोरनाकौ इत्यकादेशे च आयोध्यकेति रूपं भवति—अनुमोदहत्यै संतोषनिवर्हणाय कालप्रयुक्तां यमेन प्रेरितां कालरात्रिमिव स्थिताम्—सा च यमदूतिका पुनः कथमिव स्थिता—जगतां भयं प्रदातुम् साध्वसं कर्तुम् अकाण्डे अनवसरे—काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु इत्यमरः—भर्गप्रदिष्टाम् ईश्वरेण प्रेरितां भद्रकालीमिव स्थिताम्—सा च ईश्वरशक्तिः—दाशरथिः तां ददर्शेति पूर्वेण संबन्धः ॥ ४-६८ ॥

(संजीविनी-४-६९) **प्रणम्य तातमिति ।** रामः शुचा दुःखेन अतितान्तं खिन्नम् मूर्छितं च दशरथं प्रणम्य हे तात किं खिन्नोऽसि किमर्थं खिन्नोऽसि—खिद दैन्ये इति धातोः

लटि रूपम्—किम् आगः अकार्षम् कम् अपराधम् अहं कृतवानस्मि—इत्युक्त्वा बद्धाञ्जलि यथा तथा मध्यमाम्बां कैकेयीम् अस्य दशरथस्य किं जातम् किमभवत् इति जगाद पप्रच्छ ।। ४-६९ ।।

(संजीविनी-४-७०) **सा नाविदमिति ।** अहं किमपि नाविदम् किंचिन्मात्रमपि न जानामि स्म—विद्लृ धातोः लुङि लृदित्वात् अङि रूपम्—किं तु अयं दशरथः मन्थरायाः वाक्यैः विह्वलति—विह्वलो भवति—इति सा कैकेयी उवाच—ततः अनन्तरं वदतां वरिष्ठः वाग्मिनां श्रेष्ठः गुरुः वसिष्ठः स्त्रीसाहसं वीक्ष्य हसन् वक्ष्यमाणप्रकारेण बभाषे ।। ४-७० ।।

(संजीविनी-४-७१) **न केकयीति ।** हे कुमार राम इदं केकयीकृत्यं केकयीकृतं न भवति—किं तु तत्प्रेषिता तया कैकेय्या नियुक्ता सती मन्थरा जल्पति—इदं सममर्मकवचनम्—सा कैकेयी वा अस्तु—इयं मन्थरा वा अस्तु—आभ्यां कुलनाशिनीभ्याम् समस्तं साम्राज्यम् अस्तं समस्तं राज्यं नाशितम् ।। ४-७१ ।।

(संजीविनी-४-७२) दानप्रकारमाह—**पुरा किलेति ।** हे तात हे रामचन्द्र पुरा किल पूर्वं किल—ऐतिह्ये किलशब्दः—तव तातः तव पिता अयं राजा आजिः अजस्यपुत्रः दशरथः पुण्यजनाभियोक्तुः राक्षसान् प्रति यातुः—यातुधानः पुण्यजन इत्यमरः—पूर्वकृतोः इन्द्रस्य साहाय्यम् इच्छन् अनया कैकेय्या सह रयिणा रथेन वेगवता रथेन साधनेन आजिम् युद्धम् अगात् गतः—इणो लुङि रूपम्—इणो गा लुङि इति गादेशः ।। ४-७२ ।।

(संजीविनी-४-७३) **रथाश्वसंघे इति ।** रथाश्च अश्वाश्च रथाश्वम्—तस्य संघे रणसीम्नि युद्धभूमौ भग्ने नम्रे रथाक्षे च भग्ने भुजम् अक्षयित्वा अक्षं कृत्वा अक्षवत् चक्रधारणार्थमुपयुज्य अत एव धीरा जाया कैकेयी जापयति स्म दशरथं जयिनं कारयति स्म—जि धातोः ण्यन्ते रूपम्—क्रीङ्जीनां णौ (६-१-४८) इति आत्वम्—अतिह्रीत्यादिना पुगागमः—अमुना च दशरथेन अस्यै कैकेय्यै द्वौ वरौ दत्तौ किल—किलेत्यैतिह्ये ।। ४-७३ ।।

(संजीविनी-४-७४) **तौ अद्येति ।** इयं कैकेयी धात्रीतनयामुखेन मन्थरामुखेन तौ वरौ अद्य धात्रीपतिं दशरथं याचति—याचतिर्द्विकर्मकः—तौ च इत्थम्—हे राम त्वम् अटवीं चतुर्दशाब्दान् चर—भरतश्च इदानीम् अभिषेकं भजतु इति ।। ४-७४ ।।

(संजीविनी-४-७५) **जायासख इति ।** हे राम त्वं जायासखः जायासमेतः सन्—राजाहः सखिभ्य इति टच्—जटिलः जटावांश्च सन्—तुन्दादिभ्य इलच्च (५-२-११७)

इति इलच् प्रत्ययः—वल्कलं वसानः वल्कलाच्छादितशरीरः सन् निषङ्गी तूणीरवान् कवची उरश्छदवानपि सन् खड्गी च सन् खड्गेभसिंहादिमृगान् विनेष्यन् खड्गगजसिंहादिमृगान् विनयं प्रापयिष्यन् लक्ष्मणेन सह वनान्ते वस वनमध्ये चर ॥ ४-७५ ॥

(संजीविनी-४-७६) **दिशानसूय इति।** अनसूयः असूयारहितः सन् त्वं भरतस्य राज्यं दिश त्यज—वन्यं फलमूलकन्दं वनेभवानि कन्दमूलफलानि अशान भक्षय—अनरण्यान्वयभूः अनरण्यो नाम इक्ष्वाकुकुलोद्भवो राजा आसीत्—तदन्वये संभूतः त्वम् अरण्यं विश अटवीं प्रविश—हे तात राम तव दशाननाद्याः रावणादयः वध्याः हन्तव्याः ॥ ४-७६ ॥

(संजीविनी-४-७७) **श्रुत्वेति राम इति।** श्रुतवान् विद्वान् अधीती अधीतवान् वेदाध्ययनं कृतवान् धीतीर्णसंसारसमुद्रपारः धिया बुध्या तीर्णः अतिक्रान्तः संसार एव समुद्रः—तस्य पारः अन्तो यस्य स तथोक्तः रामः इति पूर्वोक्तं तस्य (वसिष्ठस्य) वचनं श्रुत्वा प्रसन्नवक्त्रः सन् पितरौ कैकेयीदशरथौ प्रणम्य—पिता मात्रा (१-२-७०) इत्येकशेषः—बद्धाञ्जलिः सन् इदं वक्ष्यमाणं वाक्यं बभाषे उवाच ॥ ४-७७ ॥

(संजीविनी-४-७८) **महान् प्रसाद इति।** इह पित्रा दशरथेन भारोऽपि राज्यभारोऽपि मयि न आरोपि इति यत् अयं महान् प्रसादः—अयं मदनुग्रहः मयि अनुग्रहः—मध्यमाम्बा कैकेयी यद् अध्यवासात् यद् वचनं निश्चिकाय—अधि-अव-पूर्वात् षोऽन्तकर्मणि इति धातोः लुङि रूपम्—विभाषा घ्राधेट्शाछासः (२-४-७८) इति सिचो लुक्—तद् वचनं तथैव कुर्वे करिष्यामि—सर्वे यूयं मुदिताः स्थ मुदिता भविष्यथ—वर्तमानसामीप्ये लट्—(पद) विभागः—भारः अपि न आरोपि—मयि इह पित्रा (इति) ॥ ४-७८ ॥

(संजीविनी-४-७९) **दत्त्वा वरावद्येति।** हे महीश दशरथ अद्य वरौ दत्त्वा इदानीं कैकेयीवरप्रदानं कृत्वा—विलशित्वा खलु क्लेशमगत्वा—अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा (३-४-१८) इत्यनेन क्त्वा प्रत्ययः—सत्यात् न हीयस्व स्वसत्यवचनाद् हीनो मा भूः—दयार्द्रया कृपारसार्द्रया दृशा अस्मान् वीक्ष्य वनाय दिश वनवासं कर्तुं विसर्जय—क्रियार्थोपपदस्य च कर्मणि स्थानिनः (२-३-१४) इति चतुर्थी—त्वं मा विषदः दुःखितो मा भूः—षद्लृ धातोः लुङि रूपम् (विषद इति)—न माङ्योगे इति निषेधाद् अडागमाभावः—प्रसीद प्रसन्नो भव—पाघ्रेत्यादिना सीदादेशः ॥ ५-७९ ॥

(संजीविनी-४-८०) **जीवातुनेति।** जीवातुना जीवनौषधेन—जीवातुः जीवनौषधम् इत्यमरः—रामवचोऽमृतेन रामस्य वचनामृतेन मूर्छां मुक्त्वा संज्ञाम् उपगम्य चेष्टां

प्राप्य स दशरथः आहूय--रामम् इति शेषः--पुरतो बाहू प्रसार्य हस्तौ पुरस्तात् प्रसार्य पुत्रं परिष्वज्य पुत्रम् आलिङ्ग्य चिरं व्यलापीत् विललाप--लप व्यक्तायां वाचीत्यस्मात् लुङि रूपम्--इट ईटि इति सिचो लोपः ॥ ४-८० ॥

(संजीविनी-४-८१) **हा राम हा राघवेति।** हा राम रामभद्र हा राघव रघुकुलोद्भव हा कुमार पुत्र हा वत्स हा शिशो हा वत्सल हा गुरुवत्सल--हा शब्दः खेदे--अह हा इत्यद्भुते खेदे इत्यमरः--मत्समीपं हित्वा ममान्तिकं त्यक्त्वा कथं काननान्तं यास्यसि कथं वनमध्यं गमिष्यसि--किं च जरती ते प्रसूः माता वृद्धा तव जनयित्री--जनयित्री प्रसूर्माता इत्यमरः--कथं पुरा आस्ते कथं स्थास्यति--यावत्पुरानिपातयोरिति लट् पुराशब्दयोगात् भविष्यदर्थे--त्वयि वनाय गते सति कौसल्या पुत्रवात्सल्यात् कथं स्थास्यतीति भावः ॥ ४-८१ ॥

(संजीविनी-४-८२) गृहस्थानां मातापित्रादयः अपरित्याज्या--किं तु पोष्या इति मनुनाप्युक्तमित्याह--**वृद्धौ चेति।** गृहस्थैः वृद्धौ च मातापितरौ साध्वी च भार्या--पतिव्रता पत्नी--शिशुरपत्यमपि शिशवः पुत्राश्च अकार्यमपि कृत्वा अकार्यादिकमपि कृत्वा--स्वयमपोष्यापि पोष्याः भर्तव्याः इति महीयान् मनुः पूज्यो मनुर्वक्ति--अत एव वयमपि पोष्या इति भावः--ब्रुवः पञ्चानामादित आहो ब्रुवः (३-४-८४) इत्यनेन लटः स्थाने णलादेशः ब्रुवः आहादेशश्च ॥ ४-८२ ॥

(संजीविनी-४-८३) **दृष्ट्वाग्रत इति।** हे तात राम अग्रतः मे परलोकयात्रां दृष्ट्वा पुरस्तात् मरणं दृष्ट्वा पश्चादरण्ययात्रां कुरु पश्चाद् वनवासं कुरु--पश्चाद् वनवासगमने तव लाभ इत्याह--हे तात राम चिरस्य जाते चिराय उत्पन्ने त्वयि याते वनं गते सति मम शिरसि मस्तके अलातम् को निदद्यात् उल्मुकं को वा निक्षिपेत् ॥ ४-८३ ॥

(संजीविनी-४-८४) **त्वत्तो निवापमिति।** मृतोऽप्यहम् त्वत्तो निवापं भवत्तः पितृदानम्--पितृदानं निवापः स्यादित्यमरः--न अवापम्--न गच्छामि स्म--अवपूर्वात् आप्नोतेर्लुङि रूपम्--पुषदीत्यादिना च्लेरङादेशः--अत एव परलोकतापं पापं कष्टम् प्राप्स्यामि गमिष्यामि--तथा हि आत्मजेन दत्तं प्रदत्तं त्र्यञ्जलं जलम् (अञ्जलित्रयपरिमितं जलम्)--द्वित्रिभ्यामञ्जलेः (५-४-१०२) इत्यनेन टच् प्रत्ययः समासान्तः--संख्यापूर्वो द्विगुरिति द्विगुः--(तादृशं जलम्) प्रेतस्य तापप्रशमं करोति हि ॥ ४-८४ ॥

(संजीविनी-४-८५) **प्रसीदेति।** हे कैकेयि प्रसीद प्रसन्ना भव—दुराग्रहा असि दुराग्रहविशिष्टा असि—शिशुना रामेण ते किमपराद्धम् शिशुना रामेण तव को वा अपराधः कृतः—स्वमातरि कौसल्यायाम् त्वयि च निर्विशेषे समे भक्ते च रामे इयत् पापं कथं करोषि ॥ ४-८५ ॥

(संजीविनी-४-८६) **प्रियाः प्रियाभ्य इति।** हे कैकेयि लोके प्रियाः पतयः के के नरेन्द्राः प्रियाभ्यः पत्नीभ्यः वरान् न वितरन्ति पत्नीभ्यो वरान् न ददति—सर्वे ददतीत्यर्थः (मम तु तुल्यः कोऽपि न भवतीत्याह—अहमिव त्वदर्थम् त्वत्प्रीत्यर्थम् (यथा करोमि तथा) निष्करुणः कृपाशून्यः सन् कः पुमान् निष्कारणमेव कुमारं निष्कासयेत् पुत्रं निर्यापयेत्—(न कोऽपीत्यर्थः) ॥ ४-८६ ॥

(संजीविनी-४-८७) इदानी कैकेयी प्रति सामर्षं वचनामह—**वशीकृतमिति।** हे वामाक्षि वामलोचने हि यस्मात् कारणात् वामाः वनिताः प्रतीपदर्शिन्यः—प्रतीपदर्शिनी वामा इत्यमरः—वशीकृतं वल्लभं वशीकृतं प्रियम् अभीष्टान् वरान् अर्थयेरन् प्रार्थयेरन्—अत एव त्वमपि उत्सङ्गसुखोपलाल्यम् अङ्के सुखोपलालनीयं वत्सं शिशुं रामं वने वस्तुं वने स्थातुं वल्कलिनं वल्कलभाजं वृणीषे प्रार्थयसे ॥ ४-८७ ॥

(संजीविनी-४-८८) **चिरादिति।** चिराद् भुवम् अभौक्षम् भूपालनम् अकार्षम्—किं च इष्टभोगान् अभुक्षि (इष्टान् भोगान् उपभुक्तवान्)—अभुक्षीत्यत्र भुजोऽनवने इत्यात्मनेपदम् (उपभोगार्थत्वात्)—तथापि वृद्धोऽहम् न तपः तितप्से तपस्तप्तुं नेच्छामि—तप सन्तापे इत्यस्मात् सन्नन्ते रूपम् उत्तमपुरुषैकवचने—वृद्धोऽप्यहं विषयान् विहाय तपस्तप्तुं नेच्छामीत्यर्थः—(वार्धके मुनिवृत्तीनामित्युक्तवत्)—युवतिर्जाया यस्य स युवजानिः वत्सः एषः रामः वल्कलं वसानः सन् वनं कथमुपेयात्—वनवासं कथमङ्गीकुर्यात् ॥ ४-८८ ॥

(संजीविनी-४-८९) **रामे पुरः प्रोषुषि इति।** राज्ययोग्ये पट्टाभिषेकार्हे रामे पुरः प्रेषुषि अयोध्यातः निर्याते सति—मन्दभाग्ये अल्पभाग्ये मयि क्षिप्रं प्रेयुषि शीघ्रं मृते—भुवि भूतले लोकाभिशप्ता भवसि जनैर्निन्दिता भविष्यसि—राममाता कौसल्या शोकाभितप्ता शोकपीडिता भविष्यति—वर्तमानसामीप्ये वर्तमानवद् वा इति लट् ॥ ४-८९ ॥

(संजीविनी-४-९०) **इक्ष्वाकुवंशैकगुरो इति।** इक्ष्वाकुवंशैकगुरो इक्ष्वाकुवंशस्य मुख्यगुरो हे वसिष्ठ हे सुमन्त्र हे धृष्टे (अयमपि कश्चिदमात्यः) हे धर्मपाल शृणु—इदं वचनं शृण्वित्यर्थः—सुमन्त्रधृष्टिधर्मपालाः दशरथस्य सचिवाः (दृश्यतां वा-

रामायणम्——१-७-३) इक्ष्वाकुवंशैकगुरो इति वसिष्ठविशेषणम्——शृण्विति प्रत्येकं संबध्यते——सन्देशहराः दूताः इमाम् अयोध्यापुरनाशवार्तां समन्तात् नयन्तु——सर्वदिशः प्रापयन्तु——नयतिर्द्विकर्मकः ।। ४-९० ।।

(संजीविनी-४-९१) **उभौ सुताविति ।** उभौ सुतौ भरतशत्रुघ्नौ मातुलसद्मयातौ युधाजिद्गृहं प्रति यातौ——अन्यौ रामलक्ष्मणौ च अजिनोत्तरीयौ अजिनोत्तरासङ्गौ भवन्तौ वन्यां यातौ वनसमूहं प्रति यातौ——वन्या वनसमूहे स्यादित्यमरः——पाशादिभ्यो यः (४-२-४९) इति य प्रत्ययः समूहार्थे——नृपतिर्दशरथः शोकोपरागात् शोकनिमित्ताद् उपप्लवात् (शोकोपरागः इति प्रथमान्तपाठः प्रद्योतन्याम् नृपतेर्विशेषणतया व्याख्यातः——संपादकस्य) परागात् मृतोऽभूत्——परापूर्वाद् इण्धातोः लुङि रूपम्——इणो गा लुङीति गादेशः——इति अनेन प्रकारेण लेखान् आदिशन्तु प्रेषयन्तु ।। ४-९१ ।।

(संजीविनी-४-९२) **स ब्रह्मेति ।** ब्रह्म विद्वान् ब्रह्मज्ञानीत्यर्थः सः जनकः दुहितृः प्रदाय रामादिभ्यो दत्त्वा रघूणां कुले संबन्धम् आसज्य संबधं कृत्वा संसारसौख्यं (दुहितृणां) बहु मन्यमानः जामातृषु रामादिषु दुहितृणां पतिषु परं प्रेम विधत्ते उत्कृष्टं स्नेहं करोति ।। ४-९२ ।।

(संजीविनी-४-९३) **ज्योत्स्नेव सोममिति ।** ज्योत्स्ना सोममिव कौमुदी निशापतिमिव वत्सा सीता च बाला रामं न जहाति रामभद्रं न त्यजति——किं तु वनं याता दण्डकारण्यं प्रति गमिष्यति——याता इति लुटि रूपम्——पुण्यस्य जनकस्य राज्ञः पुण्यपुरुषस्य जनकराजस्य पुत्र्याः कुमार्याः वधूट्याः स्नुषायाः अहं श्वशुरः सन् पापोऽस्मि पापिष्ठो भवामि ।। ४-९३ ।।

(संजीविनी-४-९४) **दिवोऽवनेरिति ।** दिवः स्वर्गस्य अवनेरपि भूमेश्च अवनाय जातः रक्षणायोत्पन्नः अद्यापि इदानीमपि बालो मे सुतः विधिवैशसेन दैवस्य अननुकूलत्वेन वनाय यातः वनवासं कर्तुं गतः——वनायेत्यत्र क्रियार्थोपपदस्येति चतुर्थी——मुनिभोज्यं मूलं फलं वा——समुच्चये वाशब्दः——मूलं फलं च——कथम् अद्यात् (कथं भक्षयेत्) ।। ४-९४ ।।

(संजीविनी-४-९५) **विनीतमेनमिति ।** विनीतं विनयसंपन्नम् अग्रतःस्थम् पुरः स्थितम् अपराधं विना——निरपराधमित्यर्थः——शिशुम् एनं रामं वनं व्रज गच्छेति यदि ब्रुवे यदि वदामि तर्हि आर्याः पूज्याः मां भ्रूणहणं भ्रूणहन्तारं भणेयुः वदेयुः——ब्रह्मभ्रूणवृत्रेषु क्विप् (३-२-८७) इति क्विप् प्रत्ययः——किं च कर्मचण्डालं कर्मणा

व्यापारेण चण्डालं च मां वदेयुः—अविहितकर्मणः अनुष्ठानात् अनार्यम् अपूज्यं च वदेयुः ॥ ४-९५ ॥

(संजीविनी-४-९६) **जनन्ययोध्ये इति।** हे जननि हे मातः हे कुलराजधानि हे अयोध्ये—पदद्वयम् अयोध्याविशेषणम्—कुमारे गते रामे वनाय गते सति मयि सुप्रमारे मय्यपि मृते सति त्वाम् उपलाल्य आश्वास्य कः पालयेत् को वा रक्षेत्—कोऽपि रक्षको नास्तीत्यर्थः—अत एव नष्टासि नाशं गतासि—अनाथासि नाथहीना च असि—ते पतिः कुतः तव पतिः कः—पतिरेव नास्तीत्यर्थः—कष्टम् ॥ ४-९६ ॥

(संजीविनी-४-९७) रामे वनवासाय गते सति पुत्रशोकेन संप्राप्तां स्वकीयां मृतिम् आशङ्क्य आह—**कैकेयि इति।** हे कैकेयि इतः मत्तः तव वैधव्यं प्रियं चेत् तर्हि अनर्थम् एवं किमिति व्यवासाः निश्चितवती—भक्ते ओदने विषं वा—भिस्सा स्त्री भक्तमन्धोऽन्नमित्यादिरमरः—भवने अनलं वा गृहे विभावसुं वा दत्त्वा विन्यस्य पतिघ्नी सती विधवा कथं वा न स्याः किमिति न भवेः—विकल्पे वाशब्दः ॥ ४-९७ ॥

(संजीविनी-४-९८) **इन्दीवरश्यामलमिति।** इन्दीवरश्यामलम् नीलोत्पलवत् श्यामवर्णम्—स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च—इन्दीवरं च नीलेऽस्मिन् इत्यमरः—इन्दुवक्त्रं चन्द्रवदनम् इन्दिन्दिरानीलकलापकेशम् इन्दिन्दिरा भ्रमराः—इन्दिन्दिरो मधुकरश्चञ्चरीको मधुव्रतः इति वैजयन्ती—इन्दिन्दिरा इव आनीलाः कलापवत् वर्हवत् केशा यस्य—तम् इन्द्रारिहन्तारं राक्षसहन्तारम् कथं जटाचीरधरम् जटावल्कलानि धारयन्तम् अमुं कुमारम् कथं वा द्रक्ष्यामि—वर्तमानसामीप्ये लट्—वल्कलयुक्तं रामं द्रष्टुं न समर्थोऽस्मीत्यर्थः ॥ ४-९८ ॥

(संजीविनी-४-९९) **वसिष्ठवाक्येनेति।** राज्याभिषेकाय पट्टाभिषेकाय वसिष्ठस्य वाक्येन वधूसमेतं पत्नीसमेतं निशि जागरित्वा रात्रौ जागरणं कृत्वा कृतोपवासं रघुप्रवीरं रामं वनाय गच्छेति कथं वक्ष्ये कथं नु वदिष्यामि ॥ ४-९९ ॥

(संजीविनी-४-१००) **वल्कं गृहाणेति।** वल्कं गृहाण वल्कलम् आच्छादयेति—वनं विशेति काननं प्रविशेति—जटा बध्नीतेति—जपन् वसेति जपं कुर्वन् निष्ठेति—मूलानि अशान कन्दमूलफलानि भक्षयेति—मुनिर्भवेति शिशुं रामं ब्रुवाणः वदन् अहं शतधा न दीर्ये शतधा न दीर्णो भवामि ॥ ४-१०० ॥

(संजीविनी-४-१०१) **धर्मं तथार्थं चेति।** धर्मं तथा अर्थं च परित्यजन्तं धर्मार्थौ परित्यजन्तं प्रकामम् अत्यन्तं काममेव पुरुषार्थं कुर्वाणम् स्त्रीजितम् कैकेय्या वशीकृतम् अत एव लघ्वाशयम् अल्पाभिप्रायम्—अभिप्रायश्छन्द आशयः इत्यमरः—

माम् इन्द्रलोके रघ्वादयः न विलोकितारः न द्रक्ष्यन्ति—लोकृ दर्शने इत्यस्मात् लुटि रूपम् ॥ १०१ ॥

(संजीविनी-४-१०२) **प्रसादयामीति।** हे कैकेयि अधुना इदानीम् त्वाम् अञ्जलिना अञ्जलिबन्धेन प्रसादयामि—अत एव प्रसीद—मूर्ध्ना नतोऽस्मि—हे वराकि वत्सस्य शिशोः रामस्य वनप्रयाणाय वनवासार्थम् अत एव जगतो विरुद्धं लोकविरुद्धं वरं जहीहि त्यज—रामवनवासरूपं वरं न वृणित्यर्थः ॥ ४-१०२ ॥

(संजीविनी-४-१०३) **वत्सप्रवासादिति।** हे वनजाक्षि कमललोचने वनशब्देन उदकमुच्यते—जीवनं भुवनं वनमित्यमरः—वनजं च कमलम्—वत्सप्रवासात् राघववनवासात् इतरान् वरान् वृणीष्व पृच्छ—शतं वा वरान् दद्याम् प्रयच्छेयम्—अथवा इति पक्षान्तरे—हे वामशीले प्रतिकूलस्वभावे मे शिरो वा वृणु—सम्प्रति इदानीं कम्प्रं तत् शिरः त्वया संप्रयच्छे तुभ्यं दास्यामि—चतुर्थ्यर्थे तृतीया (अशिष्टव्यवहारे इत्यादिना)—पाघ्रादिसूत्रेण यच्छादेशः ॥ ४-१०३ ॥

(संजीविनी-४-१०४) **रामश्चेति।** सौमित्रियुतो लक्ष्मणसहितः रामश्च तथा अहं च भरतस्य प्रेष्याः भृत्याः पोष्याः पोषणीयाश्च भवामः—नियोज्यकिंकरप्रेष्यभुजिष्यपरिचारकाः इत्यमरः—वत्सेन शिशुना रामेण सह अल्पपल्ल्याम् अल्पग्रामे—पल्ली कुटीग्रामकयोरिति विश्वः—वत्स्यामि स्थास्यामि—हे कल्याणि मङ्गलस्वरूपे तव तनयेन भरतेन पृथ्वी पाल्या धरित्री पालनीया ॥ ४-१०४ ॥

(संजीविनी-४-१०५) **हताधिकारमिति।** हताधिकारं हीनसामर्थ्यम्—वरप्रदानादिति भावः—माम् अनया वध्वा कैकेय्या सह क्वचन कस्मिंश्चित् अधिकारम् कारायाम् कारागृहे—अधिकारामिति विभक्त्यर्थे अव्ययीभावः—कारा स्याद् बन्धनालये इत्यमरः—निगलैः अन्दुकैः निरुध्य निरुद्धं कृत्वा मौलैः सचिवैः सह मूलादागतैः मौलैः—तत आगत इति अण् प्रत्ययः—राज्यपीठे सिंहासने रामं प्रतिष्ठापय रामस्य पट्टाभिषेकं कुरु—(पद) विभागः इत्थम् हताधिकारम् क्वचन अधिकारम् (इति) ॥ ४-१०५ ॥

(संजीविनी-४-१०६) **तवाभिषेकमिति।** हे रामचन्द्र एकाम् इमां युधाजिद्भगिनीं विना एकया अनया कैकेय्या विना—पृथग्विनेत्यादिना द्वितीया—मम राज्ये केऽपि केचनापि तव अभिषेकं न प्रतिकूलयन्ति—एतया कैकेय्या किं क्रियेत—अत एव बलाद् अयोध्याम् अध्यास्स्व बलात्कारेण अयोध्याम् अधितिष्ठ—अधिशीङित्यादिना कर्मत्वम् ॥ ४-१०६ ॥

(संजीविनी-४-१०७) **स्त्रिया इति।** रहसि एकान्ते प्रियायाः पत्न्याः प्रियार्थम् प्रीतये यद् वस्तु प्रदाय तद् वस्तु अददानः सन् अहम् असत्यम् इयाम् अनृतं प्राप्नुयाम् यदि—तर्हि जगत्समक्षम् लोकविदितं यथा तथा ते राज्यं प्रतिश्रुत्य तव राज्यं दास्यामीति प्रतिज्ञाय तद् राज्यं न दत्त्वा वनं ददत् वनवासं ददानः सन् कथं च सत्यः भवेयम्—अर्थात्—असत्यः सत्यहीनः कथं न भवेयम्—ददत् इत्यत्र नाभ्यस्तात् शतुः इति प्रतिषेधात् नुमभावः ॥ ४-१०७ ॥

(संजीविनी-४-१०८) **सत्सन्ततिमिति।** आर्याः पूज्याः इह लोके सत्सन्तति स्वर्गम् आहुः—अनृतेन असत्येन नरकः काले अनुभाव्यः कालान्तरे अनुभवयोग्यः (इति च)—अत एव प्रत्यक्षतः स्वर्गसुखं विहाय प्रत्यक्षस्वर्गसुखं परित्यज्य परोक्षतः नरकाद् बिभीयाम् किम्—किम् शब्दः प्रश्नार्थे नरकाद् भीतो नास्मि इत्यर्थः ॥ ४-१०८ ॥

(संजीविनी-४-१०९) **अद्य प्रभृतीति।** हे कैकेयि हे पापे अद्य प्रभृति आमरणम् मरणपर्यन्तं ते मुखं न निरीक्षे तव आननं न पश्यामि—किं च यदि भरतः त्वदानुकूल्यम् इच्छेत् तवाभिप्रायम् अङ्गीकुर्यात् चेत् तर्हि मृतोऽपि अहम् अतो भरतात् निवापं जलाञ्जलिं नेच्छेयम्—पितृदानं निवापः स्यादित्यमरः ॥ ४-१०९ ॥

(संजीविनी-४-११०) **इत्येवमुक्त्वेति।** इति एवम्—उक्त्वेति शेषः—राजा दशरथः एकवासाः एकवस्त्रः सन् मुक्तविशीर्णकेशः मुक्ताः शिथिलाः विकीर्णाः केशा यस्य स तथोक्तः उन्मत्तवत् भ्रान्त इव धरण्यां लुठन् भूमौ लुठन् हा वत्स हा राम इति अनीचैः उच्चैः वदन् विधात्रा मुषितः वञ्चितः मुमूर्छ ॥ ४-११० ॥

(संजीविनी-४-१११) **तमीक्षमाण इति।** तम् इत्थम् एवं तदवस्थं नृपम् ईक्षमाणः पश्यन् हे तात मा खिन्थाः खिन्नो मा भूः इति वदन् उदश्रुः उद्गतबाष्पः सन् रामचन्द्रः रामभद्रः मूर्छितं नृपं दशरथं बाहुभ्याम् उत्थाप्य मूर्ध्ना नतः प्रणतः आलिलिङ्ग ॥ ४-१११ ॥

(संजीविनी-४-११२) **तदङ्गसङ्गेनेति।** नरेन्द्रो दशरथः तदङ्गसङ्गेन तस्य रामस्य अङ्गैरवयवैः सङ्गेन मूर्छां विहाय मूर्छां परित्यज्य हा रामेति हा तातेति मां न त्यज मां न विसर्जयेति हा वत्स मागाः हा शिशो न गच्छेति हा कुमार हा पुत्रेति एतावदेव अनेन प्रकारेण व्यलपत् ॥ ४-११२ ॥

(संजीविनी-४-११३) **नष्टोऽस्मीति।** नष्टोऽस्मि मृतोऽस्मि दग्धोऽस्मि—अहहा हतोऽस्मि—गमने हननेऽपि च कुत्सिते—इति केशवस्वामी। दृष्टिश्च नष्टा नाशं गता—रामं च नेक्षे रामं न पश्यामि—हा वत्स क्वासि कुत्र तिष्ठसि इत्येवम् उक्त्वा

भूमौ विलुठ्य हस्तौ प्रसार्य बाहू प्रसार्य आत्मजम् अन्वियेष पुत्रम् अन्विष्यति स्म ॥ ४-११३ ॥

(संजीविनी-४-११४) **तं तादृशमिति ।** ततः अनन्तरं दयालुः कृपावान् रामः तादृशं तथा दीनावस्थापन्नं तं दशरथं वीक्ष्य हा तात अयमहमस्मि इति पदोः पतित्वा पादयोः प्रणिपत्य निर्गन्तुकामः वनाय निर्यातुकामः सन् उदश्रुः उद्गताश्रुः सन् सप्त शतानि मातृः वक्ष्यमाणप्रकारेण जगाद—दशरथस्य सप्तशतानां स्त्रीणां विद्यमानत्वात् सप्त शतानि मातृरित्युक्तम् ॥ ४-११४ ॥

(संजीविनी-४-११५) **अम्बाः इति ।** हे अम्बाः मातरः मयि किंचिद् आगः अस्ति चेत् कोऽप्यपराधो विद्यते चेत् तर्हि वरवर्णिनीभ्यः—उत्तमा वरवर्णिनी इत्यमरः —वः युष्मभ्यं नमः नमस्कारं करोमि—बहुप्रियैः बहुभिः प्रियवचनैः उपलालयन्त्यः यूयं स्तनंधयं माम् अवीवृधध्वम् (वर्धितवत्यः) ॥ ४-११५ ॥

(संजीविनी-४-११६) कैकेयी रामस्य मध्यमाम्बा दशरथस्य द्वितीयपत्नीत्वात् —एवं सति तमर्थं छलोक्त्या परिहरति **न मध्यमाम्बेत्यादिना**—इयं कैकेयी मम मध्यमाम्बा न भवति—तत् कथम्—यत् यस्मात् कारणात् भारं निषेधति मम राज्य-भारं परिहरति—अतः कारणात् उत्तमाम्बा उत्तममाता—या भारं कुरुते सैव मध्य-माम्बा—या तु भारं निषेधति सैव उत्तमा—मे प्रियो भ्राता भरतः राजा अस्तु—पिता दशरथश्च अहं च तस्मै राज्यम् अदाव अयच्छाव—अदावेति दाधातोर्लुङि रूपम् ॥ ४-११६ ॥

(संजीविनी-४-११७) **वने इति ।** ससौमित्रिः लक्ष्मणसहितः सन् अहं वने चरेयम्—कैकेयेयः केकयीपुत्रः भरतः स च—चशब्दस्त्वर्थः—अवने पालने तिष्ठतु ॥ ४-११७ ॥

(संजीविनी-४-११८) **आश्वासनीय इति ।** तातः पिता दशरथः आश्वासनीयः —वृद्धा मम जननी माता च कौसल्या संबोधनीया—सपत्नीति स्पर्धा न कार्या—किं तु ज्येष्ठेति मम मातेति च हेतोः माननीया ॥ ४-११८ ॥

(संजीविनी-४-११९) **श्रुत्वा गिर इति ।** पूर्वोक्तास्ताः गिरः श्रुत्वा आकर्ण्य समस्तास्ता वनिताः युगपत् उच्चैः चक्रन्दुः—तन्मन्दिरं तदन्तःपुरम् मन्दरमन्थमान्थ-दम्भोधिगम्भीररवम् मन्दर एव मन्थः मन्थानदण्डः—तेन मान्थन् क्षुभ्यन्—कलुषीभवन् स चासौ अम्भोधिश्च—तस्य गम्भीररव इव रवः यस्मिन् कर्मणि तद् यथा भवति तथा (मन्दिरं) रुराव दध्वान ॥ ४-११९ ॥

(संजीविनी-४-१२०) **तथा रटन्तीष्विति ।** नृपाङ्गनासु अन्तःपुरवनितासु तथा आरटन्तीषु क्रन्दन्तीषु सतीषु रामः वसिष्ठं नत्वा प्रणम्य निरहास्त निर्ययौ--ओ हाङ् गतावित्यस्मात् लुङि रूपम्--सरन्तं गच्छन्तम् आत्मानं शरीरम्--आत्मा देहमनो-ब्रह्मस्वभावधृतिबुद्धिषु इति विश्वः--स्वभाव इव एको लक्ष्मण एव तं रामम् अन्वगात् अनुययौ ।। ४-१२० ।।

(संजीविनी-४-१२१) **अम्बा क्व सेति ।** अम्बा माता कौसल्या क्व कुत्र स्थिता --कनीयसी अम्बा सा सुमित्रा च क्व कुत्र स्थितेति ब्रुवन् मातृगृहानुवर्ती कौसल्या--दिजननीगृहानुयायी सन् रामः सौमित्रिं लक्ष्मणम् आलम्ब्य जगाम ।। ४-१२१ ।।

(संजीविनी-४-१२२) **आदेशादिति ।** स रामः अवनिपतेः दशरथस्य आदेशात् नियोगात् वनाय गन्तुम् अधिगहनं गहने कानने क्रव्यादान् राक्षसान् बलात् निहन्तुम् वैदेह्याः सीतायाः सहवनगमनम् अनुमन्तुम् अङ्गीकर्तुम् तां कौसल्यां नन्तुम् कौसल्या-भवनम् अगात् कौसल्यागृहं ययौ---(पद)विभागः---सः तां च नन्तुम् (इति) ।। ४-१२२ ।।

इति श्री-राम-पल्लि-गोपीनाथसूरिविरचितायाम्
उदारराघवव्याख्यायाम् संजीविन्यां चतुर्थः सर्गः ।

NOTES TO SAṂJĪVINĪ—Canto IV

[1] The *Saṃjīvinī* reads: *lakṣyaguṇopayogā*. Bombay edn. and the *Pradyotanī* read: *lakṣyaguṇopayoge*.

[2] Only Bombay edn. reads: *paureva*. The *Saṃjīvinī*, the *Pradyotanī* and MSS. 1 & 7 read: *poṭeva*.

[3] The *Vālmīkirāmāyaṇa* has thus: *sa nirarthaṃ gatajale setuṃ bandhitum icchati* (II. 18. 23)

उदारराघवे महाकाव्ये पञ्चमसर्गस्य व्याख्या संजीविनी
श्री-राम्-पल्लि-गोपीनाथसूरिविरचिता

(संजीविनी-५-१) **तस्मिन्ननेहसीति ।** तत्र कौसल्यागृहे तस्मिन्ननेहसि तस्मिन् रामगमनसमये--कालो दिष्टोऽप्यनेहापि इत्यमरः--तारतरम् अत्युच्चं यथा भवति तथा तौर्यत्रिकं नृत्तगीतवाद्यम्--तौर्यत्रिकं नृत्तगीतवाद्यं नाट्यमिदं त्रयम् इत्यमरः:--मन्द्रं ननाद गम्भीरं यथा भवति तथा दध्वान--कल्पान्तधाराधरधीरनादाः कल्पान्ते युगान्ते धाराधराः मेघाः तद्वद् धीरनादाः गम्भीरध्वनयः दुन्दुभयः भेर्यः मन्देतरम् अत्यधिकं यथा तथा विनेदुः दध्वनुः ।। ५-१ ।।

(संजीविनी-५-२) **वीणा विरेणुरिति ।** वाराङ्गानामङ्गलगीतमिश्राः वारयोषितां मङ्गलगानेन संमिश्राः वीणाः मृदुवेणुनादैः मृदुवेणुस्वनैः सह विरेणुः दध्वनुः--(जनाः) कम्बूंश्च दध्मुः शङ्खांश्च पूरयामासुः--पटहांश्च जघ्नुः--आनकांश्च ताडयामासुः--उच्चैः प्रघणेषु उन्नतेष्वलिन्देषु--प्रघाणप्रघणालिन्देत्यादिरमरः--घण्टाः बबन्धुः अलिन्देषु घण्टाबन्धनं चक्रुः--रण शब्दे ध्मा शब्दाग्निसंयोगयोः हन हिंसागत्योः बध बन्धने इति धातूनां लिटि रूपाणि--जघ्नुरित्यत्र हो हन्तेः (७-३-५४) इत्यनेन हकारस्य कुत्वेन घकारः ।। ५-२ ।।

(संजीविनी-५-३) **कोणाहतानामिति ।** कोणाः वादनसाधनदण्डाः--कोणो वीणादिवादनमित्यमरः--तैराहतानां जयघण्टिकानां प्रभूताः स्वाणाः समश्राविषत अधिकाः स्वनाः शुश्रुविरे--सर्वत्र सर्वप्रदेशेषु वेदघोषाः पुरोहितानां पुण्याहघोषाश्च अश्रोषत शुश्रुविरे--समश्राविषत अश्रोषत इत्युभयत्रापि श्रु श्रवणे इत्यस्मात् कर्मणि लुङि रूपम्--बहुवचनं च--समश्राविषतेत्यत्र स्यमिच्सीयुडित्यादिना (६-४-६२) चिण्वद्भाव इडागमश्च--अश्रोषतेत्यत्र चिण्वदिडभावपक्षे आर्धधातुकत्वाद् गुणः ।। ५-३ ।।

(संजीविनी-५-४) **विचित्रवर्णैरिति ।** विचित्रवर्णैः नानावर्णैः मणिभित्तिभागैः मणिमयभित्तीनां भागैः कुसुम्भमुख्यैः कुसुम्भपुष्पप्रधानैः कुसुमोपहारैः उपलक्षिता सुव्यक्तमुक्तामयरङ्गवल्ली सुव्यक्ता अत्यन्तं व्यक्ता मुक्तामयी मुक्ताविकारा

रङ्गवल्ली यस्यां सा तथोक्ता राज्ञीगृहमण्डनश्रीः कौसल्यायाः गृहालंकारशोभा रराज ॥ ५-४ ॥

(संजीविनी-५-५) **ललाटिकेति** । ललाटिकारक्तलसल्ललाटाः ललाटिकाभिः—कर्णललाटात् कन् अलंकारे इति कन् प्रत्ययः—रक्तानि लोहितानि लसन्ति मनोज्ञानि ललाटानि यासां तास्तथोक्ताः—पाटलगण्डभागाः पाटलगण्डप्रदेशाः आरक्तताम्बूलरसारुणास्याः अतिरक्तेन ताम्बूलरसेन अरुणमुखाः लाटाङ्गनाः लाटदेशस्त्रियः ललिताङ्गहाराः मनोज्ञाङ्गविक्षेपाः सत्यः लास्यानि चक्रुः नर्तनं चक्रुः ॥ ५-५ ॥

(संजीविनी-५-६) **अरुन्धतीति** । पूर्वार्धमेकं पदम्—अरुन्धतीमुख्यानाम् अरुन्धतीप्रभृतीनां अरच्चिरण्टीनां वृद्धसुवासिनीनाम्—चिरण्टी तु सुवासिनी इत्यमरः—पूजाविधये पूजार्थं व्यग्रः पुरन्ध्रिवर्गः त्वरमाणस्त्रीसमूहः यस्मिन् तत् तथोक्तम्—मनोहरं मातृगृहं वीक्ष्य मनोज्ञं कौसल्यागृहं दृष्ट्वा तनुजः राघवः अन्तः प्रवेष्टुम् अन्तः पुरं प्रवेष्टुं ललज्जे जिह्राय—वनवासवार्तायाः वक्ष्यमाणत्वाद् अन्तः प्रवेष्टुं लज्जितोऽभूदित्यर्थः ॥ ५-६ ॥

(संजीविनी-५-७) **पुत्राभिषेकेति** । पुत्राभिषेकोत्सवपूर्णकामा रामस्य अभिषेकोत्सवेन पूर्णकामा क्षौमाभिरामा दुकूलेन रम्या—मणिकाञ्चिदामा मणिमयं काञ्चीदाम यस्याः सा तथोक्ता समृद्धां श्रियम् आदधाना समग्रां शोभां दधाना रत्नासनस्था रत्नपीठाधिरूढा वृद्धा राज्ञी कौसल्या रराज ॥ ५-७ ॥

(संजीविनी-५-८) **धूता सुमित्रेति** । सुमित्राकरचामरेण धूता वीज्यमाना सीताकरावर्तिततालवृन्ता सीतायाः करेण आवर्तितं भ्रामितं तालवृन्तं व्यजनं यस्याः सा तथोक्ता—शुद्धान्तवृत्तान्तम् अन्तः पुरवार्ताम् रामवनप्रयाणरूपाम् अजानती सा कौसल्या समयः रामाभिषेकसमयः कदा इति विप्रान् पप्रच्छ ॥ ५-८ ॥

(संजीविनी-५-९) **आगादिति** । इयत्यन्तर एव रागाद् अनुरागाद् रामः आगाद् आजगाम—इणो लुङि रूपम्—आगामिदुःखव्यसनानभिज्ञाम् भविष्यद् दुःखम् अजानतीम्—वनवासेन भविष्यन्तं क्लेशमजानतीमित्यर्थः—तां कौसल्यां प्रणम्य प्रेमभरेण प्रेमातिशयेन पश्यन् रामः निश्शङ्कम् अपगतशङ्कम् यथा भवति तथा अङ्के निषसाद ॥ ५-९ ॥

(संजीविनी-५-१०) **दरोद्गतेति** । अम्बा कौसल्या दरोद्गतशमश्रु दरम् अल्पम् यथा तथा उद्गतानि समुद्भूतानि श्मश्रूणि यस्य तत् तथोक्तम्—नीलायितं श्यामायितम्—तदीयं रामसंबन्धि गण्डस्थलं निनिमे चुचुम्ब—णिसि चुम्बने इत्यस्मात् लिटि

रूपम्—धम्मिल्लमाल्याग्रमिलन्मरन्दे धम्मिल्लः कचभरः—धम्मिल्लः संयताः कचाः इत्यमरः—तस्मिन् माल्याग्रे मिलन्तः सक्ताः मरन्दाः मकरन्दाः यस्य स तथोक्तः—तस्मिन् मूर्धनि उपाघ्रात् शिरसि आजिघ्रति स्म—घ्रा गन्धोपादाने इत्यस्मात् लुङि रूपम्—विभाषा घ्राधेट्शाच्छासः इत्यनेन सिचो लुक्—बाष्पम् आनन्दबाष्पं च मुमुचे त्यक्तवती ॥ ५-१० ॥

(संजीविनी-५-११) **आकारितस्येति** । अभिषेकहेतोः अभिषेकाय—षष्ठी हेतुप्रयोगे इति षष्ठी—आकारितस्य आहूतस्यापि—कृतिराकारणाह्वानम् इत्यमरः—निष्कासितस्यापि निर्यासितस्यापि तथापि—निर्विकारम् विकारशून्यम्—अत एव प्रसन्नं तस्य मुखम् आलोक्य किमप्यबुद्ध्वा रामस्य वनप्रयाणं किंचिदप्यजानती माता कौसल्या वक्ष्यमाणप्रकारेण जगाद ॥ ५-११ ॥

(संजीविनी-५-१२) **वत्साद्येति** । हे वत्स राम अद्य इदानीम् तव राज्यं भावि भविष्यति—अत एव शत्रून् उत्साद्य शत्रून् निहत्य अप्रमत्तः सन् क्षितिं रक्ष भूमिं पालय—भक्तिभाजः भक्तियुतान् त्रीन् तव भ्रातॄन् रक्ष—इमाः सर्वाः मातॄः मदतिरिक्ताः सर्वा जननीः मामिव पश्य ॥ ५-१२ ॥

संजीविनी-५-१३) **मान्यानिमानिति** । मान्यान् माननीयान् इमान् पुरस्थितान् ते मन्त्रिणः मानय—तव सचिवान् संभावय—बन्धूंश्च मित्राणि च बालवृद्धान् बालान् शिशून् वृद्धान् स्थविरांश्च संभावय—पुण्यवाचः पवित्रवाचः—वेदवाच इत्यर्थः—पुरोहितांश्च पूजय—सत्यसन्धः सत्यप्रतिज्ञः सन् भृत्यानपि पुपाण पोषय ॥ ५-१३ ॥

(संजीविनी-५-१४) **प्रजानुरागेणेति** । हे राम प्रजानुरागेण प्रजानुरञ्जनेन धनं चिनुष्व—धनं संपादय—धनेन धर्मं परिपालयस्व—धर्मेण कीर्तिं संपादय—कीर्त्या अखिलान् लोकान् पुनीथाः समस्तान् लोकान् पावनान् कुरु ॥ ५-१४ ॥

(संजीविनी-५-१५) **विशिष्ढीति** । राज्ये तव राष्ट्रे जनानां विभवं विशिष्टि जनानां सौभाग्यं विशिष्टं कुरुष्व—राष्ट्रे जनान् संभावयेत्यर्थः—निजैः चरित्रैः जनानां पापानि निष्पिष्टि स्वकीयैः सच्चरित्रैः जनानपि सच्चरित्रान् कुरु इत्यर्थः—यथा राजा तथा प्रजाः इत्युक्तत्वात्—शिष्लृ विशेषणे पिष्लृ संचूर्णने इति धात्वोः लोटि मध्यमपुरुषैकवचने विशिष्टि निष्पिष्टीति रूपे—इह अयोध्यायां सिंहासनस्थे त्वयि महीतलं शासति भूतलं पालयति सति नेत्रे शीतलयामि लोचने शीतले करोमि—तत् करोति तदाचष्टे इति णिच् ॥ ५-१५ ॥

(संजीविनी-५-१६) **श्रुत्वेति** । इति पूर्वोक्तवचनानि श्रुत्वा रामः प्रहसन् शुद्धान्तचरेषु अन्तःपुरजनेषु शृण्वत्सु सत्सु वृद्धां कौसल्यां बभाषे—किमिति इत्थम्—हे मुग्धे अम्ब किमपि न वेत्सि किमपि न जानासि—कुक्षौ क्षुधा दग्धे जठरे बुभुक्षया दग्धे सति को वा अक्षिण अञ्जनं कुर्यात्—न कोऽपीत्यर्थः ।। ५-१६ ।।

(संजीविनी-५-१७) **वनोपदेशमिति** । हे अम्ब मे पिता वनोपदेशं कुरुते—वनवासोपदेशं करोति—त्वं भूम्याम् अवनोपदेशं वक्षि रक्षणोपदेशं ब्रवीषि—पित्रोर्युवयोः अहं पितुर्वाक्यम् आचरेयम्—भरतः राजा सन् त्वद्वाक्यकारी अस्तु ।। ५-१७ ।।

(संजीविनी-५-१८) **ममाभिषेकेति** । मध्यमाम्बा कैकेयी ममाभिषेकोद्यतम् अभिषेकोद्युक्तं तातं पितरं दशरथं वरद्वयम् अद्य याचति—याचतिर्द्विकर्मकः—अत एव (तस्या) एकेन वरेण वनं यास्यामि—वनाय गमिष्यामि—अपरेण (तस्या एव) वरेण भरतः राजा भावी भविष्यति ।। ५-१८ ।।

(संजीविनी-५-१९) **पद्भ्यामिति** । जटाचीरधरः जटावल्कलधरः सन् तपस्वी अहं वने दण्डकारण्ये पद्भ्यां चतुर्दशाब्दान् पद्भ्यां चरिष्यामि—कालाध्वनोरिति द्वितीया—मनस्वी प्रशस्तमनस्कः भरतः हस्त्यश्वयायी हस्त्यश्वारूढः सन्नित्यर्थः—किरीटं दधत् मुकुटं दधानः—नाभ्यस्तात् शतुरिति नुमभावः—धरणीं प्रशास्ता भूमिं पालयिष्यति—शासु अनुशिष्टौ इत्यस्मात् लुटि रूपम् ।। ५-१९ ।।

(संजीविनी-५-२०) **श्रुत्वेति** । इति पूर्वोक्तवचनानि श्रुत्वा तन्वी कोमलाङ्गी देवी कौसल्या अकाण्डाशनिपीडितेव अकाण्डे अनवसरे अशनिना निर्घातेन ताडितेव—गर्जितशून्यनिर्घातेन ताडितेवेत्यर्थः—विच्छिन्नकाण्डा निकृत्तदण्डा—एकः काण्डशब्दः अवसरवाची—अपरस्तु दण्डवाची—काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिष्वित्यमरः—कदली इव हा वत्स वत्सेति भूमौ निपत्य विधात्रा मुषिता सती ब्रह्मणा वञ्चिता सती मुमूर्छ मूर्छिता अभूत् ।। ५-२० ।।

(संजीविनी-५ २१) **स्वमातृमूर्छेति** । लक्ष्मणः अग्रे पुरस्तात् स्वमातृमूर्छाकुलचित्तं स्वमातुः कौसल्यायाः मूर्छया व्याकुलचित्तं तं रामं निष्ठुरं परुषं यथा तथा बभाषे उवाच । किमिति—हे आर्य पूज्य राज्यं किं वृथा नाशयसि—भिन्नाशया उद्विग्नाभिप्राया—अभिप्रायश्छन्द आशयः इत्यमरः—इयम् तव कौसल्या म्रियते मृता भवति ।। ५-२१ ।।

(संजीविनी५-२२) **माता प्रमीतेति** । हे आर्य अद्य माता प्रमीता कौसल्या मृता (भविष्यति)—मीङ् हिंसायामिति धातोः क्तप्रत्यये रूपम्—पिता प्रमेता दशरथः

मृतो भविष्यति—लुटि रूपम्—अन्तःपुरमातृवर्गः प्रमेष्यते मृतो भविष्यति—लुटि रूपम्—त्वयि वनं प्रयाते वनाय गते सति अबला सीता काम् अवस्थां यास्यति ॥ ५-२२ ॥

(संजीविनी-५-२३) **मुधैवेति** । मूढबुद्धेः नष्टबुद्धेः जाल्मस्य असमीक्ष्यकारिणः—जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः—जरतः वृद्धस्य राज्ञः दशरथस्य प्रलापैः अनर्थकवचनैः—प्रलापोऽनर्थकं वचः इत्यमरः—मुधैव व्यर्थमेव किं मुह्यसि किमर्थं मुग्धोऽसि—दैवादिको मुहधातुः—उत्तरार्धेन असमीक्ष्यकारित्वमेव उपपादयति—स दशरथः स्त्रीविप्रलापैः कैकेय्या विरोधोक्तिभिः—विप्रलापो विरोधोक्तिरित्यमरः—विप्रलब्धो वञ्चितः सन् इह राजनीतौ न मूलबुद्धिः मूलपरिज्ञानो न भवति ॥ ५-२३ ॥

(संजीविनी-५-२४) **नाहं सहे इति** । हे नाथ राम जगद्विरुद्धं लोकविरुद्धम् वृद्धप्रलापेन दशरथोक्त्या संप्राप्तं वनप्रयाणम् अहं न सहे—तथापि नयमार्गभाजां नीतिज्ञानां पुंसाम् स्त्रीबालवृद्धाः स्त्रियो योषितः बालाः शिशवः वृद्धाः जरठाश्च पोषणीयाः खलु—किं तु (ते) न ग्राह्यवाचः नादरणीयवाचः ॥ ५-२४ ॥

(संजीविनी-५-२५) **वृद्धाविति** । असंबद्धगिरौ अनन्विवचनौ वृद्धौ जरठौ तौ दम्पती कैकेयीदशरथौ निरुद्धय—कारागृहे इत्यर्थः—वश्यसमस्तलोकः वशंगतसमस्तजनः सन् मौलप्रधानानुमतः—मूलादागताः मौलाः—तत आगत इति अण्प्रत्ययः—ते च ते प्रधानाश्च—तैरनुमतः अङ्गीकृतः सन्—रामाभिषेकायेत्यर्थः—अहं तव अभिषेकोत्सवम् आचरेयम् कुर्याम् ॥ ५-२५ ॥

(संजीविनी-५-२६) **कश्चिदिति** । इह एतस्मिन् अभिषेकविषये बलाभियोधी चतुरङ्गबलेन युद्धं कुर्वन् भरतानुरोधी भरतानुवर्ती कश्चिद् विरोधी आवयोः कश्चन शत्रुः यदि स्यात् अस्ति चेत् तर्हि तं शत्रुं समूलघातं निहन्याम् समूलं यथा तथा निहन्याम्—मूलेन सह नाशयामि—समूलाकृतजीवेषु इत्यादिना णमुल् प्रत्ययः—यद्वा बलानुपातं सैन्यमनुपात्य—विशिपतीत्यादिना णमुल्—तत्र व्याप्यमानत्वामेव्यामानत्वयोः समासेनैव गम्यमानत्वात् (नित्यवीप्सयोरिति) द्विर्वचनं (न) क्रियते—(तृतीयाप्रभृतीनि अन्यतरस्यामिति समासस्य वैकल्पिकत्वेन समा सा भा वपक्षे तु) व्याप्यमानत्वे विवक्षिते द्रव्यस्य द्विर्वचनम्—आनेव्यमानत्वस्य विवक्षितत्वे क्रियायाः द्विर्वचनं (भवति)—(विशिपतीत्यादिसूत्रे (३-४-५६) काशिका सिद्धान्तकौमुदी च दृश्यताम्—संपादकस्य) (तं शत्रुम्) बहिरीरयामि बहिर्निष्कासयामि ॥ ५-२६ ॥

(संजीविनी-५-२७) **वसिष्ठमुख्यानिति।** वसिष्ठमुख्यान् वसिष्ठप्रमुखान् वशिनो महर्षीन् धृष्टिमुख्यान्—धृष्टिर्नाम कश्चन अमात्यो दशरथस्य—स मुख्यो येषां ते तथोक्ताः—तान् वृद्धान् अमात्यांश्च संमन्त्र्य तैः सह विचार्य संभाव्य सत्कृत्य हे आर्य इह एतस्मिन्नभिषेकविषये एतत् समस्तं कार्यं समञ्जसं साधु यथा तथा कुर्याम् ॥ ५-२७ ॥

(संजीविनी-५-२८) **करस्थितमिति ।** इह एतस्मिन् विषये करस्थितं राज्यम् अपहाय हस्तगतं राज्यं त्यक्त्वा दरिद्रः सन् गहनं किं गाहितासे किमर्थं काननप्रवेशं करिष्यसि—कः क्षत्रियः वनान्ते वनमध्ये वस्ता स्थाता सन्—वस निवासे इत्यस्मात् तृच् प्रत्ययः—वल्कलं वसिता आच्छादयिता च सन् श्रोत्रियताम् उपेयात् छान्दसत्वं प्राप्नुयात्—न कोऽपीत्यर्थः—वल्कं वसिता इत्यत्र न लोकाव्ययनिष्ठाखलर्थतृनामिति प्रतिषेधात् कर्तृकर्मणोः कृतीति प्राप्ता षष्ठी न भवति ॥ ५-२८ ॥

(संजीविनी-५-२९) **राज्येनेति ।** पुरुषाः राज्येन महान्तम् अर्थं चिन्वन्ति—अत्यधिकं धनं संपादयन्ति—(तेन अर्थेन) धर्मकामौ च तन्वन्ति—धर्मार्थकामेषु संभृतेषु सम्यक् संपादितेषु सत्सु मुक्तिभाजां मुक्तिम् इच्छूनां पुरुषाणां मुक्तिः स्वयं सेत्स्यति—षिधू संराद्धौ इत्यस्मात् लृटि रूपम्—राज्यस्य मुक्तिकारणत्वात् राज्यमेव स्वीकुरु इत्यर्थः ॥ ५-२९ ॥

(संजीविनी-५-३०) **तद् राज्यमूलमिति ।** हे रामभद्र राज्यमूलं राज्यं मूलकारणं यस्य तत् तथोक्तम्—तत् सकलं विहाय पूर्वोक्तधर्मार्थकाममोक्षान् परित्यज्य वृथा दरिद्रास्यसि किमर्थं दुर्गतो भविष्यसि—तथा हि वृद्धाः बाहुजानां क्षत्रियाणां बाहाबलेन—आकारान्तो बाहाशब्दोऽपि विद्यते—बाहुबलेन संजीवनं साधु वदन्ति ॥ ५-३० ॥

(संजीविनी-५-३१) **पिनष्मीति ।** अहं शत्रून् पिनष्मि रिपून् चूर्णयामि—शौर्यं विशिनष्मि विशेषयुक्तं करोमि—शैलान् क्षुणद्मि पर्वतांश्च चूर्णयामि—वेलाः भिनद्मि दारयामि—शक्त्यतिशयेन जगद्विपर्यासं करोमीत्यर्थः—तव फाले ललाटे राज्यपट्टं बध्नामि—त्वम् उत्साहम् उत्सृज्य भीलुको न स्याः भयशीलो न भव—भियः क्रुक्लुकनौ (३-२-१७४) इत्यनेन क्लुकन् प्रत्ययः—पिष्लृ संचूर्णने शिष्लृ विशेषणे भिदिर् विदारणे इति धातवः श्नम् विकरणाः—बध धातुः श्नाविकरणः ॥ ५-३१ ॥

(संजीविनी-५-३२) **उत्साहहीने इति ।** उत्साहपरित्यागे दोष इत्याह—उत्साहेत्यादिना—उत्साहहीने सति धृतिरप्यपैति धैर्यमप्यपयाति—धृतौ गतायां धैर्यापाये

सति श्रीः नोपयाति लक्ष्मीः न प्राप्नोति—अश्रीकं गतलक्ष्मीकं पुरुषम् जनौघः न आश्रयते न सेवते—जनोज्झितः पुरुषः कस्य कदा उपयोग्यः कुत्र स्थित्या उपयोगं व्रजति—न व्रजतीत्यर्थः—तेनाप्युत्साहवता भवितव्यम् इति भावः ॥ ५-३२ ॥

(संजीविनी-५-३३) **न सन्दिहीतेति** । धीरः पुरुषः आप्तजनस्य वाक्ये न सन्दिहीत इष्टजनवचने सन्दिग्धो न भवेत्—आप्तवाक्यं निशम्य जातु न खिन्दीत कदाचिदपि खिन्नो न भवेत्—एतद् वचनं दुष्करं मत्वा मनःपरितापं न प्राप्नुयादिति भावः—खलेन धूर्तेन सह कार्यजातं न विन्दीत न विचारयेत्—स मन्त्रकल्पः क्षणेन भिन्दीत भेदं प्राप्नुयात्—तस्मात् मद्वाक्ये सन्देहो न कार्यः इत्यर्थः ॥ ५-३३ ॥

(संजीविनी-५-३४) **तदेहीति** । तत् तस्माद् एहि आगच्छ—मुनिमन्त्रपूतैः (मुनीनां वेदमन्त्रैः पवित्रितैः) शुद्धैः वार्भिः जलैः—अभिषिच्यस्व अभिषिक्तो भव—मुनिमन्त्रिसाक्षित्वात् (राज्यदानकथनसमये तेषां संनिहितत्वेन साक्षिभावात्) पित्रैव दत्तं दशरथेनैव दत्तम् राज्यं भज स्वीकुरु—अत्रैव आ समुद्रं समुद्रपर्यन्तं क्षिति शाधि पालय—शासु अनुशिष्टावित्यस्मात् लोटि रूपम्—हेर्धिः धि चेति सकारलोपः ॥ ५-३४ ॥

(संजीविनी-५-३५) **श्रुत्वेति** । सत्त्वाधिकस्य अवरजस्य शक्तिसंपन्नस्य अनुजस्य इति पूर्वोक्ता वाचः श्रुत्वा श्रुतधर्मतत्त्वः श्रुतधर्मस्वरूपः रामः—विहस्य करेण चिबुकं धृत्वा ओष्ठाधः प्रदेशं धृत्वा—अधस्ताच्चिबुकमित्यमरः—सान्त्वपूर्वम् उपसान्त्वपूर्वं यथा भवति तथा सौमित्रिम् आभाषत लक्ष्मणम् उवाच ॥ ५-३५ ॥

(संजीविनी-५-३६) **तात त्वमिति** । हे तात त्वम् आप्तोऽसि—मम आप्तोऽसि इष्टोऽसि—मम भक्तोऽसि—जगन्ति भुवनानि विषयीकर्तुं शक्तोऽसि समर्थोऽसि—त्वदग्रजन्मा तव अग्रजो भरतः भवादृक् भवानिव—त्वदादिषु दृशः अनालोचने कञ् च (३-२-६०) इति क्विन् प्रत्ययः—आ सर्वनाम्नः (६-३-९१) इति आकारः (भवच्छब्दस्य) मद्वाक्यकारी च मदनुवर्ती च—मदेकजीवः मम केवलं प्राणस्वरूपः ॥ ५-३६ ॥

(संजीविनी-५-३७) **तातस्येति** । वृद्धस्य जरतः दशरथस्य गिरं निरस्य वाचं तिरस्कृत्य भ्रातुः भरतस्य राज्यं हृत्वा तं दशरथम् इह अस्मिन्नभिषेकविषये बन्धेन निगलबन्धेन यदि रुन्धीमहि तर्हि तस्य दशरथस्य पुत्रकामेष्ट्याः तत् फलं किम् निगलबन्धनं फलं किमु—(तदिदं न युक्तमित्यर्थः) ॥ ५-३७ ॥

(संजीविनी-५-३८) **चिरायेति** । पङ्क्तिरथो दशरथः चिराय पुत्रान् उपलभ्य चिरकालेन पुत्रान् प्राप्य तेभ्यः पुत्रेभ्यः जरायां वार्धके आपदं प्राप (इति) एनाम्

अपकीर्तिम् एवंरूपाम् अपकीर्तिम् अर्कवंश्याः सूर्यवंशजाः वयं कथम् उद्वहामः कथं भरिष्यामः—पित्रे कथं द्रुह्याम द्रोहम् आचरेम—(दुह्याम इति लोटि रूपम्) दशरथाय द्रोहं कुर्याम—क्रुधद्रुहेत्यादिना चतुर्थी ॥ ५-३८ ॥

(संजीविनी-५-३९) **पितैव दैवमिति** । पितैव दैवम् पितृव्यतिरिक्तं दैवं नास्तीत्यर्थः—अतः पितरं भजस्व—सेवस्व—पित्रैव पोष्यस्व—पित्रा पोषणीयो भवेत्यर्थः—पित्रे दशरथाय न च ईर्ष्य ईर्ष्यां मा कुरु—क्रुधद्रुहेत्यादिना चतुर्थी—पितुः जनकाद् बिभीयाः भीतो भवेः—पितुः इत्यत्र भीत्रार्थानामिति अपादानत्वात् पञ्चमी—पितुः दशरथस्य भवतः एधि भवतो भव—अस भुवि इत्यस्मात् लोटि मध्यमपुरुषैकवचनम् (एधि इति) पितरि अभीष्टे संतुष्टे सति पितरोऽपि पूर्वपुरुषा अपि तुष्टा भवन्ति—एतस्मिन् पद्ये सप्त विभक्तयः (पितृशब्दे) उक्ता भवन्ति ॥ ५-३९ ॥

(संजीविनी-५-४०) **पितुः स्त्रिय इति** । सर्वाः पितुः स्त्रियः सर्वा अपि पितृपत्न्यः (अस्माकं) मातर एव—सर्वे द्वैमातुराः भ्रातर एव—मातृतत्संख्यासम्भद्रपूर्वायाः (४-१-११५) इत्यनेन अण् प्रत्ययः मातृशब्दस्य उकारश्च—तत् तस्मात् कारणात् कैकेयी मे स्वयमेव माता जननी—भरतः युवाभ्यामपि विशिष्टः—युवाभ्यामिति पञ्चमी—युवाभ्यमित्यनेन लक्ष्मणशत्रुघ्नौ कथितौ ॥ ५-४० ॥

(संजीविनी-५-४१) **तन्मातरमिति** । तत् तस्मात् कारणात् मातरं कैकेयीं भ्रातरं भरतं च आद्रियस्व मानय—स्थिराज्ञस्य स्थिरशासनस्य राज्ञः दशरथस्य वाक्यं विधेहि कुरु—दशरथो यत् नियुङ्क्ते तत् कुरु इत्यर्थः—चतुर्दशसंवत्सराः देवमाने देवपरिमाणे चतुर्दशाहानि चतुर्दश दिनानि—(तानि च) कियान् अनेहा कियान् कालः—सोढुं शक्य एवेति भावः—कालो दिष्टोऽप्यनेहापीत्यमरः ॥ ५-४१ ॥

(संजीविनी-५-४२) **तीर्णप्रतिज्ञे इति** । तीर्णप्रतिज्ञे निस्तीर्णप्रतिज्ञे—चतुर्दशसंवत्सरपर्यन्तं वनवासं कृतवतीत्यर्थः—अत एव पूर्णकामे संपूर्णकामे वनात् निवृत्ते मयि वसुधां निधत्तम् भूमिं दत्तम् (युवामित्यर्थः)—तावत्पर्यन्तं गुणाढ्यो भरतः राजा अस्तु—त्वं च वीरभोज्यं शूरेण भोक्तव्यं यौवराज्यं भज युवराजत्वं स्वीकुरु—युवा चासौ राजा च युवराजः—तस्य भावः यौवराज्यम्—शूरः त्वमपि यौवराज्यं स्वीकुरु इत्यर्थः ॥ ५-४२ ॥

(संजीविनी ५-४३) **मदाज्ञयेति** । हे लक्ष्मण मदाज्ञया मन्नियोगेन तातराज्ये दशरथराज्ये ज्येष्ठं कैकयेयम् भरतम्—स्त्रीभ्यो ढक् इति ढक् प्रत्ययः—प्रतिष्ठापय

स्थापय—आर्तं वृद्धं तातम् समाश्वासय—दुःखितं दशरथं समाश्वासय—भग्नपक्षाम् अम्बां कौसल्यां च संबोधय ॥ ५-४३ ॥

(संजीविनी-५-४४) **श्वश्रूषु इति** । श्वश्रूषु सक्ता श्वशुरस्य भक्ता इयं मैथिली सीता शुश्रूषुः शुश्रूषां कर्तुमिच्छन्ती इहैव आस्ताम् इह अयोध्यायामेव तिष्ठतु मदपायभीताम् मद्वियोगेन त्रस्ताम् बालाम् अनाथाम् सीतां च सुमित्रां च समं यथा तथा मनुष्व अवगच्छ—श्रिञ् सेवायामित्यस्मात् सनि उप्रत्यये च शुश्रूषुरिति रूपम् ॥ ५-४४ ॥

(संजीविनी-५-४५) **श्रुत्वेति** । इति पूर्वोक्तानि वचनानि श्रुत्वा रोषस्फुरिताधरोष्ठी रोषेण कम्पमानाधरोष्ठी सती पादतलेन भूतलं हत्वा ताडयित्वा साश्रुः अश्रुभिः समेता सकम्पा कम्पमहिता रुदती हसन्ती च सती सीता सगद्गदं यथा तथा रामं वक्ष्यमाणप्रकारेण उवाच जगाद—कोपयुक्तानां पूर्वोक्तानि लक्षणानि विद्यन्ते ॥ ५-४५ ॥

(संजीविनी-५-४६) **मैवं भणीरिति** । हे राम मैवं भणीः एवं न ब्रूहि त्वं गुणी प्रशस्तगुणः श्रुतः विख्यातः—वित्तविज्ञातविश्रुताः इत्यमरः—अत एव फणीव सर्प इव मुखेन विषं मा मुञ्च न त्यज कथं मां लक्ष्मणं च इहैव तिष्ठतम् इति वक्तुं ते जिह्वा कथं न जिह्रेति न लज्जते—मा च लक्ष्मण च प्रति इहैव तिष्ठतमिति वचनमेव विषमोचनतुल्यम् ॥ ५-४६ ॥

(संजीविनी-५-४७) **तुभ्यं ददन्मामिति** । भवचापभङ्गकर्त्रे ईश्वरचापभञ्जकाय तुभ्यं मां ददत् मां ददानः सन्—नाभ्यस्तात् शतुरिति निषेधात् जुगभावः—सीरकेतुर्जनकः बालां शिशुम् अनाथां च सीतां देव्रे देवराय समर्प्य दत्त्वा—स्वामिनो देवृदेवरौ इत्यमरः—जटी च जटावांश्च चीरी च गन् वनं व्रजेति आभाषत किम् ॥ ५-४७ ॥

(संजीविनी५-४८) **रामायणानीति** । इह पुरातनानि रामायणानि (चिरन्तनरामाख्यानानि) पुरातनेभ्यः बहुधा श्रुतानि—किंतु रामः वैदेहसुतां विहाय वैदेहसुताविहीनः सन् वनं यात. इति न क्वापि मे श्रुतम् कुत्रापि मया न श्रुतम्—तृतीयार्थे षष्ठी ॥ ५-४८ ॥

(संजीविनी-५-४९) **रामो विना लक्ष्मणमिति** । लक्ष्मणं विना एक एव वनं चचारेति वनं जगामेति वचोऽपि दूरे—एतद् वचनं दूरापास्तमिति भावः—अत्र अयोध्यायां मां सौमित्रिं च उभौ जिहासन् त्यक्तुमिच्छन् एकस्त्वम् शून्यमरण्यं जनवर्जितं वनं प्रति जिहासमे गन्तुमिच्छसि—ओ हाक् त्यागे ओ हाङ् गतौ इति धातुभ्यां सन्नन्ते

रूपे—पूर्वधातोर्नियतपरस्मैपदित्वात् शतृप्रत्ययः—अपरधातोस्तु नियतात्मनेपदित्वात् आत्मनेपदम् ॥ ५-४९ ॥

(संजीविनी-५-५०) **अहं च सौमित्रिरपीति।** त्वदाप्तौ तव इष्टौ सस्नेहबन्धौ—स्नेह एव बन्धो बन्धनम्—तेन सह वर्तेते इति तथोक्तौ—अहं च सौमित्रिरपि लक्ष्मणोऽपि त्वां न जहिवः न त्यजावः—कथमिव मूर्तिमन्तौ विद्याविवेकाविव-पुनः कथमिव—प्रभाप्रसादौ कान्तिप्रसादौ पूर्णचन्द्रमिव ॥ ५-५० ॥

(संजीविनी-५-५१) **मां नानुजानासीति।** हे राघव मां वनाय गन्तुम् नानुजानासि नानुमन्यसे—अत एव एष जीवः नाथं त्वाम् अन्वेष्यति अनुगमिष्यति—यद् वा विषेण वा यद्वा अनशनेन अनशनादिदीक्षया वा अथवा रज्ज्वा पाशेन वा वर्म जह्याम् शरीरं त्यजेयम्—शरीरं वर्म विग्रह इत्यमरः ॥ ४-५१ ॥

(संजीविनी-५-५२) **याते त्वयीति।** त्वयि वनाय याते सति इतः परं श्वशुरो म्रियेत—मृतो भवेत्—श्वश्रूः मृता भवेत्—अद्य इयमहं मुमूर्षुः मरणम् इच्छुः—मृङ् प्राणत्यागे इत्यस्मात् सन्नन्ताद् उप्रत्यये रूपम्—अध्ययोध्यम् अयोध्यायाम् नगरे लक्ष्मणश्च न स्थास्यति—कैकेयेयः भरतस्तु क्वचिद् वनं यास्यति गमिष्यति ॥ ५-५२ ॥

(संजीविनी-५-५३) **इत्थं कुले इति।** इत्थम् उक्तप्रकारेण कुले नश्यति सति पश्यतस्ते अन्तःकरणे का प्रीतिर्भविवी—ते चित्ते को वा सन्तोषो भवेत्—रघूणां जनने कुले—सन्ततिर्गोत्रजननकुलानीत्यमरः—विच्छिन्नतन्तौ विच्छिन्नपारम्पर्ये त्वमेव पिण्डोदकनोदकः स्याः एतेषां पिण्डोदकदायकः त्वमेव भ्याः ॥ ५-५३ ॥

(संजीविनी-५-५४) **अहं कलत्रमिति।** तव कलत्रम् अहं सुखदुःखमित्रम् सुखदुःखयोर्मित्रम्—आपदि लक्ष्मणश्च संरक्षकः—आवाम् उभौ अटवी नयेथाश्चेत् तर्हि नः अस्माकं सर्वमिदं समञ्जसं साधु भवेत् ॥ ५-५४ ॥

(संजीविनी-५-५५) **उभौ चेति।** दिव्यास्त्रधरौ दिव्यायुधधरौ च युवानौ रक्षोहणौ राक्षसहन्तारौ उभौ (युवाम्) माम् अवतम् रक्षतम्—क्रूरमृगेभ्यस्त्वां रक्षितुं कथं शक्यमिति चेत् तत्राह—आजौ युद्धे मारीचमुख्यान् मारीचप्रमुखान् अवधिष्टम् हतवन्तौ—हन हिंसागत्योरित्यस्मात् लुङि मध्यमपुरुषद्विवचने रूपम्—लुङि चेति हन्तेर्वधादेशः—अरण्यहिंस्राः वने क्रूरमृगाः तेभ्योऽपि मारीचादिभ्योऽपि तीव्राः किम् क्रूराः किम्—क्रूरा न भवन्तीत्यर्थः ॥ ५-५५ ॥

(संजीविनी-५-५६) **शृङ्गारशय्यापीति।** हे रामभद्र शृङ्गारशय्यापि क्रीडाशय्यापि भवन्तं विना—पृथग्विनेत्यादिना द्वितीया—मम अङ्गारशय्या स्यात्—

अङ्गारशय्यापि त्वया सह चेत् सा मम कुसुमास्तृता पुष्पैर्विरचिता शृङ्गारशय्या भवेत् ॥ ५-५६ ॥

(संजीविनी-५-५७) **मूलं फलं वेति ।** वनवासे सुखानुभवो नास्तीति चेत् तत्राह मूलमित्यादिना—हे रामचन्द्र मूलं फलं वा मम दिव्यमन्नम् दिव्यान्नम्—भूमिः शिला वा मम पुष्पशय्या—पुष्पास्तृतशय्या—वृक्षस्य मूल मणिसौधशालम् माणिक्यविरचितराजगृहम्—विभाषा सेनेत्यादिना (२-४-२५) शालान्तस्य तत्पुरुषस्य नपुंसकत्वम् —अत एव तव साह्यं त्वत्संबन्धि सहभावः मे मम स्वर्गसुखादपि सुखम् ॥ ५-५७ ॥

(संजीविनी-५-५८) **तद् रामभद्रेति ।** हे राम तद् तस्मात् कारणात् भद्रासने सिंहासेन वाच्छया अलम्—निर्याहि निर्गच्छ—तावत् प्रथमं निजगृहं यामः स्वगृहं गच्छामः—किमर्थम् इति चेदाह—तत्र गृहे स्थितम् वस्तुरूपं समस्तं धनं पात्रे प्रदाय सत्पात्रे निक्षिप्य दावं वनं प्रविशाम ॥ ५-५८ ॥

(संजीविनी-५-५९) **बाला न जानामीति ।** बाला अहम् उपचारवाचो न जानामि उपचारवचनानि न वेद्मि—किं तु ते पुरः तव पुरस्ताद् यथार्थमेव अभणिषम् अवादिषम्—हे राम यद् रोचते ते तुभ्यं यत् कार्यं रोचते तद् विचार्य कुरु—तावकीना त्वत्संबन्धिनीं प्रसूम् जनयित्रीम् तावत् प्रथमम् बोधय आश्वासय—तावकीनामित्यत्र तवकममकौ एकवचने (४-३-३) इति तवकादेशः (युष्मच्छब्दस्य) खञि प्रत्यये—खञः ईनादेशश्च—जनयित्री प्रसूर्मातेत्यमरः ॥ ५-५९ ॥

(संजीविनी-५-६०) **श्रुत्वेति मन्दमिति ।** इति पूर्वोक्तवचनानि श्रुत्वा मन्दं यथा तथा विहस्य रामः तथा इति सीतागिरं सीतावचनम् ओम् अकार्षीत् अङ्गीचकार—ओम् इत्यङ्गीकारे—करोतेर्लङ्—मूर्छागताम् अम्बां संबोधयन् आश्वासयन् साश्रुः सबाष्पः सन् गद्गदरुद्धकण्ठः गद्गदेन रुद्धकण्ठः सन् वक्ष्यमाणप्रकारेण अवोचत्—वच परिभाषणे इत्यस्मात् लुङि रूपम्—अस्यतिवक्तिख्यातिभ्यः अङ् इति च्लेरङादेशः ॥ ५-६० ॥

(संजीविनी-५-६१) **समाश्वसिहीति ।** हे अम्ब समाश्वसिहि—रुदादिभ्यः सार्वधातुके इति इडागमः—दश चतस्रोऽपि समाः चतुर्दश वत्सरान्—कालाध्वनोरिति द्वितीया—तावत्कालम् मां तनूजं न जानीहि मां पुत्रं नावगच्छ—तदनन्तरं लक्ष्मणेन सह कान्तारतः प्राप्य वनाद् आगत्य कान्तारतः सीतायामनुरक्तः सन् राज्यं करवाणि कुर्याम् ॥ ५-६१ ॥

(संजीविनी-५-६२) **तावत्सुमित्रासहितेति ।** तावत्पर्यन्तं सुमित्रासहिता सती कथंचित् केनापि प्रकारेण वृद्धम् आर्तम् तातं समाश्वासय—मत्तः—अस्मच्छब्दात् तसिल्

प्रत्यये रूपम्—भरतः तव अतिभक्तः प्रियः—राज्यलक्ष्म्या मत्तः सन् त्वां न अवमनिष्यते त्वां न तिरस्करिष्यति ।। ५-६२ ।।

(संजीविनी-५-६३) **साकर्ण्येति** । सा कौसल्या कर्णामृतं कर्णयोरमृतरूपम् आत्मजस्य पुत्रस्य वाक्यम् आकर्ण्य श्रुत्वा सरोमाञ्चं सरोमहर्षं यथा तथा अपास्तमूर्छा उन्मीलिताक्षी जागरणारुणाक्षं तं पुत्रं रामम् परिरभ्य आलिङ्ग्य वक्ष्यमाणप्रकारेण जगाद ।। ५-६३ ।।

(संजीविनी-५-६४) **हा वत्स मामिति** । हा वत्स मां त्यक्ष्यसि—ते नोचितम्—तव उचितं न भवति—हा राम विषादः क्लेशः हृदयं भिन्ते विदारयति—दशरथादपि क्लेशातिये कारणमाह वृद्धस्य तव पितुः अन्ये भरतादयः त्रयः पुत्राः सन्ति—मम तु त्वदृते अन्यः को वा अस्ति—कोऽपि नास्तीत्यर्थः ।। ५-६४ ।।

(संजीविनी-५-६५) **आराध्येति** । वैभाण्डकिम् विभाण्डकपुत्रम्—अत इञ् इति इञ् प्रत्यये रूपम्—ऋष्यशृङ्गम् आराध्य संपूज्य पुरुषोत्तमं त्वां पुत्रं प्रासोषि—प्रसूतवती—षूङ् प्राणिगर्भविमोचने इत्यस्मात् लुङि आत्मनेपदे उत्तमपुरुषैकवचने रूपम्—त्वयि वनं काननं प्रयाते सति वृद्धयोर्नौ वृद्धयोरावयोः दुरापं कृच्छ्रेण आप्तुं शक्यम् निवापं जलाञ्जलिम् को वा कुरुते—कोऽपि न कुर्यादित्यर्थः ।। ५-६५ ।।

(संजीविनी-५-६६) **हा राम वत्सेति** । हा राम हा वत्सेति कं पुत्रम् अहम् आह्वयेयम्—कः सुतः माम् अम्ब इति आह्वास्यति—हे तात रामे त्वयि गेहात् निर्याति सति मे अमवः देहात् पुरा निर्यान्ति निर्गमिष्यन्ति—यावत्पुरानिपातयोर्लट् इत्यनेन पुराशब्दयोगे भविष्यदर्थे लट् ।। ५-६६ ।।

(संजीविनी-५-६७) **नाजायथाः इति** । हे राम क्वापि नरेन्द्रगेहे कस्मिंश्चिद् अन्यत्र राजगृहे (न अजायथाः न जातोऽसि—अन्यथा यदि अन्यत्र जातः स्याः तर्हि) राजा राजवत् स्वगेहे वसेः—केकयी च नरनाथजाया दशरथपत्नी न भवेत् तर्हि वृद्धौ पितरौ आशु न हि जह्याः न त्यजेः ।। ५-६७ ।।

(संजीविनी-५-६८) **मूलं फलं वेति** । हे राम तरुजं वृक्षसंभूतं मूलं फलं वा तव अन्धः अन्नम्—भिस्सा स्त्री भक्तम् अन्धोऽन्नमित्यमरः—पानाय नानागिरिनिर्झराम्भः नानागिरिनिर्झरोदकम्—दूर्वाशबला (दूर्वाकर्बुरा) भूर्वा भूमिरेव तव शय्या—हे राम मम उदरं कथं न दग्धम् कथं दग्धं न भवति ।। ५-६८ ।।

(संजीविनी-५-६९) **चीनाम्बरमिति।** हे राम वत्स चीनाम्बरं चित्रपटांश्च हित्वा त्यक्त्वा चीराम्बरं कथं वसीथाः वल्कलं कथम् आच्छादयेः (स्वःकुसुमप्रमोदैः सुगन्धिना सुरभिणा तव मूर्ध्ना जटाः कथं वा दधीथाः) ॥ ५-६९ ॥

(संजीविनी-५-७०) **त्वं तालवृन्तेति।** हे तात तालवृन्तानिलवीजनार्हः व्यजनवातस्य वीजनार्हः त्वं हिन्तालवनान्तरेषु हिन्तालास्तालविशेषाः—तेषां वनान्तरेषु वनमध्येषु झञ्झानिलवीज्यमानः तीक्ष्णवायुना वीज्यमानः सन् सीतासहितः शीतासु शिलासु शिलातलेषु कथं शयीथाः कथं स्वप्याः ॥ ५-७० ॥

(संजीविनी-५-७१) **वृद्धाः प्रद्धानिति।** वृद्धाः तव पूर्वे प्रबुद्धान् नीतिसंपन्नान् यूनः स्वसूनून् राज्ये अभिषिच्य वनम् आश्रयन्ते (इति स्थितिः)—त्वं तु जराविहीनः जराविरहितः सन्नपि जरतां वृद्धानां रघूणां पथा वनरूपेण मार्गेण कथं संचरेथाः—(तत्र कथं संचरेः—ममस्तृतीयायुक्तादित्यनेन आत्मनेपदम्) ॥ ५-७१ ॥

(संजीविनी-५-७२) **भवद्वियोगं न सहे इति।** हे कुमार भवद्वियोगं न सहे—तानि अरण्यानि पुण्यानि यानि त्वं पुनासि पावनानि करोषि—हे तात त्वं तत्र अरण्येषु मां नेतुम् अर्हसि—हे वत्स त्वत्सन्निधौ त्वत्समीपे मम वास्तु अस्तु मम निवासः अस्तु—वेश्मभूर्वास्तुरस्त्रियामित्यमरः ॥ ५-७२ ॥

(संजीविनी-५-७३) **वात्सल्यतो वत्सेति।** हे वत्स वात्सल्यतः स्नेहात् इत्थं वदेयम् एवं ब्रूयाम्—परमार्थतस्तु त्वत्साहचर्यं न सिद्ध्यति—तत् कथम्—राज्ञि राजनि स्थिरासौ जीवति सति यदि वा परासौ मृते सत्यपि अन्यत्र यानम् अन्यत्र गमनं तदसन्निधानं तस्य राज्ञः सन्निधौ अनवस्थितिश्च राजावरोधस्य अन्तःपुरयोषितः न संभवेताम् ॥ ५-७३ ॥

(संजीविनी-५-७४) **तद् याहि दावमिति।** तत् तस्मात् कारणात् दावं याहि वनं प्रति गच्छ—हि यस्मात् कारणात् राज्ञाप्यविलङ्घिताज्ञा दशरथेनापि अविलङ्घिताज्ञा तरुणी युवती सपत्नी कैकेयी हृद्या दशरथस्य हृदयंगमा—अत एव हे राम कामातुरे कामार्ते राजनि दशरथे कार्यहीने सति धर्मार्थयोः का गतिरस्ति धर्मार्थयोर्गतिर्नास्तीत्यर्थः—कामेन बाधितत्वात् ॥ ५-७४ ॥

(संजीविनी-५-७५) **अद्रौ वनद्रौ इति।** अद्रौ पर्वते वनद्रौ वनवृक्षे च—उभयत्र जातावेकवचनम्—प्रमादो यथा न भवति तथा अप्रमत्तौ युवां तिष्ठतम्—हे वत्स सीता वनेत्सुका वनदर्शने उत्सुका सती भवत्समीपम् उत्सृज्य इतरत्र मा वात्सीत् अन्यत्र न

वसेत्—वस निवासे इत्यस्मात् लुङि रूपम्—न माङ्योगे इति निषेधाद् अडागमाभावः ॥ ५-७५ ॥

(संजीविनी-५-७६) **सौमित्रिरग्रे इति ।** सौमित्रिः लक्ष्मणः अग्रे अग्रभागे सधनुः प्रयातु—धनुषा सहितः गच्छतु—मैथिलराजपुत्री सीता च सीता तु—वस्त्वर्थे—वां मध्ये युवयोर्मध्ये प्रयातु—पृथ्वीतनूजां सीतां पुरतो निधाय भवत्पुरस्तादेव निक्षिप्य भवान् धन्वी सन् तौ सीतालक्ष्मणौ पृष्ठतः रक्षतु—पश्चाद्भागे स्थित्वा अवतु इत्यर्थः ॥ ५-७६ ॥

(संजीविनी-५-७७) **त्वमेव शय्यासनेति ।** हे राघव त्वमेव शय्यासनभोजनाद्यैः अन्तिके समीपे राजपुत्रीं सीताम् रक्ष—असौ लक्ष्मणः अधिज्यधन्वा सन् अनतिदूरवर्ती समीपे वर्तमानः सन् युवाम् उभौ रक्षतु ॥ ५-७७ ॥

(संजीविनी-५-७८) **उत्साम्बु इति ।** हे वत्सौ उत्साम्बु निर्झरोदकम्—उत्सः प्रस्रवणं वारि प्रवाहो निर्झरो झरः इत्यमरः—भूयः न पिबतम् अत्यर्थम् न पिबतम्—अपक्वं कन्दमूलफलादिकम् न खादतम् न भक्षयतम्—गुल्मानि लतागृहाणि वल्मीकवपाः वल्मीकरन्ध्राणि च हित्वा परित्यज्य अद्रौ पर्वते अधिपर्णशय्यम् पर्णविरचितशयने निद्रातम् शयीथाथाम् ॥ ५-७८ ॥

(संजीविनी-५-७९) **शार्दूलेति ।** सगण्डकाः [1]गण्डकमृगसमेताः दण्डकभूमिभागाः दण्डकारण्यभूप्रदेशाः शार्दूलसंघैः व्याघ्रसमूहैः शरभैः शरभमृगैश्च सिंहैश्च लुलायभल्लूकमुखैः महिषऋक्षप्रमुखैः मृगौघैः मृगसंघैः भेरुण्डैः भारुण्डपक्षिविशेषैश्च भीमाः भयंकराः—भवन्तीति शेषः ॥ ५-७९ ॥

(संजीविनी-५-८०) **सरंहस इति ।** हे राम सरंहसः सवेगान् सिंहसंघान् भल्लेषुणा भल्लास्त्रेण (संहर जहि) भल्लूकम् भल्लुकम् उल्लुनीहि छिन्धि—लुलायबृन्दानि महिषकदम्बकानि बाणैः लुनीष्व—दुष्टसत्त्वान् [2]दूरादपि दूरादेव धुनीष्व (निःसारय) ॥ ५-८० ॥

संजीविनी-५-८१) **मा संचरोऽभूदिति ।** हे वत्स त्रस्नोः भीरोः—त्रसिगृधिधृषिक्षिपेः क्नुः (३-२ १८०) इत्यनेन नाच्छील्ये क्नुः प्रत्ययः—नः अस्माकं स्नुषायाः सीतायाः अहार्यस्नुषु अहार्याणां पर्वतानां स्नुषु सानुषु संचरो मा भूत्—आहार्यधरपर्वताः इति स्नुः प्रस्थः सानुरस्त्रियामिति च अमरः—वासोऽपि मास्तु—(त्वं) स्थिरायुर्भूयाः—भुवनं प्रशाधि पालय—शासु अनुशिष्टौ इत्यस्मात् लोटि मध्यमपुरु-

षैकवचनम्—हेर्धिः—धि च इति सकारलोपः—प्रयाहि गच्छ (इति उक्त्वा) रामम् उत्ससर्ज विसृष्टवती ।। ४-८१ ।।

(संजीविनी-५-८२) **तथोपदिष्टश्चेति ।** कौसल्यया तथा पूर्वोक्ताप्रकारेण उपदिष्टः सन् रामः सीताममेतः लक्ष्मणेन सह मनोरथेनेव स्थितेन रथेन साधनभूतेन स्वधाम स्वगृहं प्रति द्रुतं शीघ्रम् आजगाम आययौ ।। ५-८२ ।।

(संजीविनी-५-८३) **तत्रापीति ।** तत्र गृहे सौमित्रेर्लक्ष्मणस्य सीतायाश्च सखा राघवो रामः राशीकृतं समूहीकृतं सकलं समस्तं रायं धनम्—धेनवश्च अनड्वाहश्च धेन्वनुहम्—तत् तथा अजाविकम् अजाविरूपम् जीवधनं च दासीश्च द्विजसाद् विधाय ब्राह्मणाधीनं कृत्वा—तदधीनवचने इति सातिप्रत्ययः—अर्थिभ्यश्च यथेष्टवस्तु यथेष्टधनं वितरन् ददत् विस्मयमानया जनतया जनसमूहेन—ग्रामजनेत्यादिन समूहार्थे तल् प्रत्ययः—अधिकम् अस्तूयत स्तूयते स्म ।। ५-८३ ।।

(संजीविनी-५-८४) **आरुन्धतेयमिति ।** स रामः हेमासनैः सुवर्णमयासनैः हेममयैः सुवर्णमयैः मञ्चैः—अमत्रैः पात्रैः भाजनपात्रैः घटैः कलशैश्च कटाहैश्च सह भूषाः भूषणानि आरुन्धतेयम् अरुन्धतीपुत्रम् वसिष्ठसूनं सुयज्ञं तन्नामकम् अभ्यर्च्य पूजयित्वा तस्मै ददौ दत्तवान् ।। ५-८४ ।।

(संजीविनी-५-८५) **उद्घाट्येति ।** अनर्घ्याणि अमूल्यानि रत्नानि यासु ताः तथोक्ताः ताः—जनकगृहादानीताः रत्नपेटीः उद्घाट्य व्यादाय स्वयमेव अपनीय प्रमद-विकस्वरायताक्षी प्रमदेन सन्तोषेण विकस्वरे विकसिते आयते अक्षिणी यस्याः सा वैदेही सीता सुयज्ञधर्मपत्न्यै सुयज्ञस्य भार्यायै स्वाकल्पान् स्वभूषणानि अदित ददौ—दाण् इत्यस्मात् लुङि रूपम्—स्थाघ्वोरिच्च इति इकारः—ह्रस्वादङ्गादिति सिचो लुक् ।। ५-८५ ।।

(संजीविनी-५-८६) **चूडारत्नमिति ।** सर्वाङ्गीणाभरणवसना सर्वाणि अङ्गानि व्याप्नुवन्ति इति सर्वाङ्गीणानि—तत् सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति (५-२-७) इत्यनेन तद् व्याप्नोतीत्यर्थे खः प्रत्ययः—आयनादिसूत्रेण ईनादेशः—आभरणानि च वसनानि च आभरणवसनानि—सर्वाङ्गीणानि आभरणवसनानि यस्याः सा तथोक्ता—मैथिली सीता चूडारत्नं शिरोरत्नं मङ्गलार्थं शिरसि दधती—वस्त्रयुग्मं गृहीत्वा वस्त्र-युगलम् आदाय मधुभिदः पुरुषोत्तमस्य सन्निधौ साक्षात् लक्ष्मीरिव प्रत्यक्षलक्ष्मीरिव तस्य रामस्य सन्निधौ तिष्ठन्ती वल्गुवाक्या मनोज्ञवचना सती उत्तिष्ठ इति वल्लभं प्रियं रामं द्रुतं शीघ्रं बभाषे ।। ५-८६ ।।

(संजीविनी-५-८७) **निरदिक्षादिति।** जननाथनन्दनः रामः कुलागतान् कतिचित् कञ्चुकिनः कतिचन सौविदल्लान् अगाररक्षिणः निरदिक्षत् अन्तःपुररक्षकान् निर्दिष्टवान्——अन्तःपुररक्षणे नियुक्तवानित्यर्थः——जरतीः वृद्धाः चेटिकाः दासीः गृहसंस्कारकरीः गृहसंमार्जनादिकर्मकर्त्रीः निरदिक्षत्——तत्र कर्मणि नियुक्तवान् इत्यर्थः ॥ ५-८७ ॥

(संजीविनी-५-८८) **इयदन्तर एवेति।** इयदन्तर एव तस्मिन्नवसरे एव केकयी कैकेयी साग्रहा (अभिनिवेशवती) प्रतिघेन कोपेन——कोपक्रोधामर्षप्रतिघेत्यादिरमरः——तरुवल्कधरं रघूद्वहं त्वरितं निर्गमय शीघ्रं वनाय निर्यापय इति (उक्त्वा) मन्थरां प्रजिघाय प्राहिणोत् ॥ ५-८८ ॥

(संजीविनी-५-८९) **केकयीप्रहितेति।** रघुराजनन्दनः रामः केकयीप्रहितचीवरे एव तत्प्रहितवल्कले एव अम्बरे वसने यस्य स तथोक्तः लक्ष्मणं च वल्कलं परिधाप्य आच्छादितवल्कलं कृत्वा हसन् प्रहसन् आयुधानि उपनयेति तं लक्ष्मणम् आदिदेश आदिष्टवान् ॥ ५-८९ ॥

(संजीविनी-५-९०) **लक्ष्मणोऽपीति।** सिंहविक्रमः मृगेन्द्रगमनः लक्ष्मणोऽपि लघुक्षिप्रम् कोशगुप्तं कोशरक्षितम् असियुग्मम् आनयत् करवालद्वयम् आनीतवान्——धन्वनी चापौ च शरधी तूणीरौ च आनयत्——तथा चर्मणी फलके——भृतरत्नभर्मणी कलितरत्नशातकुम्भे वर्मणी कवचे च आनयत्——तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् इत्यमरः——खेटकं फलकं चर्म इति हलायुधः ॥ ५-९० ॥

(संजीविनी-५-९१) **पद्भ्यामिति।** पुरः अयोध्यापुरतः पद्भ्यामेव निर्जिगमिषतां निर्गन्तुम् इच्छताम् त्रयाणां सीतारामलक्ष्मणानाम् आभागीरथि भागीरथीपर्यन्तं रथस्य सारथिः (त्वं) भव इति नरपतिना दशरथेन आदिष्टः नियुक्तः सन् सुमन्त्रः रथाधिरोही रथमारूढः सन् वैदेहीरमणं रामम् अतत्वरत् त्वरयामास——त्वरतेः ण्यन्तात् लुङि चङि रूपम् ॥ ५-९१ ॥

(संजीविनी-५-९२) **रामप्रयाणसमये इति।** रामप्रयाणसमये रामस्य वनवासार्थं प्रयाणसमये रघुराजधान्याम् अयोध्यायाम् जनौघः जनसमूहः प्राणप्रयाणसमयाभिमुखः प्राणत्यागसमयाभिमुखः सन् रामेति राजतनयेति रघूद्वहेति मुहुर्मुहुः क्रोशन् पुनः पुनः रुदन् असह्यशोकः सन् चिरम् अमुह्यत् मुमूर्छ ॥ ५-९२ ॥

(संजीविनी-५-९३) **लक्ष्मीनारायणाभ्यां नम इति।** लक्ष्मीनारायणाभ्यां नमः इति कथनपूर्वकं शिरसि मूर्धनि न्यस्तहस्तारविन्दे निक्षिप्तपाणिपद्मे इन्दुमौलेः वन्दारौ

ईश्वरस्य अभिवादके दशरथचरणध्यानशुद्धान्तरङ्गे दशरथचरणयोः ध्यानेन शुद्धान्तः-करणे रामे पुरतः वामेतराङ्घ्रि निदधति सति सशोको राजलोकः जीवलोकः प्राणि-समूहश्च आलोकं न अलभत दर्शनं न प्राप्नोति स्म—केवलं देवलोकः देवजनः एव मुमुदे जहर्ष—रामो वनाय गत्वा रावणादिराक्षसान् हनिष्यतीति ।। ५-९३ ।।

(संजीविनी-५-९४) **बाष्पवर्षमिति ।** नरलोके बाष्पवर्षम् अपतत् पपात—सुरलोके पुष्पवर्षम् अगलत् सुरलोके पुष्पवृष्टिः पपात—शोके सति बन्धुभिः मुखम् अताड्यत अहन्यत—नाके स्वर्गलोके दुन्दुभिः अताड्यत—स्वर्गलोके देवाः दुन्दुभि ताडयामासुरित्यर्थः ।। ५-९४ ।।

(संजीविनी-५-९५) **पौर इति ।** पौरः अयोध्यासंभवो जनः जानपदः जनपदाद् आगतो जनश्च रामविरही रामेण वियुक्तः सन् समन्तात् खिन्नाम् क्लिश्नातु—किं तु रामः रावणदत्तदारविरहः रावणेन दत्तदारविरहः सन् क्रोधेन संगस्यते क्रोधसंयुक्तो भविष्यति—समो गमीत्यादिना आत्मनेपदम्—क्रुद्धो दाशरथिः कुपितो रामः सधन्व-शरधिः चापनिषङ्गसमेतः सन् रावणं रणे युद्धे हन्ता हनिष्यति—तत्कारागृहमुक्त-दारसंमिलिताः तस्य रावणस्य कारागृहाद् विमुक्तैः दारैः मिलिताः संगताः वयं स्याम भवाम इति सुराः अहृष्यन् जहर्षुः—हृष हृष्टौ इति धातोर्दैवादिकात् लङि रूपम् ।। ५-९५ ।।

(संजीविनी-५-९६) **प्रागारुह्येति ।** सुमन्त्रसचिवः सुमन्त्रसंज्ञकः अमात्यः प्राग् रथम् आरुह्य रामं रथम् आरोपयत्—रामेणापि करावलम्बनकृता कृतकरावष्टम्भना सीता अन्तिकं नीता समीपं प्रापिता—तां रथमारोपयदित्यर्थः—अथ अनन्तरं यन्तुः सारथेः सुमन्त्रस्य अग्रे अग्रभागे उपविश्य कुतुकी कुतूहलवान् वल्गाधरः रश्मिधरः वल्गतः वल्गनं कुर्वतः तुरगान् प्रगृह्य अश्वान् निगृह्य करे प्रतोदं बिभ्रत् सौमित्रिः लक्ष्मणः निरगात् अयोध्यायाः निर्ययौ ।। ।। ५-९६ ।।

(संजीविनी-५-९७) **राघव इति ।** अथ अनन्तरं राघवः रामः जनतया जनस-मूहेन ववन्दे नतोऽभूत्—पुरजनो रामं प्रणनामेत्यर्थः—राघवेण च जनता जनसमूहः अभिननन्दे अभिनन्दिता अभूत्—प्रणतं पुरजनं दृष्ट्वा रामस्तुतोषेत्यर्थः—जानकी जनबृन्दे जनसमूहे दृशम् अदात् न्यधत्त—कैकेयी च त्रिभुवनेन निनिन्दे निन्दिता अभूत् ।। ५-९७ ।।

(संजीविनी-५-९८) **कनकरथमिति ।** कनकरथं स्वर्णरथम् आरूढः सन् बाढ-प्रसादपरिष्कृतः अधिकप्रसादेन अलंकृतः नवजलधरश्यामः नीलमेघवत् श्यामवर्णः

राघवः पितुर्गृहान् दशरथस्य निकेतनानि ननाम नमति स्म—जनता जनसमूहः रघुनन्दनं रामम् आनमन्ती अभिवादयमाना सती शरदि शरत्काले सवितुः सूर्यस्य मध्ये चकासतं भान्तं साक्षात् नारायणम् अमत प्रत्यक्षं नारायणम् अबुद्ध—मनु अवबोधने इत्यस्मात् लुङि अमत इति रूपम्—तथा चोक्तमपि—

ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ।। इति ।

।। ५-९८ ।।

(संजीविनी-५-९९) **श्वश्रूभिरिति** । अश्रूणि बाष्पं विमुञ्चतीभिः श्वश्रूभिः सीता आरूढरथा इति रथम् आरूढा इति अश्रूयत शुश्रुवे—सीता रथारोहणं चकार इति श्रुत्वा बाष्पं मुमुचुः इत्यर्थः—राजा दशरथः रामं च रथिनं शुश्राव—अस्रं बाष्पं सुस्राव व्यगलत्—रामो रथाधिरोहणं कृतवान् इति श्रुत्वा दशरथो बाष्पं मुमोच इत्यर्थः—देव्यः पत्न्यश्च रुरुदुः—दुःखितं दशरथं दृष्ट्वा पत्न्यश्च रुरुदुरित्यर्थः ।। ५-९९ ।।

(संजीविनी-५-१००) **योषितामिति** । योषितां स्त्रीणां यः रुदितघोषः उद्गतः सः दिङ्मुखानि दिग्विवराणि मुखरीचकार—कथमिव अमरैः देवैः मन्दरेण गिरिणा सुरासुरैः मथ्यमानः विलोड्यमानः दुग्धसागर इव क्षीरसिन्धुरिव (दिङ्मुखानि मुखरीचकार) ।। ५-१०० ।।

(संजीविनी-५-१०१) **हा रामेति** । हा राम क्व गतोऽसि कुत्र गतोऽसि—कतरत् कान्तारं कतरद् वनम् आगाहसे—कान्तारान्तरगाहिनी वनान्तराणि प्रविशन्ती अबला तव कान्ता सीता कथं वत्स्यति कथं स्थास्यति—हे सौमित्रे शुभगात्र लक्ष्मण हे महाबाहो ऊर्मिलां विहाय परित्यज्य क्व अरण्ये कुत्र वने विचरिष्यसि इति विलपन् राजा दशरथः मुहुः व्यामुहत् मुमूर्छ—मुह वैचित्ये इत्यस्मात् लुङि रूपम्—पुषादीत्यनेन च्लेरङ् ।। ५-१०१ ।।

(संजीविनी-५-१०२) **रमणीजन इति** । रमणीजनः स्त्रीजनः रामजनन्याः कौसल्यायाः तपनीयसौधम् सुवर्णमयसौधं नरेन्द्रं दशरथं झटिति उपनीय प्रापय्य व्यजनानिलैः व्यजनवातैः जलशीकरसेकैः उदबिन्दुसेकैश्च उदजीवयत् उज्जीवयामास—प्रियशतैः अससान्त्वत् आश्वासयामास ।। ५-१०२ ।।

(संजीविनी-५-१०३) इतः प्रभृति पुरजनवचनानि—**हा रामेति** । हा हे राम हे राघव हे रघूद्वह हे रघुश्रेष्ठ हे रामचन्द्र रजनीकरसौम्यवक्त्र रजनीकरश्चन्द्रः—

तद्वत् सुन्दरवक्त्र—आर्तौ पितरौ दुःखितौ कौसल्यादशरथौ—पिता मात्रा इत्येकशेषः—न जहीहि न त्यज—अनाथां नगरीम् अयोध्याम् कस्मै ददामि—भरताय ददासि चेत्—तर्हि भरतोऽपि न राज्यकामः राज्यं नेच्छति ॥ ५-१०३ ॥

(संजीविनी-५-१०४) पौरजनः कैकेयीम् उपालभते **शिशव इति**। हे पापे कृतजागरोपवासाः—जागरश्च उपवासश्च जागरोपवासौ—कृतौ जागरोपवासौ यैस्ते तथोक्ताः शिशवः पारणाम् विनैव अकृत्वैवेत्यर्थः—निरगुः निर्गताः—कठिनं तव हृदयं कथं न दीर्णम्—कथं भिन्नं न भवति—हे कैकेयि तव अन्नं कथं नु रुच्यम्—कथं वा ते रोचते ॥ ५-१०४ ॥

(संजीविनी-५-१०५) **वैकल्ये इति**। हे कौसल्ये जनानि सशोकशल्ये शोक एव शल्यम्—तेन सह वर्तते इति सशोकशल्ये हृदये ते वैकल्ये विद्यमाने सति ते जिजीविषा तत्र कथं जीवनेच्छा भवति—हे सुमित्रे लक्ष्मणं क्व द्रष्टासि कदा द्रक्ष्यसि—हे ऊर्मिले भर्ता प्रियेण लक्ष्मणेन कदा मिलेथाः कदा संगता स्याः कथय वद ॥ ५-१०५ ॥

(संजीविनी-५-१०६) **जाल्माविति**। हे वसिष्ठवामदेवौ जगति लोके जाल्मौ स्थः असमीक्ष्यकारिणौ भवथः—हे अशोकधर्मपालौ—तौ दशरथमन्त्रिणौ—तथा चोक्तं रामायणे—

धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः।
अशोको मन्त्रपालश्च (धर्मपालश्च) सुमन्त्रश्चाष्टमोऽर्थवित् ॥
(वा-रा-१-७३) इति।

युवां धर्मं मा त्यजतम्—हे सुमन्त्र यन्तः सारथे रामं विपिनं मा नय न प्रापय—नयतिद्विकर्मकः—इत्युक्त्वा पौराः विपणौ विलुट्य व्याक्रुक्षन् रुरुदुः—क्रोशतेः लुङि रूपम्—शल इगुपधादित्यादिना क्सादेशः व्रश्चादिना शकारस्य षत्वम् कुत्वषत्वे ॥ ५-१०६ ॥

(संजीविनी-५-१०७) **रामे जगदभिरामे इति**। जगदभिरामे निमतविरामे शत्रूणामवसानरूपे रामे विनिर्यति निर्गच्छति सति द्रुहिणसदृक्षाः कमलासनसदृशाः गृहिणः गृहस्थाः द्विजवर्याः स्वयमपि सपुत्रमित्रकलत्राः पुत्रमित्रकलत्रसहिताः सन्तः निरगुः निर्ययुः—इणो लुङि रूपम् ॥ ५-१०७ ॥

(संजीविनी-५-१०८) **अश्वीयेति**। अश्वीयाः अश्वसमूहाः—रथ्याः रथसमूहाः—गजता गजसमूहः—ताभिः विहीनायाम् रथ्यायाम् लुठद्भिः पौरैः पुरजनैः कृतार्तनादा कृतदुःखस्वरा अयोध्या नगरी शोकाम्बुनिधौ शोकसागरे ममज्ज—कथमिव अचन्द्रतारा

अपगतचन्द्रतारका निशा रात्रिः अन्धकारे तमसि इव—चन्द्रश्च तारकाश्च चन्द्रतारकाः—अपगताः चन्द्रतारकाः यस्यां सा तथोक्ता—पूर्वार्धम् एकं पदम् ।। ५-१०८ ।।

(संजीविनी-५-१०९) **वृद्धानिति** । वृद्धान् निवर्तध्वम् इति प्रणम्य बद्धाञ्जलिः सन् तिष्ठत तिष्ठत इति वदन् शुद्धान्तरङ्गः शुद्धमनस्कः रामः प्रियाणि वदन् प्रियवचनानि ब्रुवन् सीतासमेतः सन् नगर्याः निरगात् अयोध्यायाः निर्ययौ ।। ५-१०९ ।।

(संजीविनी-५-११०) **आध्वमिति** । अटवीषु अरण्येषु कदध्वा कुमार्गः विद्यते—कोः कत् तत्पुरुषे कुशब्दस्य कदादेशः—अत एव आध्वम् आध्वम् तिष्ठत तिष्ठत—आतुरम् दुःखितं तातम् उपाध्वम् उपाध्वम् सान्त्वयत यात—मा तगत मा तमत ग्लानिं मा गच्छत इति एवं प्राञ्जलिः रामः बन्धून् मुहुः अभाषत अब्रवीत्—सर्वत्र क्रियासमभिहारे द्विर्वचनम् ।। ५-११० ।।

(संजीविनी-५-१११) **प्रसह्येति** । प्रसह्य बलात्कारेण अनुयातः अनुगच्छतः जनौघान् जनसमूहान् निषेद्धुम् अशक्तः सन् कुमारो रामः निषण्णः उपविष्टः सन् विषण्णः—अभूत्—सूतः सुमन्त्रः रामे अनुरक्तान् स्वयं च अनिषिद्धच स्वयमनिवार्य कथंचित् कृच्छ्रेण रथं चोदयामास प्रेरितवान् ।। ५-१११ ।।

(संजीविनी-५-११२) **वृद्धबालेति** । वृद्धबालवनिताजनान्वितः वृद्धजनैः बालजनैः वनिताजनैश्च अन्वितः—द्वन्द्वान्ते श्रूयमाणः जनशब्दः प्रत्येकम् अभिसंबध्यते—चिरन्तनौ वृद्धौ पितरौ मातापितरौ चिन्तयन् रघुनन्दनो रामः स्यन्दनेन रथेन स्यन्दिकां नाम निम्नगां नदीम् अभिजगाम प्राप ।। ५-११२ ।।

(संजीविनी-५-११३) **अत्रान्तरे इति** । अत्रान्तरे एतस्मिन्नवसरे दिवसः परिणतः दिवसः परिपूर्णो बभूव—तदानीम् पर्यस्तलोहितसमस्तगभस्तिजालः पर्यस्तं परिक्षीणं लोहितं रक्तं समस्तं गभस्तीनां जालं यस्य स तथोक्तः मयूखमाली सूर्यः अस्ताद्रिमस्तकम् अस्तपर्वतशिखरम् अहास्त प्राप्तवान्—अपरोमिमाली पश्चिमसमुद्रः लाक्षारसद्युतिरभूत् लाक्षारसकान्तिरभूत् ।। ५-११३ ।।

(संजीविनी-५-११४) **अजनीति** । दिनात्यये सायंकाले जनताचेतोरागः जनसमूहस्य चित्ते रागः अजनि अभूत्—समेत्य संभूय मुहुर्तं विमृत्वरः विसरणशीलः—इण्णशजीत्यादिना ताच्छील्यार्थे क्वरप् प्रत्ययः—अखिलः सन्ध्यारागः समस्तः सन्ध्यारागः व्यगलत् गलितोऽभूत्—सान्द्रं निबिडं तिमिरपटलं तिर्यक् तिरश्चीनं दिक्तटान् गगनकुहरे आकाशविवरे तिरोऽधित तिरोहितान् अकरोत्—सर्वतः समन्तात् ताराराजिः नक्षत्रपङ्क्तिः व्यराजत दिदीपे ।। ५-११४ ।।

(संजीविनी-५-११५) **स्यन्दिकापयसीति ।** स्यन्दिकापयसि स्यन्दिकाजले वन्दितसन्ध्यः नमस्कृतसन्ध्यः सानुजो लक्ष्मणसहितः सीतासमेतश्च रघुनाथः रामः अद्भिरेव जलैरेव कृतपारण आसीत्—भुवि भूयः बहु तद् अद्भुतम् आश्चर्यम् अभवत् आश्चर्यं बभूव ॥ ५-११५ ॥

(संजीविनी-५-११६) **नागरा इति ।** अखिलाः नागराः पुरजनाः भुवि निपत्य भूमौ पतित्वा उद्वलितदुःखसागराः उद्वलितः उत्प्लुतः दुःखसागरः येषां ते तथोक्ताः जागरामासुः जागरणं चक्रुः—यातनात्ययनिमीलितेक्षणाः यातनायाः तीव्रवेदनायाः अत्यये अवसाने निमीलितेक्षणाः मुकुलितनयनाः सन्तः अखिलाः पुरजनाः निद्रया परिबभूविरे परिभूता आसन् ॥ ५-११६ ॥

(संजीविनी-५-११७) **अद्रिजापतिरिति ।** असौ अद्रिजापतिः परमेश्वरः हिमाद्रौ हिमवत्पर्वते अशेत—श्रीपतिः लक्ष्मीपतिः हरिश्च अप्सु निद्रां सुष्वाप—राघवः रामः त्वचम् वल्कलम् अवस्त आच्छादितवान्—विधिं दैवं कः को वा लङ्घयेत् अतिक्रामेत् इति जनौघः जनसमूहः जगाद उवाच ॥ ५-११७ ॥

(संजीविनी-५-११८) **अश्वपार्श्वेति ।** अश्वानां पार्श्वे पार्श्वभूमौ शयितस्य निद्रितस्य सारथेः सुमन्त्रस्य अग्रतः पुरोभागे स लक्ष्मणः समवसत् उवास-वल्कलेन कृतम् अवगुण्ठनं ययोस्तौ तथोक्तौ तौ दम्पती सीतारामौ अधिरथम् रथे निदद्रतुः निद्रितौ बभूवतुः—दम्पती अधिरथम् इत्यत्र ईदूदेद् द्विवचनं प्रगृह्यम् (१-१-११) इति प्रगृह्यसंज्ञया प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५) इत्यनेन प्रकृतिभावः—रथोद्धता वृत्तम् ॥ ५-११८ ॥

(संजीविनी ५-११९) **स्वप्नज इति ।** स्वप्नजः शयालोः—स्वपितृपोः नजिङ् (३-२-१७२) इत्यनेन नजिङ् इति कृत् प्रत्ययः—स्वप्नक् शयालुः इत्यमरः—पुरजनस्य समूहे राघवोऽपि रामोऽपि महतीम् अधिकां धृतिम् धैर्यम् ऊहे उवाह—अर्धरात्रसमये जनसमूहं परित्यज्य गमिष्यामि इति निश्चितवान् इत्यर्थः—सुमन्त्रः जाग्रदेव निद्रारहितः सन्नेव—नाभ्यस्तात् इति नुमभावः—निषसाद निषण्णोऽभूत्—तथा हि स सुमन्त्रः स्वामिनीतौ स्वामिकार्ये निहितः (अवहित इति हेतोरेव सुमन्त्र इति ख्यातः) —अत एव जाग्रदेव निषसाद ॥ ५-११९ ॥

(संजीविनी-५-१२०) **सीतया सहेति ।** रघुतिलके रघुश्रेष्ठे रामे सीतया सह गहनं वनं प्रति गतवति सति—हतेन कृपाशून्येन विधिना दैवेन दशरथजनकयोः कुले हते

विनाशिते सति हा वत इति सारथौ मुगन्ते ,रुदिते रुदितवति सति सकलजने च विलपति सति मुखरदिशा मुखरीभवदाशा सा निशा रात्रिः विधुरदशा क्लेशावस्था समजनि—दीपजनेत्यादिना कर्तरि चिणि रूपम् ।। ५-१२० ।।

इति श्री-(राम्-पल्लि) गोपीनाथसूरिविरचितायाम्
उदारराघवव्याख्यायां संजीविन्यां पञ्चमः सर्गः ।
इति शम् ।

NOTES TO SAṂJĪVINĪ—Canto V

[1] Bombay edn. and the *Saṃjīvinī* read the expressions in the Nominative Case (as *sagaṇḍakāḥ* etc.), where the *Saṃjīvinī* supplies: *bhavantīti śeṣaḥ*. The *Pradyotanī* reads them in the Objective Case (*sagaṇḍakān* etc.) and comments: *hitvā iti pūrveṇānvayaḥ*.

[2] The *Pradyotanī* reads: *dūnān api*. *Bombay* edn. and the *Saṃjīvinī* read: *dūrād api*.

उदारराघवे महाकाव्ये षष्ठसर्गस्य व्याख्या संजीविनी
श्री-राम्-पल्लि-गोपीनाथसूरिविरचिता

संजीविनी-६-१) **अर्धरात्रेति ।** अथ अनन्तरम् स रामः अत्र वनस्थले जनता जनसमूहः दुर्धरा धर्तुमशक्येति अर्धरात्रसमये विनिद्रः सन् वञ्चितताखिलजनः वञ्चितसमस्तजनः सन् वनराजीः वनपङ्क्तीः आडुढौकिषुः गन्तुम् इच्छुः—ढौक् गतौ इत्यस्मात् सनि सनाशंसभिक्ष उः इति उप्रत्ययः—दुरध्वम् दुर्गममार्गम् अगाढ विवेश —गाहू विलोडन इत्यस्मात् लुङि (अगाढ इति) रूपम्—झलो झलि इति सकारलोपः —हो ढ इति ढत्वम्—ष्टुना ष्टुः इति ष्टुत्वम्—ढो ढे लोपः इति एकस्य ढकारस्य लोपः (प्रद्योतन्यां संजीविन्यां च कोऽपि भेदो) न दृश्यते—पदान्यपि सर्वात्मना समानि [एकां (संजीविनी) दृष्ट्वा केनापि (लेखकेन) अन्या (प्रद्योतनी) द्वितीयनाम्ना लिखिता स्यादिति सन्देहो भवति—तत्त्वं देवो वेद—संपादकस्य] ।। ६-१ ।।

(संजीविनी-६-२) **प्रववृते इति ।** रघूद्वहः रघुश्रेष्ठः स रामः वनाय प्रववृते वनाय प्रययौ—महाजनः अयोध्यापुरनिवासी जनः भवनाय निववृते गृहाय निवृत्तः —रथगतः (स रामः) रुचा कान्त्या रविरिव रुरुचे सूर्य इव दिदीपे—महाजनस्तु पुरगतः सन् अयोध्यां प्राप्तः सन् स्वगृहे स्वकीयवेश्मनि शुचा दुःखेन जगृहे स्वीकृतः—शोकाविष्टोऽभूदित्यर्थ ।। ६-२ ।।

(संजीविनी-६-३) **आरण्यकानीति ।** आरण्यकानि अरण्यसंबन्धीनि—अरण्यान्मनुष्ये इति वुञ् प्रत्ययः—युवोरनाकौ इति अकादेशः—मृगपक्षिरुतानि मृगाणां पक्षिणां च रुतानि शृण्वन् प्राभातिकेन प्रातःकालसंबन्धिना पवनेन वायुना निषेव्यमाणः सन् रामः सरस्सु कासारेषु जलजानि कमलानि जिघ्रन् महत्तर—महत्तरसा अत्यधिकवायुवेगेन रथेन साधनभूतेन शीघ्रं जगाम—महत्तरश्चासौ मरुच्च तस्य वेग इव वेगो यस्य स तथोक्तः—तेन ।। ६-३ ।।

(संजीविनी-६-४) **अस्तावलम्बिनीति ।** सितत्विषि सिताः शुभ्राः त्विषः कान्तयो यस्य स तथोक्तः तस्मिन् शीतभानौ चन्द्रे अस्तावलम्बिनि अस्ताद्रौ अवलम्बमाने सति भानूदये सूर्योदये च सति भगवतीं षड्गुणोपेताम् उषसम् प्रातः सन्ध्याम् ववन्दे प्रणनाम

—स रामः त्र्यञ्जलम्—द्वित्रिभ्याम् अञ्जलेः इति समासान्तः टच् प्रत्ययः—(अञ्जलित्रयपरिमितम्) जलम् अर्हणतये सूर्याय अर्पयित्वा दत्त्वा—सूर्याय अर्घ्यं दत्त्वेत्यर्थः—पश्चात् तदनन्तरम् अनारतगतिः अविच्छिन्नगमनः सन् गहनं जगाम वनं विवेश ॥ ६-४ ॥

(संजीविनी-६-५) **अह्नोऽवसानसमये इति** । अह्नः अवसानसमये सायंकालसमये जगदघक्षयहेतुभूताम् जगतां भुवनानाम् अघक्षये पापक्षये हेतुभूतां जह्नोः सुतां भागीरथी दूरे ददर्श—तत्तीरसीमनि तस्याः भागीरथ्याः तटप्रदेशे किरातपतेः किराताधीश्वरस्य गुहस्य तुङ्गध्वजम् उन्नतपताकम् शृङ्गवेरं नगरम् ऐक्षत ददर्श ॥ ६-५ ॥

(संजीविनी-६-६) **शृङ्गवेरनगरेति** । शृङ्गवेरनगराधिनायको गुहः शृङ्गकाहलनिनादसंभ्रमी शृङ्गकाहलानां निनादेन ध्वनिना संभ्रमी संभ्रमवान् अभीष्टदर्शनः प्रियदर्शनः—रामलक्ष्मणयोर्दर्शने समुत्सुक इत्यर्थः—दशरथात्मजौ दशरथपुत्रौ राघवौ रामलक्ष्मणौ द्रष्टुम् आगमत् आययौ—गम्लृ गतावित्यस्मात् लुङि रूपम्—पुषादीत्यादिना अङादेशः ॥ ६-६ ॥

(संजीविनी-६-७) **दूरतोऽश्वमिति** । दूरतः दूरादेव अश्वम् अवरुह्य (अश्वादवरुह्य) पदातिः सन् गुहः—पञ्चपैः—बहुव्रीहौ संख्येये इत्यादिना टच् प्रत्ययः समासान्तः—शबरनायकमुख्यैः भिल्लनायकश्रेष्ठैः सह वन्यं वनभवं वस्तु—कन्दमूलफलानीत्यर्थः—उपदाय उपदां कृत्वा विनीतः नम्रः सन् नाम नामधेयं जातिं कुलं च अभिधाय उक्त्वा ननाम ववन्दे—(पद) विभागः नाम जातिम् (इति) ॥ ६-७ ॥

(संजीविनी-६-८) **स्वीकृत्येति** । गङ्गातटसीम्नि भागीरथ्याः तटप्रदेशे तं गुहं स्वीकृत्य आत्मीयं कृत्वा पदातिना किरातराजेन—राजाहःसखिभ्यः इति टच् प्रत्ययः—अन्वितः संगतः सन् रामः यन्ता सारथिना वाजिनः अश्वान् विमोच्य मोचयित्वा प्रियया समं सीतया सह पयः पपौ जलं पपौ ॥ ६-८ ॥

(संजीविनी-६-९) **गाङ्गमिति** । गन्धर्वान् वाजिनः—वजिवाहावगन्धर्वेत्यादिरमरः—गाङ्गं भागीरथीसंबन्धि सलिलं दापय जलं दापय इति सुसन्त्वम् आदिश्य आज्ञाप्य पुनः रामः स्वरामया सार्धं स्ववनितया सह तापसतरुमूलभुवम् तापसतरुर्नाम इङ्गुदीवृक्षः—इङ्गुदी तापसतरुः इत्यमरः—तस्य मूलप्रदेशं जगाम प्राप ॥ ६-९ ॥

(संजीविनी-६-१०) **पल्लवमयासनस्थमिति** । पल्लवमयासनस्थं पल्लवमये आसने निषण्णं फुल्लमुखं विकसितमुखं पुण्डरीकाक्षं रामं वीक्ष्य हल्लोहलम् आकलयन् दधत् भिल्लो गुहः भल्लीम् (भल्लास्त्रम्) उपायनीचक्रे उपायनीचकार ॥ ६-१० ॥

(संजीविनी-६-११) **तस्मिन्निति।** अधिवृक्षसूर्ये अधिगताः वृक्षाः येन स तथोक्तः—अधिवृक्षः सूर्यः यस्मिन् सः अधिवृक्षसूर्यः—तस्मिन् काले—कालो दिष्टोऽप्यनेहापि इत्यमरः—सायंकाले इत्यर्थः—रामम् अभ्यर्चयितुम् पूजयितुम् गुहः प्राञ्जलिः सन् आगत्य पुरस्तात् स्थितः सन् सूर्योढम्—सूर्या नववधूः—ताम् ऊढम् परिणीतवन्तं—सूर्या नववधूः कन्या नवोढेत्युच्यते इति हलायुधः—रघुप्रवीरं रघुश्रेष्ठं कुमारं रामम् पुरप्रवेशाय शृङ्गबेरनगरप्रवेशाय—आह्वत् आजुहाव—ह्वेञ् स्पर्धायां शब्दे च इत्यस्मात् लुङि रूपम्—लिपिसिचि ह्वश्च इत्यनेन अङादेशः ॥ ६-११ ॥

(संजीविनी-६-१२) **अभणीदिति।** अथ अनन्तरम् मानवसार्वभौममनुः—मानवाः मनुजाः—तेषां सार्वभौमश्चक्रवर्ती दशरथः—सर्वभूमीत्यादिना तस्येश्वर इत्यस्मिन्नर्थे अण् प्रत्ययः—अनुशतिकादीनां च इत्यनेन उभयपदवृद्धिः—तस्य सूनुः रामः—दशरथपुत्र इत्यर्थः—समन्दहासः सस्मितः सन् मधुरं यथा तथा गुहम् अभणीत् उवाच—भण व्यक्तायां वाचि इत्यस्मात् लुङि रूपम्—इट ईटि इति सकारलोपः—किमिति अभणीत्—तत्राह वयं नगरं शृङ्गबेरपुरं प्रवेष्टुम् नार्हाः—किं तु दश चतुरश्च अब्दान् चतुर्दशसंवत्सरेषु—कालाध्वनोरिति द्वितीया—अटवीम् अटामः चरामः ॥ ६-१२ ॥

(संजीविनी-६-१३) **नास्महे इति।** नगरसीम्नि नगरप्रदेशे न आस्महे न तिष्ठामः—वस्त्रं न वस्महे—वसनं नाच्छादयामः—किंतु [1]विहितभस्मविलेपाः कृतभस्मविलेपाः वृद्धयोः मातापित्रोः कैकेयीदशरथयोः आदरणीयं वचनं मातिगाम नातिचराम—अतिपूर्वात् इण् गतावित्यस्मात् लुङि रूपम्—इणो गा लुङि इति गादेशः ॥ ६-१३ ॥

(संजीविनी-६-१४) **भरतायेति।** मे पिता दशरथः नीतिनिरताय नीतिशास्त्रकुशलाय भरताय धराधिपतित्वम् क्षितीश्वरत्वं वितरीतुं दातुम्—वृतो वा इत्यनेन इटो दीर्घः—ऐहत ऐच्छत्—त्वं जटिलः सन् चतुर्दशसमाः चतुर्दशसंवत्सरेषु—कालाध्वनोरिति द्वितीया—विपिने कानने चर इति [2]अनुजयुक्तं लक्ष्मणयुक्तं माम् अदिक्षत् मां प्रजिघाय—दिश अतिसर्जने इत्यस्मात् लुङि रूपम्—शल इगुपधाद् इत्यादिना क्सादेशः—व्रश्चादिना षत्वम्—षढोः कः सीत्यनेन कत्वम् ॥ ६-१४ ॥

(संजीविनी-६-१५) **राजा यदाजाह्नवीति।** यत् यस्मात् कारणात् राजा दशरथः सालचिह्नं—सालो वृक्षविशेषः—स चिह्नं यस्य तत् तथोक्तम्—भागीरथीपर्यन्तं सुमन्त्रसूतं सुमन्त्रः सूतः सारथिर्यस्य स तथोक्तः—तं रथं मे आदिशत् प्रजिघाय तत्

तस्मात् कारणात् विपिनं विविक्षुः काननं प्रवेष्टुम् इच्छुः अहं श्वः जटाः बद्ध्वा जटा-बन्धनं कृत्वा साश्वं तम् एनं रथं प्रातः प्रहिणोमि प्रातःकाले प्रेषयामि ।। ६-१५ ।।

(संजीविनी-६-१६) **भृशमिति** । रघुघनश्रमाम्भसः गमनवेगेन अधिकस्वेदोदकाः रथवाजिनः रथाश्वाः भृशम् अत्यर्थम् अक्षुधन् क्षुधिता अभवन्---पथि मार्गे नितान्तम् अश्रमन् अत्यन्तं श्रान्ता अभवन्--अत एव हरितं तृणं बालतृणं हरिमन्थकानपि चण-कांश्च---चणको हरिमन्थकः इत्यमरः---त्वरितं मागानय आनय वयं समागताः---वयं समायाताः ।। ६-१६ ।।

(संजीविनी-६-१७) **इति रामगिरामिति** । गुहः इति पूर्वोक्तप्रकारेण राम-गिराम् रामवचनानाम् अनन्तरम् तृणभारान् तृणसंघान् चणकान् हरिमन्थकांश्च---चणको हरिमन्थक इत्यमरः--अदात् रामाय ददौ--डु दाञ् दाने इत्यस्मात् लुङि रूपम् --गातिस्थेत्यादिना सकारलोपः---रथसारथिरपि सुमन्त्रोऽपि उष्णकरावपीडितान् सूर्य-किरणैर्बाधितान् तुरगान् असिष्णपत् (स्नापयामास)---ष्णा शौचे इत्यस्मात् णिचि लुङि रूपम्---णिश्रीत्यादिना चङादेशः ।। ६-१७ ।।

(संजीविनी-६-१८) **अथ पश्चिमेति** । परिफुल्लानि विकसितानि हल्लकानि कल्हाराणि---सौगन्धिकं तु कल्हारं हल्लकं रक्तसन्ध्यकम् इत्यमरः---तेषां दलानीव अरुणच्छविः रक्तकान्तिः रुचां पतिः सूर्यः पश्चिमाद्रिम् अगमत् प्राप---गम्लृ गता-वित्यस्मात् लुङि रूपम् (अगमदिति)---लृदित्वाद् अङादेशः---[3]उदारराघवं महान्तं रामचन्द्रम्---उदारो दातृमहतोः इत्यमरः---वरुणाय शंमितुमिव रामो वनाय गत इत्याख्यातुमिव अपरे (अपरस्मिन्) अम्बुधौ पश्चिमसमुद्रे मङ्क्षु शीघ्रम् निमिमङ्क्षुः च निमङ्क्तुम् इच्छुः च अभवत्---अपरे च मङ्क्ष्वव मिमङ्क्षुरम्बुधौ इति पाठान्तरम् ---वरुणः अपाम् अधिपतिरित्युक्तत्वात् ।। ६-१८ ।।

(संजीविनी-६-१९) **पश्चिमवारीति** । भगवति षड्गुणोपेते महसां भर्तरि त्विषां पत्यौ तमसां हर्तरि तमोनाशके---उभयत्र कर्तृकर्मणोः कृतीति षष्ठी---दशशतकिरणे सहस्रकिरणे सूर्ये पश्चिमवारिराशौ पतिते सति पक्षिकुले पक्षिसमूहे कुलायनिलयान् नीडस्थानानि अभिपतति अभियाते सति चन्दनशैलमन्दपवनः मलयपर्वतमन्दवायुः शनैः मन्दं सरिता समगत भागीरथ्या संगतोऽभूत्---समो गमीत्यादिना आत्मनेपदम्---लुङि रूपम् ।। ६-१९ ।।

(संजीविनी-६-२०) **सत्वरमिति** । सत्वरं शीघ्रम् यथा भवति तथा उत्थितः सन् रामः अनुजनुषा समं लक्ष्मणेन सह---अनु पश्चात् जनुः जन्म यस्य स तथोक्तः---

तेन जनकतनुजया समं सीतया सह जह्नुसुतां धुनीं भागीरथीं नदीम्—तटिनी ह्लादिनी धुनी इत्यमरः—उपगतः प्राप्तः सन् रवये सूर्याय अर्घ्यजलं प्रदाय अर्घ्योदकं दत्त्वा शोधितं कण्टकादिरहितं कृतं किसलयशयनं पल्लवशयनम् इङ्गुदीतरुतले तापसतरुमूले (स्थितं) पुनरपि अगात् ययौ—इणो लुङि रूपम् ।। ६-२० ।।

(संजीविनी-६-२१) **कोकव्राते इति ।** विरहिणि विरहवति तथैव विधुरे निर्विग्ने शोकक्लिष्टे शोकेन दुःखेन क्लिष्टे कोकव्राते चक्रवाकसमूहे—कोकश्चक्रश्चक्रवाक इत्यमरः—सरिति भागीरथ्यां विरुदति सति लोकव्याप्ते तमसि च बहले अधिके कस्यापि पुरुषस्य दृशोः लोचनयोः प्रियं सन्तोषः नो अजनि नोत्पन्नः—जनी प्रादुर्भावे इत्यस्मात् कर्तरि लुङि रूपम्—दीपजनेत्यादिना चिण्—विरहिजनदर्शने तमोदर्शने च सति चक्षुःप्रीतेरविद्यमानत्वात् ।। ६-२१ ।।

(संजीविनी-६-२२) **भिल्लं वीक्ष्येति ।** अत्यासन्नम् अतिसमीपवर्तिनं भिल्लं गुह वीक्ष्य रामः हे गुह (त्वम्) अस्माकं प्रियम् अतनीः अकार्षीः—तनोतेर्लुङ्—इदानीम् अद्य आत्मीयां नगरीं शृङ्गबेरनगरी पुरी याहि गच्छ—इति आदिक्षत् इति गुहं प्रजिघाय—स गुहश्च नरपत्यादेशं रामस्य आज्ञां प्रत्यादिक्षत् तिरश्चकार—प्रत्यादेशो निराकृतिरित्यमरः—दिश अतिसर्जने इत्यस्मात् लुङि रूपम्—शल इगुपधादित्यादिना क्सादेशः ।। ६-२२ ।।

संजीविनी-६-२३) **न याम्यहमिति ।** हे राघव अहं शृङ्गबेरपुरं न यामि । न गच्छामि (यतः) यूयं पुनरपि अयोध्यां प्रति न याथ न गच्छथ । लोकोत्तमे लोकोत्कृष्टे त्वयि अटवी प्रविष्टे सति लोकाधमः अल्पोऽहं पुरं प्रति कथं वा गच्छामि ।। ६-२३ ।।

(संजीविनी-६-२४) **जरन्निति ।** जरन् वृद्धः ते पिता दशरथः जगदीश्वरोऽपि लोकाधीश्वरोऽपि किं जानाति—किमपि न जानातीत्यर्थः—अज्ञाने जरत्त्वमेव कारणम् अनुसन्धेयम्—वसिष्ठः जरठः वृद्धः किम्—वृद्ध एव न भवतीत्यर्थः—किम्शब्दः क्षेपे—अमात्यमौर्ख्यात् सचिवानां मूर्खत्वात् अधिकारिमौग्ध्यात् अधिकारिणां मूढत्वाच्च आढ्यंभविष्णुः उत्कृष्टो भवन्—कर्तरि भुवः खिष्णुच् इत्यनेन खिष्णुच् प्रत्ययः—खित्यनव्ययस्येति अरुर्द्विषदिति मुमागमः—त्वम् अरण्यं प्रति आगाः समागतोऽसि—इणो लुङि रूपम् ।। ६-२४ ।।

(संजीविनी-६-२५) **निष्कासनस्थस्येति ।** निष्कासनस्थस्य—निष्कशब्देन साष्टशतसुवर्णम् उच्यते—साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले—दीनारेऽपि च निष्कोऽस्त्री इत्यमरः—साष्टशतसुवर्णसिंहासनस्थस्य निरागसः अपराधशून्यस्य ते

नगर्याः निष्कासनम् अयोध्यापुरतो निरासनम् केन भवेत्—केन पुरुषेण भावितव्यम्—दशरथेन निष्कासनमिति चेत्—तत्राह कामान्धवाक्यैः कामातुरस्य दशरथस्य वचनैः करस्थिताम्—स्वाधीनम् धरित्रीम् उज्झसि त्यजसि—अत्र एतस्मिन्नर्थे का बुद्धिः ॥ ६-२५ ॥

(संजीविनी-६-२६) **एषोऽनुजः इति** । एषः अनुजः असौ लक्ष्मणः शिशुः—इयं वधूश्च जाया ते नवोढा—उभयोरपि वनवासो नोपपद्यते इति भावः—त्वं भुवो वोढा भूभर्ता—तवापि नोपपद्यते इति भावः—तथापि अमी त्रयः (यूयम्) अटवीम् अटथ याथ (इतीदं न युज्यते इति भाव.) भूभारकौ दशरथभरतौ भविष्यत इति चेत् तत्राह—वृद्धः पिता यमसमीपगतः यमपुरं प्राप्तः—आसन्नमरण इत्यर्थः—समर्थः शक्तो भरतः परदेशवर्ती (युधाजिद्गृहे निवसन्नित्यर्थः) क्व भुवो भर्ता भूसंरक्षकः कथं भवेत्—कर्मणि षष्ठी ॥ ६-२६ ॥

(संजीविनी-६-२७) **अतो निवर्तस्वेति** । अतः कारणात् पुनः स्वां पुरीम् अयोध्यां प्रति निवर्तस्व—आत्मानं किमर्थम् आयासयसे—निरागाः अपराधरहितस्त्वम् वधूप्रलापेन कैकेय्या अनर्थकवचनेन सजानिः जायासमेतः सन्—जायाया निङ इति निङ—सोदरेण लक्ष्मणेन सह वृथा व्यर्थमेव आगाः समागतोऽसि—इणो लुङि रूपम् ॥ ६-२७ ॥

(सजीविनी-६-२८) **किरातसैन्यैरिति** । हे राम बहुधा अनेकैः मदीयैः किरातसैन्यैः किरातसेनासमूहैः त्वदीयं धाम स्वकीयं स्थानम्—अयोध्याम् इत्यर्थः—रुणधाम अयोध्यानिरोधं करवामेत्यर्थः—निष्कारणं निर्निमित्तमेव त्वत्प्रतिपक्षबुद्धीन् भरतस्य बन्धून् निष्कासयामः निरासयामः ॥ ६-२८ ॥

(संजीविनी-६-२९) **तव शिरसीति** । तव शिरसि जटानां बन्धनं कारयित्रोः पित्रोः तव मातापित्रोः—कैकेयीदशरथयोः इत्यर्थः—चरणनिगलबन्धं पादयोर्निगलबन्धनं कारयिष्यामि—पुनरपि अयोध्यां प्रविश—अनन्योध्यां पालय अन्यैर्योद्धुमशक्यां पालय—विधेयविशेषणं चैतत्—दण्डसाध्याः (सामदानभेददण्डेषु) चतुर्थोपायेन दण्डेन साधनीयाः शत्रवः रणभुवि युद्धभूमौ खण्डशः करणीयाः हननीयाः ॥ ६-२९ ॥

(संजीविनी-६-३०) तत्सामर्थ्यं कि विद्यते इति चेत् तत्राह—**शतानीति** । इह अत्र नावां तरणीनां पञ्च शतानि सन्ति—मम विद्यन्ते—प्रतिनु एकैकस्यां तरण्याम् अमी पुरोवर्तिनः पञ्चशतानि नाविकाः सन्ति—नौद्व्यच इति ठन् प्रत्ययः—

प्रतिनाविकम् एकैकस्य धनुर्धराः चापधराः—समरानिवर्तिनः युद्धे परिवृत्तिं न व्रजन्तः भटाः सहस्रसंख्याः सन्ति ॥ ६-३० ॥

(संजीविनी-६-३१) **कर्बुरेति**। कर्बुरदोर्बलचण्डाः कर्बुरा निशाचराः—रात्रिचरो रात्रिचरः कर्बुरो निकषात्मज इत्यमरः—तेषां यद् दोर्बलं तेन चण्डाः प्रचण्डाः—कर्बुरखर्जूरखचितकोदण्डाः कर्बुरं शातकुम्भम्—गाङ्गेयं भर्म कर्बुरमित्यमरः—खर्जूरं रजतम्—दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि इति च अमरः—ताभ्यां खचितकोदण्डाः प्रत्युप्तचापाः—वनाद्रिसंचाराः वनेषु अद्रिषु च संचरन्तीति तथोक्ताः भटाः मे अर्बुदमपि सन्ति न्यर्बुदमपि सन्ति ॥ ६-३१ ॥

(संजीविनी-६-३२) **ससारथौ इति**। ससारथौ सुमन्त्रसहिते दाशरथौ दशरथपुत्रे त्वयि रथस्थे सति धन्वी धनुष्माम् रथेन सज्जः सन्नद्धः सन् एकरथः—एको रथो यस्य स तथोक्तः एकरथिकोऽस्मीत्यर्थः—मम अप्रमेयम् असंख्यम् किरातसैन्यं चास्ति—अत एव स्वां पुरीं प्रतिष्ठस्व निवर्तस्व—समवप्रविभ्यः स्थ (१-३-२२) इत्यात्मनेपदम् ॥ ६-३२ ॥

(संजीविनी-६-३३) **श्रुत्वेति वाक्यमिति**। इति पूर्वोक्तं शबराधिपस्य गुहस्य वाक्यं श्रुत्वा हृष्टौ गुहस्य वचनात् प्रहृष्टौ अनुजसारथौ लक्ष्मणसुमन्त्रौ दृष्ट्वा मन्दरशैलधीरः मन्दराद्रिवद् गम्भीरः रघुवंशदीपः रघुवंशस्य प्रकाशकः रामः मन्दं यथा भवति तथा हसन् वक्ष्यमाणप्रकारेण बभाषे ॥ ६-३३ ॥

(संजीविनी-६-३४) **भक्तोऽसीति**। हे निषादाधिप गुह मम भक्तोऽसि—शक्तोऽसि—अनुरक्तोसि—दासोऽसि अनुचरोऽसि—अत एव राज्यं शाधि—राज्यं पालय—हुश्नुभ्यो हेर्धिः इति धिरादेशः—धि च इति सकारलोपः—हे गुह वनेचराणाम् किरातानां वनगोचराणाम् वनं गोचरो विषयो येषां ते तथोक्ताः—तेषाम् एको राजा त्वं नः अस्माकं सहायोऽसि—सहायभूतोऽसि। गङ्गाप्रतरणरूपं भावि कार्यं हृदि निधाय सहाय इति उच्यते ॥ ६-३४ ॥

(संजीविनी-६-३५) **कुलोचितमिति**। हे गुह कुलोचितं शबरकुलस्य अनुरूपं वचनं वक्षि ब्रूषे—कुलोचितं शक्त्यनुरूपं ब्रवीषि—गङ्गाप्रतीर्णौ गङ्गाप्रतरणे नः कर्णधारो नाविको भव—कर्णधारस्तु नाविक इत्यमरः—तॄधातोः क्तिनि तीर्णिः इति रूपम् —ऋल्वादिभ्यः इति क्तिनो निष्ठावद्भावात् तकारस्य नकारः—सत्यव्रतानां सत्यसन्धानां रघूणां बालेषु वृद्धेषु च असत्यं नास्ति ॥ ६-३५ ॥

(संजीविनी-६-३६) **व्यतिव्रजेतामिति ।** पुष्पवन्तौ सूर्यचन्द्रौ—एकयोवत्या पुष्पवन्तौ दिवाकरनिशाकरौ—यदि व्यतिव्रजेताम् व्यत्यासेन गच्छेताम्—पश्चिमदिग्भागे उदयं गत्वा प्राक् अस्तमयं भजेतां चेदित्यर्थः—निखिलाश्च ताराः समस्तानि उडूनि खाद् आकाशाद् यदि निष्पतेयुः यदि पतेयुः—मेरुर्यदि चलेत्—अनलश्च शीतो यदि भवेत् तदापि तस्मिन् कालेऽपि रघवः मिथ्या न वदन्ति—मिथ्येत्यव्ययम् ।। ६-३६ ।।

(संजीविनी-६-३७) **दत्त्वा वरमिति ।** प्रजानां पतिः दशरथः केकयनन्दनायै कैकेय्यै वरं दत्त्वा—पूर्वं वरदानम् उक्त्वा—अद्य इदानीं कथं न दद्यात्—सर्वप्रकारेण वरं दद्यादेवेत्यर्थः—वनं व्रजामि वनं गच्छामि इति उक्त्वा निरेत्य निर्गत्य रामः अहं जनापहास्यः जनानाम् अपहसनीयः कथं निवर्तेय निवृत्तो भवेयम्—निवृत्तो न भवामि ।। ६-३७ ।।

(संजीविनी-६-३८) **पितरावितिः ।** यद् यस्मात् कारणात् गुरू पितरौ कैकेयीदशरथौ ममानुरोध्यौ मम अनुवर्तनीयौ—तत् तस्मात् तदाज्ञया अयोध्याम् अमुचम् अत्यजम्—मुच्लृ मोक्षणे इत्यस्मात् लुङि रूपम्—तयोराज्ञयैव समचीवरयावहि वल्कलानि आच्छादयाव—पुच्छभाण्डचीवरात् णिङ् इति णिङि चीवरशब्दात् चीवरयते इति रूपम्—नौ आवयोः जटाभरस्तु इह स्वपुर्यामिव एतस्यां शृङ्गबेरपुर्यामिव श्वो भविता श्वः भविष्यति ।। ६-३८ ।।

(संजीविनी-६-३९) **तद् याहीति ।** तत् तस्यात् याहि गच्छ—निजालये स्वगृहे निद्राहि निद्रितो भव—श्वः प्रातः त्वं नाविकः सन् अस्मान् नदीं भागीरथीं तारय—राजसूतः—सुमन्त्र इत्यर्थः—पुरम् अयोध्यां रथं नेष्यति गमयिष्यति—उभयत्र द्विकर्मकत्वम्—त्वमपि शृङ्गबेरपुरम् अधिष्ठास्यसि—अधिशीङित्यादिना कर्मत्वम् (आधारस्य) ।। ६-३९ ।।

(संजीविनी-६-४०) **इति ब्रुवाणमिति ।** इति अनेन प्रकारेण ब्रुवाणं उक्तवन्तं रामं प्रणिपत्य धन्वी कार्मुकी कवची निषङ्गी च सन् गुहः सन्नाहिना सन्नाहवता सौमित्रिणा लक्ष्मणेन सार्धम् वृक्षतले निषण्णः आसीनः सन् जाग्रदेव विनिद्र एव सन्—नाभ्यस्तादिति नुमभावः—उवास तस्थौ ।। ६-४० ।।

(संजीविनी-६-४१) **कथाविशेषानिति ।** सौमित्रिः लक्ष्मणश्च गुहाय कथाविशेषान् कथयन् तस्थौ—सुमन्त्रः रथान्तिके रथसमीपे पल्लवक्लृप्तशय्यः पल्लवैः

क्लृप्ता रचिता शय्या शयनं यस्य स तथोक्तः चिन्ताकुलः सन् न्यषदत् निषीदति स्म —षद्लृ धातोः लुङि रूपम्—पुषादीत्यादिना अङादेशः (च्लेः) ।। ६-४१ ।।

(संजीविनी-६-४२) **प्रवालशय्यामिति ।** रात्रौ वनशाखिमूले प्रवालशय्याम् अधिशय्य पल्लवशयने शयित्वा—अधिशीङित्यादिना (आधारस्य) कर्मत्वम्—वल्कावगुण्ठी वल्कलेन कृतावगुण्ठनः सन् स रामः इष्वासतूणीरकृतोपधानः चापेन निषङ्गेण च कृतोपबर्हः सन् रामासहितः सीतासमेतः सन् सुष्वाप निदद्रौ ।। ६-४२ ।।

(संजीविनी-६-४३) **प्रवालशयनमिति ।** तदा रामस्य निद्रासमये तरुतले प्रवालशयनं पल्लवनिर्मितशयनं रघुपतेः रामस्य फणीन्द्रशयनं शेषरूपशयनम् (इव) बभौ —तदङ्घ्रिविनिपीडनं विदधती तस्य रामस्य पादयोः संवाहनं कुर्वती जनकात्मजा सीता च जलधिजा लक्ष्मीः (इव) बभूव ।। ६-४३ ।।

(संजीविनी-६-४४) **सदारे इति ।** सदारे सीतासमेते कुमारे रामे वनद्रौ वनवृक्षे वनवृक्षमूले शयाने निद्राति सति—सुमन्त्रे विशद्रौ विह्वले रथाग्रे रथपुरोभागे निषद्रौ आसीने सति—उभयत्र दाधेट्सिशदसदो रुः (३-२-१५९) इत्यनेन ताच्छील्ये रुप्रत्ययः —निषादाधिनाथे गुहे विषण्णे दुःखिते निषण्णे आसीने सति रात्रिः निशा कराला भयंकरा सती कथंचिद् व्यतीयाय कृच्छ्रेण व्यत्यगात् ।। ६-४४ ।।

(संजीविनी-६-४५) **उषसि मरुतीति ।** उषसि प्रभातकाले मरुति वायौ मन्दं यथा भवति तथा वाति सति—मन्दारमालाकलकलयुतकाकव्यूहकोलाहलेन मन्दाराः पारिजातवृक्षाः—मन्दारः पारिजातकः इत्यमरः—तेषां मालासु पङ्क्तिषु कलकलेन युतानां युक्तानां काकानां गृहबलिभुजाम् व्यूहस्य कोलाहलेन कलकलेन असौ रामः जनकतनुजया सीतया सह जागरामास । मूर्ध्नि शिरसि मुकुलितकरपद्मः मुकुलीकृतकराम्बुजः सन् गङ्गां ववन्दे भागीरथीं प्रणनाम ।। ६-४५ ।।

(संजीविनी-६-४६) **उदयशिखरीति ।** उदयशिखरिशृङ्गासङ्गिनि उदयशिखरिणः उदयाचलस्य शृङ्गे शिखरे असिङ्गिनि सङ्गवति द्वादशात्मनि सूर्ये अरुणकिरणजालैः अरुणवर्णैः किरणसमूहैः किंचिदभ्युज्जिहाने किंचिद् अभ्युदयति सति रामभद्रः सरामः सीतासमेतः सन् सुरसरिति भागीरथ्यां प्रातः अस्नात् प्रातः काले स्नानं कृतवान्—सपदि तदानीमेव सहसुमन्त्रः सुमन्त्रसमेतः सन् लक्ष्मणश्च उक्तमन्त्रः उच्चारितमन्त्रः सन् अस्नात्—सुमन्त्रेण सह वर्तते इति सहसुमन्त्रः—(पद) विभागः —स रामः प्रातः अस्नात् सरामः (इति) ।। ६-४६ ।।

(संजीविनी-६-४७) **नैयग्रोधमिति** । गङ्गारोधसि गङ्गातीरे आरात् समीपे कर्णधाराधिपेन गुहेन नैयग्रोधं न्यग्रोधसंबन्धि क्षीरम् आनाय्य भृङ्गश्रेणीमेचकानीचकान्ति भृङ्गश्रेण्याः भ्रमरपङ्क्त्याः मेचकेन नैल्येन अनीचकान्ति केशपाशं वेणीं कर्तुं जटाः कर्तुम् मुमोच ।। ६-४७ ।।

(संजीविनी-६-४८) **सरोजनेत्रस्येति** । सरोजनेत्रस्य कमललोचनस्य पुरोजनेः अग्रजस्य—पुरः पुरस्तात् जनिः जन्म यस्य स तथोक्तः—तस्य जटाकलापं विरचय्य ततः अनन्तरं लक्ष्मणः पुरः स्थितः रामस्य पुरस्तात् स्थितः सन् भूतपञ्चके—पञ्चसु महाभूतेषु इत्यर्थः—शोचति आक्रोशति सति तादृशं तादृग्विधं जटाकलापं यत्नेन प्रयत्नेन बबन्ध—आत्मनो जटाकलाबन्धनं चकारेत्यर्थः—जनिरुत्पत्तिरुद्भवः इत्यमरः ।। ६-४८ ।।

(संजीविनी-६-४९) **त्रस्ता शिर इति** । सीता त्रस्ता भीता सती विकृतवेषौ रामलक्ष्मणौ दृष्ट्वेत्यर्थः—शिरस्ताडयति स्म शिरस्ताडनं चकार—सुमन्त्रः सुमन्त्रः विलपन् भूमौ लुलोठ—गुहः स्वमात्मानं स्वकीयशरीरं हन्तुम् उदायुधः उद्धृतायुधः सन् बन्धुतया बन्धुसमूहेन बलात् बलात्कारेण न्यषेधि निषिद्धोऽभूत्—ग्रामजनबन्धुभ्यस्तल् इत्यनेन समूहार्थे तल् प्रत्यये बन्धुतेति रूपम्—षिधु संराद्धौ इत्यस्मात् कर्मणि लुङि न्यषेधि इति रूपम् ।। ६-४९ ।।

(संजीविनी-६-५०) **तटस्थसिद्धर्षीति** । तटस्थसिद्धर्षिकुटुम्बिनीनाम् भागीरथीतीरस्थानाम् ऋषीणां च कुटुम्बिनीनाम् पत्नीनाम्—दाराः स्यात्तु कुटुम्बिनी इत्यमरः—आबालवृद्धम् वृद्धबालसहितं रुदतां जनानां भिल्लाङ्गनानां भिल्ल-स्त्रीणां च बहुबाष्पपूरैः अधिकैः बाष्पप्रवाहैः गङ्गाप्रवाहो द्विगुणीबभूव—अनेन तेषां दुःखातिशयः उक्तः ।। ६-५० ।।

(संजीविनी-६-५१) **न साश्रव इति** । शुचा दुःखेन अन्विताः समेताः रथ्यहयाः रथाश्वाः साश्रवः सबाष्पाः सन्तः न जिहेपिरे हेषास्वनं न चक्रुः—नाविकाः कर्णधाराश्च नौषु तरीषु मिथः अन्योन्यं न बभाषिरे—तटद्रुमस्थाः भागीरथीतटद्रुमस्थाः अण्डजाः पक्षिणश्च विरेटुः चुक्रुशुः—मृगाश्च बाष्पं मुमुचुः—रामवनवाससमये तिर्यग्जन्तूनामपि शोकातिशयोऽभूत्—इतरेषां तु किं पुनरित्यर्थः ।। ६-५१ ।।

(संजीविनी-६-५२) **उपारतायामिति** । भागीरथीरोधसि भागीरथीतटे नरेन्द्रसूनोः रामलक्ष्मणयोः जटासु बद्धासु सतीषु रुदतां रोदतां रोदनं कुर्वतां जनानाम्

बाष्पवृष्टौ उपारतायाम् शान्तायां सत्याम् खाद् आकाशात् नन्दनपुष्पवृष्टिः सुरकुसुमवर्षं पापत ।। ६-५२ ।।

(संजीविनी-६-५३) **ततः समाहूयेति ।** ततः अनन्तरं प्रसन्नधीः—निर्मलबुद्धिः मन्त्रकोविदः नीतिशास्त्रज्ञः सः जननाथनन्दनः रामः सुमन्त्रम् आर्य पूज्य इति समाहूय तद्दुःखितस्य सुमन्त्रस्य मुखे बाष्पं करेण हस्तेन परिमृज्य मन्दं यथा भवति तथा हसन् वक्ष्यमाणप्रकारेण आह ।। ६-५३ ।।

(संजीविनी-६-५४) **किं रोदिषीति ।** हे सुमन्त्र प्राकृतवत् किं रोदिषि किमर्थं रोदनं करोषि—रुदादिभ्यः सार्वाधातुके इति इडागमः—प्रवयाः वृद्धः मम पिता—दशरथ इत्यर्थः—भवद्धिया तव बुद्धया अयोध्यां प्रशास्ति—अयोध्यां पालयति—वनं यियास्वोः वनं प्रति गन्तुम् इच्छतोः आवयोः तथा बुद्धिं वद यथा वनाद् आवां पुनः आजिहीवहि पुनरागच्छेव ।। ६-५४ ।।

(संजीविनी-६-५५) **तत् सारथे इति ।** तत् तस्मात् कारणात् हे सारथे सुमन्त्र सज्जयावहं सज्जयम् आवहन्तं शताङ्गं रथम्—शताङ्गः स्यन्दनो रथः इत्यमरः—शतयोजनातिगैः शतयोजनानि अतीत्य गच्छद्भिः अश्वैः सज्जय सज्जं कुरु—संयोजय—अद्यैव संगवे काले—उदयादारभ्य षड्घटिकापर्यन्तं प्रातःकालः । ततः परं षड्घटिकापर्यन्तं संगवकालः—तस्मिन् साकेतम् उपेहि अयोध्यां गच्छ—तथा स्थितं दुःखितं तातम् उपेत्य दशरथमुपेत्य सान्त्वय आश्वासय—(पद) विभागः—सज्जय सज्जयावहम् (इति) ।। ६-५५ ।।

(संजीविनी-६-५६) **यथा मयीति ।** मयि प्रोषुषि प्रवासं गते सति पुत्रवत्सलः पिता दशरथः आमदागमम् मदागमपर्यन्तं वपुः शरीरं यथा न जह्यात् न त्यजेत् तथा भगवान् षड्गुणोपेतः पुरोहितो वसिष्ठः तिरोहितः वियुक्तः क्षणमपि मावस्थित क्षणकालमपि न तिष्ठतु—ष्ठा गतिनिवृत्तौ इति धातोः लुङि रूपम्—समवप्रविभ्यः रथ. इत्यात्मनेपदम्—स्थाध्वोरिच्च इति इकारादेशः—ह्रस्वाद् अङ्गात् इति सकारलोपः ।। ६-५६ ।।

(संजीविनी-६-५७) **प्राणानिति ।** जरती वृद्धा ममाम्बा मम माता कौसल्या अमुं पुरोवर्तिनं मां यदि क्षणं न पश्येत् तर्हि प्राणान् विमुच्चेत्—प्राणान् त्यजेत्—तत् तस्मात् कारणात् आशु शीघ्रं गत्वा सवनं वनसमेतं मन्नाम मम नामधेयं जपित्रोः रामो वनाय गत इति वदतोः—पित्रोः कौसल्यादशरथयोः—पिता मात्रा इत्येकशेषः—शुचम्

उल्लुनीहि शोकं नाशय—(पद) विभागः—प्रणान् विमुच्चेद् यदि माम् अमुं च (इति) ॥ ६-५७ ॥

(संजीविनी-६-५८) **प्रणिधिभिरिति** । अविरतम् अनवरतं सुकलाभिरतं शोभनकलासु विद्यासु आसक्तं सकलाभिमतम् सकलानां जनानाम् इष्टं युधाजिदगारगतम् युधजिद्गृहं प्राप्तवन्तं रथवाजिमदेभरतम् रथेषु वाजिषु अश्वेषु मदेभेषु मत्तगजेषु च अभिरतम् भरतं प्रणिधिभिः गूढचारैः झटिति शीघ्रम् आनयत—एतैः विशेषणैः भरतस्य राजलक्षणानि उक्तानि ॥ ६-५८ ॥

(संजीविनी-६-५९) **स च परमेष्ठीति** । स भरतश्च परमेष्ठिसुतस्य ब्रह्मपुत्रस्य वसिष्ठमुनेः गिरं वचं सुष्ठु सम्यक् अनुतिष्ठतु अनुसंदधातु—नयनिष्ठपटिष्ठयविष्ठसखः नयनिष्ठाः नीतिज्ञाः—पटिष्ठाः कार्यकुशलाः—यविष्ठाः युवानः तेषां सखा सन् पितुर्दशरथस्य राज्यपदम् अधितिष्ठतु—अधिशीङित्यादिना (आधारस्य) कर्मत्वम्—राज्यपदे तिष्ठतु इत्यर्थः ॥ ६-५९ ॥

(संजीविनी-६-६०) **इति रामेति** । इति पूर्वोक्तं रामवचः श्रुत्वा कृतसाष्टाङ्गनतिः कृतसाष्टाङ्गनमस्कारः चिरं रुदित्वा विलप्य रथनद्धतुरंगमः रथे बद्धाश्वः सन् सुमन्त्रः अनाथवत् नाथशून्य इव नगरम् अयोध्यां प्रति गन्तु प्रतस्थे—समवप्रविभ्यः स्थः इति आत्मनेपदम् ॥ ६-६० ॥

(संजीविनी-६-६१) **रथेति** । आराद् दूरात् निमित्तात् रथकिङ्किणीघणघणारवम्—रथशब्देन रथतुरंगमा विवक्ष्यन्ते—रथतुरंगमाणां किङ्किणीनां क्षुद्रघण्टिकानां घणघणारवम्—घणघणेत्यनुकारिशब्दोऽयम् घणघणेति ध्वनिम् अनिशम्य अश्रुत्वा—तद्रथरजोऽपि (तद्रथतुरंगमगमनजनितं) रजः पासु च अनिशाम्य अदृष्ट्वा—इतरेतराननविलोकनखिन्नाः सन्तः तत्र एव सीतारामलक्ष्मणा एव सिन्धुतटसीमनि भागीरथीनटभूमौ तस्थुः ॥ ६-६१ ॥

(संजीविनी-६-६२) **रथयानेति** । रथयानसजनितबाष्पलोचनौ रथगमनेन उत्पादितानि बाष्पाणि ययोस्ते तथोक्ते—रथयानसंजनितबाष्पे लोचने ययोस्तौ तथोक्तौ—तदनु तदनन्तरम् विपिनोत्सुकौ वनवासे समुत्सुकौ चीरवसनौ वल्कलवसनौ जटाधरौ रामलक्ष्मणौ अवलोक्य स गुहः शुचा दुःखेन सरिति भागीरथ्यां मङ्क्तुम् ऐहत ऐच्छत् ॥ ६-६२ ॥

(संजीविनी-६-६३) **अश्रुदूषितमिति** । सः जानकीपतिः रामः अर्णसो जलस्य—अम्भोऽर्णस्तोयपानीयेत्यादिरमरः—तटे तीरे दुःखितं कर्णधारपतिं गुहं सकरुणं

सदयं यथा भवति तथा सान्त्वयन् समाश्वासयन् जाह्नवीपयसि भागीरथीजले अश्रु-दूषितं मुखम् अचिक्षलत् क्षालयामास--क्षल शौचकर्मणि इत्यस्मात् (चौरादिकात्) लुङि रूपम्--णिश्रिद्रुस्रुभ्यः (३-१-४८) इत्यादिना चङ ।। ६-६३ ।।

(संजीविनी-६-६४) **अब्रवीच्चेति।** स रामः अब्रवीच्च। किमिति--हे गुह वृथा मा रुदः (मा रोदीः)--रुदिर् अश्रुविमोचने इत्यस्मात् लुङि रूपम्--इरितो वा अङादेशः--प्रियम् (अस्माकमिष्टम्) (त्वदीयं मुखं) चारु सुन्दरं दर्शयितुमर्हसि--(न तु अश्रुभिराविलयितुम्)--आपगां भागीरथीं तरीतुं तरितुं नावम् आनय--तरिम् आनय--नः अस्माकं गिरं वचनं कदापि नावमानय नोल्लङ्घय--विभागः नावम् आनय--तरीतुम् आपगाम्--न अवमानय--(इति) ।। ६-६४ ।।

(संजीविनी-६-६५) **आतरमिति।** हे गुह मे निजसख्यं (त्वयि मम स्निग्धताम्) आतरं कलय तरपण्यं कलय--तव चेतः किमर्थं कातरं भवति। हे गुह प्रातरेव (अस्मान्) अपरतीरम् अंहय प्रापय--अहि गतावित्यास्मात् (णिजन्तात्) लोटि रूपम्--त्वां भरतवत् भरतम् इव भ्रातरं कलये (मन्ये) ।। ६-६५ ।।

(संजीविनी-६-६६) **इहेति।** हे गुह त्वं सुखी सन् इह शृङ्गबेरनगरे नन्द समृद्धः (प्रजापश्वादिसंपन्नो) भव--नः अस्माकं गहनं वनं श्रयणीयम्--अतः अस्मात् प्रदेशात् न हि मा निवृतः (अवश्यं) निवृत्तो भव--द्वौ नञौ प्रकृतमर्थं द्रढयतः इति वचनात्--इतः प्रदेशाद् (अवश्यं)--निवृत्तो भवेत्यर्थः--वृतु वर्तने इन्त्यस्मात् लुङि मध्यमपुरुषैकवचनम्--पुषादीत्यादिना अङादेशः--(द्युद्भ्यो लुङीति परस्मैपदम्) --वनवासानन्तरं प्रतिनिवृत्य अदम्भवता दम्भहितेन भवता त्वया भरतेन च सह इदं राज्यं भजेयम् स्वीकुर्याम्--विभागः भजेयम् अदम्भवता भरतेन च (इति) ।। ६-६६ ।।

(संजीविनी-६-६७) **परमिति।** नावा तरण्या साधनभूतया अस्मासु परं पारं भागीरथ्याः अपरतीरम्--पारावारे परार्वाची तीरे पात्रं तदन्तरम् इत्यमरः--यातेषु गतेषु सत्सु आवां विना आवाभ्यां विना--पृथग्विनेत्यादिना तृतीयार्थे द्वितीया--अमूभिः चमूभिः किरातसैन्यैः सह निवृत्तः सन् त्वं दश त्रीणि च एकं वर्षाणि तावत् चतुर्दशसंवत्सरपर्यन्तम्--तावच्छब्दः साकल्ये--कालाध्वनोरत्यन्तसंयोगे इति द्वितीया --मदीक्षां प्रतीक्षस्व मद्दर्शनं निरीक्षस्व--अहं यावन्निवर्ते निवृत्तो भविष्यामि--यावत्पुरानिपातयोर्लट् (३-३-४) इत्यनेन भविष्यदर्थे लट्--चतुर्दशसंवत्सरपर्यन्तं मदागमननिरीक्षणं कुरु--तावदेव निवृत्तो भविष्यामीत्यर्थः--नावा विना आवाम् अमूभिः इति (पद)विभागः ।। ६-६७ ।।

(संजीविनी-६-६८) **श्रुत्वेति** । तत् पूर्वोक्तं रामवचः श्रुत्वा निषादराजो गुहः ——राजाहःसखिभ्य इत्यादिना टच् प्रत्ययः——सविषादबाष्पैः विषादेन संजातबाष्पैः सह वर्तते इति सविषादबाष्पः——तादृशः सन् इति वक्ष्यमाणप्रकारेण बभाषे——किमिति चतुर्दशाब्दापगमे चतुर्दशसंवत्सरान्ते त्वा न द्रक्ष्यामि चेत् तदा तर्हि अनलं वेक्ष्यामि अग्निप्रवेशं करिष्यामि——विश प्रवेशने इत्यस्मात् लृटि रूपम्——व्रश्चादिना षत्वम्——षढोः कः सीत्यनेन कत्वम्——(पद) विभागः चतुर्दशाब्दापगमे न चेत् (इति) ।। ६-६८ ।।

(संजीविनी-६-६९) **आनाय्येति** । पटुकर्णधारैः निपुणैर्नाविकैः——कर्णधारस्तु नाविकः इत्यमरः——नावम् आनाय्य रामादीन् तरणिम् आरोप्य गङ्गां भागीरथीम् तान् रामादीन् तारयति स्म——गुहोऽपि गद्गदरुद्धकण्ठः गद्गदेन रुद्धकण्ठः सन् ततः तस्मात् प्रदेशात् शृङ्गबेरं प्रत्यगात् ययौ——इणो लुङि रूपम्——इणो गा लुङीति गादेशः——गातिस्थेति सकारलोपः ।। ६-६९ ।।

(संजीविनी-६-७०) **तत इति** । ततः तदनन्तरम् भरद्वाजमुनिं प्रणम्य तत्प्रार्थितः तेन भरद्वाजेन प्रार्थितः सन् सानुजनिः अनुजन्मना सहितः सन्——अनु पश्चात् जनिः जन्म यस्य स तथोक्तः——तेन सहितः——सानुजनिः——सजानिः जायासहितः रामः वन्याशनं कन्दमूलफलादिकं प्रत्यवसायं अनुभुज्य——वन्भनमभ्यवहारः प्रत्यवसानं च जेमनं जग्धिः इति हलायुधः——मुन्याश्रमे भरद्वाजाश्रमे ता रजनी निनाय तां रात्रिं गमयामास ।। ६-७० ।।

(संजीविनी-६-७१) **प्रातरिति** । रामः प्रातःकाले मुनीन्द्रं भरद्वाजम् प्रणम्य तच्छिष्यसंदर्शितया तस्य भरद्वाजस्य शिष्येण दर्शितया सरण्या मार्गेण गत्वा——सरणिः पद्धतिः पद्या वर्तन्येकपदीति च इत्यमरः——तृतीययामे यमस्वसारम् यमस्य भगिनीम् अनौकाम् अविद्यमानतरणीं यमुनां व्यतीयाय ततार——तरण्या यमुनातरणे दोषो विद्यते इति [4]पुराणोदितम् ।। ६-७१ ।।

(संजीविनी-६-७२) यमुना तरणप्रकारमाह——**तृण्येति** । तृण्यामयं तृणसमूह-विकारम्——पाशादिभ्यो यः (४-२-४९) इति समूहार्थे यप्रत्ययः——तृणानां संहतिस्तृण्या इत्यमरः——कीचकदारुनद्धं कीचकदारुनिर्मितम् संघातम् उडुपम् विदेहपुत्री सीताम् आरोप्य उभौ रामलक्ष्मणौ उभाभ्यां दोर्भ्याम् हस्ताभ्याम् नुदन्तौ प्रेरयन्तौ सन्तौ तौ अनुतेरतुः यमुनां तेरतुः ।। ६-७२ ।।

(संजीविनी-६-७३) **उडुपेति** । उडुपाङ्कागता उडुपमध्यं गता उडुपानना चन्द्र-वदना सौरभवासितापगापा स्वकीयशरीरसौरभेण वासिताः आपगायाः यमुनायाः

आपः जलानि यया सा सौरभवासितापगापा—ऋक्पूरब्धूः पथामानक्षे (८-४-७४) इति अकारः समासान्तप्रत्ययः—अजाद्यत इति टाप्—सती पतिव्रता असौ ललना सीता त्रयाणां नः अस्माकम् अभयं कुरु इति तां सूर्यसुतां यमुनां ववन्दे ।। ६-७३ ।।

(संजीविनी-६-७४) **तटमिति** । ते त्रयः रामादयः तपनदुहितुः यमुनायाः अवाच्यम् तटम् दक्षिणतीरम्—गत्वा—प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः इत्यमरः—श्यामनाम्नः श्यामसंज्ञकस्य वटस्य अधः वटप्रदेशे प्रहरं याममात्रं स्थित्वा —कालाध्वनोरिति द्वितीया—अहरन्तारुणे अहरन्ते सायंकालसमये अरुणे अरुणवर्णे भगवति षड्गुणोपेते उष्णद्योते उष्णद्युतौ सूर्ये पश्चिमाद्रौ पश्चिमसमुद्रे पतति सति प्रदोषे सायंकाले आदिकाव्यप्रबन्धुः आदिकाव्यं रामायणं तस्य प्रबन्धुः निर्मातुः अत एव आदिकवेः वामलूरोद्भवस्य वाल्मीकेः निर्दोषां दोषरहितां वसतिम् आश्रमम् अगमन् प्रापुः—गमेर्लुङि रूपम्—पुषादीत्यनेन अङादेशः—(मेघविस्फूर्जिता वृत्तम्—रसर्त्वश्वैर्यमोन्सौ ररगुरुयुते मेघविस्फूर्जिता स्यात् इति लक्षणम्) ।। ६-७४ ।।

(संजीविनी-६-७५) **कृतेति** । कृतिना कुशलेन व्रतिना नियमव्रतेन कविना तपसां धनिना तपोधनेन मुनिना वाल्मीकिना कृतसत्कृतयः कृतसत्काराः सन्तः ते त्रयो रामादयः रजनीमतिवाह्य रात्रिं गमयित्वा निजसन्ततिमूलम् स्वकीयसन्ततेर्मूलकारणं [5]परोरजसम् सूर्यम् उषसि प्रभातसमये अनमन् प्रणेमुः—सन्ध्यावन्दनं चक्रुरित्यर्थः ।। ६-७५ ।।

(संजीविनी-६-७६) **वाल्मीकिनेति** । अथ अनन्तरं प्रभाते प्रातःकाले वाल्मीकिना प्रहितः आमन्त्रितः वनितासमेतः सीतासमेतः सन् अधिज्यशरासनेन लक्ष्मणेन सह रामः वनानि पश्यन् दक्षिणस्यां दिशि जगाम ययौ ।। ६-७६ ।।

(संजीविनी-६-७७) **गिरिमिति** । अथ अनन्तरम् विलोक्यतटं प्रेक्षणीयसानुम् तटभुवि पर्वतप्रान्तभूमौ पुण्डरीकहरिकेसरिसंकुलितम् व्याघ्रैः कपिभिः सिंहैश्च संकुलितम् चित्रकूटं गिरिं विलोक्य स दशरथनन्दनो रामः मिथिलापतिनन्दनया सीतया सह तरक्षुतरःक्षुभितम् तरक्षूणां वृकाणाम्—तरक्षुस्तु मृगादनः इत्यमरः—तरसा वेगेन क्षुभितं व्याकुलितं चित्रकूटं गिरिम् अधिरुरुक्षति स्म अधिरोढुमिच्छति स्म ।। ६-७७ ।।

(संजीविनी-६-७८) चित्रकूटाधिरोहणम् आह—**अग्रे इति** । अग्रे पुरस्ताद् अधिज्यधन्वा अधिज्यशरासनः सौमित्रिः लक्ष्मणः—ततः अनन्तरम् तरलायताक्षी चञ्चलविशाललोचना सीता च—ततः अनन्तरम् स्वयमात्तचापः स्वयमपि स्वीकृ-

तशरासनः सन् रामश्च इत्यनेन प्रकारेण ते त्रयो रामादयः चित्रकूटम् अध्यरुक्षन्—अधिरोहणं चक्रुः—रुह बीजजन्मनि प्रादुर्भावे च इत्यस्मात् लुङि रूपम्—शल इगुपधादित्यादिना च्लेः क्सादेशः—ढत्वकत्वषत्वाणि ।। ६-७८ ।।

(संजीविनी-६-७९) **मनोरमेति** । गिरेः चित्रकूटस्य गरीयसि उन्नते शृङ्गे शिखरे मनोहरतमं प्रदेशम् समवलोक्य दृष्ट्वा कनीयसा अनुजेन लक्ष्मणेन रचितपर्णशालालयः (तत्र) निर्मितपर्णशालानिवासः सन् प्रियङ्करणतापसद्विजजनप्रियंभावुकः प्रियाणि कुर्वता तापसानां तपस्विनां द्विजानां ब्राह्मणानां प्रियंभावुकः प्रियतमः—प्रियाणि कुर्वतां मुनीनां प्रियतम इत्यर्थः—रघुनन्दनो रामः जनकनन्दनासंयुतः सीतासमेतः सन् उवास तस्थौ—चित्रकूटशिखरे लक्ष्मणेन विनिर्मितायां पर्णशालायां सीतासमेतस्तस्थौ इत्यर्थः—प्रियाणि क्रियन्ते एभिरिति प्रियङ्करणाः—आढ्यसुभगेत्यादिना ख्युन्प्रत्ययान्तः निपातितः—ते च तापसाश्च—तपः शब्दाद् अणि रूपम्—ते च ते द्विजजनाश्च—प्रियंभावुकाः इत्यत्र कर्तरि भुवः इति सूत्रेण खुकञ् प्रत्ययः—उभयत्र खित्यनव्ययस्येति अरुर्द्विषदिति च मुमागमः ।। ६-७९ ।।

इति श्रीगोपीनाथसूरिविरचितायां संजीविन्याख्यायाम् उदारराघवव्याख्यायां
षष्ठः सर्गः समाप्तः ।।

NOTES TO SAṂJĪVINĪ—Canto VI

[1] This simply shows that the author was a devout devotee of Śiva. The point of *bhasma-vilepana* is not found in the original (s. o. V.R).

[2] See verse IV. 75.

[3] It seems intended to praise indirectly (the qualities of) the *Udārarāghava*. the present poem;

[4] I am unable to trace the source for this information.

[5] Rucipati in his commentary on the *Anargharāghava* explains the expressions: *parorajobhiḥ* thus: *Pāraskaraprabhṛtīni ca iti suṭ nipātitaḥ. parorajobhiḥ – rajasaḥ paraiḥ – sāttvikaiḥ. parorajasa iti sup supeti samāsaḥ.* (NSP, edn., 1939; p. 32).

उदारराघवे महाकाव्ये सप्तमसर्गस्य व्याख्या संजीविनी
श्रीराम्-पल्लि-गोपीनाथसूरिविरचिता

(संजीविनी-७-१) **चित्रकूटमिति** । रामे चित्रकूटमधितिष्ठति सति चित्रकूटाचले निवसति सति—अधिशीङित्यादिना आधारस्य कर्मत्वम्—पुत्रशोकविधुरः पुत्रशोकेन दुःखितः सन् धरणीशो दशरथः नन्दनस्य पुत्रस्य रामस्य वनवृत्तिम् वने वृत्तान्तम् अवैतुं ज्ञातुम् स्यन्दनस्य रथस्य परिवृत्ति प्रत्यागमनम् अकाङ्क्षीत् ऐच्छत्—काङ्क्षि इच्छायामित्यस्मात् लुङि रूपम्—इट ईटीति सकारलोपः ।। ७-१ ।।

(संजीविनी-७-२) **पञ्चमे इति** । सुमन्त्रः पञ्चमे अह्नि पञ्चमे दिवसे विनिवृत्य प्रत्यागत्य उदश्रुः उद्गतबाष्पः सन् रामलक्ष्मणविनिर्गमहीनाम् रामलक्ष्मणयोर्वनवासेन हेतुना शून्याम् अयोध्या पुनः प्राविशत् विवेश—कथमिव स्थिताम्—द्युमणिचन्द्र-विहीनाम् दिवाकरनिशाकराभ्या वियुक्ताम् द्यामिव आकाशमिव स्थिताम् ।। ७-२ ।।

(संजीविनी-७-३) पुनः कथमिव स्थिताम् तत्राह—**राजेति** । राजहंसरहितां राजहंसेन शून्याम् वापीमिव स्थिताम्—पुनः रत्नदीपरहिताम् रत्नान्येव दीपाः—तैः शून्या शालामिव गृहमिव स्थिताम्—सुरद्विपशून्याम् सुरद्विपेन ऐरावतेन वियुक्तां स्वर्णदीमिव स्थिताम्—पुनः वीतकोकिलशुकाम् वीताः कोकिलाश्च शुकाश्च यस्यां सा तथोक्ता ताम्—वन्याम् वनसमूहमिव स्थिताम्—पाशादिभ्यो यः इति समूहार्थे यप्रत्ययः—अयोध्यां प्राविशदिति संबन्धः ।। ७-३ ।।

(संजीविनी-७-४) **हीनेति** । ([1]हीनहेषितविषण्णतुरंगाम् अस्तबृंहितसमस्त-गजेन्द्राम् । आपणेषु परिहीनपदार्थाम् अङ्गणेष्वनुषितार्जकसार्थाम् ।।) पुनः कथंभूताम् —हीनहेषितविषण्णतुरंगाम् हीनेन स्वल्पेन हेषास्वनेन विषण्णाः खिन्नाः तुरंगाः अश्वाः यस्यां सा तथोक्ताम्—पुनः कथंभूताम् आपणेषु निषद्यासु परिहीनाः विहीनाः शून्याः पदार्थाः यस्यां सा तथोक्ताम्—पुनः कथंभूताम्—अङ्गणेषु प्राङ्गणेषु अनुषिताः (व्यवहाराभावे)न अनवस्थिताः अर्जकसार्थाः वणिक्समूहाः यस्यां सा तथोक्ता—ताम् अयोध्यां प्राविशदिति संबन्धः ।। ७-४ ।।

(संजीविनी-७-५) **रङ्गवल्लीति** । (रङ्गवल्लिरहिताङ्गणरथ्याम्—धूलिधूसरवधूमुखचन्द्राम् । लुप्तसर्जरसगुग्गुलुधूपाम् मन्दिरोज्झितमहामणिदीपाम् ।।) पुनः कथंभूताम्—रङ्गवल्लिरहिताङ्गणरथ्याम् रङ्गवल्लीभिः रञ्जकरेखाभिः रहिताः शून्याः अङ्गणरथ्याः प्राङ्गणवीथ्यः यस्यां सा तथोक्ता—ताम्—पुनः कथंभूताम्—धूलिधूसरवधूमुखचन्द्राम् ।। ७-५ ।।

(संजीविनी-७-६) **देहलीष्विति** । देहलीषु अनिहिताक्षतसूनाम् गृहावग्रहणीषु अनिहितानि अनिक्षिप्तानि अक्षताः कुसुमानि च यस्यां सा तथोक्ता—ताम्—पुनः कथंभूताम् मन्दिरोज्झितमहामणिदीपाम् मन्दिरैः उज्झिताः वियुक्ताः महामणय एव दीपाः यस्यां सा तथोक्ता—ताम्—पुनः कथंभूताम्—शान्तदेवगृहनर्तनगानाम्—शान्तानि उपरतानि देवगृहेषु देवालयेषु नर्तनानि गानानि च यस्यां सा तथोक्ता—ताम्—वीतवारवनिताकरतालत्यक्तनृत्तमदमत्तमयूराम् वीतवारवनिताकरतालाः त्यक्तनृत्ताः मदेन मत्ता मयूराः यस्यां सा तथोक्ता—ताम् अयोध्यां प्राविशदिति संबन्धः ।। ७-६ ।।

(संजीविनी-७-७) **तामिति** । तां पूर्वोक्ताम् अयोध्यां प्रविश्य हतशोभान् नष्टमुखकान्तीन् शतशः अनेकान् नागरानपि निरीक्ष्य दृष्ट्वा सलज्जः लज्जासमेतः सन् सुमन्त्रः राजवर्त्मनि राजमार्गे क्वचिदपि क्वचिन्नरेऽपि निजदृष्टि स्वकीयदृष्टि न निहितवान् अनिक्षिप्तवान् सन् जगाम ययौ ।। ७-७ ।।

(संजीविनी-७-८) **त्वमिति** । हे सारथे त्वं रथेन साधनभूतेन रघुनाथं रामम् अनैषीः अगमयः—तं राम क्व नु कुत्र स्थले विहाय त्यक्त्वा आगाः आगतोऽसि—उभयत्र लुङि रूपम्—पौरजनौघे पुरजनस्य समूहे इति इत्थम् उदीरयति उक्तवति सति सुमन्त्रः क्वचिदपि कदाचिदपि उत्तरं नादत्त न ददौ ।। ७-८ ।।

(संजीविनी-७-९) **मन्दिरमिति** । सुमन्त्रः नरपतेर्दशरथस्य मन्दिरम् उपगम्य गृहं गत्वा स्यन्दनं रथं च बहिरेव अन्तःपुरस्य बहिरेव निधाय मन्दिरार्पितहयः वाजिशालानिक्षिप्ततुरगः सन् दुरन्तशुचम् अतिदुःखितं नरनाथं दशरथम् ईक्षितुम् अगात्—द्रष्टुम् आययौ—इणो लुङि रूपम् ।। ७-९ ।।

(संजीविनी-७-१०) **अन्तरेत्येति** । सूतः सुमन्त्रः अन्तरेत्य अन्तःपुरमागत्य सुदतीनां तरुणीनाम् अवरोधवधूनाम् अन्तःपुरसुन्दरीणां रुदितम् आचकर्णत् रोदनं शश्राव—आचकर्णदिति आकर्णयतेः लुङि रूपम्—णिश्रीत्यादिना चङ—मञ्चपार्श्वम्

उपगम्य खट्वासमीपं प्राप्य विचेष्टं चेष्टारहितं पार्थिवम् अवन्दत तं दशरथं प्रणनाम ।। ७-१० ।।

(संजीविनी-७-११) **स्तम्भमूलमिति** । स्तम्भमूलमुपगम्य सौधस्तम्भमूलं प्राप्य विषण्णः सन् स्थण्डिले निकटसीम्नि शय्यासमीपस्थले निषण्णः आसीनः सन् सुमन्त्रः राममातरम् अपृच्छत्—कौसल्यां पप्रच्छ—किमिति—हे अम्ब इदानीं स्वामिनः दशरथस्य कथमिव दशा कीदृशी अवस्था इति ।। ७-११ ।।

(संजीविनी--७-१२) **सा इति** । अधिमञ्चं शय्यायां समीपे उपविश्य अधिपतिं दशरथं व्यजनेन वीजयन्ती रघुपतेर्जनयित्री रामस्य माता सा कोसलपुत्री कौसल्या मन्त्रिणं सुमन्त्रं मन्दं यथा भवति तथा वक्ष्यमाणप्रकारेण अभ्यधित उवाच—अभिपूर्वाद् दधातेः लुङि रूपम् ।। ७-१२ ।।

(संजीविनी-७-१३) **निर्गता इति** । मे वत्सकाः मे शिशवः यस्मिन् अहनि यस्मिन् दिने वनोत्सुकचित्ताः वनवासे समुत्सुकहृदयाः सन्त. नगरतो निर्गताः अयोध्यापुरतो निर्याताः तस्मिन् समये निर्गतः निर्यातः सन् एष दशरथः रथघोषं निशमयन् शृण्वन् रथध्वनिं त्वरया वेगेन द्वारदेशम् अगमत् द्वारदेशं प्राप—गम्लृ धातोः लुङि रूपम् ।। ७-१३ ।।

(संजीविनी-७-१४) **स्यन्दनेनेति** । एष दशरथः अग्रे पुरस्तात् भवता त्वयैव रघुनन्दनं रामं स्यन्दनेन रथेन साधनभूतेन नीयमानम् वनायेत्यर्थः अवयन् जानन्—हे राम राम हे रमणीयगुणाब्धे मनोज्ञगुणनिधे हे राघव क्व चलसीति कुत्र गच्छसीति (वदन्) पपात ।। ७-१४ ।।

(संजीविनी-७-१५) **द्वारसीमनीति** । महिलाः वनिताः द्वारसीमनि द्वारप्रदेशे इलायां भूमौ लुठन्तं दशरथं मम सौधमानयन्त मत्प्रासादं प्रापयन्—मञ्चके शय्यायां विनिपत्य मूर्छितं दशरथं अमूः वनिताः मुहुः रुदत्यः सत्य. असमान्त्वन् सान्त्वयामासुः ।। ७-१५ ।।

(संजीविनी-७-१६) **तत्प्रभृतीति** । तत्प्रभृति तदा प्रभृति अयं दशरथः अनुन्मिषिताक्षः उन्मेषशून्यलोचनः सन् नेक्षते न पश्यति—किमपि नैव शृणोति किंचिन्मात्रमपि नैव शृणोति—रोदिति रोदनं करोति—श्वसिति निश्वसिति—न स्वपिति न निद्राति—किं च निरिन्द्रियचेष्टः निर्गतेन्द्रियव्यापारः सन् चेष्टितुं नेष्टे न ईष्टे समर्थो न भवति—रुदिर् अश्रुविमोचने श्वस प्राणने ञि ष्वप् शये इत्येषां धातूनां रुदादिभ्यः इत्यनेन इडागमः—(पद) विभागः स्वपिति ईष्टे—चेष्टितुम् (इति) ।। ७-१६ ।।

(संजीविनी-७-१७) **क्वासीति ।** हे वत्स हे रघुनन्दन हे राम क्वासि कुत्र तिष्ठसि इति अनेन प्रकारेण एकदा एकस्मिन् काले वदति—जातविषादः जातदुःखः हे केकयि इह एतस्मिन् रामवनवासविषये रामेण ते किम् आगः कृतम् को वापराधः कृतः इति अन्यदा अन्यस्मिन् काले वदति ।। ७-१७ ।।

(संजीविनी-७-१८) **तल्पत इति ।** स दशरथः तल्पतः शय्यायाः पतति भूमौ लुठ्यति—पुनः तल्पमेव अधिशेते पुनः शय्यायामेव शेते—विसज्ञः संज्ञाशून्यः सन् जल्पतः अभिदधतो जनस्य स्वल्पमपि प्रतिवचः अल्पमपि प्रतिवचनं नाभिदधाति न वदति ।। ७-१८ ।।

(संजीविनी-७-१९) **रामनामेति ।** कोऽपि रामनाम रामस्य नामधेयं यद्यभ्यधत्त यदि अब्रवीत् तर्हि रामः कुत्र राघवः कुत्र तिष्ठतीति दिक्षु मार्गति मृगयते—अत एव त्वं च त्वमपि राम इति यद्यवदिष्यः ब्रवीषि चेत् तर्हि प्रत्यभोत्स्यत प्रतिबोधं लप्स्यते वचोऽपि अभणिष्यत् प्रतिवचनमपि वदेत्—वद व्यक्तायां वाचि बुध अवगमने भण व्यक्तायां वाचि इति एतेभ्यो धातुभ्यः लृङि रूपम् ।। ७-१९ ।।

(संजीविनी-७-२०) **तन्निशम्येति ।** स सुमन्त्रः हृद्गतस्खलितगद्गदकण्ठ्याः हृदयगतेन स्खलनेन निरुद्धकण्ठ्याः तस्याः कौसल्यायाः तद् वचनं निशम्य तं दशरथं बुबोधयिषुः प्रतिबोधयितुमिच्छन् दृग्भ्याम् अम्बु उत्सृजन् जलं विसृजन् इदं वक्ष्यमाणं वचनम् उवाच ।। ७-२० ।।

(संजीविनी-७-२१) तदेवाह—**राम रामेति ।** हे राम राम रामणीजनकामवनिताजनस्य मन्मथ श्यामतामरसकान्त्यभिराम नीलोत्पलस्य कान्तिरिव मनोज्ञः—तद्वद्रमणीयशरीरकान्तिरित्यर्थः—हे रामणीयकनिधे रमणीयतायाः स्थानभूत हे राजललाम राजश्रेष्ठ बहुधामन् (बहूनां गुणानां स्थानभूत) प्रीतिधाम भव (मम प्रीतिस्थानं भव)—रामणीयकमित्यत्र योपधाद् गुरूपोत्तमाद् (५-१-१३२) इत्यनेन भावार्थे वुञ् प्रत्ययः ।। ७-२१ ।।

(संजीविनी-७-२२) **राम राम वदतीति ।** सुमन्त्रे रामनाम रामस्य नामधेयं वदति सति हे राम क्वासि कुत्र तिष्ठसि—मां वद मां ब्रूहि मया सह भाषणं कुरु इति (वदन्) उत्थितः सन् राजा दशरथः शयनमध्ये निषण्णः शयनमध्ये उपविष्टः सन् सन्नकण्ठम् अभणत् अल्पस्वनं यथा भवति तथा उवाच ।। ७-२२ ।।

(संजीविनी-७-२३) **सारथे इति ।** किमिति तदेवाह—हे सारथे कुमारौ रामलक्ष्मणौ जनकेन्द्रकुमारी जनकराजपुत्री सा जनी स्नुषा—समाः स्नुषाजनीवध्वः इत्य-

मरः—कुत्र दिशि स्थिताः कथय—वनान्ते वनमध्ये शीतवाततपनातपतान्ताः शीतवायुना तपनातपेन सूर्यातपेन च तान्ताः खिन्नाः सन्तः सासवो वसन्ति किमु सप्राणाः निवसन्ति किमु इति ।। ७-२३ ।।

(संजीविनी-७-२४) **अद्येति** । अद्य पञ्चमम् अहः वर्तमानः पञ्चमो दिवसः—सहजानेः सीतासमेतस्य—जायाया निङ इति निङ आदेशः—सानुजस्य लक्ष्मणसहितस्य नगरात् निर्गतस्य अयोध्यायाः निष्क्रान्तस्य उत्तमगुणस्य श्रेष्ठगुणस्य मुनिवेषधरस्य मे शिशोः मम पुत्रस्य रामस्य वृत्तं न हि जाने वृत्तान्तं न हि अवगच्छामि ।। ७-२४ ।।

(संजीविनी-७-२५) **ब्रूहि वृत्तमिति** । हे सुमन्त्र पृथुकानां शिशूनाम् रामादीनाम् अखिलं समस्तं वृत्तं ब्रूहि वृत्तान्तमखिलं वद—कानि वनानि भजन्ते सेवन्ते—जनवृन्दं त्वां च मां च केकयीं च कथमिव न अनिन्दीत् कथं वा नोपक्रोशति स्म—उपाक्रोशदेवेत्यर्थः—अनिन्दीत् इति लुङि रूपम् ।। ७-२५ ।।

(संजीविनी-७-२६) **पृच्छतीति** । पृथिवीभुजि दशरथे इति अनेन प्रकारेण पृच्छति सति सूतः सुमन्त्रः पौरजानपदवञ्चनपूर्वम् पुरजनानां जनपदेभ्यः समागतानां च वञ्चना पूर्वा यस्मिन् तत् तथोक्तम्—अर्धरात्रसमये रथयानं रथगमनं च अविरतम् अनुस्यूतं यानं प्रयाणमपि शशंस उवाच—दशरथायेत्यर्थः ।। ७-२६ ।।

(संजीविनी-७-२७) **शृङ्गबेरेति** । शृङ्गबेरनगराधिपशृङ्गम् गुहम्य सङ्गम् तस्य गुहस्य रथ्यहरिमन्थकदानम् रथ्यानां रथाश्वानां हरिमन्थकानां चणकानां दानम्—पत्तनाय शृङ्गबेराय पुनरागमनार्थम् पश्चादागमनाय गुहस्य प्रार्थनां च अकथयत् उवाच ।। ७-२७ ।।

(संजीविनी-७-२८) **इङ्गुदीतरुतले इति** । इङ्गुदीतरुतले तापमतरुमूलप्रदेशे रजन्यां रात्रौ देव्या सीतया सह रामस्य शयनं लक्ष्मणस्य गुहस्य च नातिदूरे समीपे तरुमूले वृक्षमूले निवासं च चख्यौ उवाच ।। ७-२८ ।।

(संजीविनी-७-२९) **आत्मनोऽपीति** । रथधुर्यसमीपे रथधुर्याणां रथाश्वानां समीपे तृणानां पल्लवानां च शय्यामाश्रितस्य अध्ययोध्यम् अयोध्यायाम् अवनीश्वरचिन्ताविह्वलस्य अवनीश्वरस्य दशरथस्य चिन्ताखिन्नस्य—अयोध्यायां दशरथः कामवस्थां गत इत्येवंरूपेण विचारेण खिन्नस्येत्यर्थः—आत्मनोऽपि निशि रात्रौ जागरम् आख्यत् जागरणं च उवाच—ख्या प्रकथने इत्यस्मात् लुङि अख्यदिति रूपम् —अस्यतिवक्तीत्यादिना अङादेशः ।। ७-२९ ।।

(संजीविनी-७-३०) **जाह्नवीपयसीति** । जाह्नवीपयसि भागीरथीजले स्नानपूर्वकम् अखिलं समस्तम् कथयित्वा रामलक्ष्मणपरस्परवेणीबन्धदारुणकथां च तदा वृत्ताम् आख्यत् ।। २-३० ।।

(संजीविनी-७-३१) **तज्जटेति** । तज्जटानहनजानि तयोः रामलक्ष्मणयोः जटानहनेन जटाबन्धनेन संभूतानि जनानां करुणानि दीनानि क्रन्दितानि रुदितानि उदभूवन् उत्पन्नान्यासन्—इह अयोध्यायाम् उच्चैः अधिकः तद्ध्वनिः तस्य रोदनस्य ध्वनिः नागरैः पुरजनैः न श्रुतः किम् इत्युक्त्वा सुमन्त्रः रुरोद ।। ७-३१ ।।

(संजीविनी-७-३२) **सारथाविति** । सारथौ सुमन्त्रे रुदति विलपति सति सौधगतानां प्रासादगतानां योषितां रुदितघोषः रोदनध्वनिः उदस्थात् उत्पन्नः—उदस्थादिति ष्ठाधातोर्लुङि रूपम् उत्पूर्वात्—गातिस्थेत्यादिना सकारलोपः—हे वत्स राम जटिलोऽसि जटावानसि—वनान्ते वनमध्ये वल्कली वल्कलवान् इत्युक्त्वा ऐन्दुमतेयः दशरथः—स्त्रीभ्यो ढक् इति ढक् प्रत्ययः—अरुदत् रुरोद—रुदिर् अश्रुविमोचने इत्यस्मात् लुङि रूपम्—इरितो वा (३-१-५७) इत्यनेन अडादेशः ।। ७-३२ ।।

(संजीविनी-७-३३) **सूत शेषमपीति** । हे सूत सुमन्त्र शेषम् अवशिष्टमपि वृत्तम् मे सविशेषं यथा भवति तथा ब्रूहि वद—अतः परं तपस्वी स रामः किम् अकरोत्—लक्ष्मणः कथमभूत्—कामवस्थां प्राप्तवान्—मैथिली सीता कथम् आसीत्—कामवस्थां गता इति अनेन प्रकारेण नृपतिः दशरथः सुमन्त्रम् अपृच्छत् ।। ७-३३ ।।

(संजीविनी-७-३४) **सोऽभ्यधादिति** । स सुमन्त्रः अभ्यधात् अवोचत्—अभिपूर्वात् धाञ् धातोः लुङि रूपम्—गातिस्थेत्यादिना सकारलोपः—किमित्यवोचत्—तत्राह—तरुणतापसवेषौ तरुणस्य तापसस्य वयस्थस्य वेष इव वेषो ययोस्तौ तौ रामलक्ष्मणौ वीक्ष्य जनकजा सीता भयभीता भयविह्वला सती अथ अनन्तरं शिरः ताडयन्ती शिरस्ताडनं कुर्वती अरोदीदिति यत् रोदनमकार्षीत् इति यत्—तेन शिरस्ताडनयुक्तरोदनकर्मणा भूः स्फुटति भूमिर्विदीर्णा भवति—द्यौः आकाशश्च शीर्यति विदीर्णा भवति—भूम्याकाशयोः कम्पोऽभूदित्यर्थः ।। ७-३४ ।।

(संजीविनी-७-३५) **आननमिति** । भुवि निपत्य भूमौ पतित्वा कराभ्यां हस्ताभ्याम् आननं मुखं आघ्नती ताडयन्ती आर्ता दुःखिता सती सीता अनाथवत् नाथरहितेव दशरथं जनकं च मुहुः आह्वयत् पुनः पुनः आजुहाव—रामेण रामचन्द्रेण मुहूर्तात् क्षणमात्रादेव समबोधि प्रबोधिता ।। ७-३५ ।।

(संजीविनी-७-३६) **प्रेक्ष्येति** । तां सीतां प्रेक्ष्य अहम् उर्व्याम् अलोठिषम् भूमौ विलोठनम् अकार्षम्—गुहः सुरसिन्धौ भागीरथ्यां मङ्क्तुम् ऐहत ऐच्छत्—मज्जनं कर्तुम् इयेष—रघुपतिः रामः वृद्धवत् वृद्ध इव स्वयमेक एव आर्तान् दुःखितान् अस्मान् समबोधयत् प्रबोधयामास ।। ७-३६ ।।

(संजीविनी-७-३७) **मामिति** । मां प्रबोध्य मां ज्ञापयित्वा परिरभ्य आलिङ्ग्य च हे सुमन्त्र त्वं पितुरेव समीपं प्रयाहि दशरथस्य समीपं गच्छ—हे गुह त्वम् अत्र जाह्नवीं सरितं तरीतुं भागीरथीतरणं कर्तुम् नावम् आनय इति नौ आवाम् अशिषत् प्रजिघाय —नौ इति द्वितीयाद्विवचनम्—अशिषदिति शासु अनुशिष्टौ इत्यस्मात् लुङि रूपम्—सर्तिशास्तीत्यादिना (३-१-५६) च्लेरङ—शासः इदङ्हलोः (६-४-३४) इत्यनेन इकारः ।। ७-३७ ।।

(संजीविनी-७-३८) **मामवेक्ष्येति** । स रामः मामवेक्ष्य दृष्ट्वा मम वृद्धौ पितरौ प्रणमतः नमस्कुर्वतः मे मम वाचा सान्त्वय उपलालय—रामो वां नमस्कृत्य मा शोचतम् इति जगादेति ताभ्यां कथय इत्यर्थः—आगताय युधाजितो गृहात् आगताय भरताय राज्यं दत्त प्रयच्छत इति सर्वान् मन्त्रिणः ईरय सर्वान् सचिवान् कथय इति उदीर्य परिरभ्य पुनः मां प्राहिणोदिति संबन्धः ।। ७-३८ ।।

(संजीविनी-७-३९) **क्ष्मामिति** । भरतः पितृदत्तां दशरथेन दत्तां क्ष्मां प्रशास्तु —भूमिं पालयतु—सः भरतः सकलं राज्यं शासितुमर्हति पालयितुं समर्थो भवति—लक्ष्मणावरजनिः शत्रुघ्नः भरतेऽपि प्रेमभक्तिविनयान् वितनोतु स्नेहभक्तिविनयान् करोतु—इत्युदीर्य परिरभ्य मां प्राहिणोदिति संबन्धः ।। ७-३९ ।।

(संजीविनी-७-४०) **केकयीमिति** । आर्य पूज्य केकयीम् कैकेयीम् अनमम् प्रणतोऽस्मि—सुमित्रामपि अनंसिषम् सुमित्रामपि प्रणतवान् अस्मि—णमु प्रह्वत्वे शब्दे च इत्यस्मात् लुङि रूपम्—अम्बाः इतरमातरश्च अवन्दिषि प्रणतवान् अस्मि—वदि अभिवादनस्तुत्योः इत्यस्मात् लुङि रूपम्—आत्मनेपदी वदिः—गरिष्ठं श्रेष्ठं वसिष्ठमभिवाद्य प्रणम्य मन्त्रिणां सचिवानां च अञ्जलिबन्धम् अकृषि अञ्जलिबन्धं कृतवान् अस्मि—अकृषीति कृणो लुङि रूपम् आत्मनेपदे—इत्युदीर्य परिरभ्य पुनर्मां प्राहिणोदिति संबन्धः ।। ७-४० ।।

(संजीविनी-७-४१) **याहीति** । हे सुमन्त्र याहि गच्छ—शताङ्गं सज्जय रथं सज्जीकुरु—शताङ्गः स्यन्दनो रथः इत्यमरः—अद्य सायम् अयोध्याम् उपयाहि—अद्य सायंकालसमये अयोध्यां गच्छ इत्युदीर्य उक्त्वा पुनः परिरभ्य मां

प्राहिणोत् मां प्रजिघाय—अहमद्य इह समागाम् अत्र समागतोऽस्मि—इणो लुङि रूपम् ।। ७-४१ ।।

(संजीविनी-७-४२) **मद्रथे इति ।** जाङ्घिकधुर्ये जाङ्घिका जवाधिकाः धुर्याः अश्वाः यस्य स तथोक्तः—तस्मिन् मद्रथे चलति सति—जङ्घालोऽतिजवस्तुल्यौ जङ्घाकरिकजाङ्घिकौ इत्यमरः—अथ अनन्तरं कर्णधारपतिरपि गुहोऽपि नावा तरण्या साधनभूतया तान् रामादीन् त्रिपथगां तारयेत्—भागीरथीतरणं कारयेत्—मुनयोऽपि स्वालयान् स्वाशयांश्च नयेयुः (रामादीन्) गमयेयुः ।। ७-४२ ।।

(संजीविनी-७-४३) **दक्षिणामिति ।** रामः दण्डाकावनं दण्डाकारण्यम् अभीति भयरहितं करिष्यन् दक्षिणां दिशम् उपेष्यति दक्षिणां दिशं गमिष्यति—हे नरेन्द्र दशरथ तत्कृते तदर्थं तस्मै रामाय खलु विलप्य विलापमकृत्वा—अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा (३-४-१८) इति प्रतिषेधे गम्ये खलूपपदात् कृञः क्त्वा—क्त्वे ल्यप्—स्वास्थ्यमेव भज स्वास्थ्यमेव प्राप्नुहि—अत्र एतस्मिन्नर्थे मा चिचिन्तः चिन्तां मा कुरु—मा विचारय—चितिधातोः चौरादिकात् लुङि रूपम् ।। ७-४३ ।।

(संजीविनी-७-४४) **इत्युदीरयति इति ।** सुमन्त्रे इत्युदीरयति इत्थमुक्तवति सति राजविसृष्टे निलयाय निर्गते च सति सः दशरथः पूर्ववत् शयने एव पतित्वा श्वासमात्रविधृतासुः निश्वासमात्रधृतप्राणः अभूत्—भूधातोः लुङि रूपम् ।। ७-४४ ।।

(संजीविनी-७-४५) **अर्धरात्रेति ।** अथ अनन्तरम् स राजा दशरथः अर्धरात्रसमये राघवं विचिन्त्य विचिन्त्य रामं पुनः पुनर्मनसि स्मृत्वा वनितासु पत्नीषु निद्रितासु सतीषु निर्गतासुः निर्गतप्राणः सन् अधिमञ्चम् खट्वायामेव शरीरम् अमुञ्चत् मञ्चके शरीरं तत्याजेत्यर्थः—शे मुचादीनाम् इति नुमागमः ।। ७-४५ ।।

(संजीविनी-७-४६) **प्रत्युषसीति ।** प्रत्युषसि प्रभातसमये—उषःप्रत्युषसी अपि इत्यमरः—अतिनिमीलितनेत्रम् अतिमुकुलितनयनं शयने निश्चलगात्रं मञ्चके निश्चलशरीरं तं दशरथं वीक्ष्य योषितः वनिताः झटिति शीघ्रं भूमिमनैषुः—भूमिं गमयामासुः—दशरथमित्यर्थः—णीञ् प्रापणे इत्यस्मात् लुङि रूपम् अनैषुरिति । हा हताः स्मः हा नष्टा भवामः इति उच्चैः चुक्रुशुः रुरुदुः ।। ७-४६ ।।

(संजीविनी-७-४७) **केकयीति ।** काश्चित् ताः पूर्वोक्तवनिताः कैकेयीवदनाय प्रसारितहस्ताः सत्यः—क्रोधादिति भावः—आहतकुचाः ताडितस्तनाः सत्यः रुरुदुः चुक्रुशुः—अथ अनन्तरं सौधः मन्दरघातैः मन्दरवलनैः मथ्यमानः विलोड्यमानः अपां निधिरिव अध्वनत्—समुद्र इव दध्वान ।। ७-४७ ।।

(संजीविनी-७-४८) **संभ्रमादिति ।** प्रकृतयः प्रजाः क्षितिदेवाः ब्राह्मणाश्च वामदेवसमेतो वसिष्ठश्च सजयन्तसुमन्त्राः जयन्तसुमन्त्रसहिता मन्त्रिणश्च अमात्याश्च साश्रवः सबाष्पाः सन्तः संभ्रमात् सभायां सममिलन्त संगता अभवन् ।। ७-४८ ।।

(संजीविनी-७-४९) **ते विचार्येति ।** ते पूर्वोक्ताः प्रकृत्यादयः विचार्य राज्ञो दशरथस्य अग्निसात्कृतिः अग्निसंस्कारः इह एतस्मिन् काले नेति न भवतीति निरचेषत निश्चिक्युः—निर्पूर्वात् चिञ् चयने इत्यस्मात् लुङि रूपम्—कटाहे गन्धतैलपरिरन्धितं गन्धतैलाभ्यां पक्वीकृतम् अङ्गं शरीरं मणिमन्दिरमध्ये मणिमयसौधमध्ये व्यक्षिपन्त निक्षिप्तवन्तः ।। ७-४९ ।।

(संजीविनी-७-५०) **आनयेति ।** भरतमानयेति त्वरया इति अमात्याः सचिवाः प्रणिधिवर्गं चारवर्ग प्रैषयन्—प्रजिध्युः—सोऽपि प्रणिधिवर्गश्च सर्वसुखधाम सर्वसुखानां स्थानं राजगृहनाम राजगृहसंज्ञकं युधाजिद्धाम युधाजिन्नगरम् जगाम प्राप ।। ७-५० ।।

(संजीविनी-७-५१) **तैरिति ।** तैः पूर्वोक्तैः चारैः यथा कथनधर्षितधैर्यः—रामो वनाय गतः—दशरथश्च मृतः इति यथावत्कथनेन धर्षितधैर्यः विनाशितधैर्यः सन् अत एव आकुलमनाः व्याकुलचित्तः भरतः गमनाय प्रैर्यत प्रेरितः—सयवीयान् अनुजसहितः शत्रुघ्नसहितः—कनिष्ठयवीयोऽवरजानुजाः इत्यमरः—भरतः जननी-जनयित्रा कैकेयीजनकेन आर्यकेण आर्यकसंज्ञकेन राज्ञा संयुयाव संगतोऽभूत्—युधा-तोर्लिटि रूपम् ।। ७-५१ ।।

(संजीविनी-७-५२) **आनिनायेति ।** युधाजित् तस्य भरतस्य रथम् आनिनाय रथमानाययामास—भ्रातरौ तौ भरतशत्रुघ्नौ तद् रथमधिरुह्य निरैताम् युधाजिन्नगरात् निर्जग्मतुः—तावुभौ भरतशत्रुघ्नौ तम् उदन्तं पूर्वोक्तं रामवनवासादिकं वृत्तान्तं विविदतुः ज्ञातवन्तौ—इतरे अन्ये आर्यकमुख्याः न विविदुः न ज्ञातवन्तः—नीतिवि-रुद्धत्वादित्यर्थः ।। ७-५२ ।।

(संजीविनी-७-५३) **प्राप्येति ।** पञ्चभिरहोभिः दिनैः अयोध्यां प्राप्य रघुपतेः रामस्य निर्गमं वनबासरूपं राज्ञो दशरथस्य च स्वर्गमं मरणरूपम् अत एव हतमुदं नष्टहर्ष तम् उदन्तं वृत्तान्तं शृण्वता भरतेन रुरुदे अरोदि—(पद) विभागः—हतमुदं तम् उदन्तम् (इति) ।। ७-५३ ।।

(संजीविनी-७-५४) **क्रोधेति ।** वसिष्ठः साश्रुनयनस्य सबाष्पलोचनस्य भरतस्य —क्रोधशोकरुदितानि निरस्य—कैकेयीं प्रति क्रोधः—रामस्य वनवासेन शोकः—दशरथ-

मरणेन रुदितम् एतानि निरस्य—अथ अनन्तरम् ते पितरं पश्येति नीत्वा तस्मै भरताय तादृशं नृपमदर्शयत् तादृग्विधावस्थापन्नं दशरथं दर्शयामास ।। ७-५४ ।।

(संजीविनी-७-५५) **तमिति** । स भरतः तं विलोक्य तं दशरथं दृष्ट्वा भुवि पतितः सन् मूर्छाम् आर्च्छत् मूर्छां जगाम—ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु इत्यस्मात् लङि रूपम्—तदनन्तरम् उच्छ्वसितवान् विललाप—किमिति—हे तात तैलकटाहे किं वससि किं प्रयोजनं तिष्ठसि—सभायां संसदि हेमपीठमधितिष्ठ सिंहासने तिष्ठ ।। ७-५५ ।।

(संजीविनी-७-५६) **किं न पश्यसीति** । हे तात निमीलितनेत्रः मुकुलितनयनः सन् मां किं न पश्यसि—किं नेक्षसे—गुरुं कुलगुरुं वसिष्ठं किं नोपतिष्ठसि—न सेवसे—कैकेयीजठरजातम् अत एव अभाग्यं मां किं न वदसि—किंप्रयोजनं न ब्रवीषि—किं वा न वादयसे किं न भाषयसे—(पद) विभागः वदसि वादयसे वा (इति) ।। ७-५६ ।।

(संजीविनी-७-५७) **तदिति** । तत् तथा पूर्वोक्तप्रकारेण विलप्य भरतः विरतः विलापादुपरतः सन् दहनसात्कृतदेहं भूपतिं दशरथं सारवजले सरयूजले न्युप्य—तस्मै निवापं जलाञ्जलिं दत्त्वेत्यर्थः—जलरोधसि उदकतीरे अमुष्य दशरथस्य और्ध्वदेहिकं चकार श्राद्धादिकं चकार—पारलौकिकक्रियां चकार—ऊर्ध्वदेहाच्च वक्तव्यम् (४-३-६० इति सूत्रे श्लोकवार्त्तिकं दृश्यताम्) इति ठञ् प्रत्ययः ।। ७-५७ ।।

(संजीविनी-७-५८) **अप्रविश्येति** । पितृशून्यं दशरथशून्यं दशरथेन वियुक्तं नगरमप्रविश्य अयोध्याप्रवेशमकृत्वा भ्रातृवीक्षणमपेक्ष्य रामस्य दर्शनमपेक्ष्य सदैन्यः आत्तमातृगुरुनागरबन्धुः मातरः कौसल्यादयः गुरुर्वसिष्ठः नागराः पुरजनाः बन्धवश्च आत्ताः आनायिताः यस्य स तथोक्तः—भरतः—गुहनावा गुहस्य तरण्या दिव्यसिन्धुमतरत्—भागीरथीं ततार ।। ७-५८ ।।

(संजीविनी-७-५९) **चित्रकूटमिति** । चित्रकूटमुपगम्य चित्रकूटाचलं प्राप्य सरामं सीतासमेतं चीरिणं वल्कलिनं जटिलं जटावन्तं रामम् ऐक्षत—रामं ददर्श—सशोकः दुःखसमेतः सन् भरतः दण्डवत् प्रणनाम प्रणामं कृतवान्—लोकः जनः तं भरतं सविस्मयं यथा भवति तथा अलोकत अपश्यत् ।। ७-५९ ।।

(संजीविनी-७-६०) **अध्ययोध्यमिति** । अध्ययोध्यम् अयोध्यायां नीत्या नीतिमार्गेण अवनीमव भूमिं पालय इति भरतः व्याहृत अवादीत्—विपूर्वात् हृञ् हरणे इत्यस्मात् लुङि रूपम् व्याहृत इति (आत्मनेपदे)—तदनन्तरं हे भरत त्वं पितृदत्तां

दशरथेन दत्तां महीं भूमिं मन्मतेन हि मदनुज्ञयैव भजस्व पालय इति रामो भरतं बभाषे उवाच ।। ७-६० ।।

(संजीविनी-७-६१) **पादुके इति** । हे राम चतुर्दशवर्षाणि चतुर्दशवत्सरकालम्——कालाध्वनोरिति द्वितीया—अर्चितुं पूजयितुं मम पादुके दिश देहि—ते पादुके महीम् अवताम् भूमिं पालयताम्——इति एवम् उक्त्वा अस्य पादुके उद्धृत्य भरतः शिरसि अधात् शिरसा दधौ ।। ७-६१ ।।

(संजीविनी-७-६२) **स्थाण्डिले इति** । स्थाण्डिले स्थण्डिलशायिनि——सोऽस्य निवासः इत्यण् प्रत्ययः——जटिनि जटावति चीरिणि वल्कलिनि नन्दिग्रामनिवासिनि फलाशे कन्दमूलफलाशे इह एतस्मिन् मयि कृपां मा जहिहि न त्यज——अथ नैष्यः यदि नागमिष्यः तर्हि अध्यनलम् अनले प्रैष्यम् प्रवेक्ष्यामि इति स भरतः अनमत् प्रणनाम ।। ७-६२ ।।

(संजीविनी-७-६३) **तं तथेति** । स रामः तथा इत्यङ्गीकृत्य भरतं च गुहं च प्राग् विसृज्य प्रथमम् आमन्त्र्य गुरुमप्यभिवाद्य वसिष्ठं च प्रणम्य ज्ञातिमातृसखिना-गरबन्धूंश्च प्राञ्जलिर्व्यसृजत् विससर्ज——अश्रु च व्यसृजत् विससर्ज ।। ७-६३ ।।

इति श्री-(राम्-पल्लि-)गोपीनाथसूरिविरचितायां संजीविनी-
समाख्यायाम् उदारराघवव्याख्यायां सप्तमः सर्गः ।

NOTES TO SAṂJĪVINĪ—Canto VII

[1] There is some difference in the expressions and the order of these verses between the readings in the MS. 1 and the *Saṃjīvinī* on one hand, and in the Bombay edn. on the other. The essential meaning in the context, however, is not affected. MS. 1 and the *Saṃjīvinī* amount to having one additional verse before verse VII. 5 of the Bombay edn.

उदारराघवे महाकाव्ये अष्टमसर्गस्य व्याख्या संजीविनी
श्री-राम्-पल्लि-गोपीनाथसूरिविरचिता

(संजीविनी-८-१) **प्रस्थित इति ।** अथ अनन्तरं शुभरतः शुभकार्येषु अभिरतः भरतोऽपि चिराय प्रार्थितः अत्यर्थं राज्याय प्रार्थितः सन् नगराय प्रस्थितः अयोध्यानगराय प्रतस्थे—ष्ठा गतिनिवृत्तौ इत्यस्मात् कर्तरि क्तप्रत्यये रूपम्—राघवोऽपि नागरौघपुनरागमशङ्की नागरौघस्य पुरजनस्य समूहस्य पुनरागमनं शङ्कमानः सन् गिरितो निरितोऽभूत् चित्रकूटात् निर्यातोऽभूत् ।। ८-१ ।।

(संजीविनी-८-२) **लक्ष्मणेनेति ।** रघुनाथो रामः लक्ष्मणेन सह पक्ष्मलनेत्रां पक्ष्माणि अनयोः सन्तीति पक्ष्मले नेत्रे—ते तथोक्ते यस्याः सा—ताम्—सिध्मादिभ्यश्च इत्यनेन तदस्यास्त्यस्मिन्नित्यर्थे लच् प्रत्ययः (पक्ष्मलशब्दे)—सीतां च अद्रिशृङ्गमवरोप्य चित्रकूटाचलशृङ्गादवतार्य—दण्डकेषु दण्डकारण्येषु दनुजान् विजिगीषुः राक्षसान् विजेतुम् इच्छुः दक्षिणां दिशमगात् दक्षिणां दिशं प्रति जगाम—इण् गतावित्यस्मात् लुङि रूपम् (अगादिति) ।। ८-२ ।।

(संजीविनी-८-३) **चण्डकार्मुकेति ।** चण्डकार्मुकधरः धनुर्धरः करवाली करवालवान् स रामः दण्डकाभिमुखम् दण्डकारण्यस्य अभिमुखं यथा भवति तथा एत्य गत्वा विप्रवृन्दं मुनिकदम्बकम् अमन्दम् अत्यधिकम् यथा भवति तथा अननन्दत् तोषयामास —टु नदि समृद्धावित्यस्मात् ण्यन्तात् लुङि रूपम्—कथमिव चन्द्रमाः चकोरवृन्दमिव ।। ८-३ ।।

(संजीविनी-८-४) **चित्रकूटसविधे इति ।** स रामः चित्रकूटसविधे चित्रकूटाचलस्य सदेशे—सदेशाभ्याशसविधेत्यादिरमरः—विधातुः पुत्रं ब्रह्मपुत्रम् अत्रिं यावद् अदिदृक्षत अत्रिमहर्षि यावद् द्रष्टुम् ऐच्छत् तावत् सः अत्रिमहर्षिः हृष्यता प्रहृष्यता निजशिष्यगणेन स्वकीयशिष्यकदम्बकेन एनं रामम् आश्रमम् अनीनयत्—रामम् आश्रमम् आनाययामास—णीञ् प्रापणे इत्यस्मात् ण्यन्तात् लुङि रूपम् ।। ८-४ ।।

(संजीविनी-८-५) **वेधस इति ।** अनेधसं काष्ठरहितम् प्रज्वलन्तम् अग्निमिव स्थितम् भान्तं प्रकाशमानम् अर्कमिव सूर्यमिव स्थितं वेधसः पुत्रं ब्रह्मपुत्रम् अत्रिं रामया

सह (भार्यया सह स्थितं) दृष्ट्वा स रामः रामचन्द्रः सरामः गच्छामः इति लक्ष्मणम् ऊचे उवाच—सृ गतावित्यस्मात् लटि सराम इति रूपम्—(पद) विभागः—रामया सह तं निरीक्ष्य सः रामः सराम इति लक्ष्मणम् ऊचे (इति) ।। ८-५ ।।

(संजीविनी-८-६) **नेत्रयोरिति** । ते त्रयोऽपि ते रामादयोऽपि नेत्रयोरमृतमाद-धतं लोचनयोरमृतं कुर्वाणं तम् अत्रिम् रचिताञ्जलि कृताञ्जलि यथा तथा नेमुः प्रणतवन्तः—अथ अनन्तरं सः अत्रिरपि श्रोत्रियैः ब्राह्मणैः सह अवनिपालम् अभीत्य रामम् अभिगम्य यथार्हम् आर्हीत् यथोचितं पूजयामास—अर्ह पूजायामित्यस्मात् लुङि रूपम् ।। ८-६ ।।

(संजीविनी-८-७) **कन्दमूलेति** । इन्दुपिता अत्रिमहर्षिः दत्तमातृकरदत्तम् दत्तस्य दत्तात्रेयस्य मातुः अनसूयायाः करेण दत्तं कन्दमूलफलम् अस्मै रामाय अदत्त—स रामः सानुजः लक्ष्मणसहितः सन् अनेन कन्दमूलफलेन आशितंभवं कृत्वा भोजनं कृत्वा —आशितंभवम् इत्येकं पदम्—आशिते भुवः करणभावयोः (३-२-४५) इत्यनेन खच् प्रत्ययः—अरुर्द्विषदिति खित्यनव्ययस्येति च मुमागमः—निरवारीत् (निर्वृतः आसीत्) सुखं प्राप—निर्पूर्वात् वृञ् वरणे इत्यस्मात् लुङि रूपम्—इट ईटीति सकारलोपः—(पद) विभागः—आशितंभवम् अनेन कृत्वा सः (इति) ।। ८-७ ।।

(संजीविनी-८-८) **जानतीति** । ऋषिभार्या अनसूया जनकजां जनकतनयां जन-कसमुद्भवाम्—अनेन लक्ष्मीर्जनकगृहे समुत्पन्नेति सूचितम्—अन्येष्वप्यवतारेषु विष्णो-रेषा सहायिनी (विष्णुपुराणे-१-९-१४४) इत्युक्तत्वात्—सीतां पुत्रिकामिव पुपूजयि-षन्ती पूजयितुम् इच्छन्ती पूर्वजन्मनि भृगोस्तनयां भृगुसुतां मन्दिरं गृहं प्रति एताम् आगताम्—आङ्पूर्वाद् इण् गतावित्यस्मात् कर्तरि क्तप्रत्यये रूपम् (एताम् इति)—इन्दिरां लक्ष्मीम् अमत अबुद्ध—मनु अवबोधने इत्यस्मात् लुङि रूपम्—तनादिभ्यः इत्यादिना सिचो लुक्—अनुदात्तेत्यादिना अनुनासिकलोपः—पूर्वं भृगुसुताया लक्ष्म्याः क्षीराब्धौ उत्पत्तिः कथमिति पृष्टवान् (पराशरम्) मैत्रेयः—स पराशरः तस्य मैत्रेयस्य उत्तरमाह—क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती (१-९-१४८)—भृगोःख्यात्यां समुत्पन्ना लक्ष्मीर्विष्णुपरिग्रहः इति (विष्णुपुराणे-१-१०-२) ।। ८-८ ।।

(संजीविनी-८-९) **अङ्गरागेति** । अनसूया अङ्गरागवसनाभरणैः अङ्गरागेण च वसनैः वस्त्रैश्च आभरणैश्च रघुपतेः रामस्य अङ्गनां सीताम् अभिपूज्य पुनः पश्चात् दिव्यया दिवि संभूतया सुमनसां पुष्पाणां मालया बालां सीताम् उपास्कृत अलंचकार—डु कृञ् करणे इति धातोः उपपूर्वात् लुङि रूपम् (उपास्कृतेति)—सम्परिभ्यां

करोतौ भूषणे (६-१-१३७) उपात् प्रतियत्नेत्यादिना (६-१-१३९) भूषणार्थे सुडागमः ।। ८-९ ।।

(संजीविनी-८-१०) **किं किमेतदिति** । सा अनसूया एतत् पुरोवर्ति वस्तु किं किमिति कौतुकिनीम् कुतूहलवतीं तां सीताम् कुङ्कुमेन च समस्कृत अलंचकार—करोतेर्लुङि रूपम्—अस्य प्रक्रिया पूर्वमेवोक्ता—शची पुलोमजा रहसि एकान्ते यत् कुङ्कुमं दिव्यं दिव्यगन्धि च दिगधीशानां दिक्पतीनां वधूभ्यः यच्छति ददाति तेन कुङ्कुमेन सीतां समस्कृतेति संबन्धः—(पद)विभागः यत् शची रहसि यच्छति (इति) ।। ८-१० ।।

(संजीविनी-८-११) **पारिजातेति** । महर्षिचिरण्टी अत्रिमहर्षिपत्नी अनसूया पारिजातहरिचन्दनजातं पारिजातेभ्यश्च हरिचन्दनेभ्यश्च संभूतं पुष्पजातं पुष्पकदम्बकम् अभिजातगृहिण्यै सीतायै आचकर्ष (अपचितवती) कल्पवृक्षकुसुमाकर्षणं चकार—सा महर्षिचिरण्टी अनसूया अमुना पुष्पजातेन कचभरं समयंसीत् सीतायाः केशपाशं बबन्ध-सम्पूर्वात् यम उपरमे इत्यस्मात् लुङि रूपम् (समयंसीदिति) ।। ८-११ ।।

(संजीविनी-८-१२) **अर्पणादिति** । अभिनवाभरणानां दिव्याभरणानाम् अर्पणात् निमित्तात् दर्पणाहितमुखी मुकुराभिमुखं निक्षिप्तवदना सती अत एव विलसन्ती प्रकाशमाना रूपसंपदनुरूपविलासा सौन्दर्यातिशयानुरूपविलासा सीता स्वयं साक्षात् श्रीरिव अलक्ष्यत ।। ८-१२ ।।

(संजीविनी-८-१३) **वल्कले चेति** । राघवौ रामलक्ष्मणौ च जनकजा च सीता च वल्कले नवीने नूतने वसने च ते अनसूया प्रादत्त ते वसित्वा आच्छाद्य—प्रत्येकं वस्त्रद्वययुक्ताः ते रात्रिम् उषित्वा रात्रौ स्थित्वा—कालाध्वनोरित्यादिना द्वितीया—प्रातरेव प्रयाणाभिमुखाः सन्तः तम् अत्रिम् अभ्यवन्दिषत प्रणेमुः—वदि अभिवाद-नस्तुत्योरिति धातोः लुङि रूपम् ।। ८-१३ ।।

(संजीविनी-८-१४) **खड्गिनमिति** । असावनसूयाजानिः अत्रिमहर्षिः—अनसूया जाया यस्य सः इति समासः—जायाया निङ इति निङादेशः—सभ्यसमाजे सभ्यानां पूज्यानां सभायां खड्गिनं करवालिनं कवचिनं कवचवन्तं सनिषङ्गम् इषुधियुक्तम् अदभ्रम् अत्यधिकम् अधिज्यम् अधिरोपितज्यं धनुः बिभ्रतं दधानं जानकीपतिम् अभ्य-धित राघवमुवाच—अभिपूर्वात् डु धाञ् धारणपोषणयोः इत्यस्मात् लुङि रूपम् (अभ्य-धितेति)—स्थाध्वोरिच्चेति इकारः—ह्रस्वादङ्गादिति सकारलोपः ।। ८-१४ ।।

(संजीविनी-८-१५) किमिति तदाह—**वत्सेति** । हे वत्स हे राम तामरसाक्षी कमललोचना रमणी सीता रमणीयं सुन्दरं त्वाम् अनुव्रजति अनुगच्छति—असूर्यंपश्यया सूर्यमनवेक्षमाणया—कदापि पर्यटनमकुर्वत्येत्यर्थः—असूर्यपश्येत्येकं पदम्—असूर्यललाटयोरित्यादिना खश् प्रत्ययः—अर्कद्विषहिति खित्यनव्ययस्येति च मुमागमः—अनया भीर्वा (भयशीलया) सीतया सार्धं त्वम् अध्यरण्यं वने कथमटिष्यसि कथं चरिष्यसि—अटधातोः लृटि रूपम् ।। ८-१५ ।।

(संजीविनी-८-१६) **चण्डेति** । चण्डाः भयंकराः केसरिणः सिंहाः यस्मिन् स तथोक्तः—तस्मिन्—गण्डकद्विरदकासरघोरे गण्डकमृगैः द्विरदैः गजेन्द्रैः कासरैः लुलायैश्च घोरे भयंकरे—लुलायो महिषो वाहद्विषत्कासरसैरिभाः इत्यमरः—दण्डकदावे दण्डकारण्ये समन्तात् सर्वतः अन्तकातिशयिनः यममप्यतीत्य वर्तमानाः—अन्तकादप्यतिक्रूरमनसः नरजग्धाः नरभक्षकाः राक्षसाश्च विचरन्ति—अटन्ति (अतः जागरूकैर्भवितव्यमिति भावः) ।। ८-१६ ।।

(इतः परम् एकविंशतिपद्यभागपर्यन्तं व्याख्याग्रन्थपातः मातृकायाम्)

(संजीविनी-८-२१) **तद्धनुरिति** । अध्वनि मार्गे तद्धनुर्ध्वनिभिः भीतैः कासरद्विरदकेसरियूथैः कासराः लुलायाः—द्विरदाः गजाः—केसरिणः सिंहाः—तेषां यूथैः समूहैः अद्रिनितम्बे पर्वतनिकटप्रदेशे सरवं यथा भवति तथा दुद्रुवे द्रुतम्—(भावे लिट्) —वृक्षकदम्बे वृक्षसमूहे पक्षिभिः व्यगमि गतम्—गम्लृ धातोः भावे लुङ् ।। ८-२१ ।।

(संजीविनी-८-२२) **भ्रातराविति** । इषुभृतौ अस्त्रधारिणौ भ्रातरौ रामलक्ष्मणौ कलयन्त्यः पश्यन्त्यः कातराः भीताः भिल्ल्यः भिल्लाङ्गनाः क्वचिद् अपासत भीत्या कुत्रचिदपसरन्ति स्म—केऽपि वृद्धकिराताः रामलक्ष्मणौ अवन्दिषत—केचन फलानि उपनिन्युः—फलान्युपायनानि चक्रुः ।। ८-२२ ।।

(संजीविनी-८-२३) **पक्कणेष्विति** । पक्कणेषु शबरालयेषु—पक्कणः शबरालयः इत्यमरः—श्वनिचये कुक्कुरसमूहे मुखरीकृतदिक्कं ध्वनितं दिङ्मण्डलं यथा भवति तथा बुक्कति भषति सति—वनचर्यः भिल्लाङ्गनाः इह अत्र सधनुषौ सकार्मुकौ इमौ कौ—इयं च कामिनी का इति कौतुकम् ईयुः कुतुहलं प्रापुः ।। ८-२३ ।।

(संजीविनी-८-२४) **मैथिलीमिति** । शाकपर्णवसनाः—शाको नाम बालेयशाकः वर्बरवृक्षः—बालेयशाकबर्बरवन्दकाः इत्यमरः—**आन्ध्रभाषायां तेकु** (इत्युच्यते)—तस्य पर्णानि वसनानि वस्त्राणि यासां तास्तथोक्ताः—आहितगुञ्जाः न्यस्तगुञ्जाफलनिर्मितहाराः शबरीणाम् आलयः शबरस्त्रीणां पङ्क्तयः—वीथ्यालिरावलिः

पङ्क्तिरित्यमरः--पृथुलचारुनितम्बां विस्तृतनितम्बप्रदेशाम् निस्तलस्तनयुगां वर्तुल-कुचयुगलां तनुमध्यां कृशोदरी मैथिली सीतां ददृशुः ।। ८-२४ ।।

(संजीविनी-८-२५) **कङ्कतमिति** । कङ्कतं प्रसाधनीम्--प्रसाधनी कङ्कतिका इत्यमरः--करटिदन्तकरण्डम् करटशब्देन गजगण्डमुच्यते--काकेभगण्डौ करटौ इत्यमरः --करटौ अस्य स्तः इति करटी--तस्य दन्तेन निर्मितं करण्डम्--करण्डशब्देन अञ्ज-नादीनाम् आधारभूतः पात्रविशेष उच्यते--राङ्कवं कम्बलविशेषं च--राङ्कवं मृगरो-मजम् इत्यमरः--मृगमदं कस्तूरी च--शुचि शुभ्रं चामरं च सुकेश्यै सीतायै दत्त्वा काचन पुलिन्द (पुरन्ध्री ताम् सीताम् अवन्दत प्रणनाम) ।। ८-२५ ।।

• (इतः परम् सप्तत्रिंशपद्यभागपर्यन्तं व्याख्याग्रन्थपातः मातृकायाम्)

(संजीविनी-८-३७) (**नायुधेति** । आयुधोपलशताहतमर्मापि) त्वं न मर्मरीषि मृतो न भवसि--मृङ् प्राणत्यागे इत्यस्मात् यङ्लुकि रूपम्--धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (३-१-२२) इति यङ् प्रत्ययः--यङोऽचि च (२-४-७४) इति तस्य लुक्--यङो वा (७-३-९४) इति ईडागमः--विनाशं कथम् एपि मरणं कथं गच्छसि इति पृथिवीभुजि पार्थिवे स्वच्छचेतसि निर्मलचित्ते रामे पृच्छति सति विराधः वक्ष्यमाणप्रकारेण जगाद ।। ८-३७ ।।

(सजीविनी-८-३८) **सानुज इति** । हे राम गुणखने गुणनिधे सानुजः लक्ष्मण-सहितः त्वम् अधिसानु पर्वतसानुप्रदेशे सजीवं मां निखनेथाः--भूनिखानवपुषः धरित्र्यां निखातशरीरस्य मर्तुः मरणं गच्छतः मम पुण्यलोकगतिः पुण्यलोकप्राप्तिः पुरा अस्ति भविष्यति--यावत्पुरानिपातयोर्लट् इति भविष्यदर्थे लट् ।। ८-३८ ।।

(संजीविनी-८-३९) **तन्निशम्येति** । तत् निशम्य तद्वचनं निशम्य श्रुत्वा तथे-त्यङ्गीकृत्य अथ अनन्तरं कालसूत्रमिव नरकविशेषमिव स्थितम्--तद्भेदास्तपना-वीचिमहारौरवरौरवाः संघातः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः इत्यमरः-- अद्रिकन्दरं नीत्वा अद्रिगुहा प्रापय्य राघवौ रामलक्ष्मणौ जीवत एव रक्षसो विराधस्य अलघिष्ठम् अत्यधिकम् अपघनं शरीरं न्यखनेताम् निचखनतुः--अपघनोऽङ्गम् (३-३-८१) इति निपातितम् ।। ८-३९ ।।

(संजीविनी-८-४०) **कालकर्मेति** । कालकर्मयुजि कालकर्मसंयुक्ते कालघनाभे कालघनस्य नीलघनस्य आभा इव आभा यस्य स तथोक्तः--तस्मिन् विराधे काल-धर्ममुपयाति मरणं गच्छति सति--स्यात् पञ्चता कालधर्मः इत्यमरः--अध्यरण्यं वने

मुनिवर्याः मुनिश्रेष्ठाः ऋषिलोकशरण्यं मुनिलोकशरणाय योग्यं रामम् आनुनुविरे तुष्टुवुः—आङि नुप्रच्छयोरित्यात्मनेपदम् ।। ८-४० ।।

(संजीविनी-८-४१ एकचत्वारिंशपद्यस्य व्याख्या लुप्ता)

(संजीविनी-८-४२) **आश्रमानिति** । स रामः मुनीनाम् आश्रमान् अनुचरन् आश्रमान् प्रति गच्छन् आलयांश्च परिपालयमानः मुनीनामेव निकेतनान्यपि परिपालयन् (राक्षसानपि निरस्यन् दण्डकदावम् दण्डकारण्यं निर्भयं व्यधित राक्षसभयरहितं चकार) ।। ७-४२ ।।

(पुनरपि एकोनपञ्चाशपद्यपर्यन्तं व्याख्याग्रन्थपातः)

(संजीविनी-८-४९) **सर्वत इति** । निम्बैः पिचुमन्दवृक्षैश्च निचुलैर्वेतसैश्च निबिरीसं निबिडं कुम्भसंभववनं निविवशे इत्यनेन संबन्धः—निबिरीसपदे नेर्बिडच्—बिरीसचौ (५-२-३२) इत्यनेन बिरीसच् प्रत्ययः ।। ८-४९ ।।

(संजीविनी-८-५०) **तद्विलोक्येति** । अक्ष्णोर्लोचनयोः तपसःफलं तपःफलरूपम्—ये पश्यन्ति तेषां वा (तपसः)—अद्वितीयम् असदृशम्—अतिशान्तं द्वन्द्वमृगविरोधरहितं तद् अरण्यं विलोक्य रघुवीरो रामः देवदानवदुरापमुखश्रीः देवैर्दानवैः राक्षसैश्च दुर्लभमुखकान्तिः सन् रमणीं पत्नीं सीताम् एवमाह—वक्ष्यमाणप्रकारेण जगाद—ब्रूञ् व्यक्तायां वाचि इत्यस्मात् लटि रूपम्—ब्रुवः पञ्चानाम् आदित आहो ब्रुवः इति आहादेशः ।। ८-५० ।।

(संजीविनी-८-५१) **वश्यवन्यमृगेति** । किमिति तदाह—हे जानकि वश्यवन्यमृगधन्यविहङ्गं वश्या वश गताः वन्यमृगाः वने भवा मृगाः—धन्याः कृतार्थाः विहंगाः पक्षिणः यस्मिन् तत् तथोक्तम्—नश्यदार्तिरुदितव्यतिषङ्गम् आर्तिः पीडा रुदितं दुःखं च—ताभ्यां व्यतिषङ्गः आसङ्गः—नश्यन् ध्वंसमानः तादृशो व्यतिषङ्गः यस्मिन् तत् तथोक्तम्—ऋश्यशृङ्गमिव संगतशान्तं प्राप्तशान्तगुणं मुनीन्द्रनिशान्तम् अगस्त्यभवनम्—ऋश्यशृङ्गोऽपि मृगैः सार्धं वने चरति—अत एव वश्यवन्यमृगत्वं विद्यते—आर्तिरुदितव्यतिषङ्गरहितश्च (ऋश्यशृङ्गः) विषयासङ्गशून्यत्वात्—शान्तया संगतत्वाच्च संगतशान्तत्वम् ।। ८-५१ ।।

(संजीविनी-८-५२) **अत्र मन्दमिति** । अत्र तपोवने नभस्वान् वायुः मन्दं यथा भवति तथा अभिवाति—अत्र तपोवने विवस्वान् सूर्यश्च नो वितपते विशेषेण न प्रकाशते—उद्विभ्यां तपः इत्यात्मनेपदम्—अत्र तपोवने हविष्मान् प्रशस्तं हविरस्यास्तीति तथोक्तः अनलः अग्निः हव्यम् अत्ति दैवमन्नं भक्षयति—अत्र तपोवने

वपुष्मान् मूर्तिमान् वृषोऽपि धर्मश्च खेलति विहरति—स्याद् धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः इत्यमरः—सर्वमिदं पश्येति संबन्धः ।। ८-५२ ।।

(संजीविनी-८-५३) **वौषडिति** । इह तपोवने राजशुकौघः राजशुकसंघः सविस्तरं सप्लुतं यथा भवति तथा—वौषडिति होतृवचनम्—अस्तु श्रौषट् इत्याग्नीध्रवचनम्—यजेत्यध्वर्युवचनम्—ये यजामहे इति होतृवचनम्—एवंरूपान् ऋतुमन्त्रान् नित्यं गायति सर्वदा अनुवदति (राजशुकसंघः)—तदिदं हे जानकि पश्येति संबन्धः—अत्यन्तपराधीनचेतसः पक्षिजातस्यापि ऋतुमन्त्रपठनेन ऋषीणां सर्वदा यागाभ्यासप्रसंगो भवतीत्युक्तम् ।। ८-५३ ।।

